Birla Central Library
PILANI (Jaipur State)
Class No. :- S294.5
Book No. :- N1627T v.2
Accession No. :- 16530

REQUEST

IT IS EARNESTLY DESIRED THAT THE BOOK BE HANDLED WITH CARE AND BE NOT MARKED, UNDERLINED OR DISFIGURED IN ANY OTHER WAY, OTHERWISE IT WILL HAVE TO BE REPLACED OR PAID FOR BY THE BORROWER IN THE INTEREST OF THE LIBRARY

LIBRARIAN

TRIVANDRUM SANSKRIT SERIES.
No. LXXI

THE TANTRASAMUCHCHAYA

OF

NÂRÂYANA

WITH THE COMMENTARY VIMARSINÎ

OF

SANKARA

EDITED BY

MAHÂMAHOPÂDHYÂYA

T. GANAPATI SÂSTRÎ

Curator of the Department for the publication of Sanskrit Manuscripts, Trivandrum.

Part—II.

PUBLISHED UNDER THE AUTHORITY OF THE GOVERNMENT OF HIS HIGHNESS THE MAHARAJAH OF TRAVANCORE.

TRIVANDRUM:
PRINTED BY THE SUPERINTENDENT, GOVERNMENT PRESS.
1921.

(All Rights Reserved.)

अनन्तशयनसंस्कृतग्रन्थावलिः ।

ग्रन्थाङ्कः ७१.

तन्त्रसमुच्चयः

श्रीनारायणप्रणीतः

शङ्करप्रणीतया विमर्शिन्याख्यया व्याख्यया समतः

संस्कृतग्रन्थप्रकाशनकार्याध्यक्षेण

महामहोपाध्यायेन

त. गणपतिशास्त्रिणा

संशोधितः ।

द्वितीयः सम्पुटः ।

स च

अनन्तशयने

महामहिमश्रीमूलकरामवर्मकुलशेखरमहाराजशासनेन

राजकीयमुद्रणयन्त्रालये तदध्यक्षेण

मुद्रयित्वा प्रकाशितः ।

कोल्लम्वाब्दाः १०९६, क्रैस्ताब्दाः १९२१.

विषयानुक्रमणी।

विषयः.	पृष्ठम्.
सप्तमः पटलः।	
अथ प्रतिष्ठितस्य देवसप्तकस्य नित्यपूजारम्भपरिपाटी	१
तत्र जीवपरमात्ममन्त्रमूर्तीनामैक्यभावना	२, ३
मूलमन्त्राक्षरन्यासः	४—१०
सामान्येनाङ्गन्यासः	१०
शङ्खपूरणक्रमः	११
आत्माराधनम्	१२
पुष्पपूरणम्	१३, १४
पीठपूजा	१५, १६
पीठस्वरूपकथनम्	१७
नव शक्तयः	१८
समष्टिमन्त्राः	१९, २०
आवाहनविधिः	२१
पञ्च मुद्रास्तत्प्रदर्शनमन्त्राश्च	२२
आवाहनक्रियाशेषः	,,
तत्तन्मूर्त्तिध्यानम्	२३—२६
षोडशोपचारसमर्पणविधिः	२७
परिषदुपहारदानम्	२८
परिषत्प्रसरणकृप्तिः	,,
परिवारव्यवस्थाऽऽमावरणकल्पना	,,
अङ्गार्चनम्	२९
असाधारणावरणदेवतान्यसनम्	२९—३२
साधारणावरणदेवतान्यसनम्	३३
आवरणदेवतानामुपहारदानादि	,,
पुष्पावृतिः	३४
धूपदीपनैवेद्यार्पणविधिः	३५, ३६
षड्डुपहारसमर्पणरीतिः	३७
नैवेद्यसमर्पणानन्तरकृत्यम्	३८
पूजाहोमविधिः	,,
परिषद्बलिहरणादिकर्मसमर्पणान्तः क्रियाकलापः	३९, ४०
प्रसन्नार्घ्यदानाद्यात्मपृथक्करणान्तं कर्म	४१
अथोत्सवादौ द्वादशाक्षरादिमन्त्रान्तरसमर्चने यथायथं न्यासादीनां भेदमात्रप्रदर्शनम्	४२
तत्र द्वादशाक्षरस्य न्यासभेदः	,,
ध्यानभेदः	४३
उपहारदानादौ विशेषः	,,
वैष्णवषडक्षरविधानम्	,,
षडक्षरमूर्त्तिध्यानम्	४४
तदङ्गादिपूजा	,,
मूर्तिशक्त्यादीनां पूजामन्त्राः	,,
शिवस्य प्रासादमन्त्रविधाने विशेषः	४५
प्रासादमन्त्रमूर्तिध्यानम्	,,
तत्परिवारपूजा	४६
पञ्चब्रह्मविधानम्	,,
तदावाहनसकलीकरणध्यानपूजनादिकम्	४६, ४७
सप्तमपटलोपसंहारः	४७
अष्टमः पटलः।	
अथ प्रतिष्ठायाश्चतुर्थदिने कर्तव्यस्य स्नानस्य विधिः	४८
तदङ्गतयाङ्कुरारोपणादिक्रियाविधानम्	,,
अभिषेककलशेष्वभिपूर्यमाणानां द्रव्याणां प्रमाणानुरूपतया खण्डकरणं चित्रतरै रजोभिस्तदापूरणं च	४९
सप्तदशद्रव्यस्नाने कलशकृप्तिः	,,
पञ्चविंशतिद्रव्यस्नाने कलशकृप्तिः	५०

विषयः.	पृष्ठम्.
तत्कलशानां पुटकृत्यादि	५०—५४
कलशक्षेत्रे धान्यपीठकल्पनम्	५४
तत्तत्स्थानेषु कलशादीनां न्यसनं ब्रह्मकलशपूजासंस्करणादि च	५५—५८
लिपिपङ्कजपूजा	५८—६०
मूर्त्यावाहनम्	६०
कलावाहनरीतिः	६१
कृशान्वादिकलानां संख्या तन्त्रामानि च	६१, ६२
कलानां बीजानि	६२
अष्टवर्गनिर्दिष्टाः क्रूरसमष्टिमन्त्राः	६३
तेजस्त्रयस्य समष्टिमन्त्राः	,,
प्रणवांशानां समष्टिमन्त्राः	६४
तदन्तर्भूताः ब्रह्मादिवर्गाः	,,
आनन्दादयः सृष्ट्यादिकृत्यानि च	,,
समष्ट्यावाहनादीनां क्रमः	६५
प्राणप्रतिष्ठा	,,
तदुपयुक्तमूर्ध्वांशत्रितयम्	६६
शक्तिकलादयः	,,
कलावाहनकूलशेषः	६७
कलान्यासः	,,
अकारकलादीनां पक्षान्तरेण न्यासः	६८
न्यासानन्तरकृत्यम्	,,
हृदिस्थादिमन्त्रः	६९
शक्तिकलादीनां न्यसने पृथक् स्थानकल्पना	,,
तत्त्वावाहनम्	,,
ब्रह्मकलशमुखभूषणादि	७०
परिघटार्चनारम्भः	,,
तत्तद्देवताभेदेन तत्तदर्थे परिघटेषु पूरणीया द्रव्यगणाः	७१—७८
विष्णौ सप्तदशद्रव्यस्नाने द्रव्यदेवतामन्त्रादिकम्	७९, ८०
तत्रैव पञ्चविंशतिद्रव्यस्नाने द्रव्यादिकम्	८०—८२
शङ्करनारायणकलशकृप्तिः	८३
तत्र स्नानमन्त्राः	८४
मध्यमाधमादिषु स्नानविधिषु कलशकृत्यादिकम्	८५—८८
शङ्करनारायणकलशस्नाने विशेषकृत्यम्	८८
शिवे सप्तदशद्रव्यस्नाने द्रव्यादिकम्	८९, ९०
तत्रैव पञ्चविंशतिद्रव्यस्नाने कलशकृप्तिद्रव्यपूरणदेवतामन्त्रद्रव्यान्तरयोगादिकम्	९०—९६
दुर्गायां पञ्चविंशतिद्रव्यस्नाने द्रव्यादिकम्	९७, ९८
तत्रैव सप्तदशद्रव्यस्नाने द्रव्यकलशक्रममन्त्रकृप्तेर्विष्णुभागान्तर्भूतत्वकथनम्	९८
स्कन्दस्योत्तमादिभेदेन नवधा कथितेष्वभिषेकविधिषु कलशकल्पितद्रव्यपूरणादिकं क्वचित् पक्षान्तरप्रदर्शनं च	९९—१०६
गणपत्यभिषेके कलशकल्पितद्रव्यदेवतादिकम्	१०६—१०८
शास्तृकलशे द्रव्यादिकम् उत्तमादिभेदत्रयप्रकटनं च	१०८, १०९
कलशान्तरेषु वारुणपरिपूरणं तदभ्यर्चनं च	११०
द्रव्यघटेषु कृतहोमसम्पातपातनं, वस्त्रपुष्पाक्षतादिभिस्तदलङ्करणं च	,,
अखिलखण्डदेवयोरैक्यभावादीनि कलशाधिवासकृत्यान्तराणि	१११

विषयः.	पृष्ठम्.
पुनः पीठयजनादिकलशोक्षण-पुष्पाक्षतविकिरणान्तं कर्म	१११
उक्षणमन्त्रद्वयम्	,,
पुनश्च कलशप्रोक्षणप्रार्थनादीनि प्रार्थनामन्त्रश्च	११२
देवे अनुष्ठितकलशाधिवासन-कर्मविज्ञापनं तन्मन्त्रश्च	,,
अत्र प्रकरणे उक्तेषु मन्त्रेषु देवतान्तरविषययोजनप्र-कारस्तन्निशातिवाहनवि-धिश्च	,,
अथ प्रतिष्ठायाश्चतुर्थदिवसे देवस्थानमभ्येत्य कर्तव्याः क्रियाविशेषाः	११३
देवस्य निर्माल्यव्यपनयनादि	,,
अभिषेकविधिः	११४
अन्तराभिषेके मन्त्राः	११५
अभिषेककलशोद्धारक्रमः	,,
अन्त्यकलशेनाभिषेचनम्, अ-भिषेकानन्तरपूजा, परि-षदामभिषेकः, बलिहरणं, प्रसन्नपूजा, अष्टमपटलो-पसंहारश्च	११६

नवमः पटलः।

अथोत्सवाचरणसमयनियमौ	११७
उत्सवस्य कालनियमः	,,
उत्सवारम्भविधिः	,,
तत्र ध्वजस्थापनविधानं, प्राक् प्रतिष्ठिते ध्वजे त्वधुना केतुपटे वाहावा-हनं बलिदानादिकं च	११८, ११९
प्राकारान्तर्ग्रामादीनां च वि-तानादिभिः परिष्करणम्	११९
प्रथमदिवसरात्रौ भूतबलि-हरणम्, उत्तरदिवसेषु देवस्य सवनत्रयपूजा च	११९
तत्र देवस्य स्नानालङ्करणहवि-र्निवेदनादिविधिः सवन-त्रयपूजामन्त्राश्च	१२०
भूतबल्युत्सवबल्योराचरणे नि-यमः	,,
दैविकादिहविर्विभजनं, तद्देव-ताः, भूतगणाह्वानबलिह-रणविधिश्च	१२१
बलिदानाय देवप्रार्थनामन्त्रः	,,
बलिकल्पितिः	१२२
भूतबलिक्रमः	,,
अन्तर्बलिः	,,
द्वाःस्थानां कल्पितिः	१२३
द्वाःस्थानां नामानि तत्स्था-नानि च	१२३, १२४
वाहननाम	१२५
बहिर्बलिः	,,
शिवादीनां ध्वजेशाः	१२५, १२६
द्वितीयावरणबलिदेवताः	१२६
महापीठावरणदेवताः, तद्बलि-दानमन्त्राश्च	१२६—१२८
भूतबलिदानावसानकृत्यम्	१२९
अथोत्सवबलिः	१२९, १३०
तदुपयुक्ता उपस्थानमन्त्राः	१३१—१३५
बलिदेवतानां स्वस्वनाम-मन्त्राः	१३६
श्रीशदुर्गयोरन्तर्द्वारे परिवार-देवताः नन्दिमहाकाल-मनू च	,,
गरुडसिंहयोर्मनुः, गरुडगा-यत्री च	१३७

विषयः.	पृष्ठम्.
दिक्पालमन्त्रलक्षणम्	१३७
सुरादिजातयः	,,
नमोभूतादिमालामन्त्रद्वयं, तत्र दिगादिविशेषयोजनप्रकारश्च	१३७, १३८
तृतीयो मालामन्त्रः, तत्र दिग्योजनप्रकारश्च	१३९
ऋषभमन्त्रस्तद्गायत्री च	,,
स्कन्दाद्यावरणमन्त्राः, वीरभद्रादीनां गायत्र्यश्च	१४०
दिक्षूर्ध्वतश्च मातृभ्यो बलिदाने मन्त्राः	१४१
शास्त्रार्चने मन्त्रा गायत्री च	,,
सूर्यादियजनमन्त्रः, स्कन्दगायत्री, वागीश्वर्यादिमातरस्तद्बीजानि च	१४२
शिवनिर्माल्यधारिणोर्यजनमन्त्रः	,,
भूतबलेरुत्सवबलावुपादेया विशेषाः	१४३, १४४
दुर्गायामष्टविधाः सदुर्गाद्याः शक्तयस्तद्यजनमन्त्रोद्धारश्च	१४५, १४६
शिवे दशविधा महाकालादयो विंशतिर्भूतगणास्तद्यजनमन्त्राश्च	१४६—१४८
स्कन्दे येभूतादिमन्त्रद्वयम्	१४८
शास्तरि चाम्बादिमन्त्रचतुष्कं, तत्र तृतीये मन्त्रे विशेषश्च	१४८, १४९
विघ्ने उत्सवार्थमित्यादिमन्त्रः	१४९
महाबलिपीठे भूतबलेर्विशेषः	,,
तदुपयुक्ता हरिसेनगायत्र्यादयः	१४९, १५०
उभयबल्योरपि क्रियाक्रमे पक्षभेदः	१५०
बलिसमापनकृत्यम्	१५१
उत्सवस्य विशेषतः सादरकर्तव्यत्वोपदेशः	,,
तीर्थस्नानात् पूर्वेद्युः कर्तव्यस्य मृगयाप्रचारस्य विधिर्ग्रामबलिमन्त्राश्च	१५१—१५३
ग्रामबलिदानानन्तरकृत्यम्	१५३
तीर्थयात्रार्थे प्रार्थनमन्त्रः	१५४
घृतारोपणविधिः	,,
तदनन्तरभावि देवस्य कौतुकबन्धनादि	१५५
कर्मार्चायामावाहनविधिः	,,
आवाहितमूर्तेः कर्मार्चायाः पूजादिमूलधामप्रापणान्तं कर्म	१५५—१५८
पुनर्मूलार्चाभिषेकादि	१५८
तीर्थयात्राहोमः	,,
पुनः कर्मार्चायाः स्नापनोद्वर्तनादिकं, तीर्थयात्राप्रार्थनमन्त्रद्वयं च	१५९
तीर्थयात्राप्रस्थानपरिपाटी	१६०, १६१
देवस्य तीर्थस्नापनम्	१६२
पुनः स्वस्थानप्रतिप्रापणप्रार्थनामन्त्रः	१६३
प्रतिप्रापणसमनन्तरकृत्यम्	,,
शुद्ध्यर्थाभिषेको भूतबलिकिरणं च	,,
नवमपटलोपसंहारः	१६४

दशमः पटलः ।

अथ निष्कृतिप्रस्तावः	१६५
अशुद्धिनिमित्तानां परिगणनम्	१६५, १६६

विषयः.	पृष्ठम्.
अशुद्धौ सत्यां तच्छोधनादिप्रस्तावः	१६६
स्थानशुद्धिक्रमस्तद्विवरणं च	१६७, १६८
बिम्बशुद्धिक्रमः	१६८
तत्र क्षालनादिमार्जनान्तानां शुद्धीनां विवरणम्	१६९
धाराविधिः	१७०—१७२
अवगाहविधिः	१७३, १७४
सेचनविधिः	१७४, १७५
तत्र दोषाधिक्ये विशेषः	१७५—१७८
शान्तिहोमः	१७८—१८१
प्रायश्चित्तहोमादि	१८१—१८८
तत्त्वहोमः	१८९, १९०
होमान्ते देवाभिषेकादि	१९०
अङ्कुरार्युपहतौ प्रायश्चित्त-प्रस्तावः	१९१, १९२
तत्राङ्कुरोपहतौ प्रायश्चित्तं क्वचित् पक्षभेदश्च	१९३, १९४
बलिदेवताद्रव्ययोर्विपर्यये, बल्यभावे, कालत्रयपूजा-तिक्रमे च प्रायश्चित्तम्	१९४
ध्वजोपघाते शिवे वस्त्रदाहे च प्रायश्चित्तम्	१९५
प्रपूरितद्वारघटोपघाते प्रायश्चित्तम्	,,
प्रायश्चित्तहोमार्थमुत्पादित-स्याग्नेर्विनाशे प्रायश्चित्तम्	,,
अग्नेरशुद्धौ प्रायश्चित्तमशुद्धौ विशेषश्च	१९६
अधिवासहोमादिषु दिक्षु विहता-नामग्नीनां नाशे प्रायश्चित्तम्	१९७
आचार्यकुण्डस्थाग्निनाशे प्रायश्चित्तम्	१९८
उभयाग्निनाशे प्रायश्चित्तम्	,,
होतृणां संज्ञास्तन्मन्त्रविभागश्च	१९९
प्रासादस्यापि दक्षिणादिदि-ग्विभागेनोत्पादितानाम-ग्नीनां नाशे प्रायश्चित्तम्	,,

विषयः.	पृष्ठम्.
विशिष्यापरिज्ञाते प्रायश्चित्ते कर्तव्यस्य सर्वप्रायश्चित्तस्य विधौ मन्त्राः	२००
प्रायश्चित्तविधौ न्यूनातिरेक-परिहाराय ब्राह्मणतर्पणादेः कर्तव्यत्वोपदेशः	,,
क्रियामध्ये यस्यकस्यचिद् गमने तल्लाघवगौरवानुगो-धेन करणीयः प्रायश्चित्तहोमः	,,
अभिषेककलशानामशुद्धिस-म्भवे प्रायश्चित्तम्	,,
भिन्ने कलशे प्रायश्चित्तम्	२०१
क्रियामध्ये कलशोपघाते प्रायश्चित्तम्	,,
कर्मबिम्बे दुष्टेऽशुद्धे निपतिते वा प्रायश्चित्तम्	,,
बल्यार्थं प्रस्थापिते तस्मिन् मध्येमार्गं भग्ने प्रायश्चित्तम्	२०२
इहापि सर्वप्रायश्चित्तादीनामतिदेशः	,,
अनुक्तेष्वपि कर्मविनाशेषु त-त्तद्दोषबलाबलमनुस्मृत्योक्त-प्रायश्चित्तानां यथायथम-तिदेशस्य कथनम्	,,
अर्चकशुद्धिः	२०३
अर्चनादावर्चकस्य देहात्मनो-र्विशेषशुद्धिः	,,
पूजासाधनशुद्धिः	२०४
सर्वस्यापि प्रायश्चित्तस्य पुष्क-लतासिद्धये कर्तव्यस्योप-देशः दशमपटलोपसंहारश्च	२०५
एकादशः पटलः ।	
अथ जीर्णोद्धारोद्देशः	२०६
तत्र सामान्येन निष्कामण-सङ्कोचनविध्योर्विषयविभागः	,,
तयोः स्वरूपकथनम्	,,
निष्कामणक्रमः	२०७, २०८

विषयः.	पृष्ठम्.
संहारतत्त्वहोमक्रमः	२०८
संहारानुमतिप्रार्थनम्	,,
नाडीसन्धानादिर्यात्राद्याहुति-सम्पातस्वीकरणान्तः क्रियाकलापः	२०९--२११
देवप्रणामपूर्वकं विद्वत्सु विप्रेषु चिकीर्षितकर्मनिवेदनम्	२१२
प्रणामादौ विहिता मन्त्रास्तेषां विभागश्च	,,
सर्वजनबोधनाय दुष्टबिम्बत्यागमुद्दिश्य प्रवृत्तस्यागमवचनस्य निवेदनम्	२१३
ततः कर्तॄन् प्रति कालावधिमनुयुज्य तत्क्षेत्रस्थिताभ्यो देवताभ्यो देवाय च निवेदनीया मन्त्राः	२१३, २१४
देवस्य तत्त्वकलशाभिपेचनादि	२१४
ध्यानसङ्कोचनम्	२१५, २१६
तत्र क्रियाक्रमे पक्षभेदः	२१६
तत्समापनकृत्यम्	२१७
तदनु कर्तव्यानि लौहघटपूरणादीनि	२१७, २१८
जीवोद्वासनप्रकारासूत्रणम्	२१८, २१९
आवाहितमूर्तेः कलशस्य लघुमण्डपस्थापनक्रमः	२१९
जीर्णबिम्बोद्धारविधौ शान्तिकलशपूजाहोमादिकं क्रियाक्रमे पक्षभेदश्च	२२०
विप्रैः शान्तिप्रवाचनं, तत्पद्यानि, प्रतिमागतवासनाशक्तिप्रोद्वासनं च	२२१
उद्धारकाले आवर्तनीया मन्त्राः, बिम्बप्रोद्धरणपरिपाटी, तदुपयुक्ता मन्त्राः, बिम्बपीठाद्युत्सर्जनप्रकारश्च	२२२, २२३
प्रासादरक्षणपूर्वकं प्रकृतकर्मारचनाभ्यनुज्ञा, अल्पबिम्बगतदेवपूजा च	२२३
अल्पगेहेऽल्पबिम्बप्रतिष्ठापनविधिः	२२४
चतुर्थदिनस्नानादिकस्यात्रापि करणीयत्वकथनं बालालयस्थापनगतो विशेषश्च	२२५
बालालये स्थापितस्य देवस्य मूलप्रासादप्रवेशविधौ बीजवापजलाधिवासादीनां कर्तव्यत्वोपदेशः	२२५, २२६
देवप्रार्थनामन्त्रद्वयम्	२२६
अल्पबिम्बोत्सर्जनविधिः	,,
नवीकृतस्य बिम्बस्य मूलप्रासादप्रतिष्ठापने ध्यानाधिवासादीनां रत्नन्यासादीनां च कालः	२२७
उक्त एव निष्क्रामणे विशेषः	,,
प्रासादमात्रस्य जीर्तां तन्नवीकरणप्रकारः	२२८
तत्रोद्वासनात् पूर्वं देवप्रार्थनार्थे विहितं मन्त्रद्वयम्	२२९
प्रासादमात्रजीर्तावपि क्वचिन्निष्क्रामणविध्यङ्गीकाराभिप्रायाविष्करणपूर्वकं सामान्येन सङ्कोचाचरणविधानम्	,,
सङ्कोचनप्रक्रिया	२३०
प्रासादनवीकरणानन्तरकृत्यम्	२३१
अष्टबन्धे जीर्णे कर्तव्यं कर्म	२३१, २३२
अष्टबन्धद्रव्याणि तत्परिमाणं च	२३२, २३३
परिवाराणां जीर्णोद्धारविधिः	२३३, २३४
जीर्णोद्धारविध्युपसंहारः	२३४
बहुबेरप्रतिष्ठाप्रस्तावः	२३५—२४०
तत्र प्रतिमापरिग्रहादिकम्	२४०
जलाधिवासकालनियमादिकम्	२४१

विषयः.	पृष्ठम्.
अधिवासादिशान्तिहोमसम्पातपातनान्तं कर्म	२४१, २४२
तत्र कुमारे विशेषः	२४२
प्रासादप्रतिष्ठादिकर्मार्चास्थापनाधिकाः क्रियाः	२४३
शिलामयादिस्थिरकर्मार्चाविधिः	,,
अत्र नित्यपूजाक्रमः	२४४
बिम्बशुद्ध्यादिषु क्रियापरिपाटी	२४४, २४५
एकादशपटलोपसंहारः	२४५, २४६
द्वादशः पटलः ।	
अथ कर्मशेषाख्यपटलसङ्गतियोजनम्	२४७
तत्र प्रथमपटले प्रसक्तं दिग्विभागज्ञानविधानम्	२४७, २४८
निधिकलशादीनां प्रमाणम्	२४९
इष्टकानां प्रमाणम्	२५०
गर्भपात्रप्रमाणं गर्भन्यासस्थानं च	२५१
द्वितीयपटलप्रस्तुतप्रतिष्ठास्थाननियमादि	२५२—२५७
तृतीयपटलप्रस्तुतानां बीजवापपात्राणां सङ्ख्या, संज्ञा, तदुत्सेधकल्पितिश्च	२५८
पालिकालक्षणम्	२५८, २५९
घटिकालक्षणम्	२५९
शरावलक्षणम्	२६०
पात्रत्रयस्य सामान्यविधिः तस्य स्थापने नियमश्च	,,
चतुर्थपटलप्रस्तुतानां तोरणादीनां प्रमाणम्	२६१
पञ्चमपटलप्रस्तुतानां कुण्डमण्डलादीनां निर्माणार्थं चतुरश्रसाधनकल्पितिः	,,
तत्र चतुरश्ररूपकुण्डलक्षणम्	२६२
कुण्डानां योनिलक्षणम्	२६३
योनिरूपकुण्डलक्षणम्	२६४
अर्धचन्द्राकारकुण्डलक्षणम्	,,
त्रिकोणकुण्डलक्षणम्	,,
वृत्तकुण्डलक्षणम्	२६५
षट्कोणकुण्डलक्षणम्	,,
पद्माकारकुण्डलक्षणम्	,,
अष्टाश्रकुण्डलक्षणम्	२६६
स्रुवलक्षणम्	,,
जुहूलक्षणम्	२६७, २६८
महास्रुग्लक्षणम्	२६८
होमद्रव्याणां प्रमाणम्	२६९
उत्तममध्यमाधमानां मण्डलानां करमानम्	,,
षोडशवर्गपुटस्य मण्डलस्य लक्षणम्	२७०—२७१
तादृशस्य चक्राब्जमण्डलस्य लक्षणम्	२७२—२७३
शक्तिदण्डकभद्रकस्य लक्षणम्	२७४
तत्र शक्तीनां लेखनप्रकारः	२७४, २७५
हरिद्रादिरजोभिस्तत्पूरणप्रकारः	२७५
स्कन्दोक्तषट्दलमण्डलस्य लक्षणम्	२७६
दीक्षाविधिः	२७६—२७८
प्रणवोद्धारः	२७८
तत्तद्देवतानां मूलमन्त्रोद्धारः	२७८—२८०
मूलमन्त्राणाम् ऋष्यादिकं तदङ्गनामानि च	२८०
अङ्गमन्त्राः अङ्गानां बीजानि च	२८१
पञ्चाङ्गानि	२८२
षड् जातयः	,,
तत्तद्देवतानां गायत्र्यः	२८२, २८३
श्रीबीजादिकम्	२८३
वैष्णवद्वादशाक्षरमन्त्रोद्धारः	,,
अस्यैव मन्त्रस्याङ्गानि	२८४
षडक्षरमन्त्रोद्धारः	,,

विषयः.	पृष्ठम्.
सुदर्शनमन्त्रोद्धारः	२८५
उपचारमन्त्रो मूर्तिमन्त्राश्च	,,
शक्तिमन्त्राः किरीटमन्त्रश्च	२८६
शिवे प्रासादमन्त्रोद्धारः	२८७
ईशानादिमूर्तिमन्त्रोद्धारः	,,
अङ्गमन्त्राः	२८८
अष्टात्रिंशत्कलाः	२८८, २८९
ईशानादीनामक्षरसङ्ख्याविभागः	२८९
व्योमव्यापिमन्त्रोद्धारः	२९०
महाव्योमव्यापिमन्त्रोद्धारः	२९०—२९३
अस्याङ्गमन्त्राः	२९३, २९४
ऋष्यादिकम्	२९४
मृत्युञ्जयपाशुपतमन्त्रयोरुद्धारः	,,
अघोरास्त्रोद्धारस्तदङ्गानि च	२९५
बीजमुख्यमन्त्रोद्धारः	,,
क्षुरिका वज्रमनुश्च	२९६
औमेयाष्टाक्षरमन्त्रोद्धारः	,,
स्थाणूपचारमनुः	,,
पञ्च दुर्गाणवः	,,
दुर्गोपचारमनुर्विद्यामन्त्रोद्धारश्च	२९७
शान्तिहोमप्रोक्तयागमन्त्रोद्धारः	२९८
कलशाभिषेकप्रस्तुतभूतिश्रीमन्त्रः	२९९
स्कन्दोपचारमनूद्धारः	,,
स्कान्दषण्मन्त्राः द्वादशनामानि च	,,
सकलमन्त्रादयः	,,
वैघ्नषण्मन्त्राः द्वादशनामानि च	३००
शास्तृषण्मन्त्राः द्वादश नामानि च	,,
षड्विंशतिनामानि, सप्तदशाक्षरो बीजमन्त्रश्च	३०१
सकलदेवेषु समानाः प्राणाहुतिमन्त्राः, निवेद्यार्पणमन्त्रोद्धारश्च	,,
जलादिरससमर्पणार्थाः पञ्च मन्त्राः	३०२
जपसमर्पणकर्मसमर्पणमन्त्रौ	,,

विषयः.	पृष्ठम्.
ब्रह्मार्पणमन्त्रोद्धारः	३०३
निष्कामणविधिप्रस्तुतानां पञ्चतत्त्वानां विशेषवत्त्वप्रकटनम्	,,
शिवे विशेषेण विशेषपञ्चतत्त्वानामुद्धारः	३०४
जीवावाहनस्वरूपोन्मीलनम्	३०४, ३०५
प्राणन्यासप्रकाशनम्	३०५, ३०६
अञ्जलिमुद्रा, ब्रह्माञ्जलिमुद्रा, वन्दनीमुद्रा च	३०६
ऊर्ध्वमुद्रा, शिवलिङ्गमुद्रा, योनिमुद्रा, गणपतिमुद्रा च	३०७
अङ्गमुद्राः गरुडमुद्रा च	३०७, ३०८
गालिनीमुद्रा सुरभिमुद्रा च	३०९
आवाहन्यादयः सप्त मुद्राः	३०९, ३१०
चक्रमुद्रा शङ्खमुद्रा शङ्खमुद्रायाः पक्षान्तरप्रदर्शनं च	३११
गदापद्मपल्लवहरिणाभयवरदमुद्राः	३१२
शूलकपालचापशरवज्रशक्तिमुद्राः	३१३
प्राणादिमुद्राः, प्रासमुद्रा च	,,
षडुपहारमुद्राः, निवेद्यमुद्रा, बलिमुद्रा च	३१४
अञ्जल्यादिप्रधानमुद्राणां दर्शनकालः	,,
उपहारदानस्य कालनियमः	३१५
स्नानकृप्तिः	,,
प्रसन्नपूजाकाले साध्यपुष्पाञ्जलिक्रमः	,,
बहुबेरे एकबेरे च पूजाकृप्तिः	३१६
तन्त्रसमुच्चयोपसंहारः	,,
ग्रन्थकर्तुः स्वकालगृहगोत्रनाम्नां कथनम्	३१७
प्रार्थनापूर्वकं ग्रन्थसमापनम्	३१८
द्वादशपटलोपसंहारः	३१९

॥ श्रीः ॥

नारायणप्रणीतः

तन्त्रसमुच्चयः

शङ्करप्रणीतया विमर्शिन्याख्यया व्याख्यया समेतः ।

(द्वितीयो भागः ।)

अथ सप्तमः पटलः ।

अथाखिलेशार्चनमुच्यतेऽधुना
पुमर्थसर्वस्वविधायि यज्वनाम् ।
तदीयसंस्थापनकर्म यत्कृते
समीरितं स्वागमसारसङ्ग्रहात् ॥ १ ॥

स्नात्वाचम्य विधानतः सुरगृहं संप्राप्य संपूज्य च
द्वास्थावन्तरुपेत्य देवमभिवन्द्यापास्य निर्माल्यकम् ।

प्रतिष्ठितस्य देवस्य पूजाया अवश्यकर्तव्यत्वात् प्रतिष्ठानन्तरमेव पूजाविधानं सप्तमेन पटलेनाभिदधानस्तत्सङ्गतिं योजयति — **अथाखिलेति** । अथ प्रतिष्ठाकथनानन्तरम् अधुना इदानीं प्राप्तकालत्वाद् अखिलेशार्चनम् अखिलेशानां विष्ण्वादिकानां सप्तानां देवानामर्चनमुच्यते । अस्माभिरिति शेषः । तदर्चनं यज्वनां यजमानानां पुमर्थसर्वस्वविधायि पुरुषार्थचतुष्टयस्यापि सम्पादनस्वभावम् । यत्कृते यस्यार्चनस्यापेक्षया तदीयसंस्थापनकर्म तत्प्रतिमानां सम्यक् प्रतिष्ठाकर्म स्वागमसारसंग्रहात् स्वस्वागमानां सारं संगृह्य समीरितं सम्यग्विभज्योक्तम् ॥ १ ॥

नित्यपूजारम्भे परिपाटीमाह — **स्नात्वेति** । विधानतः स्नात्वा विधानत आचम्येति मन्त्रस्नानं मन्त्राचमनं चोक्तम् । सुरगृहं देवालयं सम्प्राप्य द्वास्थौ स्वस्वमन्त्रेण संपूज्य चकारात् तदनुज्ञां गृहीत्वान्तरुपेत्य देवमभिवन्द्य

बिम्बाद्यं मनुविद् विशोध्य सलिलैराराध्य पुष्पैर्लिपि-
न्यासान्तं विदधीत दर्शितदिशासीनः स्वयं दक्षिणे ॥ २ ॥

प्रत्यक्चितिं परिजपन्नहहेति मूल-
चक्रादुदस्य परमात्मनि संविलाप्य ।
मन्त्रात्मना परिणमय्य सुधीर्हृदब्ज-
मध्ये सुयोजयतु सादिमनुप्रजापी ॥ ३ ॥

तस्यैशलैङ्गिकविराण्मयविग्रहात्म-
भावक्रमात् परिणतिं विदधद् विधाय ।
मूलेन वायुयमनत्रितयं तदाधा-
रार्थं प्रविन्यसतु चात्मनि योगपीठम् ॥ ४ ॥

न्यस्येद् गुरून् मूर्धनि मूलचक्रे
गणेश्वरं चाहृदयं तदादि ।

मनुविद् निर्माल्यापासनादिमन्त्रज्ञो गुरुः निर्माल्यमपास्य बिम्बाद्यं बिम्बपीठ-गर्भगृहादिकं सलिलैर्विशोध्य पुष्पैराराध्य स्वयं दक्षिणे भाग आसीनः दर्शित-दिशा अधिवासपटलोक्तमार्गेण लिपि-न्यासान्तं विदधीत ॥ २ ॥

सुधीः बुद्धिकौशलयुक्तो गुरुः अहहेति परिजपन् प्रत्यक्चितिं जीवा-त्मानं मूलचक्राद् मूलाधाराद् उदस्य ऊर्ध्वं नीत्वा परमात्मनि संविलाप्य म-न्त्रात्मना परिणमय्य मूलप्राणायामेन मन्त्रमूर्तिरूपत्वं भावयित्वा सादिमनु-प्रजापी आदिः प्रणवः मनुः मूलमन्त्रः प्रणवसहितमूलं जपन् हृदब्जमध्ये हृदयकमलकर्णिकायां सुयोजयतु सुस्थितं यथा भवति तथा योजयेत् ॥ ३ ॥

तस्य आत्मनः ऐशलैङ्गिकविराण्मयविग्रहात्मभावक्रमात् परसूक्ष्मस्थू-लस्वरूपमूर्तित्वेन परिणतिं परिणामं विदधत् कुर्वाणो मूलेन वायुयमनत्रितयं प्राणायामत्रयं विधाय तदाधारार्थं तस्योपाधिसिद्धये चात्मनि स्वशरीरे योगपीठं प्रविन्यसतु। इह पीठन्यासे मन्त्रा वक्ष्यमाणायाः पीठपूजाया अवगन्तव्याः ॥

गुरून् मूर्धनि न्यस्येत् । मूलचक्रे मूलाधारे गणेश्वरं च, तदादि

---

१. 'सलिलैर्विशोध्य कुसुमं चाराध्य तद्दक्षिणे स्वासीनः कथितक्रमेण लिपिवि-न्यासान्तिमं प्राचरेत ॥ प्र', २. 'तत्तादृगात्मतनुतत्परिषत्प्रपञ्चभावेन तत्परि' ख. पाठः.

आधारशक्त्यादि गणं क्रमेण
तथा पृथिव्यन्तिममूर्ध्वमूर्ध्वम् ॥ ५ ॥
ऊर्वंसयुग्मोरुषु नाभिमूल-
पार्श्वास्यपार्श्वेषु च दक्षिणादि ।
अष्टौ प्रविन्यस्यतु धर्मपूर्वान्
सत्त्वादिकं व्यापितयेह मध्ये ॥ ६ ॥
हृत्पुण्डरीकेऽर्चनवक्ष्यमाण-
न्यायेन पद्मादिसमष्टिनिष्ठम् ।
विन्यस्य तस्मिन् परिकल्पयेच्च
मान्त्रं चिदानन्दघनं महस्तत् ॥ ७ ॥
तत् तेजः प्रियदर्शनं विभुमभिध्यायार्चयित्वा धिया
सञ्जप्याप्ययवर्त्मना मनुमसुं तेजोमयं भावयेत् ।

मूलाधारादि आहृदयं हृदयान्तम् ऊर्ध्वमूर्ध्वमाधारशक्त्यादि पृथिव्यन्तिमं गणं च क्रमेण न्यस्येत् ॥ ५ ॥

ऊर्वंसयुग्मोरुषु ऊरावंसयुग्मे ऊरौ च नाभिमूलपार्श्वास्यपार्श्वेषु नाभिमूले पार्श्वे आस्ये पार्श्वे च दक्षिणादिक्रमेण धर्मपूर्वान् धर्मज्ञानादीनष्टौ प्रविन्यस्यतु, सत्त्वादिकं व्यापितया व्यापकत्वेन इह मध्ये धर्माद्यष्टानां मध्यप्रदेशे च ॥ ६ ॥

हृत्पुण्डरीके हृदयपद्मे अर्चनवक्ष्यमाणन्यायेन पूजायां वक्ष्यमाणरीत्या पद्मादिसमष्टिनिष्ठं पद्मादिसमष्टिपर्यन्तं सर्वं विन्यस्य तस्मिन् मान्त्रं मन्त्रसम्बन्धि चिदानन्दघनं घृतकाठिन्यवच्चैतन्यामृतसान्द्ररूपं तत् प्रस्तुतं महस्तेजः परिकल्पयेच्च ॥ ७ ॥

तदेव तेजः प्रियदर्शनं मनोहररूपं विभुं देवम् अभिध्याय ध्यात्वा धियार्चयित्वा मानसपूजां कृत्वा । मानसपूजामन्त्रास्तन्मुद्राश्च द्वादशात् पटलाद् ग्राह्याः । अमुं मनुम् अप्ययवर्त्मना प्रातिलोम्येन संजप्य अमुं देवं

---

१. 'य स्वयं मन्त्रवित् कर्मात्मा हृदयाम्बुजाग्रदलसंस्थः कर्णिकासंस्थितम् । तारोच्चारपरिप्लवद्धिरमृतै रक्तारविन्दोदरादभ्यर्हेरुपहारकैर्निजमहाभूतात्मकैस्तं यजेत् ॥ यो ब्रह्माद्यणुना समर्प्य परमायात्मानमप्यात्मने सञ्ज' इ. पाठः.

धाम्नोऽस्मात् परचित्सुधाद्रवमयात् तेजःकणं स्वाञ्जलौ
मन्त्री पिङ्गलया निपात्य करयोस्तद्भावनां प्राचरेत् ॥

व्यापय्य तारपुटितेन मनूत्तमेन
दोष्णोः क्रमेण तलपृष्ठकपार्श्वकेषु ।
ताराभिरुद्धमनुवर्णगणं सहार्दं
न्यस्येत् स्वकल्पकथितक्रमतोऽङ्गुलीषु ॥ ९ ॥

सृष्टिर्दक्षिणतर्जनीप्रभृतिवामैतद्विरामा स्थिति-
स्तर्जन्यादिकनिष्ठिकाद्वितयनिष्ठाष्टाक्षरे संहृतिः ।
सृष्टिन्यासविपर्यया त्रयमिदं सृष्टिस्थितिभ्यां युतं
न्यस्येत् सृष्टिवदष्ट पञ्च युगपज्ज्येष्ठाद्यमङ्गानि च ॥

तेजोमयं भावयेत् । मन्त्री मन्त्रतेजसोरेकरूपत्वं जानन् परचित्सुधाद्रवमयात् परचैतन्यामृतद्रवरूपाद् अस्माद् धाम्नः तेजसः तेजःकणं तेजोलेशं स्वाञ्जलौ पिङ्गलया पिङ्गलाद्वारेण निपात्य पातयित्वा करयोः तद्भावनां मन्त्रभावनां प्राचरेत् ॥ ८ ॥

तारपुटितेन मनूत्तमेन मूलेन दोष्णोः करयोस्तलपृष्ठकपार्श्वकेषु क्रमेण व्यापय्य ताराभिरुद्धमनुवर्णगणं प्रणवपुटितान् मूलमन्त्राक्षरान् सहार्दम् अन्ते नमोयुक्तानङ्गुलीषु स्वस्वकल्पकथितक्रमतो न्यस्येत् ॥ ९ ॥

तद् विवृणोति — **सृष्टिरिति** । हरावित्यध्याहर्तव्यम् । हरावष्टाक्षरे मन्त्रे दक्षिणतर्जनीप्रभृतिवामैतद्विरामा दक्षिणतर्जन्यादिवामतर्जन्यन्ता सृष्टिः । तर्जन्यादिकनिष्ठिकाद्वितयनिष्ठा दक्षिणतर्जन्यादितत्कनिष्ठान्ता वामतर्जन्यादितत्कनिष्ठान्ता च स्थितिः । सृष्टिन्यासविपर्यया वामतर्जन्यादिदक्षिणतर्जन्यन्ता संहृतिः । इदं त्रयं सृष्टिस्थितिसंहारान् पुनरपि सृष्टिस्थितिभ्यां युतं न्यस्येत् । अष्टाङ्गानि सृष्टिवत् सृष्टिन्यासस्थानेषु पञ्चाङ्गानि ज्येष्ठाद्यं युगपद् न्यस्येत् ॥ १० ॥

पञ्चार्णे युगपच्छिवे पुरुषघोरौ सद्यवामेशकां-
स्तर्जामध्यमयोर्न्यसेत् सहकनिष्ठानामिकाङ्गुष्ठयोः ।
मन्त्राणानिषुजेऽग्रजादितलनिष्ठं सार्यविघ्ने गुहे
षण्मन्त्रानपि वेति सुम्भजिति दुर्गापञ्चकं चातलम् ॥

अङ्गुष्ठादितलान्तं न्यसतु षडङ्गानि दोर्युगे युगपत् ।
दोर्भावनेत्यभाषि प्रायः सर्वत्र मूलमन्त्रविधौ ॥ १२ ॥

आभ्यां कराभ्यां निजमूलतस्त्रि-
र्व्यापय्य देहे सकलीकरोतु ।
षडध्वभिर्वा लिपितत्त्वमन्त्रैः
स्वमन्त्रविन्यासमिह ब्रवीमि ॥ १३ ॥

शिवे पञ्चार्णे पञ्चाक्षरविधाने पुरुषघोरौ सद्यवामेशकांश्च तत्पुरुषाघोरसद्योजातवामदेवेशानसंज्ञा मूर्तीः 'मं तत्पुरुषाय नम' इत्यादिभिः 'मं तत्पुरुषतर्जनीभ्यां नम' इत्यादिभिर्वा मन्त्रैः तर्जामध्यमयोः सहकनिष्ठानामिकाङ्गुष्ठयोश्च तर्जनीमध्यमाकनिष्ठानामिकाङ्गुष्ठानां युग्मेषु युगपन्न्यस्येत् । इषुजे मन्त्राणान् मन्त्रस्य षडक्षरान् अग्रजादितलनिष्ठम् अङ्गुष्ठाद्यङ्गुलीषु तले च । सार्यविघ्ने गुहे षण्मन्त्रानपि इति वा, स्कन्दस्य मूलाक्षरवद् न्यस्येद् वा। वेति समुच्चयार्थः । सुम्भजिति दुर्गापञ्चकं पञ्चदुर्गाश्च अतलं तलरहितम् अङ्गुष्ठाद्यङ्गुलीष्वेव ॥ ११ ॥

सर्वत्र षडङ्गानि दोर्युगे करद्वये युगपद् अङ्गुष्ठादितलान्तं न्यसतु । सर्वत्र मूलमन्त्रविधौ दोर्भावना करभावना इति एवं प्रायः समभाषि उक्तम् ॥ १२ ॥

आभ्यां कराभ्यां निजमूलतो देहे त्रिर्व्यापय्य षडध्वभिर्वा पूर्वोक्तैः षडध्वन्यासैर्वा लिपितत्त्वमन्त्रैरेव वा सकलीकरोतु । इह पूजायां स्वमन्त्रविन्यासमेवाहं ब्रवीमि ॥ १३ ॥

श्रीशश्रीशशिवार्यकेषु मनुवित् काक्ष्यास्यहृन्नाभिषु
न्यस्येत् सध्वजजानुपत्सु मनुवर्णांस्तारुरुद्धान् क्रमात् ।
नत्यन्तानिति सृष्टिरत्र हृदयान्ता नाभिपूर्वा स्थितिः
संहारश्चरणादिकस्त्रयमिदं न्यस्येत् ससृष्टिस्थिति ॥१४॥

योज्या मूर्धनि मध्यमा नयनयुग्मे तर्जनीमध्यमे
साङ्गुष्ठोपकनिष्ठिका वचसि हृद्यङ्गुष्ठयुक्तर्जनी ।
नाभौ सावरजाग्रजा प्रथमजान्या वा शिवे जानुनो-
र्व्यग्र्या वा व्यनुजा तु[1] वा पदयुगेऽङ्गुल्यः समस्ताः सदा ॥

श्रीशश्रीशशिवार्यकेषु विष्णौ शिवनारायणे शास्तरि च काक्ष्यास्यहृन्नाभिषु मूर्धनेत्राननहृदयनाभिषु सध्वजजानुपत्सु लिङ्गे जानुनोः पादयोश्च तारुरुद्धान् प्रत्यक्षरं प्रणवपुटितान् नत्यन्तान् नमोन्तांश्च मनुवर्णान् मन्त्राक्षरान् न्यस्येद् इति सृष्टिः । अत्र एषु स्थानेषु नाभिपूर्वा नाभ्यादिपादान्ता मूर्धादिहृदयान्ता च स्थितिः । चरणादिकः पादादिमूर्धान्तः संहारः । इदं त्रयं सृष्टिस्थितिसंहाररूपं ससृष्टिस्थिति पुनरपि सृष्टिस्थितिभ्यां सहितं यथा तथा न्यस्येत् । क्रमादिति सृष्ट्यादित्रयेऽपि क्रमेणैव मन्त्राक्षरा न्यस्तव्या इत्यर्थः । मनुविदित्यस्यायमभिप्रायः — वैष्णवाष्टाक्षरेऽष्टावेव वर्णाः । शिवनारायणे त्वेकादशाक्षरे मूले आदिमं प्रणवम् अन्तस्थं नमस्कारं च हित्वा अष्टौ वर्णा ग्राह्याः । शास्तरि पुनर्नवाक्षरे मूले आदिमं[3] प्रणवं वर्जयित्वाष्टौ ग्राह्या इति ॥ १४ ॥

उक्ते न्यासेऽङ्गुलिनियममाह — योज्येति । मूर्धनि मध्यमाङ्गुली योज्या । मध्यमाङ्गुल्या मूर्धनि न्यस्येदित्यर्थः । नयनयुग्मे तर्जनीमध्यमे योज्ये । वचसि आस्ये साङ्गुष्ठोपकनिष्ठिका अङ्गुष्ठानामिके । हृदि अङ्गुष्ठयुक्तर्जनी अङ्गुष्ठतर्जन्यौ । नाभौ सावरजाग्रजा कनिष्ठाज्येष्ठे । शिवे लिङ्गे प्रथमजा वा अन्या अङ्गुष्ठरहिता वा, जानुनोः व्यग्र्या अङ्गुष्ठरहिता वा व्यनुजा कनिष्ठिकारहिता वा पदयुगेऽपि समस्ता अङ्गुल्यो योज्याः । सदा स्थितिसंहारयोरपि तथा स्थानेष्वङ्गुल्यो योज्या इत्यर्थः ॥ १५ ॥

---

१. 'सशिरोदग्वक्त्रहृन्ना' ख. पाठः. २. 'स्तु' इति मूलकोशपाठः. ३. 'जं' ख. पाठः.

मूर्धेक्षणास्ये हृदि नाभिगुह्य-
पादेषु सुम्भद्विषि मन्त्रवर्णान् ।
निर्बीजके सप्त सबीजकेऽष्टौ
मन्त्रे न्यसेज्जानुयुतेषु तेषु ॥ १६ ॥
आस्ये हृदङ्घ्रिध्वजमूर्धसु प्रा-
ग्याम्याप्यसौम्योर्ध्वमुखेष्वपीशे ।
न्यस्येत् षडर्णे नरघोरसद्य-
वामेशकान् स्वाक्षरतत्पदाढ्यान् ॥ १७ ॥
ईशानादिषु योज्या ज्येष्ठाद्याः केवलाः स्युरङ्गुलयः ।
ज्येष्ठोपगृहीता वा सोपग्राह्या तु तर्जन्या ॥ १८ ॥

दुर्गायां मन्त्राक्षरस्थानान्याह — मूर्धेति । सुम्भद्विषि **निर्बीजके** दुम्बीजेन रहिते मन्त्रे सप्त मन्त्रवर्णान् मूर्धेक्षणास्ये मूर्धनेत्राननेषु हृदि नाभिगुह्यपादेषु न्यस्येत् । सबीजके दुम्बीजसहिते मन्त्रे अष्टौ वर्णान् गुह्यानन्तरं जानुयुतेषु तेषु न्यस्येत् ॥ १६ ॥

ईशे षडर्णे नरघोरसद्यवामेशकान् तत्पुरुषाघोरसद्योजातवामदेवेशानान् स्वाक्षरतत्पदाढ्यान् स्वाक्षरैर्मूलमन्त्रस्य स्वीयैः स्वीयैरक्षरैः तत्पदैस्तत्तत्तत्पुरुषादिपदैस्तद्वक्त्रादिपदैश्च युक्तान् आस्ये वक्त्रे हृदङ्घ्रिध्वजमूर्धसु हृदयपादगुह्यमूर्धसु प्राग्याम्याप्यसौम्योर्ध्वमुखेषु पूर्वदक्षिणपश्चिमोत्तरोर्ध्ववक्त्रेष्वपि न्यस्येत् । अयमत्र न्यासक्रमः — सूत्रन्यासे 'मं तत्पुरुषवक्त्राय नमः' 'शिं अघोरहृदयाय नमः' 'यं सद्योजातपादाभ्यां नमः' 'वां वामदेवगुह्याय नमः' 'नं ईशानमूर्ध्ने नमः' इति । वक्त्रन्यासे 'मं तत्पुरुषपूर्ववक्त्राय नमः' 'शिं अघोरदक्षिणवक्त्राय नमः' 'यं सद्योजातपश्चिमवक्त्राय नमः' 'वां वामदेवोत्तरवक्त्राय नमः' 'नं ईशानोर्ध्ववक्त्राय नमः' इति ॥ १७ ॥

तत्राङ्गुलीनियममाह — ईशानादिष्विति । ईशानादिषु ईशानतत्पुरु-

---

१. 'कास्यात्मान्धुपदे द्वयेकेन्द्रयमसोमाप्याननेष्वप्यमून् ईशादीनथ वा न्यसेत् स्मररिपौ स्कन्देऽथ कास्यात्मसु । गुह्ये जानुपदाग्रयोश्च मनुवर्णान् षण्मनूंश्च न्यसेत् षण्मन्त्रान् गणपेऽप्यजानुषु सनाभिष्वेषु तानार्यके ॥ स्वमूलमन्त्रन्यसनं समासादित्युक्तमष्टार्णदशाक्षकाद्यम् । कल्पान्तरोद्दिष्टविधिप्रपञ्चादिदं मात्रसिद्ध्यै कथयामि किंचित् ॥ आ',

२. 'व पूर्ववक्त्राय नमः' ख. पाठः.

ईशाङ्गुष्ठादिकल्प्त्या करयुजि वपुषीशानमूर्धाभिकल्प्त्या न्यस्येद्वा पञ्चमूर्तीः स्मरजिति महिषारौ तथा पञ्चदुर्गाम् । कास्ये हृदूगुह्यजान्वङ्घ्रिषु च मनुलिपीः षण्मुखे षण्मनून् स-द्वैपास्येऽस्मिन्नथार्ये न्यसतु विगतजानुष्वमून् नाभिमत्सु ॥

आधारहृद्वदनदोःपदमूलनाभौ
कण्ठे सनाभिहृदयस्तनपार्श्वपृष्ठे ।
कास्येक्षणश्रवणगन्धवहे च दोःप-
त्सन्ध्यङ्गुलीषु हृदि धातुषु सानिलेषु ॥ २० ॥

षाघोरवामदेवसद्योजातेषु ज्येष्ठाद्याः अङ्गुष्ठतर्जनीमध्यमानामिकाकनिष्ठिका अङ्गुलयः केवलाः स्युः । ज्येष्ठोपगृहीता वा अङ्गुष्ठेन युक्तास्तर्जन्याद्या वा । सा तु ज्येष्ठा पुनस्तर्जन्योपग्राह्या योज्या ॥ १८ ॥

शिवे पक्षभेदमाह — ईशाङ्गुष्ठेति । स्मरजिति उक्ताः पञ्चमूर्तीः करयुजि करयोर्न्यासे ईशाङ्गुष्ठादिकल्प्त्या च क्रमेण वपुषि देहे सूत्रन्यासे वक्त्रन्यासे च ईशानमूर्धाभिकल्प्त्या 'नं ईशानमूर्ध्ने नमः' इत्यादि 'नं ईशानोर्ध्ववक्त्राय नम' इत्यादिकल्प्त्या च न्यस्येद्वा । महिषारौ तथा मूर्धादिक्रमेण पञ्चदुर्गा न्यस्येत् । षण्मुखे कास्ये मूर्धाननयोर्हृदूगुह्यजान्वङ्घ्रिषु च मनुलिपीः मन्त्राक्षरान् न्यस्येत् । सद्वैपास्येऽस्मिन् गणपतिस्कन्दयोः षण्मन्त्रांश्च उक्तेषु षट्सु स्थानेषु न्यस्येत् । अथार्ये अमून् स्वषण्मन्त्रान् विगतजानुषु नाभिमत्सु षट्सु स्थानेषु न्यसतु ॥ १९ ॥

विष्णावष्टाक्षरवर्णैर्दशावृत्तिन्यासमाह — आधारेति । आधारहृद्वदनदोःपदमूलनाभौ मूलाधारे हृदये वदने च करचरणयोर्मूलेषु चतुर्षु नाभौ च अष्टाक्षरस्य लिपिशः अक्षरशः क्रमेण न्यसतु इति प्रथमावृत्तिः । कण्ठे सनाभिहृदयस्तनपार्श्वपृष्ठे नाभौ हृदये स्तनयोः पार्श्वयोः पृष्ठे च इति द्वितीया । कास्येक्षणश्रवणगन्धवहे च मूर्ध्नि आस्ये नेत्रयोः श्रोत्रयोः नासिकयोश्च इति तृतीया । दोःपत्सन्ध्यङ्गुलीषु करयोः पदयोश्च प्रत्येकं सन्धित्रये पञ्चस्वङ्गुलीषु[1] चतस्र आवृत्तयः एवं सप्तावृत्तयो गताः करयोः हृदि हृदये एवं धातुषु त्वगसृङ्मांसमेदोस्थिमज्जाशुक्लेषु सानिलेषु अनिलसहितेषु, प्राणे चेत्यर्थः । अत्र तु 'ओं ओं ओं त्वगात्मने नमः' 'ओं नं ओं असृगात्मने नमः' इत्यादयो

---

१. 'षु च च' क. पाठः.

मूर्धेक्षणास्यहृदयोदरसोरुजङ्घा-
पादद्वयेषु लिपिशो न्यसतु क्रमेण ।
गण्डांसकोरुचरणेषु रथाङ्गशङ्ख-
श्रीमद्गदाम्बुजपदेषु समाहितात्मा ॥ २१ ॥

न्य[illegible]मित्यलिककुक्ष्योर्हृद्गलेऽर्काक्षरै-
र्न्यस्येद् दक्षिणपार्श्वकांसगलवामैतत्त्रयीपृष्ठके ।
मूर्तीः केशवपूर्विकाः ककुदि चार्कार्णं च के विन्यसेत्
तद्भावप्रतिपत्तये परिजपेन्मन्त्रं किरीटात्मकम् ॥ २२ ॥

अ त्मास्यांसोरुयुग्मे षडथ सगलनाभिद्विपार्श्वाख्यपृष्ठा-
त्मोद्देशे कास्यहृन्नोयुजि करपदसन्ध्यग्रकेषु स्मरारौ ।

मन्त्रा ऊहनीयाः । इत्यष्टम्यावृत्तिः । मूर्धेक्षणास्यहृदयोदरसोरुजङ्घापादद्वयेषु मूर्ध्नि नेत्रद्वये वक्त्रे हृदये जठरे ऊरुद्वये जङ्घाद्वये पादद्वये च नवम्यावृत्तिः । गण्डांसकोरुचरणेषु गण्डद्वयेंऽसद्वये ऊरुद्वये चरणद्वये च चतुरो वर्णान् न्यस्य रथाङ्गशङ्खश्रीमद्गदाम्बुजपदेषु रथाङ्गादिस्थानेषु चक्रे शङ्खे कौमोदक्यां पद्मे च स्वस्वमुद्राभिः सह चतुरो वर्णान् न्यस्येत् । एषा दशम्यावृत्तिः । समाहितात्मा अष्टार्णद्वादशार्णयोर्मन्त्रयोर्योगं,

"ततोऽष्टाक्षरपूर्त्यर्थं स्मर्तव्यो द्वादशाक्षरः"

इति प्रपञ्चसारोक्तस्थितिं जानन्नित्यर्थः ॥ २०, २१ ॥

इत्यष्टार्णदशाङ्गम् अष्टार्णस्य दशाङ्गाभिधानं न्यासं न्यस्य अलिककुक्ष्योः फालजठरयोः हृद्गले हृदये गले च दक्षिणपार्श्वकांसगलवामैतत्त्रयीपृष्ठके दक्षिणभागगतपार्श्वांसगलेषु वामत एतत्त्रय्यां पार्श्वांसगलेषु च पृष्ठे च ककुदि गलपृष्ठे च अर्काक्षरैः द्वादशाक्षरस्य द्वादशभिरक्षरैः बीजभूतैः सह केशवपूर्विका मूर्तीः चक्रपूजायां प्रोक्ताः क्रमेण न्यस्येत् । के मूर्ध्नि अर्कार्णं द्वादशाक्षरं स्वयं च विन्यसेत् । तद्भावप्रतिपत्तये विष्णोस्तादात्म्यप्राप्तये किरीटात्मकं मन्त्रोद्धारे वक्ष्यमाणं मन्त्रं परिजपेत् ॥ २२ ॥

शिवे गोलकान्यासमाह — **आत्मेति** । अथ स्मरारौ षण्मन्त्रवर्णान् आत्मास्यांसोरुयुग्मे हृदये वक्त्रे अंसयोरूर्वोः न्यस्येदिति प्रथमावृत्तिः । सगलनाभिद्विपार्श्वाख्यपृष्ठात्मोद्देशे गले नाभौ पार्श्वयोः पृष्ठे हृदये च

---

१. 'ये पादद्वये च' क. पाठः.

न्यस्येत् कास्यात्मकुक्ष्यूरुपदसरसिजे हृत्प्रदेशास्यटङ्कै-
णाभीतीष्टे मुखांसात्मपदसरसिजोरूदरे मन्त्रवर्णान् ॥
मूलेनोर्ध्वाधःक्रमाद् गोलकावद्
व्याप्य न्यस्येत् पूरुषाघोरवामान् ।
सद्येशौ फालांसयुक्कुक्षिहृत्स्व-
प्येतत्स्फूर्त्यै स्थाणुमन्त्रं जपेत् त्रिः ॥ २४ ॥
हृत्फालान्तशिखासु बाहुयुगमध्ये लोचने दोस्तले
सर्वेषु स्वषडङ्गकानि विनिमय्याक्ष्यस्त्रयोस्तु क्रमम् ।
लक्ष्मीनाथषडास्यसुम्भरिपुमूलेष्वेषु निर्नेत्रकं
पञ्चाङ्गानि पिचण्डपृष्ठसहितेष्वष्टाङ्गकानि न्यसेत् ॥

द्वितीयावृत्तिः । कास्यहृन्नोयुजि मूर्ध्नि आस्ये नेत्रयोर्नासिकयोश्च तृतीया । करपदसन्ध्यग्रकेषु करयोः पदयोः सन्धिपञ्चकेष्वग्रेषु च चतस्र आवृत्तयः । एवं सप्तावृत्तयो गताः । कास्यात्मकुक्ष्यूरुपदसरसिजे मूर्ध्नि आस्ये हृदये जठरे ऊरुद्वये पादद्वये चाष्टमी । हृत्प्रदेशास्यटङ्कैणाभीतीष्टे हृदये आस्ये कुठारे मृगे अभीतौ वरदे च नवमी । तत्रायुधचतुष्के तत्तन्मुद्राभिः सह न्यासः कर्तव्यः । मुखांसात्मपदसरसिजोरूदरे मुखे अंसद्वये हृदये पादद्वये ऊरुद्वये जठरे च दशमी चावृत्तिः ॥ २३ ॥

पुनर्मूलेन ऊर्ध्वाधःक्रमात् ऊर्ध्वमुखमधोमुखं च गोलकावत् गोलकास्थापनवद् व्याप्य फालांसयुक्कुक्षिहृत्सु फाले अंसयोः कुक्षौ हृदये च पूरुषाघोरवामान् सद्येशौ च न्यस्येत् । एतत्स्फूर्त्यै एतन्मन्त्रमूर्तिस्फुरणाय स्थाणुमन्त्रं 'नमोऽस्तु स्थाणुभूताये'ति मन्त्रं त्रिः त्रिःकृत्वो[2] जपेत् ॥ २४ ॥

अथ सामान्येनाङ्गन्यासमाह — **हृदिति** । हृत्फालान्तशिखासु हृदये फालान्ते शिखायां च बाहुयुगमध्ये लोचने दोस्तले च सर्वेषु देवेषु स्वस्वषडङ्गकानि न्यस्येत् । लक्ष्मीनाथषडास्यसुम्भरिपुमूलेषु विष्णुस्कन्ददुर्गाणां मूलमन्त्रेषु तु अक्ष्यस्त्रयोः नेत्रास्त्रयोः क्रमं विनिमय्य व्यत्यासं कृत्वा । अस्त्रानन्तरमेव नेत्रं न्यसेदित्यर्थः । पञ्चाङ्गानि एषु स्थानेषु मध्ये निर्नेत्रकं नेत्ररहितं

---

१. 'रसद्यान्' । वामेशौ' ख. पाठः. २. 'ष्कृ' क. पाठः.

भूषायुधादिन्यसनं यथार्हं
कृत्वा धियेष्ट्वा हृदये प्रकल्प्य ।
जप्त्वा यथाशक्ति मनूत्तमं स्वं
बहिःसपर्यादिकमारभेत ॥ २६ ॥

कृत्वा गोमयवारिणा सुचतुरश्रं स्थण्डिलं तारतो
निक्षिप्याक्षतगन्धपुष्पकममुष्मिन्नस्त्रसंशोधितम् ।
शङ्खाङ्घ्रिं प्रणिधाय शङ्खमपि तत्तन्मन्त्रतो मन्त्रदि-
च्छङ्खे न्यस्य हृदात्मकेन मनुना गन्धप्रसूनाक्षतम् ॥ २७ ॥

सक्षाद्येन शिखाणुना शुचिजलैरापूर्य गन्धार्तवं
न्यस्याग्न्यर्कसुधांशुबिम्बमनुभिः प्राच्यांङ्घ्रिशङ्खोदकम् ।

न्यसेत्[2] । अष्टाङ्गकानि पिचण्डपृष्ठसहितेषु हृदयादिषट्सु उदरे पृष्ठे च न्यसेत् । अङ्गानां मन्त्रा मुद्राश्च द्वादशात् पटलादवगन्तव्याः ॥ २५ ॥

भूषायुधादिन्यसनं यथार्हं स्वस्वध्यानश्लोकादवगम्य कृत्वा हृदये प्रकल्प्य धियेष्ट्वेति योजना । हृदि मन्त्रमूर्तिं प्रकल्प्य मानसपूजां कृत्वेत्यर्थः । मानसपूजामन्त्राश्च द्वादशे पटले वक्ष्यन्ते । पुनः स्वं स्वं मनूत्तमं यथाशक्ति जप्त्वा बहिःसपर्यादिकं बाह्यपूजाया आदिभूतं शङ्खपूरणमारभेत ॥ २६ ॥

शङ्खपूरणक्रममाह — कृत्वेति । मन्त्रविदित्यनेन शङ्खपूरणस्य सारांशो गुरुमुखादवगन्तव्य इति सूचितम् । मन्त्रसहिता एव सर्वाः क्रियाः कार्या इति च सूचितम् । गोमयवारिणा स्वस्याग्रतः सुचतुरश्रं स्थण्डिलं कृत्वा अमुष्मिन् तारतोऽक्षतगन्धपुष्पकं निक्षिप्य तत्र अस्त्रसंशोधितम् अस्त्रमन्त्रेण क्षालितं शङ्खाङ्घ्रिं शङ्खमपि तत्तन्मन्त्रतः स्वस्वमूलमन्त्रेण वा बहिर्सूर्यमण्डलमन्त्राभ्यां वा प्रणिधाय शङ्खे हृदात्मकेन मनुना हृदयमनुना गन्धप्रसूनाक्षतं न्यस्य सक्षाद्येन लिपिप्रतिलोमसहितेन शिखाणुना शुचिजलैः पूर्वमेव गालितैः वर्धनीपात्रे पूरितैः क्षिप्तगन्धाक्षतपुष्पैः

---

१. 'रों' इति मूलकोशपाठः. २. 'स्थे' ख. पाठः. ३. 'पृदरे' क. पाठः.

गालिन्या शिखयोत्प्पूय विविषीकृत्यामृतीकृत्य तत्
तोयं नेत्रनिरीक्षितम् करयुजा प्रच्छाद्य वर्माणुना ॥ २८ ॥
बद्ध्वास्त्रेण दिशोऽथ तीर्थमनुना तीर्थं रवेर्मण्डला-
दावाह्यार्चितपीठके स्वहृदयाद् देवं च मूलाणुना ।
आवाह्याङ्गयुतं समर्च्य परमीकृत्य प्रजप्याष्टशो
वर्धन्यां प्रतिषिच्य किञ्चिदमुनात्मान्तं त्रिरभ्युक्षतु ॥ २९ ॥

न्यासक्रमाज्जेजतनौ प्रयजेत पीठं
हेद्वारिजन्मनि समर्च्य परं महस्तत् ।

"इमा आपः शिवाः सन्तु शुभाः शुद्धाश्च निर्मलाः ।
पावनाः शीतलाश्चैव पूताः सूर्यस्य रश्मिभिः ॥"

इति जलैर्जलैरापूर्य गन्धार्तवं गन्धपुष्पाक्षतं न्यस्य अग्न्यर्कसुधांशुबिम्बमनुभिः 'मं वह्निमण्डलाय नमः' 'अं सूर्यमण्डलाय नमः' 'उं सोममण्डलाय नमः' इति मन्त्रैः अङ्घ्रिशङ्खोदकं शङ्खपादं शङ्खजलं च क्रमेण प्रार्च्य गालिन्या मुद्रया शिखया मन्त्रेण च उत्प्रपूय उत्पवनं कृत्वा विविषीकृत्य गरुडमुद्रया सह निर्विषीभवेति निर्विषीकरणं कृत्वा अमृतीकृत्य सुरभिमुद्रया सहामृती-भवेति अमृतमुद्रयामृतीकरणं च कृत्वा नेत्रनिरीक्षितं नेत्रमन्त्रेणावलोकितं तत् तोयं करयुजा हस्तद्वयेन व(र्मणा ? र्माणुना) कवचमन्त्रेण प्रच्छाद्यास्त्रेण दिशो बद्ध्वाथ रवेर्मण्डलात् तीर्थमनुना

"गङ्गे च यमुने चैव गोदावरि सरस्वति ।
नर्मदे सिन्धु कावेरि जलेऽस्मिन् सन्निधिं कुरु ॥"

इति मनुना वा 'ओं ह्रीं गङ्गायै विश्वमुख्यै शिवामृतायै नारायण्यै नमो नमः' इति मनुना वा तीर्थमावाह्य अर्चितपीठके 'ओं पद्माय नमः' इति पीठमिष्ट्वा स्वहृदयाद् मूलाणुना देवं चावाह्य अङ्गयुतम् अङ्गं कृत्वा मूलेन समर्च्य प्रण-वेन परमीकृत्य निष्कलीकृत्याष्टशो मूलं प्रजप्य वर्धन्यां वर्धनीपात्रे किञ्चित् प्रतिषिच्य अमुना जलेन आत्मान्तं पूजासाधनान्यात्मानं च त्रिः त्रिकृत्वो-ऽभ्युक्षतु ॥ २७, २८, २९ ॥

अथात्माराधनमाह — न्यासक्रमादिति । निजतनौ न्यासक्रमात्

१. 'रिपूज्य पी', २. 'मन्त्री विभावयतु तत्र परं च तेजः । ज्या' ख. पाठः.

व्याधारभाज्यणुमहांसि निरञ्जनांशै-
रिष्ट्वा नयेत् प्रणवतः क्रमवित् तदैक्यम् ॥ ३० ॥
आयम्य वायुमणुना सकलीक्रियां च
कृत्वासनाद्युपहृतिं क्रमशः समर्च्य ।
तारोपचारनिजमूलतदक्षरार्द्यै-
र्न्यासक्रमादभियजेज्जलगन्धपूर्वैः ॥ ३१ ॥
मूलेन गन्धरसलिप्ततनुर्मुरारौ
स्वैर्मूर्तिपञ्जरपदेष्वणुभिर्द्विषड्भिः ।
फाले गलेऽसयुगले हृदि पञ्चमन्त्रै-
रीशेऽनुलिम्पतु परेष्विति मूलतोऽथ ॥ ३२ ॥
मूलेन मूर्ध्नि मनुना निखिलेषु पञ्च-
कृत्वः किरीटमनुना च रथाङ्गपाणौ ।

पीठन्यासक्रमेण पीठं प्रयजेत । हृद्वारिजन्मनि हृदयकमले तद् मूलमन्त्रात्मकं परं परमात्मरूपं महस्तेजो मूलेन समर्च्य आवाहनादिपूर्वं सम्यगर्चयित्वा व्याधारभाञ्जि मूलाधारहृदयभ्रूमध्यस्थानि अणुमहांसि आत्मान्तरात्मपरमात्मभूतानि मन्त्रतेजांसि निरञ्जनांशैः 'अं नमः' 'उं नमः' 'मं नमः' इति मन्त्रैरिष्ट्वा प्रणवतः पुष्पाराधनेन तदैक्यं नयेत् । क्रमविदित्यनेनात्माराधने केषाञ्चित् पक्षे क्रमव्यत्यासः सूचितः ॥ ३० ॥

मूलेनाणुना वायुमायम्य सकलीक्रियां च कृत्वा आसनाद्युपहृतिं क्रमशः समर्च्य जलगन्धपूर्वैरुपहारैस्तारोपचारनिजमूलतदक्षरार्द्यैर्न्यासक्रमादभियजेत् ॥ ३१ ॥

अथ मूलेन गन्धरसलिप्ततनुः अष्टगन्धरसेनानुलिप्ताङ्गो भूत्वा मुरारौ मूर्तिपञ्जरपदेषु मूर्तिपञ्जरन्यासस्थानेषु स्वैः केशवादिभिः द्विषड्भिः (अणुभिः) द्वादशमन्त्रैरूर्ध्वपुण्ड्राण्यनुलिम्पतु । ईशे फाले गलेऽसयुगले हृदि च पञ्चमन्त्रैस्तिर्यक्पुण्ड्राण्यनुलिम्पतु । परेष्विति पञ्चस्थानेषु मूलतश्च ॥ ३२ ॥

पुष्पपूरणमाह — मूलेनेति । निखिलेषु देवेषु मूलेन मनुना, रथाङ्ग-

---

१. 'प्लुतप्र', २. 'परिकल्प्य चैक्यम्' ख. पाठः. ३. 'तीः' इति मूलकोशपाठः.

स्थाण्वात्मकेन कुसुमाञ्जलिमीश्वरे च
कृत्वा यजेद् द्विविधसूनवरैरथेति ॥ ३३ ॥

श्वेतारुणक्रमकृतोभयपार्श्वयोगान्
कुर्याद्धरौ द्वितुलसीकणवीरपद्मान् ।
नाभ्यात्मचिल्ल्यवधि के षडशेषमङ्गे
शेषे शिवेऽर्कयुगपूर्वकमेतदिष्टम् ॥ ३४ ॥

धूपं च दीपं च समर्प्य तस्मै
निवेद्यबुद्धया परचित्सुधार्घ्यम् ।
दत्त्वार्चयित्वा परितोष्य चैनं
लयाङ्गनिष्ठं च समादधीत ॥ ३५ ॥

पाणौ किरीटमनुना, ईश्वरे स्थाण्वात्मकेन स्थाणुमन्त्रेण च मूर्ध्नि पञ्चकृत्वः पञ्चावृत्त्या कुसुमाञ्जलिं पूर्णपुष्पाञ्जलिं कृत्वाथ द्विविधसूनवरैः श्वेतारुणवर्णविशिष्टपुष्पैः इति वक्ष्यमाणक्रमेण यजेत् ॥ ३३ ॥

तदेव वक्ति — श्वेतेति । हरौ द्वितुलसीकणवीरपद्मान् द्विविधान् श्वेतरक्तवर्णविशिष्टान् तुलसीकणवीरपद्मान् नाभ्यात्मचिल्ल्यवधि नाभिहृदयभ्रूमध्यावधि यथा भवति तथा श्वेतारुणक्रमकृतोभयपार्श्वयोगान् सितरक्तक्रमेण संपादितं दक्षिणं वामं च पार्श्वं यथा भवति तथा योगमाश्रितांस्तान् कुर्यात् संपादयेत् । के मूर्धनि षट् उक्तानि षट् कुसुमानि, शेषेऽङ्गे अशेषं कुसुमं कुर्यात् । शिवे एतत् पुष्पपूरणम् अर्कयुगपूर्वकम् अर्ककणवीरपद्मक्रमेणेष्टं स्यात् । अन्यदेवेष्वनयोर्मार्गयोः सदृशं कुर्यात् ॥ ३४ ॥

धूपं च दीपं च तत्तन्मुद्रया समर्प्य तस्मै देवाय निवेद्यबुद्ध्या निवेद्यसमर्पणबुद्ध्या परचित्सुधार्घ्यं परचैतन्यामृतरूपमर्घ्यं दत्त्वार्चयित्वा चैनं परितोष्य लयाङ्गनिष्ठं च समादधीत ॥ ३५ ॥

---

१. 'वि' इति मूलकोशपाठः. २. 'संभिदुर्त', ३. 'ब्रह्मार्पणाद्यं च समातनोतु ॥', ४. 'णप्रक्र' ख. पाठः.

कृत्वात्मयागमिति तत्त्वनिवेशितात्मा
शङ्खादिकं च परिशोध्य भृतार्घ्यकाद्यः ।
पीठार्चयोः प्रविकिरेत् कुसुमं स्वबीज-
मूलाणुतश्चरतु चानलसालनिष्ठम् ॥ ३६ ॥
गुरूनुदग् दक्षिणतो गणेशं
प्रपूज्य पीठस्य यजेदधस्तात् ।
आधारशक्तिं प्रकृतिं च कूर्मं
स्वमन्त्रतोऽनन्तवसुन्धरे च ॥ ३७ ॥
अग्न्यादिपीठाङ्घ्रिषु धर्मसंज्ञं
सज्ञानवैराग्यकमर्चयेत ।
ऐश्वर्यसंज्ञं च चतुष्कमेतत्
प्रागादिगात्रेषु च नञ्विशिष्टम् ॥ ३८ ॥

इति उक्तप्रकारेण आत्मयागं कृत्वा तत्त्वनिवेशितात्मा स्वयं कालस्वरूपी देवोऽहमिति भावयुक्तः पूजां कुर्यात् । तत्र पूजायां प्रथमं शङ्खादिकं च परिशोध्य भृतार्घ्यकाद्यः संभृतार्घ्यपाद्याद्युपहारो भूत्वा पीठार्चयोः पीठे प्रतिमायां च स्वबीजमूलाणुतः स्वशक्तिबीजेन स्वमूलेन च क्रमात् कुसुमं प्रविकिरेत् । अनलसालनिष्ठं तालत्रयदिग्बन्धाग्निप्राकारान् चरतु च ॥ ३६ ॥

पीठपूजामाह — गुरूनित्यादिभिः । पीठस्योदग्भागे 'गु गुरुभ्यो नमः' इति मन्त्रेण गुरून्, दक्षिणतो 'गं गणपतये नमः' इति मन्त्रेण गणेशं च प्रपूज्य अधस्तात् अधोभागे आधारशक्तिं प्रकृतिं कूर्मं चानन्तवसुन्धरे च स्वमन्त्रतः 'ओं आधारशक्त्यै नमः' 'ओं मूलप्रकृत्यै नमः' 'ओं आदिकूर्माय नमः' 'ओं अनन्ताय नमः' 'ओं पृथिव्यै नमः' इति मन्त्रैर्यजेत् ॥ ३७ ॥

पुनरग्न्यादिपीठाङ्घ्रिषु पीठस्याग्निकोणादिपादेषु धर्मसंज्ञं सज्ञानवैराग्यकमैश्वर्यसंज्ञं च । स्वमन्त्रत इति सर्वत्र पूर्वस्मादायाति । 'ओं धर्माय नमः' 'ओं ज्ञानाय नमः' 'ओं वैराग्याय नमः' 'ओं ऐश्वर्याय नमः' इत्यर्चयेत । एतद् धर्मादिकं चतुष्कं नञ्विशिष्टं नञ्समासेन युक्तं प्रागादिगात्रेषु पादोपरिस्थप्रागादिगात्रेषु 'अधर्माय नमः' इत्यादिमन्त्रैरर्चयेत ॥ ३८ ॥

१. 'लयाङ्गकमसौ सुसमाहितात्मा' ख पाठः,

स्वाद्यक्षरैः सत्त्वरजस्तमांसि
संपूज्य सूत्रत्रितयेऽथ मायाम् ।
विद्यां च तच्छादनवस्त्रयुग्मे
तन्मध्यभागे प्रयजेच्च पद्मम् ॥ ३९ ॥

साद्यक्षराणि दलकेसरकर्णिकासु
विष्वग् दिनेशशशिपावकमण्डलानि ।
आत्मान्तरात्मपरमात्मन एवमेव
ज्ञानात्मकं यजतु चोपरि शक्तियुक्तम् ॥ ४० ॥

[illegible]दे तत्केसरकर्णिकासु
शक्तीर्निवाराध्य निजाः क्रमेण ।
समष्टिमन्त्रेण यजेन्निजेन
समीरिता पीठसमर्चनेति ॥ ४१ ॥

सूत्रत्रितये गात्रगतसूत्रत्रये सत्त्वरजस्तमांसि स्वाद्यक्षरैः सह 'सं सत्त्वाय नमः' 'रं रजसे नमः' 'तं तमसे नमः' इति सम्पूज्य अथ तच्छादनवस्त्रयुग्मे सूत्रोपरि संस्तीर्णवस्त्रद्वये 'मं मायायै नमः' 'विं विद्यायै नमः' इति सम्पूज्य तन्मध्यभागे पीठमध्ये 'पं पद्माय नमः' इति पद्मं प्रयजेच्च ॥ ३९ ॥

दलकेसरकर्णिकासु पद्मस्य दलेषु केसरेषु कर्णिकायां च विष्वक् परितः साद्यक्षराणि आदिः प्रणवः तस्याक्षरैर्युक्तानि दिनेशशशिपावकमण्डलानि 'अं सूर्यमण्डलाय नमः' 'उं सोममण्डलाय नमः' 'मं वह्निमण्डलाय नमः' इति यजतु । आत्मान्तरात्मपरमात्मन एवमेव दलकेसरकर्णिकासु साद्यक्षराणि 'अं आत्मने नमः' 'उ अन्तरात्मने नमः' 'मं परमात्मने नमः' इति यजतु । तेषामुपरि शक्तियुक्तं शक्तिबीजेन युक्तं ज्ञानात्मकम् 'ओं ह्रीं ज्ञानात्मने नमः' इति यजतु च ॥ ४० ॥

ततः तत्केसरकर्णिकासु पद्मस्य केसरेषु कर्णिकायां च प्रागादि यथा तथा निजाः निजनिजाः नव शक्तीः क्रमादाराध्य निजेन निजनिजेन समष्टिमन्त्रेण च यजेदिति सामान्येन पीठसमर्चना समीरिता ॥ ४१ ॥

---

१. 'सा' क. ख. पाठः ।

पीठं पङ्कजपश्चिमं महिषजिद्वर्जं समानक्रमं
प्रायः प्रागपि पङ्कजादिदमहीन्द्राढ्यं रमावल्लभे ।
बिम्बात्मोपरिपर्युपेतनवशक्त्येतत् कुमारीहरि-
श्रीशेशेषु ततः परेषु नवशक्त्यूर्ध्वस्थबिम्बात्मकम् ॥
मायाब्रह्मयुतौ प्रकृतिकूर्मौ पीठके केवलैः
स्वाद्यर्णैरपि गात्रगाः सलवकैः सौम्यां च भद्रां जयाम् ।
इष्ट्वार्यां च नवबलप्रबलकौ क्लीबार्णसंभिन्नभं-
बीजाढ्यान् सुबलं महाबलमपीहाग्न्यादिपीठाङ्घ्रिगान् ॥
सत्त्वादीनि यथोदितं यजतु कन्दं नालपद्मौ क्रमाद्
बिन्द्वन्तैः क्लनलाक्षरैर्विगतबिन्दोर्बीजयुक्ते क्रमात् ।

महिषजिद्वर्जं दुर्गां वर्जयित्वान्येषु पङ्कजपश्चिमं पद्मान्तम् इदं पीठं प्रायः समानक्रमम् । रमावल्लभे इदं पीठं पङ्कजात् प्रागपि अहीन्द्राढ्यम् 'अनन्ताय नमः' इत्यनेन युक्तं भवति । कुमारीहरिश्रीशेशेषु दुर्गाविष्णुशङ्करनारायणेषु एतत् पीठं बिम्बात्मोपरिपर्युपेतनवशक्ति मण्डलानामात्मनां चोपरिभागस्थिताभिर्नवशक्तिभिर्युतं, ततः परेषु नवशक्त्यूर्ध्वस्थबिम्बात्मकं नवशक्तीनामूर्ध्वस्थितेन मण्डलत्रयेणात्मत्रयेण च युक्तं स्यात् ॥ ४२ ॥

दुर्गायाः पीठे भेदमाह — मायेति । दुर्गायाः पीठके अधः अधोभागस्थौ प्रकृतिकूर्मौ मायाब्रह्मयुतौ भुवनेश्वर्या ककारेण च क्रमाद् युक्तौ 'ह्रीं प्रकृत्यै नमः' 'कं कूर्माय नमः' इतीष्ट्वा गात्रगाः गात्रस्थाः सौम्यां भद्रां जयाम् आर्यां च केवलैः स्वाद्यर्णैः स्वस्वाद्यक्षरैः सल(वैः?वकैः) बिन्दुसहितैरपि बीजैः सह 'सं सौम्यायै नमः' इत्याद्यैर्मन्त्रैरिष्ट्वा पुनरिह गात्रार्चनानन्तरम् अग्न्यादिपीठाङ्घ्रिगान् अग्न्यादिपीठपादगतान् क्लीबार्णसंभिन्नभंबीजाढ्यान् नपुंसकाक्षरैः संभिन्नेन युक्तेन भमिति बीजेन युक्तान् बलप्रबलकौ सुबलं महाबलमपि 'भूं बलाय नमः' 'भूं प्रबलाय नमः' इत्यादिमन्त्रैरिष्ट्वा सत्त्वादीनि सत्त्वरजस्तमांसि मायाविद्ये च यथोदितं यथोक्तं यजतु । कन्दं नालपद्मौ च क्रमात् बिन्द्वन्तैः क्लनलाक्षरैः सह 'क्लं कन्दाय नमः' 'नं नालाय नमः' 'लां

---

१. 'शुक्लवदेव पङ्कजमतः कन्दं च नालं यजेत् पद्मं च क्लनलाक्षरैः सलवकैः निर्मलेते । भा' ख. पाठः. २. 'ये' इति मूलकोशपाठः.

भास्वच्छीतगुमण्डले हुतभुजो बिम्बं सरंबीजकं
दुर्गायामियती भिदात्र नवशक्त्याद्यं पृथक् प्रोच्यते ॥
विमलोत्कर्षिण्यौ च ज्ञानाख्याना क्रिया च योगा च ।
प्रह्वी सत्येशानुग्रहाश्च नवशक्तयो हरिहरीशे ॥ ४५ ॥
वामा ज्येष्ठा रौद्री काली कलबलपदादिविकलिन्यौ ।
सबलप्रमथिन्यौ सर्वभूतदमनी मनोन्मनी च शिवे ॥ ४६ ॥
प्रभा माया जया सूक्ष्मा विशुद्धा नन्दिनी पुनः ।
सुप्रभा विजया सर्वसिद्धिदा च यथाक्रमम् ॥ ४७ ॥
आदित्रिदीर्घैर्बिन्द्वन्तैः सन्ध्यर्णैश्च समन्विताः ।
एता बिन्दुविसर्गाभ्यामपि स्युर्महिषद्विषि ॥ ४८ ॥

पद्माय नमः' इति मन्त्रैर्यजतु । भास्वच्छीतगुमण्डले सूर्यमण्डलं सोममण्डलं च क्रमाद् विगतबिन्द्वोबीजयुक्ते बिन्दुरहिताभ्याम् अ उ इति बीजाभ्यां सह 'अ सूर्यमण्डलाय नमः' 'उ सोममण्डलाय नमः' इति मन्त्राभ्यां यजतु । हुतभुजो वह्नेः बिम्बं सरंबीजकं 'रं वह्निमण्डलाय नमः' इति मन्त्रेण यजतु । दुर्गायामियती भिदा एतावान् भेदः । अथ नवशक्त्याद्यं पृथक् प्रोच्यते । अस्माभिरिति शेषः ॥ ४३, ४४ ॥

हरिहरीशे हरिहरीशयोः विमलाद्या नव शक्तयः । सर्वासां नवशक्तीनां ताराद्याश्चतुर्थीनत्यन्ता एव मन्त्राः । ज्ञानाख्याना ज्ञानेत्याख्यानयुक्ता ॥ ४५ ॥

शिवे वामाद्या नव शक्तयः । कलबलपदादिविकलिन्यौ कलबल इति पदाद्यौ विकलिन्यौ कलविकलिनी बलविकलिनी चेत्यर्थः । सबलप्रमथिन्यौ बलप्रमथिनी चेत्यर्थः ॥ ४६ ॥

महिषद्विषि प्रभाद्या नव शक्तयः । एता यथाक्रमं बिन्द्वन्तैः आदित्रिदीर्घैः आं ईं ऊं इत्येतैः, सन्ध्यर्णैश्च एं ऐं ओं औं इत्येतैश्च, बिन्दुविसर्गाभ्यां अं अः इत्येताभ्यां च समन्विताः 'आं प्रभायै नमः' 'ईं मायायै नमः' इत्याद्या इत्यर्थः ॥ ४७, ४८ ॥

---

१. 'मापिताः' ख. पाठः.

विद्या शान्तिः स्मृतिर्मेधा प्रज्ञा कान्तिर्द्युतिर्धृतिः ।
व्यापिन्यपि कुमारे स्युरामन्तव्यापकाक्षरैः ॥ ४९ ॥

तीव्राख्या ज्वालिनी नन्दा भोगदा कामरूपिणी ।
उग्रा तेजोवती सत्या विघ्नेऽन्त्या विघ्ननाशिनी ॥ ५० ॥

दीप्तिः सत्या प्रभा कान्तिर्विभूतिर्मालिनी पुनः ।
संसृष्टिः पुष्टिरप्यार्ये नवमी कामरूपिणी ॥ ५१ ॥

इति सप्तसु देवेषु समुक्ता नव शक्तयः ।
तत्तत्समष्टिमन्त्रांश्च तत्पूर्त्यै कीर्तयाम्यहम् ॥ ५२ ॥

अत्रोंनमोभगवतेविष्णवेवर्णकान् क्रमात् ।
सर्वभूतात्मने वासुदेवायेति च कीर्तयेत् ॥ ५३ ॥

सर्वात्मसंयोगयोगपद्मपीठात्मने नमः ।
इत्ययं स्यात् समष्ट्यात्ममनुर्हरिहरीशयोः ॥ ५४ ॥

कुमारे आमन्तव्यापकाक्षरैः आं इत्यन्तैः यरलवादिभिरक्षरैः सह विद्यादयो नव शक्तयः । 'यां विद्यायै नमः' इत्याद्या इत्यर्थः ॥ ४९ ॥

विघ्ने तीव्राख्या तीव्रेत्याख्यायुक्ता । ज्वालिनी इत्याद्या नव शक्तयः । अन्त्या विघ्ननाशिनी अवसाने विघ्ननाशिनीत्यर्थः ॥ ५० ॥

आर्ये दीप्त्याद्या नव शक्तयः । नवमी अन्त्या कामरूपिणीत्यर्थः ॥

इति सप्तसु देवेषु नवशक्तयः समुक्ताः । तत्पूर्त्यै तस्य पीठस्य पूर्णतायै तत्तत्समष्टिमन्त्रांश्चाहं कीर्तयामि ॥ ५२ ॥

अत्र हरिहरीशयोः 'ओं नमो भगवते विष्णवे' इति वर्णकान् क्रमात् कीर्तयेत् । 'सर्वभूतात्मने वासुदेवाय' इति च कीर्तयेत् उच्चरेत् । 'सर्वात्मसंयोगयोगपद्मपीठात्मने नमः' इति च कीर्तयेत् । अयं समष्ट्यात्ममनुः समष्टिस्वरूपो मन्त्रः स्यात् ॥ ५३, ५४ ॥

प्रणवनतिभगवतेयुतसकलगुणात्मादिशक्तियुक्ताय ।
ङेन्तानन्तादिकयोगान्ते पीठात्मने च नमश्च शिवे ॥ ५५ ॥
तारादि वज्रनखदंष्ट्रायुधपदमायसंयुतं वदतु ।
महासिंहायार्णं हूं नम इत्यपि च महिषमर्दिन्याम् ॥ ५६ ॥
ओङ्कारशक्तिगणपतिबीजयुतं वदतु सर्वशक्त्यर्णम् ।
कमलासनायवर्णं प्रणतियुतं विघ्नराजे च ॥ ५७ ॥
तारं प्रभूतसिंहासनायसर्वाक्षराणि शक्त्यर्णम् ।
ब्रूयान्मयाय पद्मायेति नमोन्तं पुनः प्रभानाथे ॥ ५८ ॥

शिवे प्रणवनतिभगवतेयुतसकलगुणात्मादिशक्तियुक्ताय प्रणवेन नत्या भगवते इत्यनेन च युतानि सकलगुणात्म इत्यक्षराण्यादौ युक्तानि शक्तियुक्तायेत्यक्षराणि ङेन्तानन्तादिकयोगान्ते चतुर्थ्यैकवचनान्तानन्तशब्दादिकस्य योगशब्दस्यान्ते पीठात्मने नम इति 'ओं नमो भगवते सकलगुणात्मशक्तियुक्तायानन्ताय योगपीठात्मने नमः' इत्यर्थः ॥ ५५ ॥

महिषमर्दिन्यां तारादि प्रणवादि वज्रनखदंष्ट्रायुधपदं वज्रनखदंष्ट्रायुध इति पदम् आयसंयुतम् आय इत्यनेन युक्तं वदतु । समहासिंहायार्णं महासिंहायेत्यक्षरैः सह हूं नम इत्यपि च वदतु । 'ओं वज्रनखदंष्ट्रायुधाय महासिंहाय हूं नम' इत्यर्थः । अपिचेत्यनेन 'महासिंहाय हुं फट् नमः' इति पक्षान्तरः सूचितः ॥ ५६ ॥

विघ्नराजे ओङ्कारशक्तिगणपतिबीजयुतम् ओं ह्रीं गं इति बीजैर्युतं सर्वशक्त्यर्णं सर्वशक्तीत्यक्षरान्, पुनः कमलासनायवर्णं कमलासनाय इति वर्णान् प्रणतियुतं नम इत्यनेन युतं वदतु । 'ओं ह्रीं गं सर्वशक्तिकमलासनाय नमः' इत्यर्थः ॥ ५७ ॥

प्रभानाथे तारं प्रभूतसिंहासनायसर्वाक्षराणि प्रभूतसिंहासनाय सर्वे इत्यक्षराणि पुनः शक्त्यर्णं शक्तीत्यक्षरद्वयं पुनर्मयाय पद्मायेति स्वरूपम् एतन्नमोन्तं ब्रूयात् । 'ओं प्रभूतसिंहासनाय सर्वशक्तिमयाय पद्माय नम' इत्यर्थः ॥ ५८ ॥

---

१. 'कलश' क. पाठः ।

ओंसर्वशक्तियुक्तेत्यादे मयूराक्षरादिकं वदतु ।
कमलासनायनम इति गुहे च ते कीर्तिताः समष्टयणवः ॥

तत्तत्समुक्तविधिनेति समर्च्य पीठं
तोयादिभिस्तदुपधां प्रकृतिं प्रतर्प्य ।
मूर्तिं च तत्र मनुबिम्बमयीं प्रकल्प्य
तत्राभिवाहयतु मन्त्रचितिं च मन्त्री ॥ ६० ॥

तारत्रयं चलनसङ्ग्रहणोद्गमार्थ-
मुक्त्वोपचारकृतिकृन्निजहृत्सरोजात् ।
उन्नीय चेतनकलां विरहय्य बन्धात्
तारेण चात्मनि परे ध्रुवतो विलाप्य ॥ ६१ ॥

गुहे च ओंसर्वशक्तियुक्तेत्यादि यथा तथा मयूराक्षरादिकं मयूर इत्यक्षरत्रयादिकं कमलासनायनम इति वदतु । 'ओं सर्वशक्तियुक्तमयूर-कमलासनाय नमः' इत्यर्थः । ते समष्टयणवः समष्टिमन्त्राः कीर्तिताः ॥

इति तत्तत्समुक्तविधिना तत्रतत्रोक्तविधिनानेन पीठं तोयादिभिरुपहारैः समर्च्य तदुपधां पीठोपाधौ स्फुरन्तीं प्रकृतिम् अर्घ्यदानेन प्रतर्प्य तत्र पीठे मनुबिम्बमयीं मूर्तिं च स्वस्वमूलमन्त्रपूर्वं 'विष्णुमूर्तये नम' इत्यादिमन्त्रैः पुष्पाञ्जलिना प्रकल्प्य तत्र मन्त्री मन्त्रचैतन्यावाहनविधिज्ञः मन्त्रचितिं मन्त्र-चैतन्यमावाहयतु ॥ ६० ॥

आवाहनविधिमाह — तारेति । तारत्रयं चलनसंग्रहणोद्गमार्थं तत्र प्रथमप्रणवेन चलनं स्वस्थानाद् भेदनं द्वितीयेन संग्रहणं स्वीकरणं तृतीयेनो-द्गमः ऊर्ध्वं गमनम् एतत्रयार्थमुक्त्वा उपचारनुतिकृत् उपचारेण स्तुतिं कु-र्वन् निजहृत्सरोजात् चेतनकलां चैतन्यांशम् उन्नीय ऊर्ध्वं नीत्वा तारेण बन्धाद् विरहय्य स्वस्मात् पृथक् कृत्वा ध्रुवतः परे आत्मनि विलाप्य मूलमुच्चरन्

---

१. 'न्त्री ॥ स्था(ण्व?ण्वात्म)कः स्मररिपावुपचारमन्त्रो विष्णौ जितन्त इति सेषाहरौ कुमार्याम् । शक्तिध्रुवाभिपुटितं स्वजिनार्णमार्ये स्यात् षण्मुखाणुरिपुजे गणपे गणानाम् ॥ ता' क, पाठः.

मन्त्रात्मना परिणमय्य सुधीः ससंबु-
द्ध्यागच्छयुग्ममभिधाय ततोऽञ्जलिस्थे ।
आवाहयामिमनुना भृतगन्धपुष्प-
तोयेऽवतार्य तनुयादथ मन्त्रमूर्तौ ॥ ६२ ॥

आवाहितोभवमुखैरभिवाहनी च
संस्थापनी समुपरिस्थनिरोधनी च ।
कार्याः समादिकनिधापनिका प्रसाद-
न्याख्या च पञ्च मनुभिः क्रमशोऽत्र मुद्राः ॥ ६३ ॥

केशादिपादचरमं मनुवर्यजापी
व्यापय्य गन्धरसचर्चितदोर्युगेन ।

मन्त्रात्मना परिणमय्य मन्त्रस्वरूपितां संपाद्य ससंबुद्धि सम्बुद्ध्या सह, सुधीरिति सम्बुद्धौ भगवच्छब्दोपादानञ्च इत्यर्थः, आगच्छयुग्मं 'भगवन्नागच्छागच्छ' इत्यभिधाय ततस्तस्मात् अञ्जलिस्थे भृतगन्धपुष्पतोये गन्धजलाभ्यां सह भृते पुष्पे आवाहयामिमनुनावतार्यार्थ मन्त्रमूर्तौ तनुयात् योजयेत् ॥ ६१, ६२ ॥

तदनन्तरमेव तन्मुद्राश्च प्रदर्शयेदित्याह — **आवाहितोभवमुखैरिति** । आवाहितोभवमुखैः 'आवाहितो भव' 'संस्थापितो भव' 'सन्निरुद्धो भव' सान्निध्यं कुरु कुरु' 'प्रसीद' इति मन्त्रैः क्रमशः पञ्च मुद्राः कार्याः । कास्ताः, अभिवाहनी आवाहनीत्यर्थः । संस्थापनी च समुपरिस्थनिरोधनी च सन्निरोधनी चेत्यर्थः । समादिकनिधापनिका सान्निधापनीत्यर्थः । प्रसादन्याख्या प्रसादनी च । अत्र मुद्रा इति पक्षान्तरे मुद्राणां तन्मन्त्राणां च बहुविधत्वमुक्तम् ॥ ६३ ॥

ततः क्रियाशेषमाह — **केशादीति** । गन्धरसचर्चितदोर्युगेन गन्धरस-

---

१. 'हि', २. 'पि' क. पाठः. ३. 'धि' इति मूलकोशपाठः. ४. 'दि' क. पाठः. ५. 'युक्तो त', ६. 'णां मन्त्र' ख. पाठः.

विन्यस्य सर्वमिह सायुधभूषणान्तं
देवं विभावयतु तत्तदणूपपत्त्या ॥ ६४ ॥

भास्वद्भास्वत्सहस्रप्रभमरिदरकौमोदकीपङ्कजानि
द्राघिष्ठैर्बाहुदण्डैर्दधतमजितमापीतवासो वसानम्।
ध्यायेत् स्फायत्किरीटोज्ज्वलमकुटमहाकुण्डलं वन्यमाला-
वत्सश्रीकौस्तुभाढ्यं स्मितमधुरमुखं श्रीधराश्लिष्टपार्श्वम् ॥

लिप्तकरद्वयेन मनुवर्यजापी मूलमन्त्रं जपन् केशादिपादचरमं व्यापय्य इह देवे सायुधभूषणान्तं सर्वं लिपितत्त्वमन्त्राक्षरात्मायुधभूषणादीनि विन्यस्य तत्तदणूपपत्त्या तत्तन्मन्त्रस्य योग्यया प्रतिपत्त्या देवं विभावयतु ध्यायतु ॥ ६४ ॥

ध्यानानि पृथक् पृथगाह — **भास्वदित्यादिभिः**। अजितं ध्यायेत्। कथंभूतं, भास्वद्भास्वत्सहस्रप्रभं भास्वतां दीप्तिमतां भास्वतामादित्यानां सहस्रस्य प्रभया तुल्यप्रभम्। द्राघिष्ठैः दीर्घतरैर्बाहुदण्डैः अरिदरकौमोदकीपङ्कजानि चक्रशङ्खगदापद्मानि दधतं धारयन्तम्। आपीतवासो वसानम् आपीतं वासो वस्त्रं वासयन्तम्। स्फायत्किरीटोज्ज्वलमकुटमहाकुण्डलं प्रकाशयता किरीटेनोज्ज्वलानि मकुटमहाकुण्डलानि यस्य तम्। वन्यमालावत्सश्रीकौस्तुभाढ्यं वनमालया श्रीवत्सेन श्रीकौस्तुभेन च परिपूर्णम्। स्मितमधुरमुखं स्मितेन माधुर्ययुक्तवक्त्रं श्रीधराश्लिष्टपार्श्वं लक्ष्म्या भूम्या चाश्लिष्टपार्श्वद्वयम्। अत्रायुधानां भूषणानां च न्यासेन पूजायां च मन्त्राः क्रमश्च सूचिताः। 'चक्राय नमः' 'शङ्खाय नमः' 'गदायै नमः' 'पद्माय नमः' इत्यायुधमन्त्रास्तत्तत्स्थानेषु न्यस्याः पूज्याश्च। तथा 'किरीटाय नमः' 'मकुटाय नमः' 'मकरकुण्डलाभ्यां नमः' 'वनमालायै नमः' 'श्रीवत्साय नमः' 'श्रीकौस्तुभाय नमः' 'श्रियै नमः' 'पुष्ट्यै नमः' इति भूषणादीनां मन्त्राः। एवं सर्वदेवेष्वपि तत्तद्ध्यानश्लोकादायुधभूषणन्यासाः पूजा च ग्राह्याः ॥ ६५ ॥

---

१. 'करम' क. पाठः.

बिभ्रद् दोर्भिः कुठारं मृगमभयवरौ सुप्रसन्नो महेशः
सर्वालङ्कारदीप्तः सरसिजनिलयो व्याघ्रचर्मोत्तवासाः ।
ध्येयो मुक्तापरागामृतरसकलिताद्रिप्रभः पञ्चवक्त्र-
स्त्र्यक्षः कोटीरकोटीघटिततुहिनरोचिष्कलातुङ्गमौलिः ॥

ध्येयो जटामकुटचन्द्रकलेद्धमूर्धा
त्र्यक्षस्तरक्ष्वजिनपीतदुकूलवासाः ।
ईशाच्युतस्त्रिशिखचक्रकपालशङ्खान्
बिभ्रत् सितासितवपुर्द्व्युचितात्मभूषः ॥ ६७ ॥

तथा च महेशो ध्येयः ध्यातुं शक्यः । दोर्भिः करैः कुठारं मृगमभयवरौ च बिभ्रद् धारयन् । सुप्रसन्नः सुतरां प्रसन्नः । सर्वालङ्कारदीप्तः सर्वैरलङ्कारैः शोभमानः । सरसिजनिलयः पद्मस्थः । व्याघ्रचर्मोत्तवासाः वैयाघ्रं चर्म वसानः । मुक्तापरागामृतरसकलिताद्रिप्रभः मुक्ताफलानां चूर्णैरमृतरसमिश्रितैर्निर्मितपर्वताकारः । पञ्चवक्त्रः पञ्चभिराननैर्युक्तः । त्र्यक्षः वक्त्रेषु प्रत्येकं त्रिभिस्त्रिभिर्नेत्रैश्च युक्तः । कोटीरकोटीघटिततुहिनरोचिष्कलातुङ्गमौलिः जटाभारस्याग्रभागे घटितया चन्द्रकलया युक्तः उन्नतो मौलिर्यस्य सः ॥ ६६ ॥

तथा ईशाच्युतश्च ध्येयः । जटामकुटचन्द्रकलेद्धमूर्धा जटाभिः मकुटेन चन्द्रकलया च दीप्तो मूर्धा यस्य सः । त्र्यक्षस्त्रिनेत्रः । तरक्ष्वजिनपीतदुकूलवासाः व्याघ्रचर्म पीतदुकूलं च वासो यस्य सः । त्रिशिखचक्रकपालशङ्खान् शूलं चक्रं कपालं शङ्खं च बिभ्रद् भरमाणः । सितासितवपुः वपुषो दक्षभागे श्वेतवर्णः वामभागे कृष्णवर्णश्च । द्व्युचितात्मभूषः शिवस्य विष्णोश्च उचितया योग्यया भूषया युक्तः ॥ ६७ ॥

---

१. 'बिभ्रद् भुजैस्त्रिशलचक्रकपालशङ्खान् श्वेतासितो द्विविधभूषणभृद्वरीशः ॥' ख, पाठः.

दुर्गां ध्यायतु दुर्गतिप्रशमनीं दूर्वादलश्यामलां
चन्द्रार्धोज्ज्वलशेखरां त्रिणयनामापीतवासोवसम् ।
चक्रं शङ्खमिषुं धनुश्च दधतीं कोदण्डबाणांशयो-
र्मुद्रे वाभयकामदे सकटिबन्धाभीष्टदां वानयोः ॥ ६८ ॥

स्फुरन्मकुटपत्रकुण्डलविभूषितं चम्पक-
स्रजाकलितकन्धरं करयुगेन शक्तिं पविम् ।
दधानमथवा कटीकलितवामहस्तेष्टदं
गुहं घुसृणभासुरं स्मरतु पीतवासोवसम् ॥ ६९ ॥

विघ्नेशं सपरश्वधाक्षपटिकादन्तोल्लसल्लड्डुकै-
र्दोर्भिः पाशसृणिस्वदन्तवरदाढ्यैर्वा चतुर्भिर्युतम् ।

दुर्गां ध्यायतु । दुर्गतिप्रशमनीं दुर्गतिर्दारिद्र्यं तत् प्रकर्षेण शमनशीलाम् । दूर्वादलश्यामलां दूर्वादलवत् श्यामवर्णाम् । चन्द्रार्धोज्ज्वलशेखरां चन्द्रकलयोज्ज्वलेन शिरोलङ्कारेण युक्ताम् । त्रिनयनां नेत्रत्रययुक्ताम् । आपीतवासोवसम् आपीतं वासो वस्त्रं वस्त इत्यापीतवासोवाः ताम् । चक्रं शङ्खमिषुं धनुश्च चक्रशङ्खशरचापान् दधतीम् । कोदण्डबाणांशयोः धनुश्शरयोः स्थाने अभयकामदे अभयवरदे मुद्रे वा, अनयोः करयोः सकटिबन्धाभीष्टदां वा कट्यां बन्धः कटिबन्धः कटिबन्धेन वरदेन च युक्तां वा ॥ ६८ ॥

गुहं च स्मरतु । स्फुरन्मकुटपत्रकुण्डलविभूषितं स्फुरता शोभमानेन मकुटेन पत्रमयाभ्यां कुण्डलाभ्यां च विशेषेण भूषितम् । चम्पकस्रजाकलितकन्धरं चम्पकमय्या मालयालङ्कृतग्रीवम् । करयुगेन करद्वयेन शक्तिं पविं च दधानम् ।(ശക്തി=വേൽ. പവി=വജ്രം)। अथवा कटीकलितवामहस्तेष्टदं कटीकलितवामहस्तेन युक्तं दक्षिणेनेष्टदं च । घुसृणभासुरं कुङ्कुमवद् भासमानं कुङ्कुमेन भासमानं वा । पीतवासोवसं पीतं वासो वस्त इति पीतवासोवाः तम् ॥ ६९ ॥

विघ्नेशं च तथा संस्मरेत् । सपरश्वधाक्षपटिकादन्तोल्लसल्लड्डुकैः परशुना अक्षमालया स्वदन्तेन उल्लसद्भिर्लड्डुकैः चतुर्भिर्दोर्भिः करैर्युतम् । पाशसृणिस्वदन्तवरदाढ्यैः पाशाङ्कुशस्वदन्तवरदसहितैश्चतुर्भिः करैर्वा युतम् ।

शुण्डाग्राहितबीजपूरमुरुकुक्षिं त्रीक्षणं संस्मरेत्
सिन्दूराभमिभास्यमिन्दुशकलाद्याकल्पमब्जासनम् ॥
स्निग्धारालविसारिकुन्तलभरं सिंहासनाध्यासिनं
स्फूर्जत्पत्रसुकल्पसकुण्डलमथेष्विष्वासभृद्दोर्द्वयम् ।
नीलक्षौमवसं नवीनजलदश्यामं प्रभासत्यक-
स्फायत्पार्श्वयुगं सुरक्तसकलाकल्पं स्मरेदार्यकम् ॥ ७१ ॥
इत्यादितत्तत्समभीष्टमन्त्र-
कल्पप्रकल्पसक्रमतोऽत्र देवम् ।
निध्याय बुद्ध्या निशिताग्रयाङ्ग-
प्रत्यङ्गभङ्ग्या प्रकरोतु साक्षात् ॥ ७२ ॥

शुण्डाग्राहितबीजपूरं शुण्डाया नासाया अग्रे गृहीतेन बीजपूरेण युतम् । उरुकुक्षिं बृहज्जठरम् । त्रीक्षणं त्रिनेत्रम् । सिन्दूराभं सिन्दूरवद् रक्तवर्णम् । इभास्यं गजवदास्येन युक्तम् । इन्दुशकलाद्याकल्पं चन्द्रकला(दि)भिरलङ्कारैर्युतम् । अब्जासनं पद्मस्थं च उपविष्टं च ॥ ७० ॥

अथार्यकं[1] स्मरेत् । स्निग्धारालविसारिकुन्तलभरं स्निग्धेन अपरुषेणारालेन वक्रेण विसारिणा विप्वक्प्रसरणशलिन कुन्तलभरेण केशभरेण युक्तम् । सिंहासनाध्यासिनं सिंहलाञ्छितमासनमधिरुह्यासीनम् । स्फूर्जत्पत्रसुकल्पसकुण्डलं स्फुरता पत्रेण सुष्ठुकल्पितकुण्डलयुतम् । इष्विष्वासभृद्दोर्द्वयं शरचापभृता करद्वयेन युतम् । नीलक्षौमवसं नीलवर्णं क्षौमं वसानम् । नवीनजलदश्यामं नूतनमेघवत् श्यामवर्णम् । प्रभासत्यकस्फायत्पार्श्वयुगं प्रभाख्यया भार्यया सत्यकाख्येन पुत्रेण च शोभमानाभ्यां पार्श्वभागाभ्यां युक्तम् । सुरक्तसकलाकल्पं सुतरां रक्तैः सकलैरलङ्कारैर्युतं च ॥ ७१ ॥

अत्र पूजायाम् इत्यादितत्तत्समभीष्टमन्त्रकल्पप्रकल्पसक्रमतः एवमाद्युक्तप्रकारेण तस्य तस्य स्वाभिमतस्य मन्त्रस्य कल्पे निर्दिष्टेन मार्गेण देवं निशिताग्रया बुद्ध्या निध्याय बुद्ध्यावलोक्य अङ्गप्रत्यङ्गभङ्ग्या अङ्गानां मुखादीनां प्रत्यङ्गानां चक्षुःश्रोत्रादीनां भङ्ग्या सौष्ठवेन साक्षात् प्रकरोतु प्रत्यक्षीकरोतु ॥ ७२ ॥

---

१. 'कं च स्म', २. 'समान' ख. पाठः.

तस्मै निजेष्टमनुरूपतया स्वभक्त्या
प्रादुस्सते दिशतु विष्टरमिष्टपीठम्।
आराध्य मूलमनुनाङ्घ्रियुगे प्रसूनै-
स्तं स्वागतं प्रवदतूपहृतीश्च दद्यात्॥ ७३॥
पाद्यार्घ्याचामादिकल्पत्योपहारा-
नीशार्धेशश्रीशविघ्नेश्वरेषु।
देवेष्वन्येष्वर्घ्यपाद्यादिकल्पत्या
दद्यान्मन्त्री षोडश प्रायशोऽत्र॥ ७४॥
अर्घ्यं समर्पयतु दक्षिणदोष्णि दोर्भ्यां
मूर्ध्न्येव वा दरभृतं पदयोश्च पाद्यम्।

स्वभक्त्या निमित्तेन निजेष्टमनुरूपतया स्वस्येष्टमन्त्ररूपत्वेन प्रादुस्सते प्रकाशीभवते तस्मै देवाय इष्टपीठं पूजितपीठं विष्टरम् आसनं स्मृत्वा दिशतु दद्यात्। अङ्घ्रियुगे तस्य पादयोः मूलमनुना प्रसूनैराराध्य तं देवं प्रति स्वागतं स्वागतमिति वदतु। उपहृतीश्च दद्यात्॥ ७३॥

अत्र ईशार्धेशश्रीशविघ्नेश्वरेषु शिवशिवनारायणगणपतिषु पाद्यार्घ्याचामादिकल्पत्या पाद्यार्घ्याचमनीयक्रमेण, अन्येषु विष्ण्वादिषु देवेषु अर्घ्यपाद्यादिकल्पत्या प्रायशः सर्वत्र षोडशोपहारान् दद्यात्। तथा च प्रपञ्चसारे—

"आसनस्वागते सार्घ्यपाद्ये साचमनीयके।
मधुपर्काचमस्नानवसनाभरणानि च॥
सगन्धसुमनोदीपधूपनैवेद्यचन्दनाः।
प्रयोजयेदर्चनायामुपचारांस्तु षोडश॥"

इति। मन्त्रीत्यनेनात्रोपहारसमर्पणे स्वस्वमूलानन्तरम् 'ओं अर्घ्यमिदं समर्पयामि' इत्यादिमन्त्रविशेषयोजनम् उपहाराणां प्रत्येकमाद्यन्तयोर्जलदाने चोक्तम्॥

तत्रार्घ्यादिदाने कृतिमाह — अर्घ्यमिति। दरभृतं शङ्खे गृहीतमर्घ्यम् उभाभ्यां कराभ्यां तस्य दक्षिणदोष्णि दक्षिणे करे वा मूर्ध्न्येव वा

---

१. 'न् शार्वार्धेश', २. 'हरेद् दरभृतं वदने कराभ्यां पाद्यं पदाब्जयुजि चाचमनं तथास्ये। तद्दक्षदोष्णि मधुपर्कमुदग्रतोषपोषं ददातु पुनराचमनं पुरोवत्॥ दद्यात् क्रमात् स्नपनवस्त्रयुगोपवीतसंभू' ख. पाठः.

आचामकं च मधुपर्कमपि प्रदद्यात्
पाणौ पुरेव पुनराचमनीयकं च ॥ ७५ ॥

संस्नाप्य रातु वासनद्वितयोपवीत-
संभूषणान्यथ यजेज्जलगन्धपूर्वैः ।
प्राक् स्नानतः परिषदोऽत्र विहृत्य विष्वक्
ताभ्यः पृथक् प्रदिशतूपहृतीर्यथार्हम् ॥ ७६ ॥

आराध्य तत्र कुसुमं प्रणवेन भाव्यं
देवात् तथा प्रसरणं परिषद्गणस्य ।
सिन्धोर्यथोर्मिपटलस्य यथा च वह्ने-
रिद्धात् स्फुलिङ्गनिकरस्य भिदाभिदावत् ॥ ७७ ॥

ईशे षडावृतिरियं पारिवारकल्पिः
पञ्चावृतिः पयसिजाक्षनिसुम्भहन्त्र्योः ।

समर्पयतु । तथा दत्तगृहीतं पाद्यं पदयोश्च । आचामकं च मधुपर्कं च दक्षिणे पाणौ प्रदद्यात् । पुनराचमनीयकं च पुरेव पूर्वाचमनीयवत् ॥ ७५ ॥

संस्नाप्य स्नानं कारयित्वा वसनद्वितयोपवीतसंभूषणानि वस्त्रद्वयमुपवीतं भूषणं च रातु दद्यात् । अथ जलगन्धपूर्वैः जलगन्धपुष्पधूपदीपैर्यजेत् । अत्र स्नानतः प्राक् परिषदः परिवारान् विष्वक् समन्ताद् विहृत्य देवान् पृथक् कल्पयित्वा ताभ्यः परिषद्भ्य उपहृतीः यथार्हं यथायोग्यं पृथक् प्रदिशतु ॥ ७६ ॥

परिषत्प्रसरणकृत्तिमाह — आराध्येति । तत्र देवे प्रणवेन कुसुममाराध्य देवात् परिषद्गणस्य प्रसरणं पृथग्भावं तथा भाव्यं कल्पनीयं, यथा सिन्धोः समुद्राद् ऊर्मिपटलस्य लहरीसमूहस्य यथा चेद्धाद् दीप्ताद् वह्नेः स्फुलिङ्गनिकरस्याग्निकणानां समूहस्य तथा भिदाभिदावद् भेदवदभेदवच्च ॥ ७७ ॥

ईशे इयं परिवारकृप्तिः परिवाराणां व्यवस्था षडावृतिः षड्भिरावरणैर्युक्ता । पयसिजाक्षनिसुम्भहन्त्र्योः विष्णुदुर्गयोः पञ्चावृतिः । परेषु चतुरा

प्रोक्ता परेषु च तदावृतिरङ्गपूर्वा
सर्वेषु शर्वगुहयोरपि मूर्तिपूर्वा ॥ ७८ ॥
अङ्गान्यष्ट हरौ यजेच्छतमखाद्याशासु वर्मान्तिमं
दिक्ष्वस्त्रं विदिशीति पञ्च च कुमार्यां तत् तथाग्नेऽक्षि च ।
अग्नीशाशरवायुदिक्षु पुरतोऽक्ष्यन्तं दिशास्वस्त्रकं
षण्मुखेऽस्त्रयजनान्ते नेत्रमग्नेऽन्तिमम् ॥ ७९ ॥
हरौ प्रचेतस्यपि वैनतेयं सुदर्शनं प्रेतपतौ सुधांशौ ।
कौमोदकीमाग्न्यभिधेयान्ते कोणेषु चाग्न्यादिषु पाञ्चजन्यम् ॥
शोषास्पदे शार्ङ्गमथेषुधी द्वौ
सुग्रीवके भृङ्गपदे च खड्गम् ।
मुख्ये च खेटं वितथे श्रियं च
पुष्टिं दितावग्रेभुवि स्वमालाम् ॥ ८१ ॥

वृतिः प्रोक्ता । सर्वेषु अङ्गपूर्वा तास्वावृतिष्वङ्गावरणपूर्वा प्रोक्ता । शर्वगुहयोरपि मूर्तिपूर्वा मूर्त्यावरणपूर्वा च ॥ ७८ ॥

हरौ अष्टाङ्गानि शतमखाद्याशासु पूर्वाद्यष्टदिक्षु यजेत् । तत्र पञ्चाङ्गानि पूर्वादिदिक्षु वर्मान्तिमं कवचान्तिममङ्गचतुष्कं, विदिशि अग्न्यादिकोणेष्वस्त्रं च । कुमार्यां तद् अङ्गार्चनं तथा हरेः पञ्चाङ्गवत्, अग्नेऽक्षि नेत्रं च । शेषेषु देवेषु षडङ्गानि अग्नीशाशरवायुदिक्षु अग्नीशाननिर्ऋतिवायुकोणेषु पुरतश्चाक्ष्यन्तं, पूर्वादिदिशास्वस्त्रकं च । षण्मुखे इति उक्तप्रकारेणास्त्रयजनान्ते अग्नीशाशरवायुदिक्षु चत्वार्यङ्गानि, पूर्वादिदिक्ष्वस्त्रं चेष्ट्वा अग्नेऽन्तिमं नेत्रं च यजेत् ॥ ७९ ॥

त्रिधाम्न्यावरणद्वयान्ते अष्टाङ्गपञ्चाङ्गावरणयोरन्ते हरौ इन्द्रे प्रचेतस्यपि वरुणेऽपि वैनतेयं, प्रेतपतौ यमे सुदर्शनं, सुधांशौ सोमे कौमोदकीम्, आग्न्यादिकोणेषु च पाञ्चजन्यं च, शोषास्पदे वरुणवाय्वोर्मध्ये शार्ङ्गं, सुग्रीवके निर्ऋतिवरुणयोर्मध्ये द्वाविषुधी च । तत्र 'इषुधिभ्यां नम' इति मन्त्रः । भृङ्गपदे यमनिर्ऋत्योर्मध्ये खड्गम्, अथ मुख्ये वायुसोमयोर्मध्ये खेटं, वितथे अग्नियमयोर्मध्ये श्रियं, दितौ सोमेशानयोर्मध्ये पुष्टिम्, अग्रभुवि पुरोभागे स्वमालां

१. 'भुजाङ्गहेरम्बयोरपि षडावृतिका कृतश्चित् ॥ अङ्गादिका परिवृतिर्गदितास्त्रिकेषु मूर्त्यादिका गिरिशशक्तिभृतोर्गणेशे । तद्वत् षडावृतियुते चरमद्वयेन्द्रवज्राद्यकात्र प्रकल्पेषु पृथग् ध्रुवेऽन्वाः ॥ अङ्गा' ख. पाठः. २. 'र्यमणि स्व' क. पाठः.

श्रीवत्सचिह्नं च भृशे जयन्ते
श्रीकौस्तुभं च न्यसतु त्रिधाग्नि ।
एवं समुक्ताावृतिदिग्व्यवस्था
व्यत्यस्यते कैश्चिदियं क्वचिच्च ॥ ८२ ॥

गौरीपतौ पुंबहुरूपसद्यवामेशमूर्तीः परितः क्रमेण ।
इन्द्रार्कियारीड्वसुपालदिक्षु मूर्त्तीस्ततोऽङ्गावरणं प्रकल्प्य ॥
अनन्तसूक्ष्मौ च शिवोत्तमैकनेत्रैकरुद्रांश्च पुनस्त्रिमूर्तिम् ।
श्रीकण्ठसंज्ञं च शिखण्डिनं च वृषेशपूर्वासु च दिग्विदिक्षु ॥
उमां च चण्डेश्वरनन्दिनौ च
तथा महाकालगणेश्वरौ च ।
वृषं न्यसेद् भिङ्गिरिटिं क्रमेण
स्कन्दं च सोमाद्यनिलान्तदिक्षु ॥ ८४ ॥

वनमालां च, भृशे इन्द्राग्न्योर्मध्ये श्रीवत्सचिह्नं श्रीवत्साख्यं चिह्नं, जयन्ते ईशेन्द्रयोर्मध्ये श्रीकौस्तुभं च न्यसतु कल्पयतु । परिवाराणां सर्वेषां तारादयश्चतुर्थीनमोन्ता एव मन्त्राः । एवं समुक्ता इयमावृतिदिग्व्यवस्था अवृतेर्दिशां क्लप्तिः कैश्चिद् देशिकैः क्वचित् पश्चिममुखादौ व्यत्यस्यते व्यत्यासः क्रियते ॥ ८०, ८१, ८२ ॥

गौरीपतौ परितः इन्द्रार्किवारीड्वसुपालदिक्षु इन्द्रः स्वयमेव आर्किर्यमः वाराड् वरुणः वसुपालो वैश्रवणः एषां दिक्षु ऐश्यां च क्रमेण पुंबहुरूपसद्यवामेशमूर्तीः तत्पुरुषाघोरसद्योजातवामदेवेशानमूर्तीः प्रकल्प्य ततोऽङ्गावरणं च प्रकल्प्य वृषेशपूर्वासु वृषा इन्द्रः ईश ईशानः इन्द्रादिदिक्षु ईशादिविदिक्षु च क्रमेणानन्तसूक्ष्मौ द्वौ शिवोत्तमैकनेत्रैकरुद्रांश्च त्रीन् पुनस्त्रिमूर्तिं श्रीकण्ठसंज्ञं शिखण्डिनं च न्यसेत् कल्पयेत् । तथा तद्बहिः सोमाद्यनिलान्तदिक्षु उत्तरादिवाय्वन्तदिक्षु प्रादक्षिण्यक्रमेण उमां च चण्डेश्वरनन्दिनौ च द्वौ महाकालगणेश्वरौ च द्वौ वृषं भिङ्गिरिटिं स्कन्दं च न्यसेत् ॥ ८३, ८४ ॥

---

१. 'दलमूलकेषु ।' ख. पाठः. २. 'क्स्था मू' । क., 'क्स्थेपूर्वं ततोऽङ्गाव' ख. पाठः. ३. 'रथाङ्गा' इति मूलकोशपाठः.

स्कन्दे[1] न्यसेद् दिक्षु सनत्कुमारं
स्कन्दं च बाणं च सहेमचूडम् ।
भद्रादिसेनं भवपुत्रदेव-
सेने शिवाद्यश्रिषु देवयानीम् ॥ ८६ ॥

अङ्गान्ते पुरुषादिसद्यचरमाः स्वाशासु शैवीः क्रमा-
दन्याश्चाश्रिषु पावकादिषु चतस्रो वासुदेवादिकाः ।
मूर्तीः कल्पयतु त्रिलोचनहरौ प्राक् चण्डसेनादिह
स्वं वाहं वृषसंज्ञकं च गरुडात्मानं सुधीरग्रतः ॥ ८७ ॥

न्यस्य जयां विजयामपि कीर्तिं प्रीतिं प्रभां तथा श्रद्धाम् ।
मेधां श्रुतिं द्वितीयावरणे प्रागादिदिक्क्रमात् तदनु ॥ ८८ ॥
चक्रं शङ्खं सगदं खड्गं पाशाङ्कुशौ शरं च धनुः ।
स्थापयतु सुम्भहन्त्र्यां षोडशकेऽस्त्रादिमाक्षरं बीजम् ॥ ८९ ॥

स्कन्दे दिक्षु सनत्कुमारं स्कन्दं च बाणं च सहेमचूडं हेमचूडं च, शिवाद्यश्रिषु ईशादिकोणेषु भद्रादिसेनं भद्रसेनं भवपुत्रदेवसेने भवपुत्रं देवसेनां च देवयानीं च न्यसेत् ॥ ८५, ८६ ॥

त्रिलोचनहरौ तत्राङ्गान्ते अङ्गावरणान्ते स्वाशासु स्वस्वदिक्षु पुरुषादिसद्यचरमाः तत्पुरुषादिसद्योजातान्ताः शैवीश्चतस्रः, पावकादिष्वश्रिष्वन्या वासुदेवादिकाश्चतस्रश्च मूर्तीः क्रमात् कल्पयतु । इह तु चण्डसेनाद् निर्माल्यधारिणः प्राक् पूर्वमग्रतो वृषसंज्ञकं गरुडात्मानं 'वृषाय गरुडात्मने नम' इति स्वं वाहनं च कल्पयतु । सुधीरिति उक्तैः परिवारनामभिर्मन्त्रयोजनं विद्वानित्यर्थः ॥ ८७ ॥

सुम्भहन्त्र्यां द्वितीयावरणे प्रागादिदिक्क्रमात् जयां विजयामपि कीर्तिं प्रीतिं प्रभां तथा श्रद्धां मेधां श्रुतिं च न्यस्य तदनु तद्बहिः पूर्वक्रमेणैव चक्रं शङ्खं सगदं गदां च खड्गं पाशाङ्कुशौ द्वौ शरं धनुश्च स्थापयतु

---

१. 'न्दं' क. पाठः.

कीर्तिप्रीत्योर्मेधायाश्चाद्यस्वरयुतं विरेफं च ।
चक्रे रमेव संबुद्ध्यन्तमिहास्त्राष्टकं फडन्तं च ॥ ९० ॥

दिक्षु क्षुरिकां खड्गं धनुः शरं हुंफडादिकं न्यसतु ।
शार्वे मधुकरमग्नौ शम्बरमप्यार्यकेऽङ्गवृत्यन्ते ॥ ९१ ॥

न्यसतु गणञ्जयविघ्नेशैकादिकदंष्ट्रवीरगजवक्त्रान् ।
लम्बोदरवरदाभिधभक्तप्रियमष्टदिक्क्रमतः ॥ ९२ ॥

ओजस्वरबीजयुतान् विघ्नेशे चावृतौ द्वितीयायाम् ।
गदितमसाधारणमित्यावरणं कीर्तयेऽथ सामान्यम् ॥ ९३ ॥

कल्पयतु । अत्र षोडशके परिवारमन्त्रे आदिमाक्षरं स्वस्य स्वस्याद्यमक्षरं बीजं स्यात् ॥ ८८, ८९ ॥

कीर्तिप्रीत्योर्मेधायाश्च तिसृणामेतासाम् आद्यस्वरयुतम् अकारयुक्तं विरेफं रेफरहितं च 'कं कीर्त्यै नमः' 'पं प्रीत्यै नमः' 'मं मेधायै नमः' इति मन्त्रा इत्यर्थः । चक्रे रमेव रं इत्येव बीजम् । इहास्त्राष्टकम् आयुधाष्टकं सम्बुद्ध्यन्तं सम्बोधनप्रथमैकवचनान्तं फडन्तं च । 'रं चक्र फण् नमः' 'शं शङ्ख फण् नमः' 'गं गदे फट् नमः' इत्याद्या मन्त्रा इत्यर्थः ॥ ९० ॥

आर्यके अङ्गवृत्यन्ते अङ्गावरणान्ते दिक्षु क्षुरिकां खड्गं धनुः शरं च हुंफडादिकं न्यसतु । 'हुं फट् क्षुरिकायै नमः' इत्याद्या मन्त्राः । शार्वे कोणे मधुकरम् अग्नौ शम्बरं च ॥ ९१ ॥

विघ्नेशे द्वितीयायामावृतौ अष्टदिक्क्रमतः ओजस्वरबीजयुतान् अयुग्मस्वरैर्वृतेन गमिति बीजेन युतान् गणञ्जयविघ्नेशैकादिकदंष्ट्रवीरगजवक्त्रान् एकादिकदंष्ट्रः एकदंष्ट्रः एतान् पञ्च, लम्बोदरवरदाभिधभक्तप्रियं लम्बोदरं वरदं भक्तप्रियं च न्यसतु । इत्यसाधारणं प्रत्येकं नियतमावरणं गदितम् । अथ सामान्यमावरणं कीर्तये ॥ ९२, ९३ ॥

प्रागाद्याशास्विन्द्राग्नियमनिर्ऋतिवरुणवायुसोमेशानान्।
निर्ऋतावनन्तमीशे ब्रह्माणं मन्त्रवित् क्रमेण यजेत ॥ ९४ ॥

वज्रं शक्तिं दण्डं खड्गं पाशाङ्कुशौ गदां शूलम्।
चक्रं पद्मं च तथा न्यस्येदिन्द्रादिबाह्यतः क्रमतः ॥ ९५ ॥

विष्वक्सेनप्रमुखं निर्माल्यभुजं निजं निजं यजतु।
दिक्पालास्त्रावसितौ दिक्पावृत्यन्तरे च दितिभागे ॥ ९६ ॥

स्वाभीष्टमन्त्रपरिवारगणान् स्वपद्मे-
ष्वेवं निवेश्य दिशतूपहृतीश्च तेषु।
मूर्त्यङ्गपश्चिममिह स्नपनादिभूषा-
निष्ठा जलादिभिरथ प्रयजेदशेषान् ॥ ९७ ॥

तत्रोङ्कारनिजोपचारमनुवर्णाङ्गायुधाद्यैः सुधी-
र्देवं विन्यसनक्रमेण जलगन्धाभ्यां प्रसूनेन च।

प्रागाद्याशासु क्रमेण इन्द्राग्नियमनिर्ऋतिवरुणवायुसोमेशानान् निर्ऋतौ अनन्तम् ईशे ब्रह्माणं च यजेत। मन्त्रविदित्यनेन 'इन्द्राय सुराधिपतये विष्णुपारिषदे नमः' इत्यादिमन्त्रविशेषज्ञ इत्यर्थः ॥ ९४ ॥

इन्द्रादिबाह्यतः इन्द्रादीनां बाह्यावरणे क्रमेण तथा वज्रं शक्तिं दण्डं खड्गं पाशाङ्कुशौ गदां शूलं चक्रं पद्मं च न्यस्येत् ॥ ९५ ॥

दिक्पालास्त्रावसितौ दिक्पालानां तदस्त्राणां चावसाने दितिभागे सोमेशानयोर्मध्ये दिक्पावृत्यन्तरे दिक्पावरणस्यान्तर्भागे विष्वक्सेनप्रमुखं निजं निजं निर्माल्यभुजं यजतु ॥ ९६ ॥

स्वाभीष्टमन्त्रपरिवारगणान् स्वस्याभीष्टस्य मन्त्रस्य परिवारगणान् एवं स्वपद्मेषु स्वस्य स्वस्याधारभूतेषु पद्मेषु क्रमेण निवेश्य कल्पयित्वा तेषु परिवारेषु मध्ये इह मूर्त्यङ्गपश्चिमं यथा भवति तथा स्नपनादिभूषानिष्ठा उपहृतीः पृथक् प्रदिशतु। अथाशेषान् परिवारान् जलादिभिः प्रयजेत् ॥ ९७ ॥

तत्र यजने सुधीः जलगन्धाद्युपहाराणां देवे चित्पर्यन्तां व्याप्तिं ध्यायन् (देवम्) ओङ्कारनिजोपचारमनुवर्णाङ्गायुधाद्यैः प्रणवेन निजनिजोपचारेण मूलेन

---

१. 'पतिभागे च सर्वदेवेषु ॥', २. 'समन्तादवं' ख. पाठः. ३. 'ज' क. पाठः. ४. 'ण', ५. 'ष्वेषु क' ख. पाठः. ६. 'प्रा' क. पाठः.

याजं याजमथैतदीयपरिवारांश्चान्तरङ्गक्रमा-
न्निर्माल्याद्यवसानिकान् निजनिजस्थानेषु संपूजयेत् ॥

सूनावसानैरिति सावृतिं तं संपूज्य पुष्पावृतिमातनोतु ।
पूर्तिं च पुष्पैस्तुलसीद्वयाद्यैर्गन्धाम्बुसिक्तैर्गदितक्रमेण ॥

आद्या कार्या प्रसूनावृतिरिह यजता सोपचारेण पुष्पै-
र्मूलेनापि त्रिवारं हरिमखिलपरीवारकानेकशश्च ।
मूलार्णैस्तं द्वितीया दिगधिपरहितावृत्युपेतं तृतीया
मूलेनाङ्गावृतं केवलमथ परतत्त्वेन तुर्या त्रिरेनम् ॥१००॥

च तथा तदक्षरैरङ्गैरायुधमन्त्रैर्भूषणमन्त्रैश्च न्यासस्थानेषु विन्यसनक्रमेण जलगन्धाभ्यां प्रसूनेन च यां यां याजमिष्ट्वा निर्माल्याद्यवसानिकान् स्वस्वनिर्माल्यधार्यवसानभूतानेतदीयपरिवारान् अन्तरङ्गक्रमात् अन्तराद्यावरणक्रमात् निजनिजस्थानेषु सम्पूजयेत् ॥ ९८ ॥

इति सूनावसानैः पुष्पावसानैः सावृतिमावरणसमेतं तं देवं सम्पूज्य पुष्पावृतिमातनोतु । तुलसीद्वयाद्यैर्गन्धाम्बुसिक्तैः विविधैः पुष्पैर्गदितक्रमेण पूर्तिं पुष्पपूरणं च ॥ ९९ ॥

पुष्पावृतिमाह — **आद्येति** । इह पुष्पावृतौ यजता साधकेन । हरिमित्यनेन विष्णावेवायं विशेष इति द्योत्यते । हरिं सोपचारेण मूलेनापि (पुष्पैः) त्रिवारं त्रित्रिवारम्, अखिलपरीवारकान् अङ्गादिनिर्माल्यधार्यन्तानखिलान् परिवारानेकशश्च इत्याद्या प्रसूनावृतिः कार्या । ततः तं हरिं मूलार्णैः त्रित्रिवारं दिगधिपरहितावृत्युपेतम् इन्द्रवज्राद्यावरणरहितैरन्यैरङ्गादिभिस्त्रिभिरावरणैरुपेतं द्वितीया पुष्पावृतिः । अङ्गावृतम् अङ्गावरणद्वयेनैवोपेतं तं मूलेन त्रिवारं तृतीया पुष्पावृतिः । अथ केवलमेनं परतत्त्वेन प्रणवेन त्रिः त्रिवारं तुर्या चतुर्थी पुष्पावृतिः ॥ १०० ॥

---

१. नम् ॥ मसा', २. 'न्त्रैश्च' ख. पाठः.

दुर्गां प्रागुपचारतोऽखिलपरीवारैरमा मूलतो
द्वेधाथाङ्गपुरस्सरावरणयुक्त्यान्ते स्वयं विद्यया ।
पुष्पैः शाम्भवपक्षतोऽखिलपरीवारैश्च मूर्त्यङ्गकैः
सार्धं केवलमप्युपार्हतु शिवे त्रेधा तथा वाखिले ॥

ससान्द्रघण्टानिनदेन नीचैर्धूपेन दीपेन समर्च्य चोच्चैः ।
देवं ससर्वावरणं प्रदद्यात् सकृत्सकृद् वारि तदावृतिभ्यः ॥

तारेण देवेऽनुगतं विभूति-
जातं प्रसूनार्पणतो विभाव्य ।
किञ्चित् समभ्यर्च्य ददातु तस्मै
तथार्घ्यपाद्याचमनीयकानि ॥ १०३ ॥

दुर्गां प्राग् आदौ उपचारतः उपचारमन्त्रेण अखिलपरीवारैरमा सर्वपरिवारैः सह पुष्पैराराधयेद् इत्येकधा, अथ तां मूलतः अङ्गपुरस्सरावरणयुक्त्या अङ्गावरणयोगेन इति द्वेधा द्विप्रकारेण कृत्वा पुनरन्ते विद्यया स्वयं द्वादशे पटले वक्ष्यमाणेन विद्यामन्त्रेण प्रधानभूतेनेत्यर्थः । शिवे तु शाम्भवपक्षतः, शम्भुपक्ष इति शिवस्य विग्रहपूजोक्ता, तेन शम्भुपक्षेण अखिलपरीवारैश्च सह तं शिवं पुष्पैरुपार्हतु इत्याद्या । पुनः मूर्त्यङ्गकैः मूर्तिभिरङ्गैश्च सह तमुपार्हत्विति द्वितीया । पुनः केवलं तमुपार्हत्विति तृतीया । शिवे इति त्रेधा त्रिप्रकारेण । अखिलेऽपि तथा त्रिप्रकारेण वा ॥ १०१ ॥

ततः कर्मशेषमाह — **ससान्द्रेति** । ससान्द्रघण्टानिनदेन गम्भीरेण घण्टानादेन सह धूपेन नीचैः नाभिमूलदर्शितेन, तथा दीपेन उच्चैः नेत्रदर्शितेन च ससर्वावरणं सर्वावरणैर्युक्तं देवं समर्च्य तदावृतिभ्यः तस्मै चावरणेभ्यश्च सकृत् सकृद् वारि प्रदद्यात् ॥ १०२ ॥

पुनस्तारेण प्रसूनार्पणतः प्रणवपुष्पाञ्जलिना विभूतिजातं परिवारव्यूहं देवेऽनुगतं विभाव्य लीनं ध्यात्वा मूलेन किञ्चित् समभ्यर्च्य तस्मै देवायार्घ्यपाद्याचमनीयकानि तथा पूर्वक्रमेण ददातु ॥ १०३ ॥

---

१. 'र्थः । तथा शि' ख. पाठः.

भूमिं विशोध्य विनिधाय हिरण्मयाद्यं
पात्रं पवित्रमभिधार्य विभोः पुरस्तात् ।
सम्पादयेद् रुचिरमत्र निवेद्यजातं
प्राज्याज्यकादलगुलादिपरिष्कृतं च ॥ १०४ ॥

प्रोक्ष्यास्त्रेण सुरक्ष्य वायुसलिलैः संशोध्य दग्ध्वाग्निम-
द्दोष्णा वामकरामृताप्लुतमिदं मन्त्रामृतीभावितम् ।
जप्त्वा मूलमथाष्टशः सुरभिमुद्रातः सुधापूरितं
प्राच्यैतद्ग्रहणस्पृहां कुसुमसंराध्या विभोर्भावयेत् ॥

कृत्वा यथोक्तं परिषेचनादिकं
दोर्भ्यां सपुष्पं रसनारुचीरिह ।
विसार्य मन्त्री विनिवेद्य दोर्युजा
ततोऽमृतं तद्वदने समर्पयेत् ॥ १०६ ॥

अथ विभोः देवस्य पुरस्ताद् भूमिं विशोध्य हिरण्मयाद्यं सुवर्णरजतादिभिर्निर्मितं पवित्रं शुद्धं पात्रं विनिधाय अभिधार्य उपस्तीर्यात्र प्राज्याज्यकादलगुलादिपरिष्कृतं प्रभूतेनाज्येन कदलीफलैः गुलैरुपदंशैश्च परितः क्षिप्तं रुचिरं रुचिकरं निवेद्यजातं पायसादि विविधं हविः सम्पादयेत् ॥ १०४ ॥

अथ इदं निवेद्यं प्रोक्ष्य अस्त्रेण स्वस्वास्त्रमन्त्रेण सुरक्ष्य वायुसलिलैः वायुबीजेन सलिलैः संशोध्य अग्निमद्दोष्णा अग्निबीजयुक्तेन दक्षिणकरेण दग्ध्वा दहनं भावयित्वा वामकरामृताप्लुतं वामकरस्थामृतबीजेनाप्लावितं मन्त्रामृतीभावितम् अमृतबीजजपेन अमृतीभावितमिदं मूलमष्टशो जप्त्वा सुरभिमुद्रातः सुरभिमुद्रया सह 'अमृतेऽमृतोद्भवेऽमृतवर्षिण्यमृतं स्रावय स्रावये'ति मन्त्रेण सुधापूरितं तद् मूलेन प्राच्यं कुसुमसंराध्या पुष्पसमाराधनेन विभोः देवस्य एतद्ग्रहणस्पृहाम् एतत्परिग्रहेच्छां भावयेत् ॥ १०५ ॥

मन्त्री परिषेचनासनादिस्वगृह्योक्तमन्त्रज्ञः यथोक्तं स्वस्वगृह्योक्तं परिषेचनादिकं कृत्वा दोर्भ्यां सपुष्पं पुष्पसहिताभ्यां कराभ्यां देवस्य रसनारुचीः रसनाया दीप्तीः इह निवेद्ये विसार्य (विनिवेद्य) 'निवेदयामी'त्यादिमन्त्रेण निवेदनं कृत्वा ततो दोर्युजा सपुष्पाभ्यां कराभ्याममृतं तद्वदने देवस्यास्ये समर्पयेत् ॥ १०६ ॥

---

१. 'क्षिप्तं' ख पाठः. २ 'र्यं' क पाठः.

निवेदयामि भवते जुषाणेदं हविर्हरे[1] ।
हरौ मन्त्रोऽयमन्येषु हरिस्थाने स्वनामवान् ॥ १०७ ॥
प्राणादिमुद्रोज्ज्वलदक्षदोष्णा सग्रासमुद्रान्यकरः स्वमन्त्रैः ।
अन्नाद् रसांशं मलधातुवर्जमायोजयेत् तद्वदनार्चिषीह ॥
देवे युनक्तु सकले जलगन्धपुष्प-
धूपप्रदीपकनिवेद्यगतान् रसांशान् ।
तोयोर्व्यनन्तपवनानलवारिसारान्
जिह्वानसोः श्रवणनाभिदृगाननेषु ॥ १०९ ॥
तत्तत्समर्पणविधौ निजभूतशक्तिः
साक्षादुदेत्य विमलाञ्जलिगं स्वसारम् ।

हरौ 'निवेदयामि भवते जुषाणेदं हविर्हरे!' इति निवेदनमन्त्रः । अन्येषु हरिस्थाने हरे इति स्थाने स्वनामवान् स्वस्वनामसहितः । 'जुषाणेदं हविर्हर' इत्यादीत्यर्थः ॥ १०७ ॥

इह निवेदनकाले प्राणादिमुद्रोज्ज्वलदक्षदोष्णा द्वादशे पटले वक्ष्यमाणाभिः प्राणादिमुद्राभिरुज्ज्वलेन दक्षिणकरेण सग्रासमुद्रान्यकरः ग्रासमुद्रासहितवामकरो भूत्वा स्वमन्त्रैः तत्रैव वक्ष्यमाणैः प्राणापानादिमन्त्रैः अन्नात् हविषः मलधातुवर्जं मलं धातुं च वर्जयित्वा रसांशं तद्वदनार्चिषि तद्वदनतेजसि आयोजयेत् ॥ १०८ ॥

अन्नरससमर्पणकथनप्रसङ्गात् षण्णामप्युपहाराणां समर्पणरीतिमाह— **देव** इति । सकले सावयवे देवे जिह्वानसोः श्रवणनाभिदृगाननेषु षट्सु स्थानेषु तोयोर्व्यनन्तपवनानलवारिसारान् अप्पृथिव्याकाशवायुतेजोजलानां षण्णां सारांशान् सूक्ष्मभूताकारान् जलगन्धपुष्पधूपप्रदीपकनिवेद्यगतान् पञ्चीकृतमहाभूतात्मकेषु षट्सु जलगन्धादिषु स्थितान् रसांशान् क्रमेण युनक्तु योजयेत् ॥

तत्तत्समर्पणविधौ तस्य तस्य जलादेः समर्पणकाले निजभूतशक्तिः स्वस्य साधकस्य पञ्चभूतात्मिकासु शक्तिषु मध्ये सा सा शक्तिः साक्षात् स्वस्वेन्द्रियाद् उदेत्य उद्गम्य विमलाञ्जलिगं विमलं विगतमलधातुकं तदेवाञ्जलिगं

---

१. 'ह ॥ ततो निवेद्य मुद्रिकां प्रधानया करद्वये स्पृशन्ननामिकां निजं मनुं जपन् प्रदर्शयेत् ॥ दे' ख. पाठः.

देवैतदक्षभवशक्तिकरे समर्प्य
तादात्म्यमेति तरसेत्यनुसन्दधीत ॥ ११० ॥
प्रत्येत्य शक्तिरपि सा निजाञ्जलिगतं रसम् ।
समर्प्य सकले तस्मिन् विलीनेति च भावयेत् ॥ १११ ॥
भूयो नैवेद्यसारामृतमयरसयोगेन हृन्मूर्त्यभिख्यं
देवं जाज्वल्यमानज्वलनरुचिमनुध्याय तां धेनुमुद्राम् ।
बद्ध्वा नद्धाञ्जलिः सन् मनुवरमभिजप्याष्टशोऽस्त्रेण रक्षां
कृत्वा बद्ध्वा कवाटं बहिरथ हविषा तन्मये ऽग्नौ जुहोतु ॥
परिसमूहनपूर्वविधावधौ परिसमर्चितपीठनिवेशितम् ।
यजतु देवममुं सकलीकृतं सपरिवारमथो जुहुयादिति ॥

शक्तेः कराञ्जलिगतं स्वसारं स्वसारभूतं रसं देवैतदक्षभवशक्तिकरे देवस्यैतस्मादेवेन्द्रियादुद्गच्छन्त्याः शक्तेः कराञ्जलौ समर्प्य तरसा वेगेन तादात्म्यम् ऐक्यम् एति गच्छतीति अनुसन्दधीत ध्यायेत् ॥ ११० ॥

सापि शक्तिः प्रत्येत्य देवं प्रतिगम्य निजाञ्जलिगतं रसं सकले तस्मिन् समर्प्य विलीना च भवतीति च भावयेत् ॥ १११ ॥

भूयः तदनन्तरं नैवेद्यसारामृतमयरसयोगेन नैवेद्यसारभूतेन अमृतमयेन रसेन यो(गात्) जाज्वल्यमानज्वलनरुचिम् अतिशयेन ज्वलदग्निनिभं हृन्मूर्त्यभिख्यम् उपहारप्रकाशिकायां 'हृन्मूर्तिं केचिदिच्छन्ती'त्याद्युक्तस्वरूपं देवमनुध्याय ताम् अमृतवर्षं कुर्वतीं धेनुमुद्रां बद्ध्वा नद्धाञ्जलिः सन् बद्धाञ्जलिर्भूत्वा अष्टशो मनुवरं मूलमन्त्रमभिजप्यास्त्रेण रक्षां कृत्वा कवाटं बद्ध्वाथ बहिः तन्मये देवमये अग्नौ हविषा जुहोतु ॥ ११२ ॥

पूजाहोमं विवृणोति — **परिसमूहनेति** । परिसमूहनपूर्वविधावधौ परिसमूहनादिक्रियावसाने परिसमर्चितपीठनिवेशितं पूजितपीठे आवाहितं सकलीकृतं देवममुं सपरिवारं परिवारसहितं यजतु । अथो इति वक्ष्यमाणविधिना जुहुयाच्च ॥ ११३ ॥

---

१. 'वे' इति मूलकोशपाठः. २. 'या' क. पाठः. ३. 'र्पि' ख. पाठः.

सतारभूरादिकपीठिकाणुभिः
सकृत्सकृत् साष्टशतं स्वमूलतः ।
दशांशमङ्गाणुभिरेकशः परै-
र्निजावृतिव्याहृतितारकैः क्रमात् ॥ ११४ ॥
प्रसन्नयज्वा परिपट्टलिं च
मन्त्री हुताशेऽथ समीरणे वा ।
द्वारोपसन्ने प्रविधाय चाचा-
न्तोऽन्तर्विशेद् द्वाःस्थकृताभ्यनुज्ञः ॥ ११५ ॥
संवन्द्य पानीयसमर्पणं च
कृत्वा समुद्वास्य मुखार्चिरास्ये ।
दत्त्वा पिधानीयजलं तदन्नं
निर्माल्यभुक्सात् प्रकरोतु मन्त्री ॥ ११६ ॥

सतारभूरादिकपीठिकाणुभिः प्रणवेन व्याहृतिभिः पीठमन्त्रैश्च सकृत् सकृत्, स्वमूलतः साष्टशतम् अष्टसहितं शतम्, अङ्गाणुभिर्मूलाद् दशांशं, परैरन्यैः निजावृतिव्याहृतितारकैः निजनिजावरणमन्त्रैर्व्याहृतिभिस्तारेण च (एकशः) क्रमात् जुहुयादिति पूर्वस्माच्छ्लोकादानयेत् ॥ ११४ ॥

प्रसन्नयज्वा अग्नौ प्रसन्नपूजाकृद् मन्त्री बलिमन्त्रज्ञः हुताशे वाथ समीरणे वा द्वारोपसन्ने द्वाराभ्याशे परिपट्टलिं च प्रविधाय च आचान्तः आचमनकृद् द्वाःस्थकृताभ्यनुज्ञः द्वाःस्थाभ्यां कृतानुज्ञः अन्तः प्रासादान्तः प्रविशेत् ॥ ११५ ॥

देवं संवन्द्य मन्त्री पानीयसमर्पणादिमन्त्रज्ञः पानीयसमर्पणं च कृत्वा मुखार्चिः रसनारुचीरास्ये समुद्वास्य पिधानीयजलं दत्त्वा तदन्नं निर्माल्यभुक्सात् प्रकरोतु निर्माल्यभुजोऽधीनं कुर्यात् ॥ ११६ ॥

---

१. 'स' क. पाठः. २. 'णाद्यं कृं', ३. 'न्त्रां ॥ उर्वीं विशोध्य वितरेत् पर-माय पुंसे गण्डूषदन्तपवनादियुतं क्रमेण । हस्तास्यमार्ष्टिमुखवासमुखोपहारान् देवं समर्च्य तमपूपमुखैर्धिनोतु ॥ एनं प्रसन्नं जलगन्धपुष्पैरभ्यर्च्य पुष्पाञ्जलिमादरेण । मन्त्रैर्मनीषी निगमागमाप्तैः कुर्वीत सर्वेश्वरतोषणाय ॥ गुरुभ्य इदमेवमादिपदपूर्वकेणाणुना करोतु कुसुमाञ्जलिं गुरुपितृम्वमात्रात्मनः । सहोदरकुटुम्बिनीतनयवंश्यसाध्यांस्तथा महीतलसमाश्रितांस्त्रिभुवनाश्रितांश्चोद्दिशन् ॥ प्राणातुमन्त्रेण समर्च्य कर्म तज्जप्त्वा पदाब्जस्मृगणुं सहस्रशः । गुह्यातिगुह्येत्यणुना जपार्पणं समाचरेत् सोदकमङ्गाग्रमूलके । इतः पूर्वं' ख. पाठः.

गण्डूषदन्तपवनादियुतं प्रदाय
हस्तास्यमार्ष्टिमुखवासमुखोपहारान् ।
देवं समर्च्य विनिवेद्य च लड्डुकाद्यं
वाद्यादिभिः प्रधिनुयाच्च नृपोपचारैः ॥ ११७ ॥
भूयः समर्च्य कुसुमाञ्जलिमिष्टमन्त्रैः
कृत्वा विधाय मनुवर्यसहस्रजापम् ।
गुह्यातिगुह्यमनुना प्रसमर्प्य भक्त्या
स्तुत्वा प्रदक्षिणविधिं प्रणतिं च कुर्यात् ॥ ११८ ॥
अथाराध्य तत्पादमूले समस्तं
सुधीरर्पयेत् सोदकं दक्षदोष्णा ।
इतःपूर्वमित्यादिना मांमदीयं
चपूर्वाणुनोंतत्सदित्यात्मना च ॥ ११९ ॥

गण्डूषदन्तपवनादियुतं गण्डूषदन्तधावनादिना युतं यथा भवति तथा हस्तास्यमार्ष्टिमुखवासमुखोपहारान् हस्तमार्जनिकामास्यमार्जनिकां मुखवासादिकांश्चोपहारान् प्रदाय देवं समर्च्य लड्डुकाद्यं लड्डुकापूपादिकं विनिवेद्य वाद्यादिभिः वाद्यगाननृत्तादिभिः नृपोपचारैः राजोपचारैः प्रधिनुयात् प्रकर्षेण प्रीणयेत् ॥ ११७ ॥

भूयः समर्च्य इष्टमन्त्रैः ईप्सितैर्मन्त्रैः कुसुमाञ्जलिं कृत्वा तत्पादपद्मं स्पृशन् मनुवर्यसहस्रजापं मूलमन्त्रसहस्रावृत्तिजपं विधाय गुह्यातिगुह्यमनुना द्वादशे पटले वक्ष्यमाणेन जपं प्रसमर्प्य भक्त्या सह स्तुत्वा प्रदक्षिणविधिं प्रणतिं प्रणामं च कुर्यात् ॥ ११८ ॥

अथाराध्य तत्पादमूले सुधीः 'प्रीणातु भगवानि'त्यादिवक्ष्यमाणमन्त्रेण कर्मसमर्पणज्ञः सोदकं दक्षदोष्णा समस्तं कर्म समर्प्य पुनः इतःपूर्वमित्यादिना ब्रह्मार्पणमन्त्रेण मांमदीयंचपूर्वाणुना 'मां मदीयं चास्मत्स्वामिने नारायणाय समर्पयामी'त्यादिना च ओंतत्सदित्यात्मना 'ओं तत्सदि'ति मन्त्रेण च सर्वं समर्पयेत् । ब्रह्मार्पणमनुरपि द्वादशे पटले वक्ष्यते ॥ ११९ ॥

---

१. 'दियु' ख. पाठः.

तारसावित्रिकाम्नायाद्यणुभिः परितोष्य तम् ।
प्रसन्नाय प्रसन्नार्घ्यं प्रदद्यात् प्रश्रयान्वितः ॥ १२० ॥

देवपादसविधाहितशङ्ख-
प्रेङ्खदाहरतु वारि वरीयः ।
तत्करात्तकलशामृतरूपं
स्वीयपुण्यफलमित्यवगच्छन् ॥ १२१ ॥

अग्रे गुरून् हरनिशाचरदिक्प्रपन्नान्
देवासुरान् भुवि पितॄंश्च पुरो विभाव्य ।
उक्षेत् स्वदक्षिणशयार्पिततीर्थतोयैः
स्वं च स्वसाध्यमपरानपि भक्तिनम्रान् ॥ १२२ ॥

भूयो नत्वा मानइत्यादिनैन-
मेनो ज्ञाताज्ञातजातं विशोध्य ।
तारेणाराध्यावसानीयमर्घ्यं
दत्त्वा देवं निष्कलीकृत्य रक्षेत् ॥ १२३ ॥

तारसावित्रिकाम्नायाद्यणुभिः प्रणवेन व्याहृतिभिः वेदादिमन्त्रैश्च तं परितोष्य प्रसन्नाय तस्मै प्रश्रयान्वितः विनयेन युक्तः प्रसन्नार्घ्यं प्रदद्यात् ॥ १२० ॥

देवपादसविधाहितशङ्खप्रेङ्खत् देवस्य पादसमीपे आहिते **शङ्खे** प्रेङ्खत् स्फुरत् **वरीयः** श्रेष्ठं **वारि** जलम् **आहरतु** स्वीकुर्यात् । कथंभूतमित्यत्राह — **स्वीयपुण्यफलं** स्वस्य पुण्यकर्मणः फलं **तत्करात्तकलशामृतरूपं** तस्य देवस्य करगृहीतकलशस्थामृतात्मकं **तदित्यवगच्छन्** आहरत्वित्यर्थः ॥ १२१ ॥

ततः स्वदक्षिणशयार्पिततीर्थतोयैः स्वदक्षिणकरस्थैस्तीर्थजलैः **अग्रे भुवि गुरून्** विभाव्योक्षेत् । हरनिशाचरदिक्प्रपन्नान् देवासुरान् ईशदिक्प्राप्तान् देवान् निर्ऋतिदिक्प्राप्तानसुरांश्च पुरोभागे विभाव्य **पितॄंश्च स्वं च स्वसाध्यं च भक्तिनम्रानपरांश्चोक्षेत् ॥ १२२ ॥**

भूयो 'मा न एकस्मिन्नागसी'त्येनं देवं नत्वा **ज्ञाताज्ञातजातं** ज्ञातेन जातमज्ञातेन जातं च **एनः** अपराधं **विशोध्य तारेणाराध्यावसानीयमर्घ्यं दत्त्वा देवं निष्कलीकृत्य रक्षेत् ॥ १२३ ॥**

---

१. 'द्भुजात्त' ख. पाठः. २. 'मध्ये गु' क. पाठः. ३. 'र्घ्यं द' ख. पाठः.

अथ तत्प्रसादकुसुमं शिरसि प्रणिधाय क्लृप्तपवनायमनः।
परिपूज्य तं हृदि कृताङ्गविधिः परिरक्ष्य तत्कृतमना विहरेत्॥

अथ द्वादशवर्णादिमन्त्रान्तरसमर्चने।
न्यासावरणकल्प्यादौ भिदामात्रं प्रदर्श्यते॥ १२५॥

अङ्गुष्ठादितलान्तमर्कलिपिवर्णान् षट् करे दक्षिणे
षड् वामेऽपि कनिष्ठिकादितलनिष्ठं सर्गकल्प्या ततः।
विन्यस्येद् द्विषडङ्गकान्यपि तथा पञ्चाङ्गकानि द्वयो-
रङ्गुष्ठादिकमङ्गुलीषु युगपत् प्रोक्तेति दोर्भावना॥ १२६॥

हरिलिपिमनुजाक्षराणि मौलौ
हरिमुखदिक्षु विलोचनद्वये च।

अथ तत्प्रसादकुसुमं गृहीत्वा शिरसि प्रणिधाय क्लृप्तपवनायमनः कृतप्राणायामः कृताङ्गविधिश्च भूत्वा तं हृदि परिपूज्य मानसपूजां कृत्वा परिरक्ष्य तत्कृतमनाः तन्मनस्को भूत्वा विहरेत् आत्मानं पृथक् कुर्यात्॥ १२४॥

एवं सप्तविधं पूजाविधानं सामान्येनोक्त्वा विष्ण्वादीनामुत्सवादौ कालत्रयपूजार्थं द्वादशाक्षरादिमन्त्रान्तरसमर्चने भेदमाह — **अथेति**। अथ द्वादशवर्णादिमन्त्रान्तरसमर्चने द्वादशाक्षरषडक्षरादिमन्त्रभेदानां समर्चने न्यासावरणकल्प्यादौ न्यासे आवरणकल्पौ ध्यानादौ च भिदामात्रं प्रदर्श्यते॥

अर्कलिपिवर्णान् द्वादशाक्षरमन्त्रस्याक्षरान् दक्षिणे करे अङ्गुष्ठादितलान्तं षट्, वामेऽपि करे कनिष्ठिकादितलनिष्ठं षट् च सर्गकल्प्या च विन्यस्येत्। तदनुसारेण स्थितिसंहारौ च कुर्यात्। ततो द्विषडङ्गकानि द्वादशाङ्गान्यपि तथा सृष्टिवद् विन्यस्येत्। पञ्चाङ्गकानि द्वयोः करयोरङ्गुलीषु अङ्गुष्ठादितलान्तं युगपन्न्यस्येत्। इति दोर्भावना करभावना प्रोक्ता॥ १२६॥

हरिलिपिमनुजाक्षराणि हरय आदित्याः तत्संख्या लिपयो यस्य मनोस्तज्जातानि द्वादशाक्षराणि **मौलौ**, **हरिमुखदिक्षु** इन्द्रादिदिक्षु, **विलोचनद्वये**

---

१. 'मे क' ख. पाठः.

वदनहृदयनाभिगुह्यजान्व-
ङ्घ्रियुजि च विन्यसतूदयक्रमेण ॥ १२७ ॥
चक्रं च शङ्खं च गदां च पद्मं चाबिभ्रतं शुभ्रतरावभासम् ।
स्फुरत्किरीटादियथार्हभूषं ध्यायेद्धरिं द्वादशवर्णरूपम् ॥
जितादिना प्रोक्तवदर्घ्यकाद्यं दत्त्वार्चयित्वा परिवारयागे ।
पूर्वादितोऽङ्गानि दलेषु शेषं गरुत्मदाद्यं प्रयजेद् यथोक्तम् ॥
अङ्गुष्ठादितलान्तिमं न्यसतु षड् वर्णान् करे दक्षिणे
वामे चापि तथाङ्गकान्यपि मनौ षड्वर्णके शार्ङ्गिणि ।
षड् वर्णान्यथ मौलिफालहृदये नाभ्यूरुपादद्वये
सृष्टौ स्यादितरद्वये तदुपपत्त्याङ्गान्यपि स्वास्पदे ॥ १३० ॥

युगपत्, वदनहृदयनाभिगुह्यजान्वङ्घ्रियुजि च उदयक्रमेण सृष्टिक्रमेण विन्यसतु । तदनुसारेण स्थितिसंहारावप्यूह्यौ । अत्र यन्नोच्यते तदष्टाक्षरविधानादवगन्तव्यम् ॥ १२७ ॥

ध्यानमाह — **चक्रमिति** । द्वादशवर्णरूपं द्वादशाक्षरमन्त्रमूर्तिरूपं हरिमेवं ध्यायेत् — चक्रं च शङ्खं च गदां च पद्मं च आबिभ्रतं धारयन्तं शुभ्रतरावभासं श्वेततरवर्णं स्फुरत्किरीटादियथार्हभूषम् अष्टाक्षरमन्त्रोक्तभूषणं च ॥ १२८ ॥

उपहारदानादौ विशेषमाह — **जितादिनेति** । जितादिना 'जितन्ते'न पूर्वप्रोक्तवदर्घ्यकाद्यं दत्त्वा तथार्चयित्वा परिवारयागे तु दलेषु द्वादशदलपद्मस्य दलेषु पूर्वादितो द्वादशाङ्गानि यजेत् । गरुत्मदाद्यं 'वैनतेयाय नमः' इत्याद्यं शेषं च यथोक्तं प्रयजेत् ॥ १२९ ॥

वैष्णवषडक्षरविधानमाह — **अङ्गुष्ठादीति** । शार्ङ्गिणि षड्वर्णके मनौ दक्षिणे वामे चापि करे अङ्गुष्ठादितलान्तिमं षड् वर्णान् न्यसतु । तथा तद्वद् अङ्गान्यपि न्यसतु । अथ मौलिफालहृदये मौलौ फाले हृदये च नाभ्यूरुपादद्वये नाभावूरुद्वये (पादद्वये) च षड् वर्णानि न्यसतु । इति सृष्टौ न्यासः स्यात् । इतरद्वये स्थितिसंहारयोः तदुपपत्त्या नाभ्यादिहृदयान्ता स्थितिः पादादिमौल्यन्तः संहार इत्यर्थः । अङ्गान्यपि स्वास्पदे स्वस्वस्थानेषु ॥ १३० ॥

शङ्खं सचक्रं सगदं सपद्मं
शार्ङ्गं सखड्गं सशरं सखेटम् ।
श्यामः षडात्माष्टभुजैर्दधानो
जिनार्णतोऽर्घ्याद्युपहृत्य पूज्यः ॥ १३१ ॥
वर्मान्तानि वृषादिदिक्षु विदिशास्वग्न्यादितोऽस्त्रं पुरो-
ऽक्ष्यन्त्यं दिक्षु विदिक्षु च क्रमवशान्मूर्तीश्च शक्तीरपि ।
शङ्खादीनि दिशासु कार्मुकमुखान्यस्त्राणि कोणेषु त-
स्याग्रे तार्क्ष्यमथो यथाविधि यजेदिन्द्रादिवज्रादिकम् ॥
विलोमाष्टमवर्गार्णैर्वासुदेवो विविन्दुभिः ।
सङ्कर्षणश्च प्रद्युम्नश्चानिरुद्धश्च मूर्तयः ॥ १३३ ॥
द्राघितैर्हादिशान्तार्णैः शान्तिः श्रीश्च सरस्वती ।
रतिश्च सलवैर्युक्ताश्चतस्रो मूर्तिशक्तयः ॥ १३४ ॥

षडात्मा षडक्षरमूर्तिर्हरिः शङ्खं चक्रं गदं पद्मं शार्ङ्गं खड्गं शरं खेटं चाष्टभुजैर्दधानः श्यामश्च ध्येयः, जिनार्णतः गायत्र्या अर्घ्याद्युपहृत्य दत्त्वा पूज्यश्च ॥ १३१ ॥

वर्मान्तानि चत्वार्यङ्गानि वृषादिदिक्षु इन्द्रादिदिक्षु, अग्न्यादितो विदिशास्वस्त्रं च, पुरोभागे अन्त्यम् अन्तभवम् अक्षि नेत्रं च यजेत् । पुनर्दिक्षु मूर्तीः विदिक्षु शक्तीश्च क्रमवशादपि यजेत् । शङ्खादीनि चत्वारि दिशासु, कार्मुकमुखानि शार्ङ्गादीनि चत्वार्यस्त्राणि कोणेषु च, अथो तस्याग्रे तार्क्ष्यं गरुडं च यथाविधि इन्द्रवज्रादिकं च यजेत् ॥ १३२ ॥

मूर्तिशक्त्यादीनां पूजामन्त्रानाह — विलोमेति । विलोमाष्टमवर्गार्णैः अष्टमवर्गस्य प्रतिलोमाक्षरैः हसपश इत्येतैः विविन्दुभिः विन्दुरहितैर्बीजैर्युक्ताः[1] वासुदेवः सङ्कर्षणश्च प्रद्युम्नश्चानिरुद्धश्च मूर्तयः । अथवा विलोमाष्टमवर्गार्णैः शादिपवर्गमारभ्य विलोमाष्टमवर्गः स्वरवर्गः, तत्रत्यैः आर्णैरिति पदच्छेदः, अ-कारादिक्षरैः सह । 'अं[2] वासुदेवाय नमः' 'आं[3] सङ्कर्षणाय नमः' 'अं[4] प्रद्युम्नाय नमः' 'अः[5] अनिरुद्धाय नमः' इति ॥ १३३ ॥

द्राघितैः दीर्घयुक्तैः सलवैः विन्दुसहितैः हादिशान्तार्णैः हकारादिशका-

---

१. 'रुक्ता वा' क. पाठः. २. 'आ' ख. पाठः. ३. 'अ', ४. 'आं', ५. 'अ' ङ. पाठः.

स्वाद्यर्णबीजैः सह शङ्खचक्रपद्मा गदा शार्ङ्गसखेटखड्गौ ।
शरो रलाभ्यामरिपद्ममिन्द्रवज्रादिकं वर्गमुखद्वितीयैः ॥

प्रासादमन्त्रे करयोरथेशाङ्गुष्ठादिकल्प्या न्यसनं करोतु ।
ईशानमूर्धप्रमुखक्रमेण तत्सूत्रवक्त्रन्यसनं तनौ च ॥ १३६ ॥

शूलाही टङ्कघण्टासिसृणिकुलिशपाशाग्न्यभीतीश्च दोर्भि-
र्बिभ्राणं देवदेवं दशभिरथ चतुर्भिस्तु वा दक्षिणाद्यैः ।
रुद्राक्षस्रक्कपाले त्रिशिखमपि सखट्वाङ्गकं चाध ऊर्ध्वं
ध्यायेत् प्रासादरूपं स्फटिकमणिनिभं पद्मसंस्थं प्रसन्नम् ॥

रान्तैः प्रतिलोमाक्षरैर्युक्ताः शान्तिः श्रीः सरस्वती रतिश्च मूर्तिशक्तयः मूर्तीनां शक्तयश्चतस्रः स्युः ॥ १३४ ॥

स्वाद्यर्णबीजैः स्वस्वाद्यक्षरबीजैः सह शङ्खाद्याः । अरिपद्मं चक्रं पद्मं च रलाभ्यां रेफलकाराभ्यां सह । 'शं शङ्खाय नमः' 'रं चक्राय नमः' इत्याद्या मन्त्राः । वर्गमुखद्वितीयैः वर्गमुखैरकारादिभिः तद्वितीयैः आकारादिभिश्च सह इन्द्रवज्रादिकम् इन्द्रादिकं वज्रादिकं च स्यात् ॥ १३५ ॥

शिवस्य प्रासादमन्त्रविधाने विशेषमाह — **प्रासादमन्त्र** इति । अथ **प्रासादमन्त्रे** करयोरुभयोरपि ईशाङ्गुष्ठादिकल्प्या ईशानादिक्रमेण अङ्गुष्ठादिक्रमेण च न्यसनं करोतु । तनौ शरीरे च ईशानमूर्धप्रमुखेण मन्त्रेण तत्सूत्रवक्त्रन्यसनं तेषां सूत्रन्यसनं वक्त्रन्यसनं च करोतु ॥ १३६ ॥

प्रासादरूपं देवदेवं देवानामपि देवमेवं ध्यायेत् — **दशभिर्दोर्भिः** शूलाही शूलं नागं च टङ्कघण्टासिसृणिकुलिशपाशाग्न्यभीतीः टङ्कं कुठारः घण्टा स्वयमेव असिः खड्गः सृणिरङ्कुशः कुलिशो वज्रः पाशाग्न्यभीतयः स्वयमेव एतानि बिभ्राणम्, अथवा दक्षिणाद्यैश्चतुर्भिर्दोर्भिरध ऊर्ध्वं च यथा तथा रुद्राक्षस्रक्कपाले त्रिशिखं शूलं सखट्वाङ्गकं खट्वाङ्गाभिधमायुधविशेषं च बिभ्राणं स्फटिकमणिनिभं श्वेतवर्णं पद्मसंस्थं प्रसन्नं च ॥ १३७ ॥

---

१. 'योः प्रधानेशानादिकल्', २. 'क्का' ख. पाठः. ३. 'ग' ख. घ. पाठः.

ईशादिसूत्रवदनादिकविग्रहेज्यां
कृत्वाप्यसौम्ययमवासवधातृदिक्स्थैः ।
सद्यादिभिः प्रभिदुरां परिवारपूजां
पञ्चाक्षरोक्तविधिनात्र च सन्तनोतु ॥ १३८ ॥

पञ्चब्रह्मविधौ सुधीः करयुजीशानादिसूक्ताणुका-
नङ्गुष्ठादिकनिष्ठिकावधि तलान्तं षट् तदङ्गान्यपि ।
न्यस्येत् सूक्तमनून् ससूत्रमुखकल्प्त्या विग्रहे तद्भवा-
स्त्रिंशत्सङ्ख्यकलास्तथाष्टसहिता मन्त्री तदङ्गान्यपि ॥ १३९ ॥

प्राग्वत् प्रार्चितपीठके समभिवाह्येशादिसूक्ताणुभिः
सद्याद्यैरभिवाहनाप्रभृतितन्मुद्राश्च कृत्वा क्रमात् ।

पुनः ईशादिसूत्रवदनादिकविग्रहेज्याम् ईशादिभिः सूत्रवक्त्रक्रमेण विग्रहपूजां कृत्वा आप्यसौम्ययमवासवधातृदिक्स्थैः पश्चिमोत्तरदक्षिणपूर्वोपरिदिक्स्थितैः सद्यादिभिः प्रभिदुरां भेदयुक्तां परिवारपूजां पञ्चाक्षरोक्तविधिनात्र च सन्तनोतु ॥ १३८ ॥

अथ पञ्चब्रह्मविधानमाह — पञ्चेति । पञ्चब्रह्मविधौ सुधीः सामान्योक्तं विशेषोक्तं च ज्ञात्वा कर्तुं कुशलः करयुजि करद्वये अङ्गुष्ठादिकनिष्ठिकावधि ईशानादिसूक्ताणुकान् 'ईशानः सर्वविद्यानामि'त्यादिसूक्तमन्त्रान् न्यस्येत् । तथा षट् तदङ्गान्यपि तलान्तं न्यस्येत् । विग्रहे देहे ससूत्रमुखकल्प्त्या सूत्रवक्त्रक्रमेण, सूक्तमनून् ईशानादिसूक्तमन्त्रान् तद्भवाः ईशानादिसूक्तभवाः अष्टसहितास्त्रिंशत्सङ्ख्याकाः कलास्तदङ्गान्यपि च न्यस्येत् । मन्त्रीत्यनेन अधिवासपटलोक्ताष्टत्रिंशत्कलान्यासे द्वादशपटलोक्तशशिन्यादिशक्तियोगस्तदङ्गविधिश्च सूचितः ॥ १३९ ॥

पुनः प्राग्वत् प्रार्चितपीठके पञ्चाक्षरविधानवदर्चिते पीठे ईशादिसूक्ताणुभिः समभिवाह्य अभिवाहनाप्रभृतितन्मुद्राश्च सद्याद्यैः सूक्तैः क्रमात् कृत्वा प्रकल्पततदणुन्यासेन प्रकर्षेण कल्पितैस्तत्सूत्रवक्त्रादिभिः अष्टत्रिंशत्कला-

---

१. 'दीति मू' क. पाठः. २. 'ङ्गयकला' च. घ. पाठः.

देवं भावयतु प्रकल्पसतदणुन्यासेन साङ्गीकृतं
साक्षस्रक्सकपालशूलविलसत्खट्वाङ्गराजद्भुजम् ॥ १४० ॥
ईशेनोपहृतीः प्रदाय मपरेण स्थाणुसंज्ञाणुना-
थेशानादिकपञ्चसूक्तमनुभिस्तत्सूत्रवक्त्रादिभिः ।
कृत्वा विग्रहपूजनं परिवृतावीशादिसूक्तैर्यजेत्
स्वस्वाशाधिगतैस्तदङ्गमनुभिर्विद्येश्वराद्यैरपि ॥ १४१ ॥
इति तन्त्रसमुच्चये श्रुतार्चाक्रमसिद्धयै रविजन्मसंप्रणीते ।
पटलः प्रतिपादितात्मदेवार्चनकर्मापि च सप्तमः समाप्तः ॥

इति तन्त्रसमुच्चये
सप्तमः पटलः ।

न्यासादिना च साङ्गीकृतं सकलीकृतं देवं भावयतु ध्यायेत् । कथंभूतं, साक्षस्रक्सकपालशूलविलसत्खट्वाङ्गराजद्भुजम् अधोभागे दक्षिणवामयोरक्षस्रजा कपालेन ऊर्ध्वभागे शूलखट्वाङ्गाभ्यां च शोभमानभुजं ध्यायेत् ॥ १४० ॥

पुनरीशेनोपहृतीः प्रदायाथ मपरेण प्रणवेन स्थाणुसंज्ञाणुना 'नमोऽस्तु स्थाण्वि'त्यादिना ईशानादिकपञ्चसूक्तमनुभिस्तत्सूत्रवक्त्रादिभिश्च विग्रहपूजनं कृत्वा परिवृतौ परिवारयागे स्वस्वाशाधिगतैः स्वस्वदिक्प्राप्तैरीशादिसूक्तैस्तदङ्गमनुभिरप्युक्तक्रमेण विद्येश्वराद्यैः, विद्येश्वरा अनन्तसूक्ष्मादयः आद्यशब्देन उमाचण्डेश्वरादयः इन्द्रादयो वज्रादयश्च विवक्षिताः, तैः सर्वैः सह यजेत् ॥ १४१ ॥

पटलं समापयति — इतीति । इति उक्तप्रकारेण तन्त्रसमुच्चये ग्रन्थे श्रुतार्चाक्रमसिद्धयै श्रुतस्यार्चाक्रमस्य स्थापनाय रविजन्मसंप्रणीते रविनाम्नः पुत्रेण नारायणाख्येन विरचिते तस्मिन् प्रतिपादितात्मदेवार्चनकर्मा उक्तमात्मनः साधकस्य देवस्य चार्चनकर्म यस्मिन् सोऽपि च सप्तमः पटलः समाप्तोऽभूत् ॥ १४२ ॥

इति तन्त्रसमुच्चयविमर्शिन्यां
सप्तमः पटलः ।

---

१. 'न' क. पाठः.

अथाष्टमः पटलः ।

अथाभिधास्याम्यभिषेचनं विभो-
र्दिने तुरीये विहितं प्रतिष्ठितेः ।
निमित्तवित्ताद्युपपत्तिभेदितं
विशुद्धिसान्निध्यसमृद्धिकारकम् ॥ १ ॥

अत्राप्यङ्कुररोपणं स्वसमये कुर्वीत तत्त्वान्तिमान्
होमान् निष्कृतिवक्ष्यमाणविधिना चाथात्र पूर्वेऽहनि ।
नागेऽलिन्दभुवि प्रकल्प्य निजकुण्डं मण्डपे देशिकः
कुर्यान्मण्डपसंस्क्रियामपि घटीभ्रान्त्यन्तिमां पूर्ववत् ॥ २ ॥

एवं प्रतिष्ठितस्य देवस्यावश्यकर्तव्यमर्चनमुक्त्वा प्रतिष्ठायाश्चतुर्थदिवसे कर्तव्यस्य स्नानस्य विधिमाह — अथेति । अथ पूजायाः कथनानन्तरं विभोः देवस्याभिषेचनम् अभिधास्यामि वक्ष्यामि । तत् तु प्रतिष्ठितेः तुरीये दिने विहितम् । न केवलं चतुर्थदिवस एव तत् कर्तव्यं, विशेषतो विशुद्धिसान्निध्यसमृद्धिकारकं च अशुद्धिपरिहारार्थं सान्निध्यार्थं समृद्ध्यर्थं च साधनम् । तत्रापि निमित्तवित्ताद्युपपत्तिभेदितं निमित्तं हेतुः वित्तं धनम् आदिशब्देन देशकालादय उक्ताः तेषामुपपत्त्या बहुधा भेदितं च ॥ १ ॥

अत्रापि, न केवलं प्रतिष्ठायामेव अत्र कलशेऽपि । स्वसमये स्वोक्तकाले अङ्कुररोपणं बीजावापं कुर्वीत । निष्कृतिवक्ष्यमाणविधिना प्रायश्चित्तपटले वक्ष्यमाणेन विधानेन तत्त्वान्तिमान् तत्त्वहोमपर्यन्तान् होमांश्च कुर्वीत । अथात्र कलशे कर्तव्ये पूर्वेऽहनि कलशस्नानात् पूर्वदिवसे । देशिकः मण्डपे कलशपूजार्थं कल्पिते मण्डपे वेदैर्बहिः नागे वायोः पूर्वभागे निजकुण्डम् आचार्यकुण्डं प्रकल्प्य कारयित्वा घटीभ्रान्त्यन्तिमां कुम्भेशपरिभ्रमणपर्यन्तां मण्डपसंस्क्रियां पूर्ववत् कुर्यात् ॥ २ ॥

---

१. 'कृत्वाथ त', २. 'निर्वर्त्य पू' ख. पाठः. ३. 'त्या च ब' ख., 'त्या चतुर्धा भे' ङ. पाठः.

आस्फाल्य सूत्राणि घटानुरूप्या-
ण्यत्राभिपूर्यद्रविणप्रमाणि ।
खण्डानि कृत्वाथ यथार्हमेता-
न्यापूरयेच्चित्रतरै रजोभिः ॥ ३ ॥

स्युर्द्रव्यसप्तदशके शरशैलनन्द-
वर्गा नवोत्तरशतद्विशते च कुम्भाः ।
सप्तादिविश्वचरमासमसङ्ख्यकेषु
सप्तोल्लसद्दशसु चापि पुटेषु कार्याः ॥ ४ ॥

त्र्येकाङ्काब्धिनवाङ्कगोविकृतयस्तत्त्वेषुवर्गा बहि-
र्दिक्कोणेषु घटा हयादिकपुटक्षेत्रक्रमाच्छूलिनि ।

अथ अत्र मण्डपे घटानुरूपाणि घटसङ्ख्यासदृशानि सूत्राणि आस्फाल्य अभिपूर्यद्रविणप्रमाणि अभिपूर्यमाणानां द्रव्याणां प्रमाणयुक्तानि खण्डानि कृत्वा यथार्हमेतानि खण्डानि चित्रतरै रजोभिरापूरयेत् ॥ ३ ॥

अत्र कलशद्रव्याणां सप्तदशकं पञ्चविंशतिकमिति प्रायेण द्वौ मार्गौ । तत्र पूर्वं सप्तदशद्रव्ये कलशकृत्तिमाह — स्युरिति । द्रव्यसप्तदशके द्रव्याणां सप्तदशके सप्तादिविश्वचरमासमसङ्ख्यकेषु सप्तसङ्ख्यामारभ्य विश्वशब्देन लक्षितां त्रयोदशसङ्ख्यामवधीकृत्य तन्मध्ये याः असमसंख्याः ओजसंख्याः सप्त नव एकादश त्रयोदश च, तत्संख्यकेषु पुटेषु । पुटो नाम सूत्रयोरन्तर्भाग उच्यते । सप्तोल्लसद्दशसु सप्तसंख्याभिरधिकेषु दशसु क्रमात् शरशैलनन्दवर्गाः शरशैलनन्दानां वर्गाः, शरवर्गः पञ्चविंशतिः, शैलवर्ग एकोनपञ्चाशत् नन्दवर्ग एकाशीतिः नवोत्तरशतद्विशते च नवोत्तरं शतं नवोत्तरं द्विशतं च । एवं पञ्चविधेषु पुटेषु पञ्चविधाः कुम्भाः कार्याः स्युः ॥ ४ ॥

तत्र शूलिनि शिवे हयादिकपुटक्षेत्रक्रमात्, हयाः सप्त, सप्तपुटादीनां क्षेत्राणां क्रमात् त्र्येकाङ्काब्धिनवाङ्कगोविकृतयः तत्त्वेषुवर्गाश्च बहिर्दिक्कोणेषु

---

१. 'खण्डानि कुर्यादिह पञ्चवर्गद्रव्ये विधिं पूर्वमहं ब्रवीमि । सङ्ख्याः कुम्भगताः' ख. पाठः. २. 'भिः ॥ क्षेत्रे पञ्चपुटेऽम्बुजं नवपदैस्तत्त्वोन्मितैः केवलैर्द्रव्यैः स्यात् स्रपनेऽन्तरत्र नव तद्बाह्ये घटाः षोडश । वीथीः सप्तपुटेऽभितोऽब्जमधिका यावत् तु तत्क्षेत्रकं मृज्यं स्यादुभयत्र सप्तदशभिर्यत्तरालाष्टकम् ॥ स्यु' क. पाठः.

मध्ये पङ्कजकर्णिकादलगताः कुम्भा नव स्युः सदा
श्रीशे दिक्तिथयो बहिर्वसुशते शेषः समानक्रमः ॥ ५ ॥
संख्याः कुम्भगताः शराद्रिनववर्गाश्चाष्टयुक्तं तथा
षट्पञ्चाशदुपेतमेक[1]मतमत्यष्टया शतद्वन्द्वकम् ।
लोकोपेतशतार्धसंयुतशतद्वन्द्वं त्रिशत्येकसं-
युक्ता पञ्चशती च[2] पञ्चकृतिकद्रव्येषु साहस्रयपि ॥ ६ ॥
घटपुटपरिसङ्ख्याः पञ्च[3] पूर्वं [illegible]दे-
त्रिसहितकृतिनिष्ठाँस्तत्परस्तात् क्रमेण ।

घटाः स्युः । तत्र सप्तपुटे बहिः त्रिकमेककं च । नवपुटे अङ्कान्यब्धयश्च, अङ्कानि षट् अब्धयश्चत्वारः । एकादशपुटे नवाङ्काश्च, अङ्का नव । त्रयोदशपुटे गावो विकृतयश्च गावो नव विकृतयः षोडश । सप्तदशपुटे तत्त्वेषुवर्गाः, तत्त्वानि पञ्चविंशतिः इषुवर्गश्च पञ्चविंशतिः । इति विभागः । मध्ये पङ्कजकर्णिकादलगताः पद्मस्य कर्णिकागता दलगताश्च सदा पञ्चस्वपि विभागेषु नव कुम्भाः स्युः । श्रीशे वसुशते, वसवोऽष्टौ, अष्टसहिते शते बहिः दिक्तिथयः, दिशो दश तिथयः पञ्चदश । शेषः वसुशतादन्यः समानक्रमः शिववदेव ॥ ५ ॥

पञ्चविंशतिद्रव्ये कलशक्लृप्तिमाह—संख्या इति । पञ्चकृतिकद्रव्येषु पञ्चानां कृतिर्वर्गः पञ्चविंशतिः तत्संख्येषु द्रव्येषु । शराद्रिनववर्गाः शराद्रिनवानां वर्गाः, शरवर्गः पञ्चविंशतिः अद्रिवर्गः एकोनपञ्चाशत् नववर्गः एकाशीतिः । अष्टयुक्तमेकशतं, तथा षट्पञ्चाशदुपेतं चैकशतम्, अत्यष्ट्या सप्तदशकेन सहितं शतद्वन्द्वकं शतद्वयं, लोकोपेतशतार्धसंयुतशतद्वन्द्वं लोकाख्यः तैः सहितेन शतार्धेन पञ्चाशता संयुतं शतद्वन्द्वं च, एकसंयुक्ता त्रिशती, तथा एकसंयुक्ता पञ्चशती, एकसंयुक्ता साहस्रचपि कुम्भगताः संख्याः स्युः ॥ ६ ॥

उक्तसंख्यानां कलशानां पुटक्लृप्तिं क्रमेणाह —घटपुटेति । घटपुटपरिसंख्याः घटानां पुटगताः संख्याः पूर्वं पञ्च । तत्परस्तात् तदनन्तरं

---

१. 'कुम्भानां गिरिशोक्तती शरकृतिद्रव्येऽष्टयुक्तं' क. पाठः. २. 'तथा दशशती संख्याः सशुद्धोदके' ॥ क., 'तथा दशशती चोक्ता सुमत्यादिभिः ॥' ख. पाठः. ३. 'अत्र चैकादशादि', ४. 'घ्टाः संप्रदिष्टाः क्र' क. पाठः.

निखिलविषमसङ्ख्या विंशतिर्नन्दयुक्ता
तदनु नवसमेतात्रिंशदप्यागमोक्ताः ॥ ७ ॥
क्षेत्रे रुद्रपुटेऽत्र पञ्चकृतिकौष्ठैर्मध्यगैरम्बुजं
न्यस्यैतत्कलकर्णिकासु कलशान् वीथिं समन्तादपि ।
तद्बाह्येऽनुदिशं द्विकं विरचयेत् कोणे चतुष्कं द्विकं
तत्राभ्यन्तरतोऽद्रिवर्गकलशे मार्ष्ट्रन्यकोष्ठानि च ॥ ८ ॥
क्षेत्रे त्रयोदशपुटे शरवर्गकोष्ठैः
पद्मं पुरोवदथ दिक्षु बहिस्त्रिकाणि ।
कुर्याद् विदिक्षु नवकानि तदन्तराल-
भाञ्जि त्रिकाणि नववर्गघटाभिषेके ॥ ९ ॥

शिवादित्रिसहितकृतिनिष्ठाः शिवा एकादश तदादिः कृतिर्विंशतिः त्रिसहिता कृतिः त्रयोविंशतिः तदवसानाः निखिलविषमसंख्याः सर्वा ओजसंख्याः। एकादश, त्रयोदश, पञ्चदश, सप्तदश, एकोनविंशतिः, एकविंशतिः त्रयोविंशतिश्चेत्यर्थः । नन्दयुक्ता नन्दा नव तैः सहिता विंशतिश्च, तदनु नवसमेतत्रिंशदपि एकोनचत्वारिंशदपि आगमोक्ताः आगमेषूक्ताः ॥ ७ ॥

तत्र पञ्चपुटे शुद्धोदकरहितत्वात् पञ्चविंशतिरेव कलशाः । तत्र खण्डविभागकल्पना न कार्येति तत् पृथक्कृत्य तदन्येषां खण्डविभागमाह — **क्षेत्रे रुद्रपुट** इत्यादिभिः । अद्रिवर्गकलशे एकोनपञ्चाशत्कलशे विधौ रुद्रपुटे एकादशपुटे क्षेत्रे अत्र एषु पदेषु मध्ये मध्यगैः पञ्चकृतिकोष्ठैः पञ्चविंशतिपदैरम्बुजं विरचयेत् । एतद्दलकर्णिकासु पद्मस्य कर्णिकायां दलेषु च नव कलशान् न्यस्य समन्ताद् वीथिमपि, तद्बाह्येऽनुदिशं दिशिदिशि द्विकं, कोणे चतुष्कं, तत्राभ्यन्तरतः अन्तरालेषु द्विकं च विरचयेत् । अन्यकोष्ठानि एतद्रहितकोष्ठानि मार्ष्टु मार्जनं कुर्यात् ॥ ८ ॥

नववर्गघटाभिषेके एकाशीतिकलशे विधौ त्रयोदशपुटे क्षेत्रे शरवर्गकोष्ठैः पञ्चविंशतिपदैः पुरोवत् पूर्ववत् पद्मं कुर्यात्। अथ बहिर्दिक्षु त्रिकाणि, विदिक्षु नवकानि, तदन्तरालभाञ्जि दिक्कोणयोरन्तरालगतानि त्रिकाणि च कुर्यात् ॥ ९ ॥

---

१. 'मार्ष्टुः ॥' क. पाठः. २. 'दि' ङ. पाठः,

नालीकं नवभिः पदैस्तिथिपुटे हीनं दलस्थैर्घटैः
पङ्क्त्या वीथिमथ त्रिकं दिशि विदिश्याकल्पयेदेककम् ।
पङ्क्त्या वीथिमथारचय्य नवकं दिश्यष्टकं कोणत-
श्चादध्यात् त्रिकमन्तरे च नवभिर्युक्ते घटानां शते ॥ १० ॥

क्षेत्रे सप्तोत्तरदशपुटे मध्यतो रन्ध्रकोष्ठैः
पद्मं षट्कं दिशि विदिशि कुर्याच्चतुष्कं च दैवे ।
मर्त्यांशे दिश्यथ नवकमत्राष्टकं कोणदेशे
सप्ताढ्यार्धाधिकशतघटे षट्कमप्यन्तराले ॥ ११ ॥

एकोनविंशतिपुटे नवकेन मध्ये
पाथोरुहं सुरनरांशगतानि भूयः ।
कुर्वीत चात्र नवकानि जिनप्रमाणि
सात्यष्टिकद्विशतसङ्ख्यघटाभिषेके ॥ १२ ॥

क्षेत्रे तत्रेध्मसंख्यापुटजुषि नवकेनाम्बुजं ब्रह्मभागे
दैवे दिक्कोणदेशे नवकमथ नृमर्त्यांशकोणे करोतु ।

घटानां नवभिर्युक्ते शते तिथिपुटे पञ्चदशपुटे क्षेत्रे मध्ये नवभिः पदैर्दलस्थैः घटैर्हीनं नालीकं पद्ममाकल्पयेत् । अथ पङ्क्त्या एकपङ्क्त्या वीथिं, ततो दिशि त्रिकं, विदिश्येककं चाकल्पयेत् । अथ पङ्क्त्या वीथिमारचय्य दिशि नवकं कोणतोऽष्टकं च अन्तरे अन्तराले त्रिकं चादध्यात् ॥ १० ॥

सप्ताढ्यार्धाधिकशतघटे सप्ताधिकपञ्चाशत्संयुतशतकलशे सप्तोत्तरदशपुटे क्षेत्रे मध्यतो रन्ध्रकोष्ठैः नवपदैः पद्मं कुर्यात् । दैवे मध्यादारभ्य ब्राह्मदैविकमानुषपैशाचशब्दा आवरणत्वेन व्यपदेश्या यतोऽतो दैविके दिशि षट्कं, विदिशि चतुष्कं च कुर्यात् । अथ मर्त्यांशे दिशि नवकम्, अत्र कोणदेशे अष्टकम्, अन्तराले षट्कं च ॥ ११ ॥

सात्यष्टिकद्विशतसंख्यघटाभिषेके सप्तदशाधिकद्विशतकलशाभिषेके एकोनविंशतिपुटे मध्ये नवकेन पाथोरुहं पद्मं, भूयः सुरनरांशगतानि दैविकमानुषगतानि जिनप्रमाणि, जिनाश्चतुर्विंशतिः, तत्संख्यानि नवकानि कुर्वीत च ॥ १२ ॥

त्रिपञ्चाशदुपगतशतद्वन्द्वकुम्भाभिषेके त्रिपञ्चाशत्सहितशतद्वयकलश-

---

१. 'षट्पञ्चाशद्युतशत' ख. पाठः.

कर्तव्यं मर्त्यभागे दिशि रविघटवत् क्षेत्रमत्रान्तरालेऽप्येवं कुर्यात् त्रिपञ्चाशदुपगतशतद्वन्द्वकुम्भाभिषेके ॥१३॥

क्षेत्रे तत्र त्रयोविंशतिपुटजुषि मध्येऽम्बुजं पञ्चकृत्या कोष्ठानां दैविके स्याद् दिशि दशकमतः कोणदेशे त्रिकं च। दिग्देशे तत्त्वसंख्यं तदनु दशकमभ्यन्तरे कोणदेशे कर्तव्यं सप्तयुक्तं दशकमपि बहिः स्याद् घटानां त्रिंशत्याम्॥

त्रिंशत्सूत्रयुते घटीशरशते क्षेत्रे विधायाभितो वीथीः पञ्चपुटान्तरेऽभिकृतिकोष्ठैर्मध्यतश्चाम्बुजम् । दैवे दिग्विदिशासु सप्तदशसंख्यातान् न्यसेन्मानुषे दिक्कोणान्तरसंस्थितानपि घटांस्तत्त्वाष्टितत्त्वप्रमान् ॥ १५ ॥

स्नानविधौ तत्र इध्मसंख्यापुटजुषि, इध्माः एकविंशतिः, एकविंशतिपुटभवे क्षेत्रे ब्रह्मभागे नवकेनाम्बुजं, दैवे दिक्कोणदेशे समर्त्यांशकोणे दैविकदिक्षु विदिक्षु मानुषकोणेषु च नवकं करोतु । मर्त्यभागे दिशि रविघटवत् द्वादशकलशयुतं क्षेत्रं कर्तव्यम् । अत्र मानुषे अन्तरालेऽपि एवं रविघटवत् क्षेत्रं कुर्यात् ॥ १३ ॥

पुनर्घटानां त्रिंशत्यां त्रयोविंशतिपुटजुषि क्षेत्रे मध्ये कोष्ठानां **पञ्चकृत्या** पञ्चविंशत्याम्बुजं स्यात् । दैविके दिशि दशकम्, अतः अतोऽस्मिन् कोणदेशे त्रिकं च, बहिर्दिग्देशे तत्त्वसंख्यं **पञ्चविंशतिकं** स्यात् । तदनु अभ्यन्तरे अन्तराले दशकं, कोणदेशे सप्तयुक्तं दशकमपि कर्तव्यं स्यात् ॥ १४ ॥

ततो घटीशरशते घटानां पञ्चशतस्थाने त्रिंशत्सूत्रयुते एकोनत्रिंशत्पुटे क्षेत्रे अभितः आयामतो विस्तारतश्च पञ्चपुटान्तरे वीथीर्विधाय मध्यतः अभिकृतिकोष्ठैः पञ्चविंशतिपदैरम्बुजं, दैवे दिग्विदिशासु सप्तदशसंख्यातांश्च न्यसेत् । मानुषे दिक्कोणान्तरसंस्थितानपि तत्त्वाष्टितत्त्वप्रमान् पञ्चविंशतिषोडशपञ्चविंशतिसंख्यान् घटान् क्रमान्न्यसेत् ॥ १५ ॥

---

१. 'गैरम्बु', २. 'कं' क. पाठः.

विश्वघ्नत्रिपुटे घटीदशशते खण्डेषु संवर्गित-
क्ष्माभृत्कोष्ठयुतेषु मध्यनवकैः पद्मं नृदेवांशयोः ।
ब्राह्मे तत्त्वपदाब्जशेषितपदान्यायोज्य वीथ्यां घटान्
न्यस्येत् पद्मपदेषु मानुषदिगब्जाशापलाशेष्वपि ॥ १६ ॥

एतेष्वन्यतमं प्रगृह्य कलशक्षेत्रं यथार्हं सुधी-
द्रोणाद्युन्मितशालितण्डुलतिलैः पीठं ससिद्धार्थकैः ।
वासोभ्यन्तरितैः करोतु कुशकूर्चान्तैः पदे ब्राह्मके
तद्वद् व्रीहिचयाग्रदर्भयुगलैः शेषेष्वशेषेष्वपि ॥ १७ ॥

पुनर्घटीदशशते घटानां सहस्रे स्नाने विश्वघ्नत्रिपुटे, विश्वे त्रयोदश, तैस्त्रिगुणिते एकोनचत्वारिंशत्पुटे सप्तसप्तपुटान्तरे वीथीः कृत्वा संवर्गितक्ष्माभृत्कोष्ठयुतेषु, क्ष्माभृतः सप्त, स्वेनैव गुणितैः सप्तभिः कोष्ठैः युतेषु एकोनपञ्चाशत्कोष्ठयुतेषु खण्डेष्वित्यर्थः । तत्र मध्यनवकैः मध्यगतैर्नवकैः नृदेवांशयोः मानुषदैविकयोः पद्मं, जातावेकवचनं, पद्मानि कुर्यात् । ब्राह्मे तु तत्त्वपदाब्जशेषितपदानि पञ्चविंशतिपदैरम्बुजं कृत्वा शेषितानि पदानि वीथ्यामायोज्य पद्मपदेषु पञ्चविंशतिपद्मेषु तत्परितो गतेषु पदेषु च मानुषदिगब्जाशापलाशेष्वपि मानुषावरणस्य दिग्भवानां पद्मानां चतुर्षु चतुर्षु दिग्दलेष्वपि घटान् न्यस्येत् ॥ १६ ॥

सुधीः वित्तदेशकालादिविशेषज्ञः साधकः एतेषु उक्तेष्वन्यतमं किञ्चन कलशक्षेत्रं यथार्हं यथायोग्यं प्रगृह्य गृहीत्वा ब्राह्मके पदे स्थाने द्रोणाद्युन्मितशालितण्डुलतिलैः द्रोणतदर्धतत्पादतदर्धपादप्रमाणोन्मितैः शालिभिस्तण्डुलैस्तिलैः ससिद्धार्थकैस्तैः वासोभ्यन्तरितैः वस्त्रान्तकुशकूर्चान्तैरेतैः पीठं करोतु शेषेष्वशेषेष्वपि पदेषु तद्वदेवादरेण व्रीहिचयाग्रदर्भयुगलैः व्रीहिपुञ्जैरग्रदर्भाणां युगलैश्च पीठं करोतु ॥ १७॥

---

१. 'दलेषु', २. 'दिक्कमलदिक्पत्रेषु चाथावृतौ ॥', ३. 'कल्प्य क' क. पाठः ४. 'स्वशक्तिक्षमं द्रोणव्रीहितदर्धतण्डु' ख. पाठः ५. 'ब्जं कृ' क. पाठः. ६. 'शानां क्षे' ख. घ. पाठः.

विन्यस्यैषु हिरण्मया- रजतजांस्ताम्रोद्भवान् मार्तिकान्
कुम्भान् वाङ्कुरपालिकादि परितः पुष्पादिकं दक्षिणे ।
उत्पूतं जलमन्यतोऽथ विधिवत् स्नानादिकृत् स्वासने
स्वासीनः प्रकरोतु वायुयमनाद्यात्मार्चनान्तं गुरुः ॥ १८ ॥

इष्ट्वा गुरून् गणपतिं च यजेत पीठं
शय्योक्तवत् प्रकृतियागविराममत्र ।
तत्त्वान्यपीह कतिचित् प्रकृतेरधस्ता-
दर्च्यान्युशन्ति कलयेदथ पद्ममुद्राम् ॥ १९ ॥

अस्त्रेणासिच्य तोयैः कलयतु कवचेन त्रिसूत्रेण कुम्भं
मूलेनालिप्य गन्धैर्मचरममनुना धूपयेत् साधु धूपैः ।

एषु पीठेषु हिरण्मयान् वा रजतजान् वा ताम्रोद्भवान् वा मार्तिकान् वा कुम्भान् विन्यस्य ब्रह्मकलशस्य परितोऽङ्कुरपालिकादि, आदिशब्दात् प्रदीपादिकं च, दक्षिणे पुष्पादिकं पुष्पगन्धाक्षतादिकम् अन्यतः उत्तरभागे उत्पूतं जलं च विन्यस्याथ गुरुः विधिवद् मन्त्रकल्पोक्तक्रमेण स्नानादिकृद् ब्रह्मकुम्भाग्रतः स्वे विष्टरे स्वासीनः सुखेनोपविश्य वायुयमनाद्यात्मार्चनान्तं गुरुगणपतिवन्दनादि स्वास्त्रेण तालत्रयदिग्बन्धाग्निप्राकारान् विधाय स्वस्य तत्त्वसंहारादिशोषणादितत्त्वसृष्टिलिपिप्राणायामादिलिपिन्यासादिकमधिवासोक्तविधिना विधाय मूलप्राणायामादितन्न्यासशङ्खपूरणात्माराधनपर्यन्तं कर्म पूजापटलोक्तविधिना प्रकरोतु ॥ १८ ॥

ततो गुरून् गणपतिं चेष्ट्वा प्रकृतियागविरामं प्रकृत्यावाहनार्चनान्तं पीठं शय्योक्तवत् शय्यापूजोक्तप्रकारेण यजेत । अत्र कलशपूजायां कतिचिद् देशिकाः प्रकृतेरधस्तात् प्रकृतेः पूर्वं तत्त्वान्यप्यर्च्यानि उशन्ति इच्छन्ति । अथ प्रकृतियागावसाने पद्ममुद्रां कलयेत् ॥ १९ ॥

अथास्त्रेण तोयैः कुम्भमासिच्य कवचेन त्रिसूत्रेण तं कलयतु । मूलेन गन्धैरालिप्य मचरममनुना तारेण धूपैः साधु अन्तर्बहिश्च धूपयेत् । पश्चात्

---

१. 'षु तु पी' क. पाठः.

पश्चात् तं न्यम्बिलं विन्यसतु मपरतः कलसपीठे यमाद्यै-
र्बीजैः शोषादिरन्ध्रीकरणसमवसानां विशुद्धिं विदध्यात्॥
आद्येन न्यसतु स्वतत्त्वमनुना दर्भान् द्वितीयेन गं-
न्धाद्भिः प्रोक्षतु मध्यमेन कलशे तत्राक्षतैः प्रोत्किरेत्।
मूलेन प्रयजेज्जलादिभिरुपान्त्येनैनमुत्तानये-
दुन्नीयाश्चितविष्टरे स्वमनुनिष्ठेनान्तिमेन न्यसेत्॥ २१॥
संप्रोक्ष्य प्रणवेन तद्घटपुटे मूलाम्बुजे पावकी-
मध्याब्जे मिहिरोद्भवा विधुभवाश्चोर्ध्वारविन्दे कलाः।
विन्यस्यर्क्सहितैः समष्टिमनुभिः संव्याप्य ताश्चार्चयेत्
पङ्क्तिद्वादशषोडशच्छदगता भूयः प्रसूनाक्षतैः॥ २२॥

कलसपीठे तं कुम्भं निजमनुना न्यम्बिलम् अधोमुखं न्यसेतु। पुनः य-
माद्यैः यं रं वं लं हं इति बीजैः शोषादिरन्ध्रीकरणसमवसानां शोषणदहन-
प्लावनकाठिन्यसुषिरीकरणस्वरूपां विशुद्धिं विशेषशुद्धिं विदध्यात्॥ २०॥

तत्र कलशे आद्येन पञ्चतत्त्वेष्वाद्येन स्वतत्त्वमनुना दर्भान् न्यसतु। द्वितीयेन गन्धाद्भिः प्रोक्षतु। मध्यमेनाक्षतैः प्रोत्किरेत्। पुनर्मूलेन जलादि-भिरुपहारैः प्रयजेत्। उपान्त्येन चतुर्थेन एनं कुम्भमुत्तानयेत्। उन्नीय ऊर्ध्वं नीत्वा अश्चितविष्टरे पूजिते पीठे स्वमनुनिष्ठेन स्वमूलमन्त्रान्तेन अन्ति-मेन स्वतत्त्वमनुना न्यसेत्॥ २१॥

तद्घटपुटे तस्य कुम्भस्यान्तर्भागे प्रणवेन संप्रोक्ष्य तस्य स्थानत्रये पद्म-त्रयं संचिन्त्य मूलाम्बुजे मूलाधारस्थपद्मे पावकीः पावकोद्भवा वह्निकलाः मध्याब्जे मिहिरोद्भवाः सूर्यकलाः ऊर्ध्वारविन्दे विधुभवाः सोमकलाश्च विन्य-स्य ऋक्सहितैः समष्टिमनुभिः तत्तद्भिस्तत्तत्समष्टिमन्त्रैश्च तत्र तत्रसंव्याप्य भूयः पङ्क्तिद्वादशषोडशच्छदगताः दशद्वादशषोडशदलगताः ताः कलाः प्रसू-नाक्षतैरन्यैश्चोपहारैरर्चयेत्॥ २२॥

---

१. 'मूलेन न्यम्बिलं तं न्यसतु सुसहिते योगपीठे' ख. पाठः. २. 'शोषादीनि क्रमेण प्रचरतु सुषिरीकारनिष्ठानि विद्वान्॥' क. पाठः. ३. 'तं गन्धैरुक्षतु मध्यमेन विकिरेत् तस्मिञ्छुभैरक्षतैः। मू' ख. पाठः. ४. 'र्चि' इति मूलकोशपाठः. ५. 'स्य', ६. 'भैं' क. ख. घ. पाठः. ७. 'ये द्वितीयेन' ख., 'थे ग' घ. ङ. पाठः.

कुम्भावाहनमादधीत चतुरर्णार्काणुना तन्मुखे
दिङ्मध्येषु निवेश्य बैन्दवकला ह्रामादिकाङ्गान्वितम् ।
तन्मन्त्रेण यजेज्जिनार्णजनितं संपातमापातये-
न्मुद्रां कुम्भमयीं प्रदर्श्य जगदण्डाकारमेनं स्मरेत् ॥ २३ ॥
न्यस्येत् तात्त्विकसंख्यदर्भकृतसन्दर्भे विराड्विग्रहे
कुम्भेऽस्मिन् प्रणवेन कूर्चमथ चार्हेत् तत् सुषुम्नात्मकम् ।
तन्मूले न्यसतु स्वकं[2] सुमहितं द्रव्यं सुवर्णाश्मवत्
तज्जीवात्ममयं निजार्हमनुना मन्त्री ततश्चार्चयेत् ॥ २४ ॥
दोष्णा कुम्भमुखं पिधाय ससुधाबीजेन तच्चेतना-
मुन्नीयोपरिपद्मसद्मपरमात्मैक्यं प्रणीयादिना ।

पुनः चतुरर्णार्काणुना 'ओं ह्रीं[3] हंसः' इत्यनेन सौरचतुरक्षरेण कुम्भावाहनं कुम्भदेवतावाहनमादधीत । तन्मुखे कुम्भमुखे दिङ्मध्येषु, बिन्दुकलाश्चतस्रश्चेच्चतसृणां दिशां मध्येषु पञ्च चेच्चतसृषु दिक्षु मध्ये च, वक्ष्यमाणा बैन्दवकला निवेश्य न्यस्य ह्रामादिकाङ्गान्वितं 'ह्रां हृदयाय नमः' इत्यादिभिरङ्गानि न्यस्य तैः समन्वितं तन्मन्त्रेण चतुरक्षरेण यजेत् । जिनार्णजनितं स्वस्वगायत्र्याज्यहोमसम्भूतं सम्पातम् आपातयेत् कुम्भे संस्पृशेत् । पुनः कुम्भमयीं मुद्रां प्रदर्श्य एनं कुम्भं जगदण्डाकारं ब्रह्माण्डाकारं स्मरेत् ॥ २३ ॥

विराड्विग्रहे विराडात्मकविग्रहे कुम्भेऽस्मिन् तात्त्विकसंख्यदर्भकृतसन्दर्भे पञ्चविंशत्या दर्भैः कृतविरचनं कूर्चं प्रणवेन न्यस्येत् । अथ कुम्भविग्रहस्य देवस्य सुषुम्नात्मकं तत् कूर्चं तेनैव प्रणवेन चार्हेत् पूजयेत् । तन्मूले तस्य मूलाधारे । स्वकं स्वीयं सुवर्णाश्मवत् सुवर्णेन रत्नैश्च युतं सुमहितं पूजितं च द्रव्यं न्यसतु । ततो मन्त्री द्रव्यदेवतामन्त्राणामैक्यज्ञः तज्जीवात्ममयं तस्य जीवात्मकस्वरूपं तद्द्रव्यं निजार्हमनुना द्रव्यस्य देवतामन्त्रेणार्चयेच्च ॥ २४ ॥

पुनः ससुधाबीजेन अमृतबीजयुक्तेन दोष्णा वामकरेणेतरेण च कुम्भमुखं पिधाय आच्छाद्य तच्चेतनामुन्नीयोर्ध्वं नीत्वा उपरिपद्मसद्मपरमा-

---

१. 'कल्पकथितं', २. 'समर्चयतु चात्माष्टाक्षरेणाणुना' इति मूलकोशपाठः.
३. 'ह्रीं ह्रं' ख. ग. पाठः.

क्षाद्यान्ताक्षरजातमादिकृततारं शीर्षनिष्ठं जपन्
मन्त्री तत्परिपातुकामृतरसैः कुम्भं धियापूरयेत् ॥ २५ ॥
उत्पूयोदगुपाहितादुदितमन्त्रेज्याजपोपस्कृता-
च्छङ्खे वारुणवारिणः समवदायाभ्यर्च्य तेनाम्भसा ।
कुम्भं प्रोक्तमनुं जपन् समभिपूर्योर्ध्वार्धमप्छेषत-
श्चास्मिन्नक्षरपुष्करं परियजेदावाह्यमूर्त्याश्रयम् ॥ २६ ॥
मूर्त्तिः शिफानालसरांसि कण्टकं
रन्ध्रं तथोपर्युपरि क्षपूर्वकैः ।

त्मैक्यं तस्य द्वादशान्तस्थपद्मगृहस्थितेन परमात्मनैक्यम् आदिना प्रणवेन प्रणीय आदिकृततारम् आदौ कृतेन तारेण युतं शीर्षनिष्ठं स्वाहाकारान्तं क्षाद्यान्ताक्षरजातं क्षकाराद्यकारान्तमक्षरसमूहं लिपिप्रतिलोमम् 'ओं क्षं स्वाहा' 'ओं ळं स्वाहा' इत्यादि पुनरवसाने शीर्षनिष्ठमित्यनेन शिरोमन्त्रं च जपन् मन्त्री तत्परिपातुकामृतरसैः तस्मात् परमात्मनः पतनशीलैरमृतरसैर्धिया कुम्भमापूरयेत् । मन्त्रीति लिपिप्रतिलोमाक्षरमन्त्राणाममृतबिन्दुरूपेण ध्यानमुक्तम् ॥ २५ ॥

ततः उत्पूय गालयित्वा उदगुपाहितात् उदग्भागे स्थापितात् उदितमन्त्रेज्याजपोपस्कृतात् पीठपूजानन्तरं तीर्थं वरुणं देवं चावाह्य तत्पूजया पञ्चवारुणादिमूलमन्त्रजपेन च संस्कृतात् वारुणवारिणः वरुणदेवत्याज्जलात् शङ्खे समवदाय आहृत्य मूलेनाभ्यर्च्य तेनाम्भसा प्रोक्तमनुं तारलिपिप्रतिलोमशिरोमन्त्रान् जपन् कुम्भमापूर्य अप्छेषतश्च वारुणपात्रे शिष्टैर्जलैश्च ऊर्ध्वार्धम् ऊर्ध्वार्धपर्यन्तं च समभिपूर्य अस्मिन् कलशे आवाह्यमूर्त्याश्रयम् आवाहनयोग्याया मूर्तेराश्रयभूतं अक्षरपुष्करं लिपिपङ्कजं परियजेत् । अत्रावाह्यमूर्त्याश्रयमक्षरपुष्करं परियजेदित्यनेन वाक्येन मूर्त्याश्रयमावाह्य मूर्त्यावाहनानन्तरं पुनरक्षरपुष्करं परियजेदिति केषाञ्चित् पक्षे क्रमभेदः सूचितः ॥ २६ ॥

मूर्तिः शिफेत्यादिभिश्चतुर्भिः श्लोकैर्लिपिपङ्कजपूजां ब्रूते— क्षपूर्वकैः क्ष ळ ह स ष श इत्येतैर्बीजैः सह मूर्तिः शिफानालसरांसि कण्टकं रन्ध्रं चोपर्युपरि स्युः । 'ओं क्षं नमः पराय मूर्त्यात्मने नमः', 'ओं ळं नमः पराय

---

१. 'स्त' क. पाठः.

सान्तस्थधर्मादिपदप्रभेदिता-
ग्नेयादिकग्रन्थिगणः स्वगोचरे ॥ २७ ॥
अधर्मपूर्वान्वितपूर्वपूर्वाः
स्युर्ग्रन्थयो दिक्षु नपुंसकार्णैः ।
पूर्वादिपत्राण्यपि कादिभान्तै-
स्त्रिभिस्त्रिभिर्दिक्षु मकर्णिकान्तः ॥ २८ ॥
द्वाभ्यां द्वाभ्यां सर्गबिन्द्वन्विताभ्या-
मज्भ्यां पूर्वाद्यादिकाः केसराश्च ।

शिफात्मने नमः' इत्यादयो मन्त्राः । सान्तस्थधर्मादिपदप्रभेदिताग्नेयादिकग्रन्थिगणः अन्तस्थैर्यरलवैः सह धर्मादिपदैः धर्मज्ञानवैराग्यैश्वर्यैश्च प्रभेदितः आग्नेयादिको ग्रन्थिगणः ग्रन्थीनां समूहः स्वगोचरे स्वस्वस्थाने आग्नेयादिकोणेषु । 'ओं यं नमः पराय धर्मायाग्नेयग्रन्थ्यात्मने नमः' इत्यादयो मन्त्राः ॥ २७ ॥

नपुंसकार्णैः ऋ ॠ ऌ ॡ इत्येतैः सह अधर्मपूर्वान्वितपूर्वपूर्वाः अधर्मपूर्वैरधर्मादिभिः सह पूर्वपूर्वाः पूर्वादयो ग्रन्थयो दिक्षु । 'ओं ऋ नमः परायाधर्माय पूर्वग्रन्थ्यात्मने नमः' इत्यादयो मन्त्राः । कादिभान्तैः कं खं गं इत्यादिभिः फं बं भं इत्यन्तैः त्रिभिस्त्रिभिः सह पूर्वादिपत्राणि पूर्वादिष्वष्टदिक्षु स्युः । 'ओं कं खं गं नमः पराय पूर्वपत्रात्मने नमः', 'ओं घं ङं चं नमः पराय आग्नेयपत्रात्मने नमः' इत्यादयो मन्त्राः । मकर्णिका अन्तः मकारसहिता कर्णिकान्तर्भागे । 'ओं मं नमः पराय कर्णिकात्मने नमः' इति मन्त्रः ॥ २८ ॥

सर्गबिन्द्वन्विताभ्यां क्रमाद् विसर्गेण बिन्दुना च युक्ताभ्यां द्वाभ्यां द्वाभ्यामज्भ्यां[1] सह पूर्वाद्यादिकाः पूर्वादिशब्दा आदिभूताः केसराश्च स्वस्वदिक्षु स्युः । 'ओं अः आं नमः पराय पूर्वकेसरात्मने नमः', 'ओं इः ईं नमः

---

१. 'भ्याम' क. ख. घ. पाठः.

तारांशाद्यान्यात्मविद्यापरात्म-
तत्त्वानीहोपर्युपर्यास्थितानि ॥ २९ ॥
क्रमेण सहशक्तितारसहिताः समर्च्यास्ततः
सुधीभिरिह बिन्दुनादयुतशक्तिशान्ता अपि ।
सबिन्दुनिजबीजनत्युपरिसंत्परायाक्षरं
विरामहृदयात्मनेपदमुदीर्णमर्णाम्बुजम् ॥ ३० ॥
तद्देवतानामविभिन्नङेन्तनत्यन्तमूर्त्यक्षरतोऽत्र मूर्तिम् ।
आवाह्य साङ्गीकरणार्चनान्ते तस्यां कलावाहनमादधीत ॥

परायाग्नेयकेसरात्मने नमः' इत्यादयो मन्त्राः । तारांशाद्यानि अं उं मं इत्याद्यानि आत्मविद्यापरात्मतत्त्वानि आत्मतत्त्वं विद्यातत्त्वं परात्मतत्त्वं च इह पद्मे[2] उपर्युपरि आस्थितानि । 'अं नमः परायात्मतत्त्वात्मने नमः' इत्यादयो मन्त्राः ॥ २९ ॥

ततः इह त्रितत्त्वानामुपरि सुधीभिः तत्तत्पूजायां तत्तत्स्थाने तत्तन्मन्त्रात्मतया पद्मस्य तत्तदवयवोद्भवध्यानकुशलैः सहशक्तितारसहिताः सं हं ह्रीं ओं इत्येतैः सहिताः क्रमेण बिन्दुनादयुतशक्तिशान्ता अपि समर्च्याः स्युः । 'ओं सं नमः पराय बिन्द्वात्मने नमः', 'ओं हं नमः पराय नादात्मने नमः', 'ओं ह्रीं नमः पराय शक्त्यात्मने नमः', 'ओं ओं नमः पराय शान्तात्मने नमः' इति मन्त्राः । सबिन्दुनिजबीजनत्युपरिसंत्[3]परायाक्षरं बिन्दुसहितानां निजनिजबीजानां नतानां चोपरि साद्भिः परायेत्यक्षरैर्युतं विरामहृदयात्मनेपदं विरामेऽवसाने हृदयेन नमसा युक्तेनात्मने इति पदेन युक्तम् अर्णाम्बुजं लिपिपङ्कजम् उदीर्णम् उक्तम् ॥ ३० ॥

अथ मूर्त्यावाहनमाह — तद्देवतेति । अत्र लिपिमये पद्मे तद्देवतानामविभिन्नङेन्तनत्यन्तमूर्त्यक्षरतः तत्तद्विष्ण्वादिदेवतानां नामयुक्तेन चतुर्थ्येकवचनान्तेन नमोन्तेन च मूर्तिशब्देन 'ओं विष्णुमूर्तये नमः' इत्यादिना मूर्तिमावाह्य साङ्गीकरणार्चनान्ते सकलीकरणमर्चनं[4] च कृत्वा तस्यां मूर्तौ कलावाहनमादधीत ॥ ३१ ॥

१. 'ष' ख. पाठः. २. 'द्मे । इत्युप' क. ख. पाठः. ३. 'ष' क. ख. घ. ङ. पाठः. ४. 'नां' क. पाठः.

आदाय शङ्खे सलिलं पुरोव-
दूधृदाष्टगन्धं प्रविलोड्य तस्मिन् ।
इष्ट्वादिना व्यस्तसमस्तरूपे-
णावाहयेत् तत्र कलाकलापम् ॥ ३२ ॥

कलाः कार्शानव्यो दश र्विभवाः स्यू रविमिता
निशेशोद्भूताः षोडश दशदशोमाक्षरभवाः ।
चतस्रो बिन्दूत्थाः श्रुतिकृतिमिता नादजनिता
जगत्संख्याः शक्तेः करपरिमिते शान्तजनिते ॥ ३३ ॥

धूम्रार्चिरूष्मा ज्वलिनी ज्वालिनी विष्फुलिङ्गिनी ।
सुश्रीः सुरूपा कपिला हव्यकव्यवहे अपि ॥ ३४ ॥

तपनी तापनी धूम्रा मरीचिर्ज्वालिनी रुचिः ।
सुषुम्ना भोगदा विश्वा बोधिनी धारिणी क्षमा ॥ ३५ ॥

कलावाहनरीतिमाह—आदायेति । पुरोवत् पूरणारम्भवत् शङ्खे सलिलमादाय हृदा हृदयमन्त्रेण अष्टगन्धं प्रविलोड्य तस्मिन् आदिना तारेणेष्ट्वा तत्र व्यस्तसमस्तरूपेण कलामन्त्रैः कलाकलापं कलासमूहमावाहयेत् ॥ ३२ ॥

कास्ताः कला इत्यत्राह — कला इति । कार्शानव्यः कृशानुसम्बन्धिन्यः वह्निकलाः दश स्युः । रविभवाः सूर्यकलाः रविमिताः द्वादश । निशेशोद्भूताः सोमकलाः षोडश । ओमाक्षरभवाः अकारोकारमकारभवाः दश दश, अकारकला उकारकला मकारकलाश्च दश दश स्युः । बिन्दूत्थाः बिन्दुकलाश्चतस्रः । नादजनिताः नादकलाः श्रुतिकृतिमिताः, श्रुतयो वेदाश्चत्वारः, तेषां कृतिः षोडश, तैः परिमिताः । शक्तेः कलाः शक्तिकलाः जगत्संख्याः तिस्रः । शान्तजनिते शान्तकले करपरिमिते द्वे च ॥ ३३ ॥

धूम्रार्चिरित्यादिना दश वह्निकलाः पठति । हव्यकव्यवहे अपि हव्यवाहा कव्यवहापीत्यर्थः ॥ ३४ ॥

तपनीत्यादिना द्वादश सूर्यकलाः पठति ॥ ३५ ॥

---

१. 'ल' ख. पाठः. २. 'ध' ३. 'धरणा' क. पाठः.

अमृता मानदा पूषा तुष्टिः पुष्टी रतिर्धृतिः ।
शशिनी चन्द्रिका कान्तिर्ज्योत्स्ना श्रीः प्रीतिरङ्गदा ॥ ३६ ॥
पूर्णा पूर्णामृता चेति तेजस्त्रयभवाः कलाः ।
सृष्टिर्ऋद्धिः स्मृतिर्मेधा कान्तिर्लक्ष्मीर्द्युतिः स्थिरा ॥ ३७ ॥
स्थितिः सिद्धिरिति प्रोक्ता यथाक्रममकारजाः ।
जरा च पालिनी शान्तिरैश्वरी रतिकामिके ॥ ३८ ॥
वरदा ह्लादिनी प्रीतिर्दीर्घा चोकारसम्भवाः ।
तीक्ष्णा रौद्री भया निद्रा तन्द्री क्षुत् क्रोधिनी क्रिया ॥ ३९ ॥
उत्कारी चैव मृत्युश्च मकाराक्षरजा मताः ।
पीता श्वेतारुणा तद्वदसितापि च बिन्दुजाः ॥ ४० ॥
निवृत्तिश्च प्रतिष्ठा च विद्या शान्तिस्तथैव च ।
इन्धिका दीपिका चैव रोचिका मोचिका परा ॥ ४१ ॥
सूक्ष्मा सूक्ष्मामृता ज्ञानामृता चाप्यायिनी तथा ।
व्यापिनी व्योमरूपा चानन्ता वापि च नादजाः ॥ ४२ ॥
याद्यैः क्रमोत्क्रमप्रोक्तकभादिद्विद्विवर्णकैः ।
आद्यैश्च कटपाद्यैश्च षाद्यैराद्यैश्च ता युताः ॥ ४३ ॥

अमृतेत्यादिना षोडश सोमकलाः पठति । इति तेजस्त्रयभवाः वह्निसूर्यसोमक्रमेण संभूताः कलाः सृष्टिरित्यादिना दशाकारकलाः पठति । जरेत्यादिना दशोकारकलाः पठति । तीक्ष्णेत्यादिना दश मकारकलाः पठति । पीतेत्यादिना चतस्रो बिन्दुकलाः पठति । अनन्ता वापीति विकल्पेन पञ्चम्यनन्ताप्युक्ता । निवृत्तिरित्यादिना षोडश नादकलाः पठति । परेति नवमी कला ॥ ३६—४२ ॥

कलानां बीजान्याह — याद्यैरिति । याद्यैः यकारादिक्षकारान्तैर्युतास्ता वह्निकलाः, 'यं धूम्रार्चिषे नमः' इत्याद्याः । क्रमोत्क्रमप्रोक्तकभादिद्विद्विवर्णकैः क्रमेण प्रोक्तैः काद्यैः, व्युत्क्रमेण प्रोक्तैर्भाद्यैश्च द्विद्विवर्णैर्युतास्ताः सूर्यकलाः 'कं[२] भं तपन्यै नमः' इत्याद्या इत्यर्थः । आद्यैः[३] अकारादिविसर्गान्तैर्युताः

---

१. 'च तथानन्ता च' इति मूलकोशपाठः. २. 'कुं' क. ख' पाठः. ३. 'द्यैराद्यैरका' क. ख. घ. पाठः.

तारस्वशक्तिबीजाढ्याः सर्वाः प्राक् स्वोक्तबीजतः ।
वक्ष्येऽष्टवर्गनिर्दिष्टानृक्समष्टिमनूनपि ॥ ४४ ॥
जाततद्ये त्र्यम्बकहंसाद्ये अपि पुनः प्रतद्विष्णुः ।
त्र्यम्बकतत्पदपूर्वे विष्णुर्योनिं च कीर्तितास्तदृचः ॥ ४५ ॥
स्वस्वध्रुवांशयुतमण्डलनाम ङेन्तं
धर्मार्थकामपदमादिदशादियुक्तम् ।
भूयः प्रदादिककलात्मपदं चतुर्थ्या
नत्या च संयुतमिति त्रिसमष्टिमन्त्राः ॥ ४६ ॥

सोमकलाः, 'अं अमृतायै नमः' इत्याद्याः । कटपाद्यैः कादिक्षान्तैर्युताः अकारकलाः 'कं सृष्ट्यै नम' इत्याद्याः, टादिनान्तैर्युताः उकारकलाः 'टं जरायै नमः' इत्याद्याः, पादिशान्तैर्युताः मकारकलाः 'पं तीक्ष्णायै नमः' इत्याद्याः । षाद्यैः षकारादिळकारान्तैः क्षकारान्तैर्वा युताः बिन्दुकलाः, 'षं पीतायै नमः' इत्याद्याः । आद्यैः अकारादिविसर्गान्तैर्युतास्ता नादकलाः, 'अ निवृत्त्यै[1] नमः' इत्याद्याः ॥ ४३ ॥

ताः सर्वा अपि कलाः स्वोक्तबीजतः प्राक् तारस्वशक्तिबीजाढ्याः प्रणवभुवनेश्वरीयुक्ताः । स्वशक्तीत्यनेन विष्णौ श्रीबीजमुक्तम् । अष्टवर्गनिर्दिष्टान् वह्निसूर्यसोमाकारोकारमकारबिन्दुनादानां कलाः अष्टवर्गास्तेषु निर्दिष्टान् ऋक्समष्टिमनून् ऋचः समष्टिमन्त्रानपि वक्ष्ये । अहमिति शेषः ॥ ४४ ॥

जाततदाद्ये 'जातवेदसे सुनवाम सोमं' 'तत्सवितुरि'त्याद्ये द्वे । त्र्यम्बकहंसाद्ये 'त्र्यम्बकं यजामहे' 'हंसः शुचिषद्' इत्याद्ये च द्वे । पुनः 'प्रतद्विष्णुरि'त्यपि । त्र्यम्बकतत्पदपूर्वे 'त्र्यम्बकं यजामहे' 'तत्सवितुरि'ति पूर्वे द्वे । 'विष्णुर्योनिम्' तदृचः तस्याष्टवर्गस्य ऋचः कीर्तिताः ॥ ४५ ॥

स्वस्वध्रुवांशयुतमण्डलनाम स्वेन स्वेन प्रणवांशेन युतानि स्वानि स्वानि मण्डलनामानि । ङेन्तं तानि नामानि चतुर्थ्येकवचनान्तानि च । आदिदशादियुक्तं धर्मार्थकामपदम् आदौ दश द्वादश षोडश इत्येभिर्युक्तानि धर्म, अर्थ, काम इति पदानि । भूयः प्रदादिककलात्मपदं प्रद इत्यादिकं कलात्म इति पदम् । तत्तु चतुर्थ्या नत्या च संयुतं स्यात् । 'मं वह्निमण्डलाय दशधर्मप्रदकलात्मने नमः', 'अं सूर्यमण्डलाय द्वादशार्थप्रदकलात्मने नमः',

---

१. 'ऋत्यै न' क. ज. पाठः.

ब्रह्माद्यैरधिदैवतैरथ पृथिव्याद्यैश्च गन्धादित-
न्मात्रैर्घ्राणमुखैः समस्तसदुपस्थानन्दपूर्वैरपि ।
तारेष्वंशभवाः समष्टिमनवः सृष्ट्यादिकृत्यैर्निवृ-
त्त्याद्याभिर्नमसैकशो निरधिदैवं चात्मनेर्णैर्युताः ॥ ४७ ॥

ब्रह्मा विष्णू रुद्रेश्वरौ सदाशिव इहेरिता देवाः ।
अन्त्यौ महासदाद्यौ विष्णू क्वापीतरे गणाः प्रथिताः ॥

अत्रानन्दविसर्गौ गमनादाने वचनमपि विषयाः ।
सृष्टिस्थितिसंहारतिरोभावानुग्रहास्तु कृत्यानि ॥ ४९ ॥

'ॐ सोममण्डलाय षोडशकामप्रदकलात्मने नमः' इति त्रिसमष्टिमन्त्राः तेजस्त्रयस्य समष्टिमन्त्राः ॥ ४६ ॥

तारेष्वंशभवाः प्रणवस्य पञ्चांशसंभूतानामकारोकारमकारबिन्दुनादकलानां समष्टिमनवः **ब्रह्माद्यैः** ब्रह्मविष्णुरुद्रेश्वरसदाशिवैरधिदैवतैः, **अथ पृथिव्याद्यैः** पृथिव्यप्तेजोवाय्वाकाशैः, **गन्धादितन्मात्रैः** गन्धादि(भिः) शब्दादिभूतैः तन्मात्रैः गन्धतन्मात्रं रसतन्मात्रं रूपतन्मात्रं स्पर्शतन्मात्रं शब्दतन्मात्रम् इत्येतैः, **घ्राणमुखैः** घ्राणाद्यैः घ्राणजिह्वाचक्षुस्त्वक्श्रोत्रैः, **समस्तसदुपस्थानन्दपूर्वैरपि** समासयुक्तैः सद्भिरुपस्थानन्दपूर्वैरपि **उपस्थानन्दः** वायुविसर्गः पादगमनं पाण्यादानं वाग्वचनम् इत्येतैः, **सृष्ट्यादिकृत्यैः** सृष्टिस्थितिसंहारतिरोभावानुग्रहैः, **निवृत्त्याद्याभिः** निवृत्तिप्रतिष्ठाविद्याशान्तिशान्त्यतीताभिः एतैः सप्तविधैर्युताः । एकशः प्रत्येकं नमसा संयुताः । **निरधिदैवं** ब्रह्माद्यधिदेवतावर्जमात्मनेर्णैः आत्मने इत्यक्षरैश्च युताः । 'ब्रह्मणे नमः' इत्याद्याः, 'पृथिव्यात्मने नमः' इत्याद्याः, 'गन्धतन्मात्रात्मने नमः' इत्याद्याः, 'घ्राणात्मने नमः इत्याद्याः, 'उपस्थानन्दात्मने नमः' इत्याद्याः, 'सृष्ट्यात्मने नमः' इत्याद्याः, 'निवृत्त्यात्मने नमः' इत्याद्याश्च सप्त सप्त ते समष्टिमन्त्रा इत्यर्थः ॥ ४७ ॥

ब्रह्मादिवर्गान् पठति — **ब्रह्मेति** । तत्रान्त्यावीश्वरशिवयोः स्थाने **महासदाद्यौ विष्णू** महाविष्णुः सदाविष्णुश्च **क्वापि** विष्ण्वादिषु भवतः । **इतरे गणाः प्रथिताः** प्रसिद्धाः ॥ ४८ ॥

अत्रानन्दादीन् पठति— **अत्रेति** । **विषयाः** उपस्थादीनां **विषयत्वेन प्रसिद्धाः** । सृष्ट्यादिकृत्यानि पठति — **सृष्टीति** ॥ ४९ ॥

तेजोजासु समष्ट्यनन्तरमृचो वैवं च सर्वासु वा
चन्द्रार्कानलनादबिन्दुविषरुद्राजक्रमादुद्भवः ।
सूर्याब्जानलबिन्दुनादविषविष्णूद्यत्क्रमेण स्थितिः
कर्माक्षाणि कुहापि पादकरपायूपस्थवाचः क्रमात् ॥

उद्गीथान्वितपाशशक्तिसृणिनिर्बिन्द्वन्तधात्वर्णहों
संवर्णानुगताजपात्मतिथिवर्णैस्तत्कलानां पदम् ।
सृण्यन्तैर्युतमेव वा पृथगुदीर्य प्राणजीवेन्द्रिया-
द्यूर्ध्वांशत्रितयप्रभेदितमथ प्राणान् प्रतिष्ठापयेत् ॥ ५१ ॥

एतेषां क्रममाह—**तेजोजास्विति** । तेजोजासु वह्निसूर्यसोमकलासु समष्ट्यनन्तरमृचो वा समष्ट्यावाहनानन्तरं वा ऋग्भिरावाहना । सर्वासु कलास्वप्येवं वा क्रमः । चन्द्रार्कानलनादबिन्दुविषरुद्राजक्रमाद् विषं मकारः, रुद्रः उकारः, (अजः अकारः) सोमसूर्यवह्निनादबिन्दुमकारोकाराकारक्रमाद् उद्भवः सृष्टिक्रमः सूर्याब्जानलबिन्दुनादविषविष्णूद्यत्क्रमेण अब्जः सोमः, विष्णुरकारः, सूर्यसोमवह्निबिन्दुनादमकाराकारोकारक्रमेण स्थितिः । संहारस्तु पूर्वोक्तक्रम एव । कुहापि क्वचित्पक्षे पादकरपायूपस्थवाचः क्रमात् कर्माक्षाणि कर्मेन्द्रियाणि भवन्ति ॥ ५० ॥

प्राणप्रतिष्ठामाह—**उद्गीथेति** । उद्गीथान्वितपाशशक्तिसृणिनिर्बिन्द्वन्तधात्वर्णहों[1]संवर्णानुगताजपात्मतिथिवर्णैः उद्गीथः प्रणवः तदनुगताः पाशशक्तिसृणयः आं इति पाशः, ह्रीं इति शक्तिः, क्रोमित्यङ्कुशः, निर्बिन्द्वन्ताः धात्वर्णाः यरलवशषसेत्यमी सप्त, हों सं इति स्वरूपम् एतेषां वर्णानामनुगता पश्चात् गता अजपा हंस इति, उद्गीथाद्यजपान्तस्वरूपैस्तिथिवर्णैः पञ्चदशाक्षरैः सह । तत्कलानां पदं तत्तद्विशेषनामयुक्तं कलानामिति पदं वह्निकलानां सूर्यकलानामित्यादिपदम् । सृण्यन्तैर्युतमेव वा प्रणवपाशशक्त्यङ्कुशैर्युतमेव वा । पृथक् त्रिवारमुदीर्य । प्राणजीवेन्द्रियाद्यूर्ध्वांशत्रितयप्रभेदितं प्राणा इह प्राणा इत्यादिजीव इह स्थित इत्यादि सर्वेन्द्रियाणि इत्यादि च ऊर्ध्वांशत्रि-

---

१. 'ह्रोमां सं' ख. घ. ङ. पाठः.

पूर्वे प्राणा इह प्राणाः पुनर्जीव इह स्थितः।
पुनः सर्वेन्द्रियाण्यादिवाङ्मनश्चक्षुरक्षरम् ॥ ५२ ॥
श्रोत्रघ्राणयुतप्राणा इहैवागत्यसंयुतम्।
सुखं चिरं तिष्ठन्तु स्वाहेत्यूर्ध्वांशास्त्रयः क्रमात् ॥ ५३ ॥

इच्छाज्ञानक्रियाः शक्तय इह गदिताः शक्तिनाम्नश्चिदानन्दात्मानौ शान्तनाम्नः स्वपदमिह समष्टिर्भवेदात्मनेन्तम्। स्वे स्वे वा पञ्च मन्त्रास्तदुभयमनवः स्वार्हकल्प्त्या लिपिर्वा मूलं वा पूरणी स्याद् यदि न पुनरमन्तान्तिमा बैन्दवीनाम् ॥

तर्पणेन च प्रभेदितं [1]पुनरीर्यात्थं प्राणान् प्रतिष्ठापयेत् प्राणप्रतिष्ठामन्त्रं जपेदित्यर्थः ॥ ५१ ॥

ऊर्ध्वांशत्रितयमाह — **पूर्वे**मिति। प्रथमे प्राणा इह प्राणा इत्यूर्ध्वांशः, पुनर्जीव इह स्थित इति, पुनस्तृतीयः सर्वेन्द्रियाण्यादिवाङ्मनश्चक्षुरक्षरं सर्वेन्द्रियाणि इत्यादौ युतं वाङ्मनश्चक्षुरित्यक्षरम्। श्रोत्रघ्राणयुतप्राणा इहैवागत्यसंयुतं श्रोत्रघ्राण इति पदाभ्यां सहितेन इहैवागत्येत्यनेन संयुतं सुखं चिरं तिष्ठन्तु स्वाहेति। इति त्रय ऊर्ध्वांशाः क्रमाद् भवन्ति ॥ ५२, ५३ ॥

शक्तिकलादिकमाह — **इच्छे**ति। इह शक्तिनाम्नः षष्ठस्य प्रणवांशस्य इच्छाज्ञानक्रियास्तिस्रः शक्तयः कला गदिताः। शान्तनाम्नः सप्तमस्य प्रणवांशस्य चिदानन्दात्मानौ 'चिदात्मने नमः' 'आनन्दात्मने नमः' इतीमौ मन्त्रौ द्वे कले भवतः। इह शक्तिशान्तयोः। आत्मनेन्तम्। आत्मने इत्यन्तम्। स्वपदं 'शक्त्यात्मने नमः' 'शान्तात्मने नमः' इति द्वयं समष्टिर्भवेत्। स्वार्हकल्प्त्या स्वयोग्यया कल्प्त्या त्रिद्विक्रमेण। स्वे स्वे पञ्च मन्त्रा वा तदुभयमनवः शक्तिशान्तयोर्मन्त्राः। अत्र बैन्दवीनां कलानां बिन्दुकलानाम्। अन्तिमानन्ता न यदि बिन्दुकलाश्चतस्र एव गृह्यन्ते चेत्। पुनरवसाने लिपिर्वा मूलं वा पूरणी चतुर्नवतिसंख्यापूरणी स्यात् ॥ ५४ ॥

---

१. 'अस्तदुभयमनवः पञ्च हंसास्तृचो वा। स्वाह्यात्मान्तां समष्ट्यात्मकमनुरथ तत्पूरणी मूलरूपा लैपेयी वा कला सा न यदि' ख. पाठः.

तत्तद्वर्ग्याः पृथगिह कलाः सन्निधाप्यैतदीये-
नावाह्याम्नायमयमनुना तत्समष्ट्यात्मना च ।
दोष्णा शङ्खोदकमभिमृशन् स्वासुसंस्थापनाणुं
मन्त्री सम्मन्त्रयतु च कलावाहनप्रक्रियेयम् ॥ ५५ ॥

मूलमन्त्रचिदुपोद्वलितं तद्
वारि मूलमनुना कलशेऽस्मिन् ।
सन्निधाय कुसुमाञ्जलिपूर्वं
व्याप्य विन्यसतु तत्र कलास्ताः ॥ ५६ ॥

व्याधारे स्वकलादलाम्बुजदलेष्वभ्यादितस्तैजसीः
पद्योःसन्धितदग्रपायुवृषणेऽन्धौ नाभिकुक्ष्योर्हृदि ।

एवमिह तत्तद्वर्ग्याः तत्तद्वर्गभवाः कलाः पृथक् सन्निधाप्यावाह्य । एतदीयेन तदीयेन । आम्नायमयमनुना ऋङ्मन्त्रेण । तत्समष्ट्यात्मना तत्तत्समष्टिमन्त्रेण चावाह्य दोष्णा शङ्खोदकमभिमृशन् स्पृशन् । स्वासुसंस्थापनाणुं स्वस्वप्राणप्रतिष्ठामन्त्रं संमन्त्रयतु जपतु च । इयं कलावाहनप्रक्रिया कलावाहनरीतिः । मन्त्रीत्यनेन सकलीकृतात् स्वात्मनस्तत्तत्कलान्यासस्थानतः तां तां कलामावाहयेदिति विशेषकृत्यं सूचितम् ॥ ५५ ॥

ततो मूलमन्त्रचिदुपोद्वलितं मूलमन्त्रावाहनपूजनाभ्यां प्राप्तचैतन्यप्रकाशम् । तत् समस्तकलासमवेतं वारि । मूलमनुना मूलमन्त्र जपन् । अस्मिन् कलशे सन्निधाय शङ्खात् कलशे योजयित्वा । कुसुमाञ्जलिपूर्वं व्याप्य तत्र कलशे ताः कलाः विन्यसतु ॥ ५६ ॥

कलान्यासमाह — व्याधार इति । व्याधारे मूलाधारहृदयभ्रूमध्येषु । स्वकलादलाम्बुजदलेषु स्वस्वकलासङ्ख्यदलवतामम्बुजानां दलेषु । अभ्यादितः अग्रगतं दलमारभ्य । तैजसीः वह्निसूर्यसोमकलाः न्यस्येत् । पद्योस्सन्धितदग्रपायुवृषणे पादकरयोः सन्ध्यग्रेषु विंशतिस्थानेषु अकारकलादशकमुकारकलादशकं च पुनः पायौ वृषणे अन्धौ लिङ्गमूले नाभिकुक्ष्योः हृदि । पार्श्वद्व-

---

१. 'प्य क्रमेण स्वर्चा चैतत्समुदितसमष्ट्यात्मनाथाभिवाह्य । दो' ख. पाठः.

पार्श्वद्वन्द्वपराक्कुत्सु च कला न्यस्येद् गले सानने
सभ्रूके प्रतिसंस्थितस्वरपदेष्वप्यादिपञ्चांशजाः[1] ॥ ५७॥
पद्दोर्युक्तलनासिकाद्विभुजपार्श्वेषु क्रमाद् वार्णजा
न्यस्याः पायुशिवोरुजानुनलकास्फिक्ष्वभवा[2] मार्णजाः[3] ।
हृद्ग्रीवांसयुगोरुनाभ्युदरवत्सोरोजके बिन्दुजाः
शक्रार्कीन्दुजलेशकेष्वथ कलास्थाने कला नादजाः[4] ॥५८॥
तत्तद्वर्ग्यकलान्ततस्तदुदिते स्थानेऽखिले व्यापये-
दृङ्मन्त्रैः स समष्टिभिः सह निजप्राणप्रतिष्ठाणुभिः[5] ।
ऊर्वोस्त्रिः प्रणवं हृदि त्रिरजपां जप्त्वा हृदिस्थादिना
मन्त्रेणाभिमृशेद्धृदि न्यसनकल्पस्तिः स्यात् कलानामिति ॥

न्द्वपराक्कुत्सु पार्श्वयोः पृष्ठे गलपृष्ठे च मकारकलाः । गले सानने आस्ये सभ्रूके च बिन्दुकलाश्चतस्रश्चेत् । पञ्च चेद् भ्रुवोर्मूर्धनि च सभ्रूक इति ककारस्य स्वार्थे कप्रत्ययत्वं मूर्ध(शब्द?)वाचकत्वं चावगन्तव्यम् । प्रतिसंस्थितस्वरपदेषु प्रतिलोमेन संस्थितेषु स्वरस्थानेषु नादकलाश्च न्यस्येत् । एवमादिपञ्चांशजाः आदेः प्रणवस्य पञ्चभ्योंऽशेभ्यः सम्भूताः कलाः न्यस्येत् ॥ ५७ ॥

अकारकलादीनां पक्षान्तरेण न्यासमाह — **पद्दोरिति** । पद्दोर्युक्तलनासिकाद्विभुजपार्श्वेषु पादतलयोः करतलयोर्नासिकाद्वये भुजयोः पार्श्वयोश्च । क्रमादार्णजा अकारकला न्यस्या वा । पायुशिवोरुजानुनलकास्फिक्षु पायौ लिङ्गे ऊरुद्वये जानुद्वये जङ्घाद्वये स्फिग्द्वये च । उभवाः उकारकलाः हृद्ग्रीवांसयुगोरुनाभ्युदरवत्सोरोजके हृदि ग्रीवायामंसद्वये ऊरुद्वये नाभावुदरे वत्सोरोजयोश्च । मार्णजाः मकारकलाः । शक्रार्कीन्दुजलेशकेषु इन्द्रयमसोमवरुणब्रह्मस्थानेषु विन्दुजाः । अथ कलास्थाने नादजाः कलाश्च न्यस्यो वा ॥५८॥

अथ तत्तद्वर्ग्यकलान्ततः तत्तद्वर्ग्याणां कलानामन्ते । तदुदिते तत्तत्कलानामुक्तेऽखिले स्थान । ऋङ्मन्त्रैस्तत्तद्दृग्भिः । ससमष्टिभिः तत्तत्समष्टिमन्त्रैश्च सह । निजप्राणप्रातिष्ठाणुभिः निजनिजप्राणप्रतिष्ठामन्त्रैश्च व्यापयेत् । पुनरूर्वोस्त्रिस्त्रिकृत्वः । प्रणवं हृदि स्पृशन्नजपां च त्रिः जप्त्वा हृदिस्थादिना मन्त्रेण । हृद्यभिमृशेत् हृदयं संस्पृश्य जपेत् । इति कलान्यसनकॢप्तिः स्यात् ॥

---

१. 'ज्ञः ॥ तत्त' ख. पाठः. २. 'क्षु क्रमान्मार्ण' क. पाठः. ३. 'र्द्वयो' क. पाठः. ४. 'स्य ॥' ख. घ. पाठः. ५. 'ग्भिश्च स' क. ख. घ. पाठः.

हृदिस्था देवताः सर्वा हृदये नित्यसंस्थिताः।
हृदि सर्वं समर्पयामि हृदि प्राणाः प्रतिष्ठिताः ॥ ६० ॥

तिस्रो न्यसेच्छक्तिकलास्त्रिषु स्वे-
ष्वाधारपद्मेषु हृदीतरे द्वे।
मन्त्रा निजाः पञ्च कला यदि स्युः
स्थानेषु ताः स्वेष्वथ मातृकां च ॥ ६१ ॥

मूलाङ्गन्यासं च कृत्वार्चयित्वा
विद्यादेहात्मानमावाह्य तस्मिन्।
मूलाद्येन स्वेन नाम्ना चतुर्थी-
नत्यन्तेन न्यस्य साङ्गं यजेच्च ॥ ६२ ॥

प्राग्वच्छङ्खगृहीतवार्युपहितैस्तन्मूर्तिकेऽनुक्रमा-
दावाह्याखिलतत्त्वकानि मनुचैतन्योर्जितं तज्जलम्।

हृदिस्थादिनेत्युक्तं मन्त्रं पठति — हृदीत्यादि। इह

"सप्तात्मकस्य तारस्य परौ द्वौ तु परौ यतः।
अतस्तु शक्तिशान्तारूयौ न पठ्येते परैः सह ॥"

इति प्रपञ्चसारोक्तत्वात् कलावाहनं पृथगेवोक्तम् ॥ ६० ॥

संप्रति न्यासकृत्तिरपि पृथगेवोच्यते — तिस्रः शक्तिकलाः स्वेषु त्रिष्वाधारपद्मेषु मूलाधारहृदयभ्रूमध्येषु। इतरे शान्तकले द्वे हृदि च न्यसेत्। निजाः पञ्च मन्त्राः शक्तिशान्तयोः कलाः यदि स्युः, ताः स्वेष्वेव स्थानेषु न्यसेत्। अथ मातृकां च मूलाङ्गन्यासं च कृत्वार्चयित्वा तस्मिन् मूलाद्येन चतुर्थीनत्यन्तेन नाम्ना स्वेन स्वेन नाम्ना मूलमुक्त्वा 'ओं विद्यामूर्तये नमः' इत्यनेनावाह्य मूलाक्षराङ्गानि न्यस्य साङ्गं यजेच्च ॥ ६१, ६२ ॥

अथ तत्त्वावाहनमाह — प्राग्वदिति। प्राग्वत् पूर्ववत्। शङ्खगृहीतवारि शङ्खगृहीते जले। उपहितैतन्मूर्तिके तत्र मूर्तिकल्पनानन्तरम्। अखिलतत्त्वकानि पञ्चविंशतिं वा षट्त्रिंशतं वा तत्त्वानि। अनुक्रमात् सृष्टिक्रमा-

---

१. 'ष्वथ शान्तजे द्वे। हृदन्तराधाब्जिदलेषु मूर्ध्नि तस्योपरि द्वे द्विदले न्यसेद्वा ॥ कृत्वा मूलन्यासमङ्गावसानं तेनाराध्यावाह्य विद्याभिधानाम्। मूर्तौ मूलादिस्वना' ख. पाठः,

कुम्भेऽस्मिन् प्रणिधाय मूलमनुना व्यापय्य विन्य य त-
त्तत्त्ववातमपि स्वमूलम- वर्णाङ्गान्तमभ्यर्चयेत् ॥ ६३ ॥

अस्त्राणुना घट- खं नवचूतबोधि-
शाखाग्रपल्लवसतण्डुलचक्रिकाभिः ।
दर्भादिकैरपि विभूष्य नवेन वासो-
युग्मेन वर्ममनुना परिवेष्टयेच्च ॥ ६४ ॥
अत्राभिवाह्य मनुवि- देदेवं
कल्पक्रमेण परिपूज्य ततो धिनोतु ।
मन्त्रान् प्रजप्य परिरक्ष्य कृताभ्यनुज्ञो
मन्त्री ततः परिघटार्चनमारभेत ॥ ६५ ॥
संहृत्या विनियोज्यं द्रव्यगणं तावदत्र कथयामि ।
बहुधाभिधास्यमानस्नपनविधासुप्रतीतये पूर्वम् ॥ ६६ ॥

दावाह्य । मनुचैतन्योर्जितं मन्त्रचैतन्येन वर्धितम् तज्जलमस्मिन् कुम्भे प्रणिधाय मूलमनुना व्यापय्य तत्तत्त्ववातं तत्त्वसमूहमपि स्वमूलमनुवर्णाङ्गान्तं विन्यस्याभ्यर्चयेत् ॥ ६३ ॥

ततो नवचूतबोधिशाखाग्रपल्लवसतण्डुलचक्रिकाभिः नवैराश्वत्थशाखाग्रपल्लवैः सतण्डुलया चक्रिकया दर्भादिभिरपि घटमुखमस्त्राणुना विभूष्य नवेन वासोयुग्मेन वर्ममनुना परिवेष्टयेच्च ॥ ६४ ॥

अत्र प्रणवोपचारादिभिर्मनुविग्रहमादिदेवं परमपुरुषमावाह्य कल्पक्रमेण परिपूज्य निवेद्य ततो धिनोतु । मन्त्री वैदिकांस्तान्त्रिकांश्च स्वीयान् स्वीयान् मन्त्रांश्च प्रजप्य परिरक्ष्य कृताभ्यनुज्ञः ब्रह्मकलशस्थाद् देवादनुज्ञां लब्ध्वा ततः परिघटार्चनमारभेत ॥ ६५ ॥

अत्र पूर्वं बहुधाभिधास्यमानस्नपनविधासुप्रतीतये अनेकप्रकारेण वक्ष्यमाणस्नपनविधानेषु सुप्रतीतये सुखेनावगमाय । संहृत्या सङ्घातरूपेण । विनियोज्यं योजनीयं द्रव्यगणम् । तावत् साकल्येन कथयामि ॥ ६६ ॥

---

१. त् ॥ समन्त्रकं व्याससमासरूपं कृत्वापरन्यसमपीह केचित् । कृत्वाखिलाधारनिवेशकल्या कार्या स्थविष्ठापघनो क्रिया च ॥ आदिमनुत्रिपदाहितपरसूक्ष्ममहाङ्गसङ्गमोपेते । स्यादुचितोऽस्त्रानुविधिः कार्यो वाचार्यदर्शितक्रमतः ॥ अस्त्रा', २. 'म्र', ३. 'तु । इत्थं प्रधानकलशार्चनमुच्यते स्म वक्ष्ये विशेषमखिलेष्वनुखण्डसंस्थम् ॥ संह' ख. पाठः.

निशाशालीचूर्णाक्षतमणिहिरण्याढ्यमजिते
स्मृतं स्नानोदं तद्द्विचरमयुतं गन्धसलिलम्।
शिवे शान्त्यम्भः सुम्भजिति कुशदूर्वे च शतमू-
ल्यपि व्याघ्री सिंही सुमतिभिरिहौषध्य उदिताः॥ ६७॥
क्रान्तिश्यामाकपद्मार्तवकुशतुलसीबैल्वगन्धाक्षतं स्या-
च्छार्ङ्गीशे पाद्यमाद्यत्रितयमिह हरौ सुम्भहन्त्र्यां सराजिः।
श्यामाकः स्कन्दविघ्नस्मरजिति तिलराज्यद्रिमृत्साः समुक्तं
दूर्वा चैतेषु शास्तर्यथ तिलरजनीगन्धपुष्पाक्षतानि॥ ६८॥
आर्येऽर्घ्यं क्षीरराज्यार्तवतिलकुशगन्धा इमे साक्षतोदा
दुर्गायां गन्धपुष्पस्थलगदधियवा साक्षतोदास्त एव।

तत्राजिते निशाशालीचूर्णाक्षतमणिहिरण्याढ्यं निशाशालीचूर्णाभ्यामक्षतेन नवभी रत्नैः हिरण्येन च युक्तं स्नानोदमिति स्मृतम्। शिवे तद्द्विचरमयुतं तेष्वन्त्यद्वयेन रत्नैः हिरण्येन च युक्तं गन्धसलिलम्। शान्त्यम्भः शान्त्युदकं स्मृतम्। सुम्भजिति कुशदूर्वे द्वे च। (രതമുലീ-കാത്തിരിക്ക. വ്യാഘ്രീ-ചെറുവഴുതിന. സിംഹീ-വലിയവഴുതിന.) इत्येताः सुमतिभिरोषध्य उदिताः॥ ६७॥

शार्ङ्गीशे क्रान्तिश्यामाकपद्मार्तवकुशतुलसीबैल्वगन्धाक्षतम्। (ക്രാന്തി-വിഷ്ണുക്രാന്തി. ശ്യാമാകം-കറുവിട.) आर्तवं पुष्पम्। बैल्वं विल्वस्य फलं पुष्पं पत्रं वा एतत्सर्वं सहितं पाद्यं स्यात्। हरौ इह द्रव्येषु मध्ये। आद्यत्रितयं क्रान्तिश्यामकपद्मानि। सुम्भहन्त्र्यां सराजिः सर्षपसहितः श्यामाकः पाद्यम्। स्कन्दविघ्नस्मरजिति स्कन्दविघ्नशिवेषु। तिलराज्यद्रिमृत्साः तिलसर्षपपर्वतमृदः पाद्यम्। एतेषु षट्सु दूर्वा च। अथ शास्तरि तिलरजनीगन्धपुष्पाक्षतानि पाद्यं समुक्तं स्यात्॥ ६८॥

आर्ये क्षीरराज्यार्तवतिलकुशतिलगन्धा अर्घ्यं संप्रोक्तं स्यात्। दुर्गायां साक्षतोदा अक्षतोदकसहिताः। इमे क्षीराद्याः। शर्वस्कन्दद्विपास्ये शिवस्कन्दविघ्नेषु। गन्धपुष्पस्थलगदधियवाः गन्धपुष्पयोः स्थाने दधियवाभ्यां

---

१. 'ष्यं मुराजिति स्मृ' क. पाठः. २. 'ष्पोदकानि॥' ख. पाठः.

शर्वे [illegible]स्येऽक्षतफलयवयुक्ता विदुग्धा हरौ ते
संप्रोक्तं स्याद् वचाढ्याः पुरमुरमथने सर्व एवाखिलोक्ताः ॥

तक्कोलजातिसलवङ्गशशाङ्कगन्ध-
पुष्पं हरीशितरि नान्त्ययुगं रमेशे ।
नान्त्यत्रयं शिवगणेशगुहे लवङ्ग-
गन्धाम्बुपद्ममयमाचमनं प्रभेशे ॥ ७० ॥

श्रीशे बिल्वद्विजग्रन्थिलखदिरशमीरा हरीशे सहैतै-
र्जम्बूनीपाम्रकारग्वधपनसमधूकास्तुरीयः कुमार्याम् ।
माधूकब्रह्मशैरीषकपनसरसाला महेशे प्रभेशे
क्षीर्याख्यास्ते ष शेषेष्वजितगिरिशयोः प्लक्षहीनाः कषाये॥

युक्ताः साक्षतोदा अक्षतोदकाभ्यां सहिताः । त एव शास्तर्युक्ताः । हरौ अक्षतफलयवयुक्ता विदुग्धाः क्षीररहिताः । ते शास्तर्युक्ताः । पुरमुरमथने शिवनारायणे । वचाढ्या वचया युक्ताः । (വചാ=വയമ്പ്) अखिलोक्ताः सर्वेषूक्ताः त एवार्घ्यं संप्रोक्तं स्यात् ॥ ६९ ॥

हरीशितरि शिवनारायणे । तक्कोलजातिसलवङ्ग शशाङ्कगन्धपुष्पम् । तक्कोलं तदेव । (ജാതി=ജാതിക്കാ) लवङ्गः स एव । शशाङ्कः कर्पूरम् । एतान्याचमनं स्यात् । रमेशे नान्त्ययुगं गन्धपुष्परहितानि । शिवगणेशगुहे शिवविघ्नस्कन्देषु । नान्त्यत्रयं शशाङ्कगन्धपुष्पराहितानि तानि । प्रभेशे लवङ्गगन्धाम्बुपद्ममयम् । (പദ്മകം=പാമകം) एतत्स्वरूपमाचमनं स्यात् ॥ ७० ॥

श्रीशे कषाये बिल्वद्विजग्रन्थिलखदिरशमीराः । बिल्वः प्रसिद्धः । द्विजः पलाशः । (ഗ്രന്ഥിലം=വയ്യങ്കതകം. ഖദിരം=കരിങ്ങാലി. ശമീരം=വന്നി) एते स्युः । हरीशे एतैः सह जम्बुनीपाम्रकारग्वधपनसमधूकाः । (ജംബു=ഞാവൽ. നീപം=കടമ്പു. ആമ്രം=മാവു. ആരഗ്വധം=കൊന്ന. പനസം=പ്ലാവു. മധൂകം=ഇരിപ്പ.) एते । कुमार्यां तुरीयः खदिरः । महेशे माधूकब्रह्मशैरीषकपनसरसालाः । (മാധൂകം=ഇരിപ്പ. ബ്രഹ്മം=പ്ലാശു. ശൈരീഷകം=നെന്മേനിവാക.) पनसमुक्तम् ।

न्यग्रोधद्रुरुदुम्बरश्चलदलप्लक्षौ रसालद्विजौ
शैरीषः समधूकदारुरपि सेनान्यां कषायोचिताः ।
ओषध्योऽत्र सुवर्चलामलवचा ब्राह्मी तथा शङ्खपु-
ष्प्युद्दिष्टाः सशतावरी सहसहा क्रान्तिश्च लक्ष्मीरपि ॥
श्रीशे रात्रिसहाशिरीषकुशभद्राः सूर्यवर्त्तिन्यपि
प्रोक्तं मार्जनमीशशार्ङ्गभृति तत्पट्कान्वितं भूस्तृणम् ।
गन्धाढ्यं तुलसी[1]द्वयीपनससंयुक्तं च शास्तर्यथो
[illegible]यक्षतगन्धपुष्पकसदाभद्राकुशाग्रात्मकम् ॥ ७३ ॥
धात्र्याम्रं बिल्वकेयौ पनसमपि फले डाडिमीभव्यरम्भा-
श्रेशार्यश्रीशविघ्नेऽष्टक इह तु गुहे मातुलुङ्गाख्यजम्बौ ।

രസാലം=മാവു) एते । प्रभेशे क्षीर्याख्याः (നാല്പാമരം) । शेषेषु उक्तेषु पञ्चस्वपि ते च क्षीर्याख्याश्च । तत्राजितगिरिशयोस्तु प्लक्षहीना एते स्युः ॥७१॥

सेनान्यां न्यग्रोधद्रुः न्यग्रोधवृक्षः, उदुम्बरः, चलदलप्लक्षौ चलदलोऽश्वत्थः, रसालद्विजौ उक्तौ, शैरीषः उक्तः, समधूकदारुः मधूक उक्तः । एतेषां त्वचः कषायोचिताः कषाये निर्दिष्टाः । अत्र सेनान्यां (സവർച്ചലാ=തുച്ച), अमलवचा निर्मला वचा उक्ता, (ब्राह्मी=ബ്രഹ്മി), शङ्खपुष्पी सैव सशतावरी (ശതാവരി=ശതാവേലി), सहसहा सहया सहिता (സഹാ=പൂവംകുരുന്തൽ) । क्रान्तिरुक्ता, लक्ष्मीः=ശ്രീതാളി) । एता ओषध्यः ॥ ७२ ॥

श्रीशे रात्रिसहाशिरीषकुशभद्राः (രാത്രി=മഞ്ഞാം. ഭദ്രാ=ചെറുപൂ) अन्यान्युक्तानि, (സൂര്യവർത്തിനി=അരിവേള) । एता मार्जनं प्रोक्तम् । ईशशार्ङ्गभृति तत्पट्कान्वितं (ദർഭതൃണം=നിലപ്പന) । गन्धाढ्यं गन्धयुक्तं, तुलसीद्वयीपनससंयुक्तं तुलसीद्वयी तुलसी कृष्णतुलसी (പനസം=പ്ലാവിൻറെ ഇലയു) एतानि । अथो शास्तरि रात्र्यैन्द्र्यक्षतगन्धपुष्पकसदाभद्राकुशाग्रात्मकम्, (വെണ്ണി=ഉഴിഞ്ഞ) । एतत्स्वरूपं मार्जनम् । अत्र पल्लवानि गृह्यन्ते ॥ ७३ ॥

ईशार्यश्रीशविघ्ने एतेषु फले । (ധാത്രീ=നെല്ലിക്കാ. അമ്രം=മാങ്ങ.) **बिल्वकेयौ** (ബിലം=കൂവളക്കാ. കേരി=തെങ്ങ. പനസം=ചക്ക),

---

१. 'रा' क. पाठः.

धात्रीकेरस्थलेऽन्त्यत्रितयसबदरीजातिकेरं कुमार्यां
शार्ङ्गीशेऽतोऽतिरिक्तं सकुटचबदरीमातुलङ्गं कपित्थम् ॥
रत्नान्याहुरिहाञ्जरागमपि नीलं मौक्तिकेन्दूपलौ
चाग्नेये कुरुविन्दकाचकसमेतौ विद्रुमं वज्रकम् ।
शार्ङ्गीशे च्युतकाचनीलकुरुविन्दस्कान्दपुष्याजरा-
गायस्कान्तविडूरजार्कहरिनीलस्फाटिकं गारुडम् ॥ ७५ ॥
मुक्तावैडूर्यवज्रं मणिमरतकगोमेदपुष्येन्द्रनीलं
भर्गे दौर्गेऽधरार्धद्वहिणमणिमहानीलनीलप्रवालम् ।

डाडिमीभव्यरम्भाः (ഡാഡിമീ-താളിമാതളം. ഭവ്യം=ഈശ്വരി. രംഭാ=കദളിക്കാ) । गुह्ये त्विह अष्टके धात्रीकेरस्थले मातुलुङ्गास्त्र्यजम्बौ । (മാതു ളുംഗം=മാതളം. ജംബൂ-ഞാവൽ) । कुमार्याम् अन्त्यत्रितयसबदरीजातिकेरम् । अन्त्यत्रितयं डाडिमीभव्यरम्भाः । (ബദരം=ഇലന്ത. ജാതി. ജാതിക്കാ. കേരം=നാളികേരം) । शार्ङ्गीशे अतः धात्र्याद्यष्टकात् सकुटचबदरीमातुलुङ्गं कपित्थं च अतिरिक्तम् अधिकं स्यात् । (കടചം=കടകപ്പാലയരി. കപിത്ഥം=വാളങ്കാ) ॥ ७४ ॥

आग्नेये स्कन्दे इह अञ्जरागं पद्मरागं, नीलं स्वयमेव, मौक्तिकेन्दूपलौ, (മൗക്തികം=മുത്ത്. ഇന്ദുപലം=ചന്ദ്രകാന്തം), कुरुविन्दकाचकसमेतौ । कुरुविन्दं स्वयमेव । (കാചകം=കരട്ടുല്ല. വിദ്രുമം=പവിഴം. വജ്രകം=വൈരം) । एतानि रत्नान्याहुः । शार्ङ्गीशे च्युतकाचनीलकुरुविन्दस्कान्दपुष्याजरागायस्कान्तविडूरजार्कहरिनीलस्फाटिकं च्युतानि रहितानि काचनीलकुरुविन्दानि स्कन्दोक्तानि पुष्यादिसहितानि च । (പുഷ്യം=പുഷ്യരാഗം. അജരാഗം=ഇരുമ്പരാഗം) । अयस्कान्तं स्वयमेव । विडूरजं वैडूर्यम् । (അർക്കം=സൂര്യകാന്തം) । हरिनीलम् इन्द्रनीलम् । स्फाटिकं स्फटिकम् । (ഗാരുഡം=ഗരുഡശില) । एतानि ॥ ७५ ॥

भर्गे शिवे मुक्तावैडूर्यवज्रं, मणिमरतकगोमेदपुष्येन्द्रनीलम्, (മണി=മാണിക്കം) । मरतकं गोमेदं च स्वयमेव । अन्यान्युक्तानि । दौर्गे अधरार्धद्वहिणमणिमहानीलनीलप्रवालम् । अधरार्धे मुक्तावैडूर्यवज्रं मणिश्च ।

विष्णौ मुक्ताप्रवालाभिधकुलिशविडूरोद्भवाम्भोजरागं
तच्छैवं वा प्रभेशे स्फटिकरहितहारीशमाहुर्गणेशे ॥
लोहं शास्त्रजिते सुवर्णरजतं ताम्रायसी च त्रपु
स्कन्दे सीसककांस्यपित्तलयुतं सारं हरीशेऽखिलम् ।
स्वर्णोत्कीर्णसुपर्णकच्छपदरारीण्यौपमानाङ्गकं
श्रीशेऽत्रामलकं प्रविष्टमुरमांसीयुक्तधात्रीफलम् ॥ ७७॥
गन्धं रुङ्मुरवारिसेव्यघुसृणक्षायःपटीरं हरि-
द्वैपास्यार्यहरे सुरद्रुशशिनागाब्दैस्तदीशाच्युते ।

ഗുഗ്ഗുലു=ഇരുമരാഗം)। महानीलं नीलं च स्वयमेव । (പ്രവാളം=പവിഴം)। एतानि। विष्णौ मुक्ताप्रवालाभिधकुलिशविडूरोद्भवाम्भोजरागम् । (കുലിശം=വൈരം. വിഡൂരോദ്ഭവം=വൈഡൂര്യം. അംഭോജരാഗം=പദ്മരാഗം)। प्रभेशे तद्वा विष्णूक्तं वा, शैवं शिवोक्तं वा। गणेशे स्फटिकरहितहारीशं स्फटिकहीनहरीशोक्तं द्वादशैवाहुः ॥ ७६ ॥

शास्त्रजिते शास्तृविष्ण्वोः सुवर्णरजतं सुवर्णं रजतं च, ताम्रायसी ताम्रमयश्च, (ത്രപു=ചെമ്പുകൊട്ടി), एतल्लोहम् । स्कन्दे सीसककांस्यपित्तलयुतंमेतत् । (സീസം=ഈയം. കാംസ്യം=വെള്ളോട്. പിത്തളം=പിച്ചള)। हरीशे सारम् औरसाहितम्, (ഔരസം=ഇരിമ്പു), अखिलमेतत् लोहम् । श्रीशे स्वर्णोत्कीर्णसुपर्णकच्छपदरारीणि स्वर्णेन कृतानि गरुडकूर्मशङ्खचक्राणि । औपमानाङ्गकम् औपमानद्रव्याङ्गानि अत्र श्रीशे प्रविष्टमुरमांसीयुक्तधात्रीफलं प्रविष्टाभ्यां मुरमांसीभ्यां युक्तं धात्रीफलम् आमलकम् आमलकद्रव्यम् ॥ ७७ ॥

हरिद्वैपास्यार्यहरे विष्णुगणपतिशास्तृशिवेषु रुङ्मुरवारिसेव्यघुसृणक्षायःपटीरम् (ങ്കു=കൊട്ടം) मुरं स्वयमेव (വാരി=ഇരുവേലി സേവ്യം=രാമച്ചം. ഘുസൃണം=കുങ്കുമം. കൃഷ്ണാഗരു=അകിൽ. പടീരം=ചന്ദനം) गन्धं प्राहुः । ईशाच्युते सुरद्रुशशिनागाब्दैः सह तत् । (സുരദ്രു=തേവതാരം. ശശി=കൂവളം. നാഗം=നാ

---

१. 'ക' ङ. पाठः. २. 'अ' ख. घ. ङ. पाठः.

सेनान्यामसगायसेन्दुगदकोशाम्भोमुरं मालयं
दौर्गे प्राहुरिदं मुराब्गदपदसाचोरगोरोचनम् ॥ ७८ ॥
मल्लीचम्पकजातिनन्दिवकुलं तुल्यं गुहान्येष्वतैः
संयोज्यं शिवविघ्नयोरपरनन्द्यम्भोजसौगन्धिकम् ।
सैतत्कुन्दफलिन्युमापतिहरौ कुन्दाब्जयूथीस्त्रियः
श्रीशार्ये महिषद्विषीह कुसुमं साशोकनागोद्भवः ॥
उत्पलकल्हाराम्बुजकुमुदं सौगन्धिकं कशेरुयुतम् ।
उत्पलयुगमपि शरजे तत्तदभावेऽत्र रक्तकरवीरम् ॥ ८० ॥

ഗച്ഛവ്. അബ്ജം=മത്തങ്ങാ) । सेनान्याम् असगायसेन्दुगदकोशाम्भोमुरं मालयं च । (അസ്യക്=കുംകുമം. അയസം=അരിൽ. ഇന്ദു=കച്ചൂരം. ഗദം=കൊട്ടം. കോശം=കണ്ടിവെണ്ണ. അംഭസ്സ്=ഇരുവേലി.) मुरं स्वयमेव । मालयं चन्दनम् । दौर्गे इदं गन्धं मुराब्गदपदसाचोरगोरोचनं प्राहुः । मुराम्भोगदस्थाने साचोरगोरोचनम् । (മുാ=മഞ്ഞി. ചോരം=കച്ചൂരം) । गोरोचनं स्वयमेव ॥ ७८ ॥

गुहान्येषु स्कन्दादन्येषु षट्सु मल्लीचम्पकजातिनन्दिवकुलं तुल्यं समानम् । (മല്ലി=മുല്ല) । चम्पकं स्वयमेव । (ജാതി=ഗിരിപ്പകം. നന്ദി=നന്ദിയാർവട്ടം. വകുളം=ഇലഞ്ഞി) । शिवविघ्नयोः तैः उक्तैः अपरनन्द्यम्भोजसौगन्धिकं संयोज्यम् । (അപരനന്ദി=മറ്റേനന്ദിയാർവട്ടം.) । अम्भोजं पद्मम् । सौगन्धिकं स्वयमेव । उमापतिहरौ सैतत्कुन्दफलिनी एतैः सहितं कुन्दं फलिनी च । (കുന്ദം=കുരുന്ന. ഫലിനീ=ഞാവൽ) । इति दश । श्रीशार्ये श्रीशार्ययोः पूर्वोक्तैः पञ्चभिः सहिताः कुन्दाब्जयूथीस्त्रियः । कुन्दं चोक्तम् । (യൂഥീ=മുത്തുവാച്ചിമുല്ല. സ്ത്രീ=കാമഴി) । इति नव । महिषद्विषीह साशोकनागोद्भवम् । अशोकं स्वयमेव । (നാഗോദ്ഭവം=നാഗച്ചവ്) । पूर्वोक्तैः पञ्चभिः सहितमेतद्वयं कसुमं पुष्पोदकलशद्रव्यम् ॥ ७९ ॥

शरजे उत्पलकल्हाराम्बुजकुमुदं सौगन्धिकम् । (ഉല്പലം=ചെങ്ങഴനീർ. കൽഹാരം=നൈതൽ) । अम्बुजं पद्मम् । (കുമുദം=ആമ്പൽ) सौगन्धिकं स्वयमेव । (കശേരു=നാനൈതൽ) उत्पलयुगं ।

नीवारशालियवतण्डुलवेणुबीज-
माषं हरौ हरिहरेऽक्षतमेतदेव ।
सिद्धार्थकङ्कुसहितं निजगर्भगीता
विघ्नेश्वरे महिषजित्यपि धातवः स्युः ॥ ८१ ॥

कथितकथितवृक्षत्वक्करीषं सुदग्धं
भसितमिह समुक्तं भर्गदुर्गाहरीशे ।
इह महिषनिहन्त्र्यां खादिरत्वक्पदे तु
द्विजवरतरुकल्कं योजनीयं वदन्ति ॥ ८२ ॥

वेदीक्षेत्रगजोक्षशृङ्गगिरिवल्मीकोद्भवाः स्युर्मृद-
स्तुल्याः कोलनदीतटद्वयतटाकान्तस्रवन्त्युद्भवाः ।

श्वेतोत्पलं नलिनोत्पलं च । अत्र स्कन्दे तत्तद्भावे एतेष्वन्यतमाभावे (रक्तकरवीरं=ചുവന്നകണവീരം) इति पुष्पोदकम् ॥ ८० ॥

हरौ नीवारादिकमक्षतम् । (നീവാരം=വരിനെല്ല്. ശാലി=നെല്ല്.) यवं स्वयमेव । तण्डुलं च स्वयमेव । (വേണുബീജം=മുളനെല്ല്. മാഷം=ഉഴുന്ന്) । इत्यक्षतद्रव्यम् । हरिहरे सिद्धार्थकङ्कुसहितमेतदेव । (സിദ്ധാർത്ഥം=കടുക്. കുങ്കുമം=കുങ്കുമം) । विघ्नेश्वरे महिषजित्यपि निजगर्भगीताः निजगर्भन्यासोक्ता धातवः स्युः ॥ ८१ ॥

भर्गदुर्गाहरीशे कथितकथितवृक्षत्वक्करीषं कषायोक्तानां वृक्षाणां त्वग्भिः सह सुदग्धं करीषं भसितं समुक्तम् । इह महिषनिहन्त्र्यां खादिरत्वक्पदे तु खादिरस्थाने द्विजवरतरुकल्कं पलाशत्वचं योजनीयमिति वदन्त्याचार्याः ॥ ८२ ॥

वेदीक्षेत्रगजोक्षशृङ्गगिरिवल्मीकोद्भवा मृदस्तुल्याः सर्वत्र । वेदी अग्निहोत्रवेदी । (ക്ഷേത്രം=വിളഭൂമി. ഗജശൃംഗം=ആനക്കൊമ്പത്തേത്. ഉക്ഷശൃംഗം=കാളക്കൊമ്പത്തേത്. ഗിരി=പർവ്വതം. വല്മീകം=പുറ്റ്.) । शार्ङ्गीशे कोलनदीतटद्वयतटाकान्तस्रवन्त्युद्भवाः । (കോലോദ്ഭവം=പന്നിപ്പുഴി. നദീതടദ്വയോദ്ഭവം=നദീതീരദ്വയത്തിങ്കലേത്.

---

१. 'जतरुवरक' ख. पाठः. २. 'तत्तेष्व' ख. घ. पाठः.

शार्ङ्गीशे सरिदब्धिजे शरभवे तीर्थाखुवेश्मोद्भवे
विघ्ने शास्तरि हस्तिनाकुजविहीना वाहिनीतीरजाः ॥
शान्त्यम्भः शिवशार्ङ्गिणीह तिलसिद्धार्थैर्यवैर्वैणवै-
र्नीवारैस्तुलसीदलाम्बुजपलाशैर्मङ्गलाम्भः पुनः ।
ब्रह्माशोककुशार्जुनेन्द्रलतिकाबोध्यङ्कुराब्जैकप-
द्माढ्यं भक्ष्यमिभानने पृथुकपूपाद्यं चतुष्कं विदुः ॥ ८४ ॥
बीजानीषुभवे यवाः सतिलगोधूमाः ससिद्धार्थकाः
शालीमुद्गकमाषकाश्च सहनीवारा हरीशेऽथ ते ।

തടാകോദ്ഭവം = കുളത്തിലേതു്. അന്തസ്യാന്ത്യോദ്ഭവം = പുഴയിലേതു) । പൂർവോക്താഭിഃ ഷഡ്ഭിഃ സഹിതാ എതാ മൃദഃ । शरभवे सरिदब्धिजे (പുഴയിലേതും, സമുദ്രത്തിലേതും), പൂർവോക്താഃ ഷട് ച । विघ्ने तीर्थाखुवेश्मोद्भवे (തീർത്ഥത്തിലേതും പുറ്റിലുള്ളതും), പൂർവോക്താഃ ഷട് ച । शास्तरि हस्तिनाकुजविहीनाः हस्तिदन्तजवल्मीकविहीनाः पूर्वोक्താഃ । षड്भ्य एतद്ദ്വയരഹിതാഃ वाहिनीतीरजाः नदीतീരസ്ഥാശ്ച മൃദഃ ॥ ८३ ॥

इह शिवशार्ङ्गिणि तिलसिद्धार्थैर्यवैर्वैणवैर्नीवारैः तुलसीदलाम्बुजपलाशैः तुलसीദലൈഃ പദ്മദലൈശ്ച शान्त्यम्भः स्यात् । पुनस्तत्र ब्रह्माशोककुशार्जुनेन्द्रलतिकाबोध्यङ्कुराब्जैकपद्माढ्यम् । (ബ്രഹ്മ=പ്ലാശു) । अशोककुशे स्वयमेव । (അശോകം=മരുതു്. ഇന്ദ്രലതിക=ഉഴിഞ്ഞ. ബോധ്യങ്കുരം=അലരുടെതുണ്ടു്. ഏകപദ്മം=കരത്താമര) । एतानि मङ्गलाम्भः स्यात् । इभानने पृथुकपूपाद्यं चतुष्कं भक्ष्यं विदुः । बुधा इति शेषः । (പൃഥുകം=അവിൽ. പൂപം=അപ്പം. ലഡ്ഡുകം ഏള്ളുണ്ട. ശഷ്കുലി=അണ്ണാപ്പലി) इति ॥ ८४ ॥

इषुभवे यवाः सतिलगोधूमाः, (ഗോധൂമം=കോതമ്പു്), ससिद्धार्थकाः शालीमुद्गकमाषकाः सहनीवाराश्च बीजानि । अथ हरीशे निर्माषसिद्धार्थकाः स्कन्दोक्तेषु माषसिद्धार्थरहिताः श्यामाकच्छണകङ്കുവൈണവയുताः ।

---

१. 'द्वयाम्बु' क. पाठः. २. 'द्यैः स्याद् विघ्ने पृथुकादि होमविहितं भक्ष्यं च' ख. पाठः. ३. 'च' क. पाठः. ४. 'क्तः' ख. पाठः. ५. 'ज' ङ. पाठः.

श्यामाकच्छणकङ्गुवैणवयुता निर्मांषसिद्धार्थकाः
सङ्घातद्रविणान्यजीगणमथान्यैस्तत्प्रयोगं ब्रुवे ॥ ८५ ॥
आज्यादिसप्तदशभिर्द्रव्यैः श्रीशाभिषेचने ।
घटादिक्लप्तिरुद्दिष्टपूर्वा द्रव्यादिकं ब्रुवे ॥ ८६ ॥
आज्योष्णोदकरत्नकानि फललोहं मार्जनं गन्धकं
प्रादक्षिण्यविधानतोऽक्षतयवौ ब्राह्मे सदैवे न्यसेत् ।
पाद्यार्घ्याचमनीयगव्यदधि दुग्धं माक्षिकं क्काथकं
दिक्कोणेषु बहिस्तदीशमनुभिस्तारेण शेषेष्वपः ॥ ८७ ॥
विष्णूष्णरश्म्यजकुबेरवसूंश्च विश्वान्
गन्धर्वकान् निर्ऋतिसुम्भजितौ पितॄंश्च ।

श्यामाकमुक्तम्। (മരാം ചാമകപ്പയറ്, കംഗു തിന) । वैणवमुक्तम्। इति बीजानि । संघातद्रविणानि संघातरूपाणि द्रव्याणि अजीगणं गणितवानहम्। अथान्यैरसंघातैः सह तत्प्रयोगं कलशविधानं ब्रुवे वच्मि ॥ ८५ ॥

एवं सामान्येन संघातद्रव्याण्यभिधायाथ विष्ण्वादिदेवानां कलशविधिं पृथक् पृथग् वदन् प्रथमं विष्णौ सप्तदशद्रव्यविधिमाह — आज्यादीति । श्रीशाभिषेचने श्रीशस्याभिषेचने आज्यादिसप्तदशभिर्द्रव्यैः करणीये तत्र घटादिक्लप्तिः घटानां पुटानां खण्डानां च क्लप्तिः उद्दिष्टपूर्वा पूर्वोक्तैव । द्रव्यादिकं द्रव्यदेवतामन्त्रादिकं ब्रुवे वच्मि ॥ ८६ ॥

ब्राह्मे सदैवे ब्रह्मकलशे दैविके च प्रादक्षिण्यविधानतः मध्यानन्तरं पूर्वादिप्रदक्षिणक्रमेण आज्योष्णोदकरत्नकानि आज्यमुष्णोदं रत्नोदं च, फललोहं फलोदकं लोहोदं च, मार्जनं च, गन्धकं गन्धोदम्, अक्षतयवौ अक्षतोदं यवोदं च न्यसेत् । पुनर्बहिर्मानुषे दिक्कोणेषु दिक्कोणक्रमेण पाद्यार्घ्याचमनीयगव्यदधि पाद्यमर्घ्यमाचमनीयं पञ्चगव्यं दधि च, दुग्धं क्षीरं, माक्षिकं मधु, क्काथकं कषायजलम्, एतानि सप्तदशद्रव्याणि तदीशमनुभिः तत्तद्देवतामन्त्रैः प्रणवादिचतुर्थीनमोन्तैः न्यसेत् पूरयेदित्यर्थः । शेषेषु द्रव्यकलशेभ्योऽन्येषु तारेणापश्च पूरयेत् ॥ ८७ ॥

विष्णूष्णरश्म्यजकुबेरवसून् विष्णुं सूर्यं ब्रह्माणं वैश्रवणं वसूंश्च,

---

१. 'वे ॥ स्नाना....दिशा प्रपूर्य शरवर्गद्रव्यकेऽन्तर्हरौ पाद्यादीन्युपखण्डमध्य' ख. पाठः,

श्रीवाक्सदक्षकविसोमसुरेश्वरार्की-
नाज्यादिभाज्यभिदधत्यधिदैवतानि ॥ ८८ ॥

ऋचः षोडश पुंसूक्तस्येदंविष्णुरपि क्रमात् ।
स्नानमन्त्रास्तदीशान्ताः प्रोक्ताः स्नानक्रमं ब्रुवे ॥ ८९ ॥

मानुषदिक्खण्डघटैर्ब्रह्मघटेनाथ मानुषविदिक्स्थैः ।
दैविकदिक्कोणगतैः सप्तदशद्रव्यैक हरिं स्नपयेत् ॥ ९० ॥

द्रव्ये तत्त्वमिते षडर्णमनुना स्नानोदकं मध्यतः
पाद्यादीन्युपखण्डमध्यकलशेष्वात्तासनेज्यादिषु ।
बाह्ये दिग्विदिगन्तरालनिहितेष्वन्तश्च दिक्कोणगे-
ष्वापूर्य द्रविणानि तत्तदणुभिश्चार्च्येच्च शार्ङ्गिणि ॥

विश्वान् देवान्, गन्धर्वकान् गन्धर्वान्, निर्ऋतिसुम्भजितौ निर्ऋतिं दुर्गां पितॄंश्च, श्रीवाक्सदक्षकविसोमसुरेश्वरार्कीन् श्रियं सरस्वतीं दक्षं शुक्रं सोममिन्द्रं यमं च, आज्यादिभाज्यानि आज्यादिद्रव्यगानि अधिदैवतान्यभिदधति वदन्ति ॥ ८८ ॥

पुंसूक्तस्य षोडशर्चः 'इदं विष्णुरपि' तदीशान्ताः अन्ते तत्तद्देवतानामयुक्ताः क्रमात् स्नानमन्त्राः प्रोक्ताः । स्नानक्रमं ब्रुवे ॥ ८९ ॥

सप्तदशद्रव्यके सप्तदशद्रव्यस्नाने पूर्वं मानुषदिक्खण्डघटैः, अथ ब्रह्मघटेन, पुनर्मानुषविदिक्स्थैः खण्डैः, पुनर्दैविकदिक्कोणगतैश्च हरिं स्नपयेत् ॥ ९० ॥

विष्णावेव पञ्चविंशतिद्रव्यस्नानमाह — द्रव्य इति । शार्ङ्गिणि तत्त्वमिते पञ्चविंशतिमिते द्रव्ये, मध्यतो ब्रह्मकलशे, षडर्णमनुना स्नानोदकं निशाशालीत्याद्युक्तम् । बाह्ये मानुषे दिग्विदिगन्तरालनिहितेषु, अन्तर्दैविके दिक्कोणगतेषु च स्थानेषु, आत्तासनेज्यादिषु कृतपीठपूजासंस्कारादिषु, उपखण्डमध्यकलशेषु उपखण्डानां मध्यस्थेषु कलशेषु, पाद्यादीनि द्रविणानि तत्तदणुभिः वक्ष्यमाणमन्त्रैरापूर्य चार्चयेच्च ॥ ९१ ॥

---

१. 'त् ॥ पितृलक्ष्मीवाग्दक्षा विष्णुकवीन्द्विन्द्रयमदिनेशधनदाः । विश्वनिर्ऋत्यगपुगन्धर्वा दुर्गेति च क्रमात् स्नपने ॥ द्र' क. पाठः. २. 'भव्यकादिषरान्ततत्स्वगणरूपद्रव्यकाणि भ्यसेत् ॥', ३ 'तपूजपी' ख. पाठः.

पाद्यार्घ्याचामगव्यं सघृतदधिपयः क्षौद्रमर्काक्षरेणो-
ष्णोदं काथोदकं मार्जनफलयवरत्नोदलोहोदकौशम् ।
गायत्र्या गन्धपुष्पौपमिकमपि सधाऽक्षतं केरवारी-
क्षूत्थोदं तण्डुलोदं न्यसतु तदधिदैवान्तमष्टाक्षरेण ॥९२॥
द्रव्याणां पुरुषः परः पितृरमावाग्दक्षविष्णूशन-
श्चन्द्रेन्द्रार्ककृतान्तविश्वधनदेरब्रह्मवस्वाह्वयाः ।
स्युः सावित्र्यपि देवता निगदिता गन्धवंवारीश्वरा-
स्तार्क्ष्यः क्ष्मानिर्ऋती रमाधरनृसिंहाख्यौ हयास्यः क्रमात् ॥

पाद्यार्घ्याचामगव्यं पाद्यमर्घ्यमाचमनीयं गव्यं च, सघृतदधिपयः घृतं दधि पयश्च, क्षौद्रं मधु, एतान्यष्टौ द्रव्याणि अर्काक्षरेण द्वादशाक्षरमन्त्रेण तदधिदैवान्तं चतुर्थीनमोन्तं तत्तद्देवतानामान्ते भवति यथा तथा न्यसतु । पुनस्तत्रान्तरालेषु उष्णोदमुष्णजलं, काथोदकं कषायं, मार्जनफलयवरत्नोदलोहोदकौशं मार्जनं फलोदं यवोदं रत्नोदं लोहोदं कुशोदं च । गायत्र्या च पुनर्दैविके गन्धपुष्पौपमिकमपि गन्धोदं पुष्पोदम् औपमानं च, सधाऽक्षतम् आमलकोदकमक्षतोदकं च, केरवारि नालिकेरोदकम्, इक्षूत्थोदं, तण्डुलोदं च, दिग्विदिक्षु अष्टाक्षरेण तदधिदैवान्तं च ॥ ९२ ॥

देवताः पठति — द्रव्याणामिति । परः पुरुषो ब्राह्मे । पुनः पितृर-

---

१. 'त् ॥ शालीपिष्टसुवर्णरत्नरजनीचूर्णाह्वयैः स्नानकं
श्यामाकाम्बुजविष्णुपर्ण्यभिधदूर्वाभिः स्मृतं पाद्यकम् ।
राजीपुष्पफलाक्षतैर्यवतिलैर्गन्धैः कुशैश्चार्घ्यकं
तक्कोलेन्दुलवङ्गजातिफलसम्पन्नं तथाचामकम् ॥
प्राक्षन्यूनपयोदुम्बादिरशमीबिल्वद्विजग्रन्थिलैः
काथं रात्रिसहाशिरापिकुशभद्रः सूर्यवर्तिन्यपि ।
षट्कं मार्जनमीरितं सकदलीबिल्वाम्रधात्रीफलं
केरीडाडिमभव्यकं सपनसं प्राहुः फलोदाङ्गकम् ॥
मुक्ताविद्रुमपद्मरागपविवैडूर्याह्वयै रत्नकं
तद्वत्काञ्चनरूप्यताम्रकमयस्त्राप्वन्वितं लोहकम् ।
गन्धाः शीतजलायसाह्वमुरसेव्याप्तार्तय: पुष्पकं
मल्लीचम्पकजातिनन्दिबकुलश्रीकुन्दयूथ्यम्बुजम् ॥
हैमं सुवर्णदरकूर्मरथाङ्गमौपमानं जटामुरयुतामलकी सुपिष्टा ।
क्षेयाजिते सयवतण्डुलमाषशालिनीवारवेणवमुदीरितमक्षताङ्गम् ॥
इदमृद्भि' क. पाठः.

इदमृग्घिरण्यवर्णा आपोहिष्ठप्रजापतेनत्वत् ।
तेजोऽसीति दधिक्राव्णोऽथाप्यायस्वमन्त्रमधुमत्यः ॥ ९४ ॥
आकृष्णेनाश्वत्थे भद्रंकर्णेभिक्रग् गणानां त्वा ।
वायो ब्रह्मोपत्वा देवस्यत्वा च मानुषे मन्त्राः ॥ ९५ ॥
विष्णोरराटमिति तत्त्वायामि सुपर्णमित्यतः स्योना ।
शन्नो यादिव्या यासां च परोमात्रयाणवो दैवे ॥ ९६ ॥
ब्राह्मेऽतो देवा इति मनवः स्नपने स्वपूरणाणुयुताः ।
इति पञ्चविंशतिमितद्रव्यस्नानक्रमो हरौ प्रोक्तः ॥ ९७ ॥

मावाग्दक्षविष्णूशनश्चन्द्रेन्द्रार्ककृतान्तविश्वधनदेरब्रह्मवत्स्वाह्वयाः पितरः श्रीः सरस्वती दक्षो विष्णुः शुक्रः सोम इन्द्रः सूर्यो यमो विश्वेदेवा वैश्रवणो वायुः ब्रह्मा वसवश्च, सावित्र्यपि मानुषे । गन्धर्ववारीश्वराः गन्धर्वो वरुणश्च, तार्क्ष्यो गरुडः, क्ष्मानिर्ऋती पृथिवी निर्ऋतिश्च. रमाधरनृसिंहाख्यौ श्रीधरो नृसिंहश्च, हयास्यो हयग्रीवः दैविके । एते क्रमाद् द्रव्याणां देवता निगदिताः स्युः ॥ ९३ ॥

स्नानमन्त्रान् पठति — इदमिति । इदमृक् 'इदं विष्णुः', 'हिरण्यवर्णाः शुचयः', 'आपो हि ष्ठ', 'प्रजापते न त्वत्', 'तेजोऽसी'ति, 'दधिक्राव्णो अकारिषम्', आप्यायस्वमन्त्रमधुमत्यः 'आप्यायस्व'मन्त्रो 'मधु वाता' इत्यादि तिस्र ऋचश्च ॥ ९४ ॥

'**आकृष्णेन** रजसा', 'अश्वत्थे वो निषदनं', 'भद्रंकर्णेभि'ऋक् 'गणानां त्वा', 'वायवायाहि', 'ब्रह्मजज्ञानम्', 'उप त्वाग्ने', 'देवस्य त्वा' च, एते मानुषे मन्त्राः ॥ ९५ ॥

'**विष्णोरराटमि**'ति, 'तत् त्वायामि', 'सुपर्ण वस्ते', 'स्योना पृथिवी', 'शन्नो देवी', 'या दिव्या आपः', 'यासां राजा', 'परो मात्रया' एते दैवे दैविके अणवः ॥ ९६ ॥

ब्राह्मे 'अतो देवा' इति स्नपने स्वपूरणाणुयुताः द्वादशाक्षरादिमन्त्राः स्वस्वदेवतानाममन्त्राश्चावसाने युक्ताः एते मनवः स्युः । इति हरौ पञ्चविंशतिमितद्रव्यस्नानक्रमः पञ्चविंशतिमितैर्द्रव्यैः स्नानक्रमः प्रोक्तः ॥ ९७ ॥

अधमाधमपूर्वमुत्तमोत्तमपर्यन्तमिहाभिषेचनम् ।
नवधा परिचक्षते बुधाः क्रमशः शङ्करशार्ङ्गधन्वनि ॥ ९८ ॥

बाणाद्रिनन्दकृतयः कलशा हरीशे
न्यूनं शतं सनवविंशतिकं शतं च ।
तत्त्वोत्तरद्विशतकं द्विशती सविश्वा
सा सप्तसप्ततियुता त्रिशती सताना ॥ ९९ ॥

आज्यादिभिर्हरिवदत्र कषायनिष्ठै-
र्द्रव्यैस्तु सप्तदशभिस्त्यधमाभिषेकाः ।
शैलाङ्कशङ्करपुटाहितपञ्चसप्त-
गोवर्गसङ्ख्यकलशैर्विहिताः क्रमेण ॥ १०० ॥

अथ शिवनारायणकलशक्लृप्तिमाह —अधमाधमेति । इह शङ्कर-शार्ङ्गधन्वनि अधममध्यमोत्तमेषु प्रत्येकमधममध्यमोत्तमयोगादभिषेचनं क्रमशो बुधा नवधा परिचक्षते आहुः ॥ ९८ ॥

हरीशे एतत्संख्याः कलशाः स्युः —बाणाद्रिनन्दकृतयः बाणकृतिः पञ्चविंशतिः अद्रिकृतिरेकोनपञ्चाशत् नन्दकृतिरेकाशीतिः इत्यधमत्रयम् । न्यूनं शतं सप्तनवतिः, सनवविंशतिकं शतं च नवविंशत्यधिकशतं, तत्त्वोत्तर-द्विशतकं पञ्चविंशत्यधिकशतद्वयमिति मध्यमत्रयम् । सविश्वा द्विशती त्रयो-दशाधिकशतद्वयं, सप्तसप्ततियुता सा सप्तसप्तत्यधिकशतद्वयं, सताना त्रिशती एकोनपञ्चाशदधिकत्रिशतमिति (उत्तमत्रयम्) ॥ ९९ ॥

अत्र शङ्करनारायणेऽपि हरिवत् विष्णुवत् शैलाङ्कशङ्करपुटाहितपञ्च-सप्तगोवर्गसंख्यकलशैः सप्तनवैकादशपुटेषु कल्पितैः पञ्चविंशत्येकोनपञ्चाश-देकाशीतिकलशैराज्यादिभिः कषायनिष्ठैः सप्तदशभिर्द्रव्यैः त्र्यधमाभिषेकाः अधमाधमाधममध्यमाधमोत्तमाश्चाभिषेकाः क्रमेण विहिताः ॥ १०० ॥

---

१. 'तत्राङ्गुगादिनववर्णमिता घटाः स्युरूनं', २. 'तादिकृतिस्त्रिशत्याः' क. पाठः. ३. 'कक्कथितनिष्ठहरिप्रदिष्टद्रव्यैः' ख. पाठः. ४. 'ण ॥ मुक्ताफलं कुलिशविद्रुममज्जपु ष्यब्रह्मादिरागसहितसूर्यपदादिकान्तम् । वैडूर्यगारुडशतक्रतुनीलसायस्कान्तं त्रिलोचनहरौ स्फटिकं च रत्नम् ॥

सद्योजातकवामवक्त्रबहुरूपेशानपञ्चाक्षरा-
प्यायस्वेति पयोवधीह मधुवातब्रह्महृद्भ्यां मधु ।
अश्वत्थे शिरसा जिनार्णशिखया पुष्प वतालोचने-
नापोह्यस्त्रमयाणुना पुरुषपङ्क्त्यर्णाणुनेत्याक्षतम् ॥ १०१ ॥

तेषु त्रिषु स्नानमन्त्राणामेव विशेष इति तान् पठति — **सद्य इति** । सद्योजातकवामवक्त्रबहुरूपेशानपञ्चाक्षराणि 'सद्योजात', वामदेवाय', 'तत्पुरुषाय', 'अघोरेभ्यः', 'ईशानः सर्वविद्यानां', पुनः पञ्चाक्षरम्, 'आप्यायस्व' इति पयोवधि पाद्यार्घ्याचमनीयगव्यघृतदधिक्षीरेषु सप्त मन्त्राः । इह मधुवातब्रह्महृद्भ्यां 'मधु वाता' इति तिस्रः ऋचः, पञ्चब्रह्महृदयेन च मधु मधुस्नानम् । अश्वत्थे वैः', शिरसा पञ्चब्रह्मशिरसा कषायस्नानम् । जिनार्णशिखया 'ओं शङ्कराय विद्महे' इत्याद्यया गायत्र्या ब्रह्मशिखया चोष्णोद-

---

श्रीमातुलुङ्गकुटचामलकाम्रकेरीरम्भाकपित्थबदरीफलपूरभव्यम् ।
चोचम्पलं कनकपित्तलकांस्यसीसं ताम्रायसारजतत्रपुलोहमाहुः ॥

भद्रं भूस्तृणयामिनीकुशशिरीषं सूर्यवर्तिन्यपि
प्रोद्दिष्टं पनसं सहा द्वितुलसंगन्धात्मकं भाजनम् ।
गन्धो रुड्मुरवारिसेव्यघुमृणप्रायःपटीराश्च ये
सामान्याः शशिदेवदारुघननागाश्चेह तौ द्वादश ॥

नीवारशालियवतण्डुलवेणुबीजमाषं सकट्वगुमितसर्षपमक्षताङ्गम् ।
श्यामाकबिल्वतुलसीकुशगन्धदूर्वाकान्त्यक्षतार्तवपयोरुहमत्र पाद्यम् ॥

दर्भ(?)न्याक्षताढ्यं तिलफलयवकाँशैर्वचागन्धपुष्पै-
राज्यार्घ्यं जातितक्कोलशशिकुसुमगन्धश्रियाचामकं स्यात् ।
क्काथे श्रीखादिरग्रन्थिलपनसशमीनीपशम्याकजम्बू-
क्षीर्याम्रब्रह्ममाधूकमपि च भसिते तत् करीषं सुगन्धम् ॥

राजीनीवारपद्मैर्यवतिलतुलसीब्रह्मभिर्वेणुबीजैः
शान्त्यम्भो मङ्गलाम्भश्चलदलमुखजैन्द्र्यजुनाशोककौशैः ।
कार्यं पद्मैकपद्मान्वितमथ कठिनीतीरमध्यात् तटाका-
न्नाकुक्षेत्रादिवेदीवृषकरिकिरिशृङ्गाच्च गृह्णातु मृत्स्नाः ॥

नीवारगोधूमयवप्रियङ्गुश्यामाकशालीतिलबैणवानि ।
बीजानि मुद्गच्छणवन्ति कुन्दफलिन्युपेतं शिवभावि पुष्पम् ॥

सद्यो' क. पाठः. १ 'यः पञ्च' ख. पाठः.

तन्महेशदशवर्णतः परं व्योमजैनलिपिपङ्क्तिवर्णतः ।
त्र्यम्बकाणुकवचेन मानऋग्विष्णुजैनलिपिना यवोदकम् ॥
इत्युक्तसद्यादिकमन्त्रकाणां सहस्रशीर्षाद्यजितोक्तमन्त्रान्।
एकैकशो[1] संमुदीर्य मन्त्री संस्नापयेच्चाभिहितक्रमेण ॥
तिथिसङ्ख्यपुटेऽधमाधमं रचयेच्छैलपुटेन मध्यतः ।
नवकान्यपि दिग्विदिक्षु तत्परितोऽष्टाविति मध्यमाधमम् ॥
गुलेक्षुकेरोदकतैलशान्तिमङ्गल्यमृद्भस्मजलानि बाह्ये ।
ब्राह्मेण बीजेन घृतादिकान्ते दिक्कोणदेशेष्वभिपूरयेच्च ॥

कस्नानम् । पुष्पावतीलोचनेन 'पुष्पावतीः' ब्रह्मनेत्रेण च फलोदकस्नानम् । 'आपो हि ष्ठ' अस्त्रमयाणुना ब्रह्मास्त्रमन्त्रेण च मार्जनस्नानम् । पुरुषपङ्क्तचर्णाणुना 'तत्पुरुषेण' व्योमव्यापिदशाक्षरेण चाक्षतोदस्नानमिति आक्षतम् अक्षतोदपर्यन्तस्नानम् ॥ १०१ ॥

तन्महेशदशवर्णतः 'तन्महेशाय' इति गायत्र्या व्योमव्यापिदशाक्षरेण च परं रत्नोदकस्नानम् । व्योमजैनलिपिपङ्क्तिवर्णतः व्योमगायत्र्या तद्दशाक्षरेण च लोहोदस्नानम् । त्र्यम्बकाणुकवचेन 'त्र्यम्बकं यजामहे' ब्रह्मकवचेन च गन्धोदकस्नानम् । मानऋक् 'मा नस्तोके', विष्णुजैनलिपिना 'नारायणाय विद्महे' इत्याद्यया गायत्र्या यवोदकम् ॥ १०२ ॥

मन्त्री मन्त्रविशेषज्ञः इत्युक्तसद्यादिकमन्त्रकाणां सद्योजातादिसप्तदशविधानामुक्तानां मन्त्राणाम् आदौ सहस्रशीर्षाद्यजितोक्तमन्त्रान् वैष्णवोक्तसहस्रशीर्षादिमन्त्रेषु एकैकं समुदीर्य अभिहितक्रमेण 'मानुषदिक्खण्डघटैरि'-त्यादिश्लोकोक्तक्रमेण संस्नापयेत् ॥ १०३ ॥

अथ मध्यमाधमादिकमाह — **तिथीति** । तिथिसंख्यपुटे पञ्चदशपुटे क्षेत्रे मध्ये शैलपुटेन सप्तपुटेनाधमाधमं रचयेत् । तत्परितो बीथ्या बहिः दिग्विदिक्षु अष्टौ नवकान्यपि रचयेदिति मध्यमाधमं स्यात् ॥ १०४ ॥

तत्र घृतादिकान्ते आज्योष्णोदकेत्याद्युक्तसप्तदशद्रव्यान्ते तद्बाह्ये दिक्कोणदेशेषु गुलेक्षुकेरोदकतैलशान्तिमङ्गल्यमृद्भस्मजलानि गुलम् इक्षूदकं

---

१. 'पारिजप्य म' क. पाठः ·

त्वं विष्णो इति दिक्ष्वथाश्रिषु पुनर्विष्णोर्नुकं शन्न इ-
त्यश्वक्रान्तऋगुद्धृतासि च पुरोयुक्तैः क्रमाद् ब्रह्मभिः।
केरोदावधि संहतैरथ पृथग्भूतैश्च सद्यान्तिमै-
र्मूलोङ्कारसमन्वितैः स्नपितयेत् स्नाते यवोदान्तिमैः ॥
क्षेत्रे विंशतिसूत्रकेऽधमभवं मध्ये तु चेन्मध्यमं
वीथिं पङ्क्तियुजोत्तमं यदि तु पङ्क्त्यैतद्वहिस्तत्क्रमात्।
कुर्यात् षोडश पञ्चकानि नवकान्यप्यन्तरा गन्धकं
विन्यस्येद्धरिमूलतोऽन्यदखिलं प्राग्वद् द्वयीतीतरा ॥१०७॥
क्षेत्रे तत्र त्रयोविंशतिपुट इषुवर्गात्मकद्रव्यकल्पत्या
मध्ये कृत्वाष्टयुक्तं शतमथ परितः पञ्चकोदञ्चितानि ।

नालिकेरोदकं तैलं शान्तिजलं मङ्गल्यजलं मृज्जलं भस्मजलं च ब्राह्मेण बीजेन 'कं' इति ब्रह्मबीजेनाभिपूरयेच्च ॥ १०५ ॥

यवोदान्तिमैः सप्तदशद्रव्यैः स्नाते सति दिक्षु 'त्वं विष्णो सुमतिमि'-ति, अथाश्रिषु 'विष्णोर्नुकं', 'शन्नो देवीरि'ति, 'अश्वक्रान्त'ऋक्, 'उद्धृतासि वराहेण' इति वैष्णवमन्त्रपुरोयुक्तैः, केरोदावधि गुलेक्षुकेरोदस्नानेषु संहतैः समस्तैः ब्रह्मभिः, अथ पृथग्भूतैः सद्यान्तिमैश्च पञ्चभिर्ब्रह्मभिश्च एतेषामन्ते मूलोङ्कारसमन्वितैश्च स्नपितयेत् स्नपितं कुर्यात् ॥ १०६ ॥

मध्यममध्यमं मध्यमोत्तमं चाह — **क्षेत्र** इति। विंशतिसूत्रके एकोनविं-शतिपुटे क्षेत्रे मध्ये अधमभवं मध्यमं चेत् पङ्क्तियुजा, मध्ये उत्तमं यदि तु पङ्क्त्या च वीथिं कुर्यात्। एतद्बहिस्तत्क्रमात् मध्यमं चेत् षोडश पञ्च-कानि, उत्तमं यदि षोडश नवकान्यपि कुर्यात्। अत्रान्तरा अन्तरालेषु हरि-मूलतः वैष्णवाष्टाक्षरेण गन्धकं गन्धोदकं विन्यस्येत्। अन्यदखिलम् आज्या-दिकं गुलादिकं च प्राग्वत्। इतरा द्वयी मध्यममध्यमं मध्यमोत्तमं चेति स्यात् ॥ १०७ ॥

उत्तमत्रैविध्यमाह — **क्षेत्र** इति। तत्र त्रयोविंशतिपुटे क्षेत्रे मध्ये इषुवर्गात्मकद्रव्यकल्पत्या पञ्चदशपुटैः पञ्चविंशतिद्रव्यकल्पत्या मानुषान्तरा-

१. 'च' क. पाठः.

दिक्कोणाभ्यन्तराण्यारचयेत् नवकाढ्यानि वा सत्यकादि-
स्थानस्थानि त्रिकाणि द्विविधविधिसमान्युत्तमार्वाग्द्वयीति

तत्रोत्तमोत्तमविधौ शतमष्टयुक्तं
मध्ये बहिर्दिक्कोणमध्यनिहिताद्रङ्ख्याः ।
दिक्कोणमध्यनिहिता जलधिप्रमाणा-
स्तत्सत्यकादिषु च तत्त्वपुटे घटाः स्युः ॥ १०९ ॥
बलां वचां चातिबलां च शङ्ख-
पुष्पीं च सक्तूदकसिंहिके च ।
व्याघ्रीं कुशोदं च घृतादिकान्ते
ब्रह्माङ्कतोऽन्तर्न्यसतु त्रिकेषु ॥ ११० ॥

लगतत्रिकैः सहाष्टोत्तरं शतं कृत्वा, अथ परितो दिक्कोणाभ्यन्तराणि पञ्चको-
दञ्चितानि पञ्चकैर्युक्तानि वा नवकाढ्यानि वा आरचयतु । उत्तमाधमं चेत्
पञ्चकानि, उत्तममध्यमं चेद् नवकानीति विभागः । सत्यकादिस्थानस्थानि
दिगन्तरालयोर्मध्यस्थानि त्रिकाण्यन्यान्यन्तरालानि वारचयतु । तानि तु द्वि-
विधविधिसमानि उत्तमस्याधमे मध्यमे च समानि । उत्तमार्वाग्द्वयी उत्तमत्रि-
तयस्य अधोगतद्वयमिति स्यात् ॥ १०८ ॥

तत्रोत्त(मोत्त)मविधौ तत्त्वपुटे पञ्चविंशतिपुटे मध्ये पूर्ववदष्टयुक्तं
शतम् । बहिर्दिक्कोणमध्यनिहिताः दिक्कोणान्तरालस्थाः दिनकराष्टिदिनेश-
संख्याः क्रमेण द्वादशषोडशद्वादशसंख्याः । तत्सत्यकादिषु दिक्समीपस्था-
न्तरालेषु जलधिप्रमाणाः चत्वारः कलशाः स्युः ॥ १०९ ॥

उत्तमत्रितयेऽपि साधारणं द्रव्यपूरणमाह — **बलामित्यादिभिः** ।
अन्तः घृतादिकान्ते घृतादिसप्तदशद्रव्ये पूरिते सति तत्रान्तरालगतत्रिकेषु
ब्रह्माङ्कतः पञ्चब्रह्माङ्गमन्त्रैः बलां (കുറുന്തോട്ടി) वचाम् (വയമ്പു) अतिब-
लां (അനക്കുറുന്തോട്ടി) शङ्खपुष्पीं, सैव, पुनः सक्तूदकसिंहिके सक्तूदकं
सिंहिकां च, (സിംഹിക = ചെറുവഴുതിന. വ്യാഘ്രീ = വലിയവഴുതിന)
कुशोदकं च न्यसतु ॥ ११० ॥

१. 'च' ख. पाठः.

बहिर्दिक्कोणकीर्तितगुलाद्यभिपूरणान्ते
तत्सत्यकादिषु बहिर्न्यसतु क्रमेण ।
अष्टाक्षरेण सलिलानि नदीसमुद्र-
वाप्यम्बुवर्षहिमतीर्थकनिर्झराणाम् ॥ १११ ॥
तत्रान्तरिक्षाद्यपरान्तरेषु
स्वमूलतो न्यस्यतु बीजतोयम् ।
स्वर्णं तिलं दौर्व्यकशालितण्डु-
लाम्भः क्षपापुष्पजलं क्रमेण ॥ ११२ ॥
उत्तमत्रितयेऽपीति व्यक्तमुक्तं प्रपूरणम् ।
ततस्तत्स्नपनं कुर्यात् तत्तत्पूरणमन्त्रतः ॥ ११३ ॥

स्नानेऽस्मिन् नवधोदितेऽपि तदुदग् द्रव्यं समस्तं समं
न्यस्य द्रोणघटे समस्तमनुभिः सम्पूर्य गन्धाम्भसा ।

बहिर्दिक्कोणकीर्तितगुलाद्यभिपूरणान्ते दिक्कोणेषूक्तैर्गुलादिभिः पूरिते सति पूर्वं तत्सत्यकादिषु दिक्समीपस्थान्तरालेषु क्रमेण वैष्णवाष्टाक्षरेण नदीसमुद्रवाप्यम्बुवर्षहिमतीर्थकनिर्झराणाम् । नदीसमुद्रौ स्वयमेव । (ബാപി-നെടുംകേണി അമ്പു-ചാണാ) । वर्षं वर्षजलम् । हिमं हिमजलम् । तीर्थं तीर्थजलम् । (നിർമ്മാല്യം അരുവിയാറ) । एतेषां सलिलानि तदभावे तद्बुद्ध्या शुद्धजलानि च न्यसतु ॥ १११ ॥

तत्रान्तरिक्षाद्यपरान्तरेषु कोणसमीपस्थान्तरालेषु स्वमूलतः बीजतोयं, स्वर्णं, तिलं, दौर्व्यकशालितण्डुलाम्भः दूर्वाम्भः शाल्यम्भः तण्डुलाम्भश्च, क्षपापुष्पजलं क्षपाजलं (ക്ഷാരാംബുതാഴെ) पुष्पजलं च क्रमेण न्यस्यतु ॥

इति उत्तमत्रितयेऽपि प्रपूरणं व्यक्तं स्फुटम् उक्तम् । ततस्तत्तत्पूरणमन्त्रतः स्नानोक्तमन्त्रावशिष्टेषु कलशेषु पूरणमन्त्रैतः स्नपनं कुर्यात् ॥११३॥

शङ्करनारायणकलशस्नाने विशेषकृत्यमाह — **स्नान** इति । ईशाच्युते नवधा नवप्रकारेणोदितेऽपि स्नाने साधकः सर्वद्रव्याणि सर्वमन्त्रांश्च

१. 'बीजनो' इति मूलकोशपाठः. २. 'न्त्रस्न' ख. घ. ङ. पाठः.

इष्ट्वा सम्यगनेन सर्वकलशान्ते स्नापयेत् साधको
यज्ञायज्ञ[1]नृसूक्तरुद्रसहितव्योमाणुनेशाच्युते ॥ ११४ ॥

अत्यष्टिसङ्ख्यैरिषुवर्गस[1]ङ्ख्यैर्द्रव्यैरथैतैः क्रमवर्धितैश्च ।
वक्ष्यामि तैलादिकगन्धकर्पूराद्यन्वयेन स्नपनं स्मरारौ ॥

अन्तः शान्त्[1]दकं प्रदक्षिणतयेन्द्रात् पञ्चगव्यं पयो
दध्याज्यं मधु रत्नकं कुशजलं गन्धाम्बु बाह्या[1]तौ ।
तद्वत् क्षारगुलासवाज्यदधिदुग्धाच्छोदगर्भाभिधान्
सङ्कल्प्याम्बुनिधीन् दलस्थितघटेष्वापूरयेद् वार्यपि ॥

तत्र साधयितुं समर्थो गुरुः तदुद(ग्भागे?क्) तस्य कलशक्षेत्रस्योदग्भागे द्रोणघटे द्रोणवहे कलशे समस्तमनुभिः तत्तद्द्रव्याणामुक्तैर्मन्त्रैः समस्तं द्रव्यं समं समप्रमाणं न्यस्य गन्धाम्भसा संपूर्य सम्यगिष्ट्वा कलावाहनादिसहितं यथाविधानं संपूज्य अनेन सर्वकलशान्ते यज्ञायज्ञनृसूक्तरुद्रसहितव्योमाणुना यज्ञा यज्ञा वः, नृसूक्तं पुरुषसूक्तं, रुद्रं श्रीरुद्रम् एतैः सहितेन महाव्योमव्यापिमन्त्रेण स्नापयेत् ॥ ११४ ॥

अथ शिवस्य कलशविधिमाह — अत्यष्टीति । अथ स्मरारौ अत्यष्टिसंख्यैः सप्तदशसंख्यैः, इषुवर्गसंख्यैः पञ्चविंशतिसंख्यैश्च द्रव्यैः, तैलादिकगन्धकर्पूराद्यन्वयेन तैलादियोगेन गन्धयोगेन कर्पूरादियोगेन च क्रमवर्धितैः एतैः पञ्चविंशतिद्रव्यैश्च स्नपनं वक्ष्यामि ॥ ११५ ॥

तत्र सप्तदशद्रव्यस्नाने[2] कृतिमाह — अन्तरिति । अन्तर्ब्रह्मकलशे शान्त्युदकं, बाह्यावृतौ मानुषे इन्द्रात् पूर्वस्मादारभ्य प्रदक्षिणतया पञ्चगव्यं पयः दधि आज्यं मधु रत्नकं कुशजलं गन्धाम्बु चापूरयेत् । दलस्थितघटेषु तद्वद् इन्द्रादारभ्य प्रदक्षिणतया क्षारगुलासवाज्यदधिदुग्धाच्छोदगर्भाभिधान् क्षाराद्यभिधानयुक्तानम्बुनिधीन् सङ्कल्प्य वार्यप्यापूरयेत् ॥ ११६ ॥

---

१. 'म्बितेन' क. पाठः. २. 'न' ख. घ. ङ. पाठः.

सावित्री शीतांशुरुद्रौ हुताशः
स्कन्दो वित्तेशश्च सप्तर्षयश्च ।
इन्द्रश्च स्युर्देवता बाह्यसंस्था
ईशानो ब्राह्मेऽम्बुधिष्वम्बुधीशः ॥ ११७ ॥

सद्याद्याः पञ्चगव्ये निजनिजमनवो दुग्धदध्याज्यमाध्वी-
ष्वासत्येनाश्मतोये कुशमयसलिले स्याच्च देवस्यमन्त्रः ।
गन्धद्वारेति गन्धाम्बुनि सलिलनिधिष्वष्टसु स्युः समुद्र-
ज्येष्ठाद्या ब्रह्मकुम्भे स्नपनमनुरथ प्रोदिता व्योमविद्या[1] ॥

तत्त्वद्रव्यविधौ शिवेऽर्धशतसंयुक्ते घटानां शते
क्षेत्रेऽत्यष्टिपुटे घटा नव निवेश्या ब्रह्मभागेऽम्बुजे ।
दिक्कोणेषु[2] कृशानुभूमिपरिसङ्ख्याताः क्रमाद् दैविके-
ऽथाशाश्रयन्तरसंस्थिता नवविकाराग्न्युन्मिता मानुषे ॥

तद्देवताः पठति — सावित्रीति । सावित्री, शीतांशुरुद्रौ सोमो रुद्रश्च, हुताशोऽग्निः, स्कन्दः स्वयं, वित्तेशो वैश्रवणः, सप्तर्षयः त एव, इन्द्रः स एव, एता बाह्यसंस्थाः देवताः स्युः । ब्राह्मे कलशे ईशानः । अम्बुधिष्वम्बुधीशो वरुणः ॥ ११७ ॥

स्नानमन्त्रान् पठति—सद्याद्या इति । अथ पञ्चगव्ये सद्याद्याः पञ्चब्रह्माणो मन्त्राः । दुग्धदध्याज्यमाध्वीषु निजनिजमनवः 'आप्यायस्वे'त्याद्याः । अश्मतोये रत्नोदके 'आसत्येन' । कुशमयसलिले 'देवस्य त्वे'ति । गन्धाम्बुनि 'गन्धद्वारे'ति । अष्टसु सलिलनिधिषु 'समुद्रज्येष्ठा'द्याः । ब्रह्मकुम्भे व्योमविद्या स्नपनमनुः प्रोदिता ॥ ११८ ॥

अथ शिवे तत्त्वद्रव्यविधौ पञ्चविंशतिद्रव्ये घटानामर्धशतसंयुक्ते पञ्चाशत्कलशयुते शते अत्यष्टिपुटे सप्तदशपुटे[3] क्षेत्रे ब्रह्मभागेऽम्बुजे नव घटा निवेश्याः । दैविके दिक्कोणेषु क्रमात् कृशानुभूमिपरिसंख्याताः त्र्येकसंख्याताः, अथ मानुषे आशाश्रयन्तरसंस्थिताः दिक्कोणान्तरालस्थिताः नवविकाराग्न्युन्मिताः नवषोडशत्रिमिताः निवेश्याः ॥ ११९ ॥

१. 'व्योमविद्या सदापि ॥' ख. पाठः. २. 'ट' घ. ङ. पाठः.

अन्तर्दिग्विदिशोर्बहिश्च कृतिसूत्रेऽभ्यन्तरेऽर्काकषड्-
वेदेभा द्विशते घटा नृपयुतेऽङ्काब्धीनभूपद्विपाः ।
मध्याद्याखिलखण्डके नवशो द्यर्काधिके मानुषे
कोणेष्वेकघटाधिकं शरशतं प्रागुक्तमन्यत् समम् ॥ १२० ॥
ब्राह्मे शान्त्यम्बु दैवे दिशि विदिशि पुनः पाद्यमाचाममर्घ्यं
गव्याज्यक्षौद्रदुग्धं न्यसतु दधि बहिश्चेक्षुतोयं फलोदम् ।
क्काथाम्भः सक्तु गन्धार्तवकनकजलं रत्नमुक्ताप्रवालं
दिक्कोणाभ्यन्तराले यवतिलजलदूर्वोत्पलं कौशशाली ॥
ईशानः पितरो हुताशदयितावाचौ च सावित्र्यथो
बाह्यैः षण्मुखसोमरुद्रमहिषारीभास्यविघ्नेश्वराः ।

केवले द्विशते कृतिसूत्रे विंशतिसूत्रे एकोनविंशतिपुटे अन्तर्बहिश्च दिग्विदिशोः बहिरभ्यन्तरे च क्रमात् पञ्चसु स्थानेषु अर्काकषड्वेदेभाः द्वादश द्वादश षट् च चत्वारोऽष्टौ च घटा निवेश्याः । तत्रैव नृपयुते षोडशाधिके द्विशते पूर्वक्रमेणैव अङ्काब्धीनभूपद्विपाः षट्चतुर्द्वादश षोडशाष्टौ च घटा निवेश्याः । द्यर्काधिके चतुर्विंशत्यधिके शतद्वये मध्याद्याखिलखण्डकेषु मध्याद्येष्वखिलेषु खण्डेषु नवशो घटा निवेश्याः । नवकानां पञ्चविंशतिकमित्यर्थः । पुनः शरशतं पञ्चशतं मानुषे भागे कोणेष्वेकघटाधिकं, पूर्वं षोडशकम् इदानीं सप्तदशकमित्यर्थः । प्रागुक्तमन्यदखिलमत्रापि समम् ॥

पञ्चविंशतिद्रव्याणां पूरणक्रममाह — ब्राह्म इति । शिवे ब्राह्मे कलशे शान्त्यम्बु न्यसतु । दैवे दिशि विदिशि क्रमात् पाद्यमाचाममर्घ्यं, गव्याज्यक्षौद्रदुग्धं पञ्चगव्यमाज्यं मधु क्षीरं च दधि च न्यसतु । बहिर्दिक्कोणाभ्यन्तराले क्रमाद् इक्षुतोयं, फलोदं, क्काथाम्भः, सक्तुगन्धार्तवकनकजलं सक्तुजलं गन्धजलं पुष्पजलं कनकजलं च, रत्नमुक्ताप्रवालं रत्नजलं मुक्ताजलं विद्रुमजलं च यवतिलजलदूर्वोत्पलं यवजलं तिलजलं दूर्वाजलमुत्पलजलं च, कौशशाली कुशजलं शालीजलं च न्यसतु ॥ १२१ ॥

देवताः पठति — ईशान इति । ईशानः, पितरः, हुताशदयिता स्वाहा, वाक् सरस्वती, सावित्री, बहिरग्निः षण्मुखसोमरुद्रमहिषारीभास्यवि-

१. 'न्यस्येच्छान्त्य', २. 'दधि च नृविषयेऽप्येक्षु', ३. 'ट्चत्वा' ख. पाठः. ४. 'शमि' क. ख. पाठः.

ज्येष्ठाखण्डलविष्णवैलेबिलयः पाशी दिनेशो मरुत्
प्रेताधीशरमे मही च मुनयो विश्वे च तद्देवताः ॥ १२२ ॥

पाद्यादिदं विष्णुरापः पुनन्त्विति-
त्यापोहिष्ठेत्यग्निमीले त्विषेत्वा ।
मध्वाद्यादध्यात्ममन्त्रा उपत्वा
मान स्तोकेऽश्वत्थ इत्याकषायम् ॥ १२३ ॥

भूयः सुमित्राद्य रग्नआया-
ह्याद्योऽथ पुष्पावतिमन्त्रकः स्यात् ।

द्येश्वराः स्कन्दः सोमः रुद्रो दुर्गा गणपतिर्विद्येश्वराश्च, ज्येष्ठाखण्डलविष्णव-जैलिबिलयः ज्येष्ठा इन्द्रः विष्णुर्ब्रह्मा वैश्रवणश्च, पाशी वरुणः, दिनेशः सूर्यः, मरुद् वायुः, प्रेताधीशरमे यमः श्रीश्च, मही पृथिवी, मुनयः सप्तर्षयः, विश्वेदेवाश्च तद्देवताः तेषां द्रव्याणां देवताः ॥ १२२ ॥

स्नानमन्त्रान् पठति — पाद्यादीति । पाद्यादिक्रमेण 'इदं विष्णुः', 'आपः पुनन्तु' इति, 'आपो हि ष्ठे'ति, 'अग्निमीले', 'इषे त्वा', मध्वाद्यादधि मध्वारभ्य दधिपर्यन्तम् आत्ममन्त्राः स्वस्वमन्त्राः । मधौ 'मधु वाताः' । क्षीरे 'आप्यायस्व' । दध्नि 'दधि क्राण्णः' । पुनः 'उप त्वाग्ने', 'मानस्तोके', 'अश्वत्थे वः' इत्याकषायं कषायपर्यन्तम् ॥ १२३ ॥

'सुमित्रा[3] नः' 'अग्न आयाहि' इत्याद्यः । अथ पुष्पावतिमन्त्रकः,

---

१. 'पि' क. पाठः. २. 'ताः ॥
शान्त्यम्भो रत्नगन्धोदककनकभृतं पाद्यकं शैलमृत्सा
दूर्वाराजीतिलैराचमनमथ सतक्कोलजातीलवङ्गम् ।
अर्घ्यं दध्यम्बुदुग्धाक्षतयवतिलराजीकुशाग्रैः फलोदं
भव्यं श्रीबीजपूराम्लकपनसरम्भाम्रकैर्मधेश ॥
प्रक्षोनक्षीरिशैरीषकपनसमधूकद्विजाग्रैः कषायं
गन्धाः शीताम्रसेव्याम्बुवगरुमुरगदर्पताः प्रसूनाम्बु जात्या ।
नन्दीयुङ्मल्लिकाचम्पकसबकुलसौगन्धिकाब्जैश्च रत्नं
मुक्तावैडूर्यवज्रं मणिमरतकगोमेदपुष्येन्द्रनीलम् ॥
पाद्यादीदं' क. पाठः. ३. 'त्रा' ख. घ. ङ. पाठः.

ब्रह्मादिजज्ञानहिरण्यवर्णमन्त्रौ
समुद्रात्मकमन्त्रकोऽथ ॥ १२४ ॥
रक्षोहणमोषधयः पितरःपदपूर्वकः श्रिये त्रिष्टुप् ।
देवस्यत्वाथाशुःशिशान इति षाणवोऽत्र शाल्यन्तम् ॥
द्रव्ये तत्त्वमितेऽत्र षोडशभिरप्यभ्यङ्गपूर्वैर्युते
कुम्भानां त्रिशती द्विशत्यपि समायुक्ता त्रिपञ्चाशता ।
मृत्सापार्श्वयुगस्थगन्धसलिलेऽस्मिन् कृत्युपेतत्रिश-
त्युक्ता पञ्चशती तु पञ्चसहिता कर्पूरकाद्यन्विते ॥ १२६ ॥
क्षेत्रे तत्र त्रयोविंशतिपुट इषुवर्गात्मकद्रव्ययुक्त्या
मध्ये कृत्वाष्टयुक्तं शतमथ परितः कल्पयेद् वीथिकान्ते ।

ब्रह्मादिजज्ञानहिरण्यवर्णमन्त्रौ 'ब्रह्मजज्ञानं' 'हिरण्यवर्णाः', । समुद्रात्मकमन्त्रकः 'समुद्रज्येष्ठाः' ॥ १२४ ॥

'रक्षोहणं वाजिनम्', 'ओषधयः संवदन्ते', पितरःपदपूर्वकः 'पितरः पितामहाः' इत्यादि, 'श्रिये जातः', त्रिष्टुबिति 'जातवेदसे सुनवाम', 'देवस्य त्वा', 'आशुः शिशानः' इति शाल्यन्तं शालीजलपर्यन्तं मन्त्राः । मध्ये ब्रह्मकलशे व्योममन्त्रकः स्यात् ॥ १२५ ॥

पञ्चविंशतिद्रव्ये द्रव्यान्तरयोगमाह — द्रव्य इति । अत्र तत्त्वमिते पञ्चविंशतिके द्रव्ये अभ्यङ्गपूर्वैः षोडशभिर्द्रव्यैर्युते कुम्भानां त्रिशती स्यात् । त्रिपञ्चाशत्समायुक्ता द्विशत्यपि । मृत्सापार्श्वयुगस्थगन्धसलिले, मृत्तिकायाः पार्श्वद्वये स्थितैर्गन्धसलिलैर्युते अस्मिन् अभ्यङ्गादिसहितपञ्चविंशतिद्रव्ये कृत्युपेतत्रिशती विंशत्यधिकशतत्रयम् । कर्पूरकाद्यन्विते कर्पूरादिभिः सहिते[1] तु तत्र पञ्चसहिता पञ्चशत्युक्ता स्यात् ॥ १२६ ॥

तत्र तैलादिके त्रयोविंशतिपुटे क्षेत्रे मध्ये इषुवर्गात्मकद्रव्ययुक्त्या पञ्चविंशतिद्रव्यन्यायेन पञ्चदशपुटैरष्टयुक्तं शतं कृत्वाथ परितो वीथिकान्ते वीथ्या बहिः दिक्कोणाभ्यन्तरस्थान् तिथिनवदिनकृत्सम्मितान् पञ्चदशनवद्वादशसंख्यांल्लिशते, त्रिपञ्चाशदुपेतद्विशते चेद् नन्दसङ्ख्यान् स्था-

१. 'ते त' ख. घ. पाठः.

दिक्कोणाभ्यन्तरस्थांस्तिथिनवदिनकृत्सम्मितान्नन्दसंख्यान्
वा कुम्भान् प्राग्वदन्तर्बहिरथ कलशान् पूरयेत् तैलपूर्वैः ॥

तैलं गुलं केररसाम्भसी च
तीर्थं सरिद्वारि तटाकवारि ।
कूपाम्बु च न्यस्यतु दिग्विदिक्षु
शर्वादिमन्त्रैर्विषमैः समैश्च ॥ १२८ ॥

न्यस्येद् भृशादिष्वचलोक्षशृङ्ग-
वेद्युत्थिताः क्षेत्रखलोत्थिते च ।
नद्यब्धितीर्थप्रभवाश्च मृत्साः
क्रमेण विद्येश्वरनाममन्त्रैः ॥ १२९ ॥

क्षेत्रे तत्र पृषत्कवर्गपुटभाजि द्वादशोर्ध्वं शतं
मर्त्यांशाश्रिविलुप्तकोष्ठघटयुक्त्याधाय तद्बाह्यतः ।

नत्रयेऽपि नवकान् कल्पयेत् । वाशब्दः कलशसंख्याविकल्पद्योतनार्थः । तत्रान्तः प्राग्वत् पञ्चविंशतिद्रव्याणि पूरयेत् । अथ बहिस्तैलपूर्वैः कलशान् पूरयेत् ॥ १२७ ॥

तत्र दिग्विदिक्षु दिक्षु कोणेषु च क्रमात् विषमैः अयुग्मैः समैर्युग्मैश्च शर्वादिमन्त्रैः 'शर्वो रुद्रः' इत्याद्यष्टमूर्तिमन्त्रैः तैलं, गुलं, केररसाम्भसी नालिकेररसं नालिकेराम्भश्च, तीर्थं, सरिद्वारि, तटाकवारि, कूपाम्बु च न्यसतु ॥ १२८ ॥

भृशादिष्वन्तरालेषु विद्येश्वरनाममन्त्रैः अनन्तसूक्ष्मादिभिः अचलोक्षशृङ्गवेद्युत्थिताः पर्वतादुक्षशृङ्गादग्निहोत्रवेद्याश्चोत्थिताः, क्षेत्रखलोत्थिते (क्षेत्रं=वीरभद्रो. खलं=कुलं) ताभ्यामुत्थिते च, नद्यब्धितीर्थप्रभवाश्च नद्याः समुद्रात् तीर्थतश्चोद्भूता मृत्साः क्रमेण च न्यस्येत् ॥ १२९ ॥

तत्र गन्धजलान्विते तैलादिके पृषत्कवर्गपुटभाजि पञ्चविंशतिपुटे क्षेत्रे मध्ये मर्त्यांशाश्रिविलुप्तकोष्ठघटयुक्त्या अष्टोत्तरशतकलशस्य मानुषकोणेषु त्यक्तपदयोगेन द्वादशोर्ध्वं शतमाधाय तद्बाह्यतो दिक्षु द्वादश,

---

१. 'का' क. ख. घ. ङ. पाठः. २. 'र्गैः श' क. ख. घ. पाठः.

दिक्षु द्वादश षोडशाश्रिषु चतुष्काण्यन्तराले त्रिशः
कृत्वा न्यस्यतु मूलतोऽभिहित[1]तत्पार्श्वद्वये गन्धकम् ॥

एकत्रिंशत्पुटेऽन्तर्नवयुतशतमेतद्बहिर्दिग्विदिक्स्थं
चापूर्य प्रोक्तरीत्या नवकमथ सहाभ्यन्तरत्रित्रिकं च ।
एतद्बाह्ये चतुर्दिक्ष्वपि घटनवकान्यद्रिसंख्यानि कृत्वा
कर्पूराद्यैः समापूरयतु मनुयुगद्रव्यकैश्च क्रमेण ॥ १३१ ॥

पुंसेन्दु[2]-[illegible]-वारि-
कुष्ठागरून् हरिदिशीशपदादिकेषु ।
वैडूर्यनीलमणिविद्रुमवज्रमुक्ता-
गारुत्मतानि यमराड्दिशि घोरनाम्ना ॥ १३२ ॥

अश्रिषु षोडश, अन्तराले त्रिशश्चतुष्काणि त्रीणि त्रीणि चतुष्काणि च कृत्वा अभिहितमृत्पार्श्वद्वये भृशादिस्थानामुक्तानां मृदां पार्श्वद्वये । मूलतो गन्धकं गन्धजलं न्यसतु ॥ १३० ॥

तैलादिभिर्गन्धजलैः कर्पूरादिभिश्चान्विते पञ्चविंशतिद्रव्ये विधिमाह — एकत्रिंशत्पुट इति । एकत्रिंशत्पुटेऽन्तः प्रोक्तक्रमेण नवयुतशतं पञ्चविंशतिद्रव्यैरापूर्य एतद्बहिर्दिग्विदिक्स्थं नवकं सहाभ्यन्तरत्रित्रिकं च कृत्वा दिक्कोणगतानि नवकानि तैलादिभिः, अन्तरालस्थितत्रित्रिकेषु मध्यस्थानि मृद्भिः, पार्श्वद्वयस्थानि गन्धोदकैश्च प्रोक्तरीत्यापूर्य पुनरेतद्बाह्ये चतुर्दिक्ष्वपि अद्रिसंख्यानि संभूयाष्टाविंशतिसंख्यानि घटनवकानि कृत्वा कर्पूराद्यैर्मनुयुगद्रव्यकैरष्टाविंशतिद्रव्यैश्च क्रमेण समापूरयतु ॥ १३१ ॥

तत्र हरिदिशि पूर्वभागे ईशपदादिकेषु ईशकोणगतं नवकमारभ्य प्रादक्षिण्यक्रमेण पुंसा तत्पुरुषेण इन्दुवानरपयोदपटीरवारिकुष्ठागरून् न्यसतु। (ഇന്ദു=കർപ്പൂരം. വാനരം=കണ്ടിവെണ്ണ. പയോദം=മുത്തങ്ങാ. പടീരം=ചന്ദനം. വാരി=ഇരുവേലി. കുഷ്ഠം=കൊട്ടം. അഗരു=അകിൽ)। पुनर्यमराड्दिशि दक्षिणभागे घोरनाम्ना अघोरेण वैडूर्यनीलमणिविद्रुमवज्रमुक्तागारुत्मतानि न्यसतु ॥ १३२ ॥

---

१. 'कं कु' क. घ. पाठः. २. 'णादिग' क. पाठः.

न्यग्रोधपिप्पलशिरीषपलाशबिल्व-
प्लक्षाम्रजक्वाथितवार्यजतः प्रतीच्याम् ।
गोधूमशालियवमुद्गतिलप्रियङ्गु-
निष्पावकान् न्यसतु वामत उत्तरस्याम् ॥ १३३ ॥

तैलादित्रिविधोक्तद्रव्याणां पूरणे[1] पुरा प्रोक्ताः ।
मन्त्रा एव स्नपने स्नपनमितीशेऽभ्यधायि पञ्चविधम् ॥

इक्षुकृतिपरिसङ्ख्यद्रव्यकैरेव[2] दुर्गा-
स्नपनमभिदधेऽस्मिन् कुम्भसङ्ख्यादिक्लृप्तिः ।
प्रथमनिगदिता स्यादत्र तु[3] द्रव्यमन्त्र-
क्रमपरिगतमेतद् भेदमात्रं वदामि ॥ १३५ ॥

प्रतीच्यामजतः सद्योजातेन न्यग्रोधपिप्पलशिरीषपलाशबिल्वप्लक्षाम्रजक्वथितवारि न्यग्रोधादीनां सप्तानां कषायजलानि न्यसतु । उत्तरस्यां वामतः वामदेवेन गोधूमशालियवमुद्गतिलप्रियङ्गुनिष्पावकान् क्रमेण न्यसतु ॥ १३३ ॥

तैलादित्रिविधोक्तद्रव्याणां तैलादीनां गन्धजलानां कर्पूरादीनां च पूरणे (पुरा) प्रोक्ता मन्त्रा एव स्नपने चेतीशे पञ्चविधं सप्तदशद्रव्यं पञ्चविंशतिद्रव्यं तैलादित्रिविधं च स्नपनमभ्यधायि उक्तम् ॥ १३४ ॥

अथ दुर्गास्नपनमाह — इक्षुकृतीति । अद्य इदानीमहम् इक्षुकृतिपरिसंख्यद्रव्यकैः पञ्चविंशतिद्रव्यैः दुर्गास्नपनमभिदधे वच्मि । अस्मिन् दुर्गास्नपने कुम्भसंख्यादिक्लृप्तिः कुम्भसङ्ख्यापुटसङ्ख्याखण्डविभागादीनां स्थितिः प्रथमनिगदिता स्यात् । अत्र तु द्रव्यमन्त्रक्रमपरिगतं द्रव्यमन्त्रक्रमाणां प्राप्तमेतद्भेदमात्रं वदामि ॥ १३५ ॥

---

१. 'णे प्रो', २. 'रेव तु' ख. पाठः. ३. 'तत्द्रव्य' क. ङ. पाठः. ४. 'नं चाभ्य' क. पाठः. ५. 'मन्त्रं व' क. घ. पाठः.

ब्राह्मे स्याद् गन्धपुष्पौषधिफलमणिहेमाम्बु शर्वादि दैवे सक्तूदं भस्म माध्वी तिलरसगुलमश्वत्थदूर्वोदरौप्यम् । पाद्यार्घ्यं पञ्चगव्यान्यथगथ पृथक् कौशकाषायरत्नं गाङ्गेयं धातुगन्धार्तवफलमपि दिक्कोणमध्येषु बाह्ये[1]॥ १३६॥

द्रव्याण्याह — ब्राह्म इति । ब्राह्मे कलशे गन्धपुष्पौषधिफलमणिहेमाम्बु स्यात् । अत्रौषध्यः कुशदूर्वेत्यादिपठिता एव । मणयः सामान्यानि नवरत्नानि । गन्धपुष्पफलहेमानि प्रसिद्धानि । दैवे शर्वादि ईशानादि प्रादक्षिण्येन सक्तूदं, भस्म, माध्वी मधु, तिलरसगुलं तिलरसं तैलं गुलं च, अश्वत्थदूर्वोदरौप्यम् अश्वत्थोदं दूर्वोदं राजतोदं च । बाह्ये दिक्कोणमध्येषु दिक्कोणान्तरालेषु क्रमात् पाद्यार्घ्यं पाद्यमर्घ्यं च, अपृथक् पञ्चगव्यानि एकीकृतपञ्चगव्यम्, अथ पृथग्भूतानि गोमूत्रगोमयक्षीरदध्याज्यानि पञ्चगव्यानि पञ्चकलशेषु, कौशकाषायरत्नं कौशं कषायं रत्नोदं च, गाङ्गेयं सुवर्णं तत्सहितं जलं, धातुगन्धार्तवफलमपि धातूदं गन्धजलं पुष्पजलं फलोदं च स्युः ॥ १३६ ॥

---

१. 'ह्ये ॥

मूलं ब्राह्मे पौरुषे दैविके तस्याष्टौ वर्णा मानुषाङ्गानि दिक्षु ।
चत्वार्यस्त्रं कोणदेशे त्विह स्याभ्रेत्रं त्वष्टस्वन्तरालेषु भूयः ॥
दूर्वा सिंहीकुशशतगुणा व्याघ्र औषध्य उक्ता
भस्मक्षीरिद्विजतरुकरीषैः स्मृतं चाथ पाद्यम् ।
राजाश्यामाकयुतनवदूर्वाग्रमर्घ्यं कुशाग्रं
राजीक्षिगिक्षुतिलयुतं गन्धपुष्पोदकं स्यात् ॥
क्वाथं क्षीरिद्रुमखदिरजं रत्नकं वज्रमुक्ता-
वैडूर्यं विद्रुममणिमहानीलनीलाब्जरागम् ।
धातून् श्यामं सरसहरितालाञ्जनं रोचनाढ्यं
सौराष्ट्रिं गैरिकमपि ससौसं मनोह्वां तथाहुः ॥
पाटीरास्रायसकापिजटारोचनाः सेन्दुचोरा
गन्धा नन्दीवकुलसहितं चम्पकाशोकनागम् ।
मल्लीजात्यन्वितमभिहितं पुष्पकं जातिकेरी
भव्यप्रोद्यद्बदरकदलीबीजपूरः फलोदम् ॥

पाद्य' क. पाठः.

पाद्य इदंविष्णुरणुः पर आपोऽग्निमील इति गव्ये ।
दध्यन्तेषु निजार्हाश्चाज्य इषेत्वा कुशे तु तत्सवितुः ॥
अश्वत्थेवस्त्र्यम्बकहिरण्यगर्भस्ततः परं क्रमशः ।
मानस्तोके शन्नः पुष्पावत्येव पुष्पफलजलयोः ॥ १३८ ॥
सक्तूदके सुमित्रा भूतिश्रीर्भस्मके मधौ स्वार्हः ।
तैले विश्वानिन इति गौलेऽग्नेत्वं च पैप्पलेऽश्वत्थे ॥ १३९ ॥
शन्नो देवीरग्ने त्वं परयोर्मध्यमे तु चित्तिः स्रुक् ।
त्रिष्टुभ एकैकार्णैः परिखण्डे मध्यमेऽन्वितं शेषैः ॥ १४० ॥
अत्यष्टिसङ्ख्यद्रविणाभिषेके
सद्रव्यकुम्भक्रममन्त्रकल्पितिः ।

स्नानमन्त्रान् सानक्रमेण सहाह—पाद्य इति । पाद्ये 'इदंविष्णुर'णुः । परे अर्घ्ये 'आपोहिष्ठ' । गव्ये 'अग्निमील' इति । दध्यन्तेषु निजार्हाः 'तत्सवितुः' 'गन्धद्वारां' 'आप्यायस्व' 'दधि क्राव्ण' इति । आज्ये 'इषे त्वा' । कुशे 'तत्सवितुः' ॥ १३३ ॥

ततः परं क्रमशः कषायरत्नोदसुवर्णोदधातूदगन्धजलेषु पञ्चसु 'अश्वत्थे वः', 'त्र्यम्बकं यजामहे', 'हिरण्यगर्भः सम', 'मानस्तोके', 'शन्नो देवीः' इति । पुष्पफलजलयोः पुष्पजले फलजले च 'पुष्पावतीरि'त्येव ॥ १३८ ॥

पुनरन्तर्गतसक्तूदके 'सुमित्रा नः' । भस्मके भस्मजले 'भूतिश्रीः' । मधौ स्वार्हः 'मधु वाता' इत्यर्थः । तैले 'विश्वानि नः' । गौले 'अग्ने त्वं' । पैप्पले[2] अश्वत्थोदके 'अश्वत्थे वः' ॥ १३९ ॥

परयोः दूर्वोदरजतोदकयोः 'शन्नो देवीः' 'अग्ने त्वम्' इति क्रमेण । मध्यमे ब्रह्मकलशे तु 'चित्तिः स्रुक् चित्तमाज्यम्' । परिखण्डे परिखण्डद्रव्येषु क्रमेण त्रिष्टुभो 'जातवेदस' इत्यस्य एकैकार्णैः सह मध्यमे शेषैरक्षरैरन्वितं स्नानं स्यात् ॥ १४० ॥

कुमार्याम् अत्यष्टिसंख्यद्रविणाभिषेके सप्तदशद्रव्यस्नाने सद्रव्यकुम्भ-

---

१. 'दुर्गाभिः परिकलशैरिहान्तरा ब्रह्मयज्ञमनुना च । स्नापयतु साधु विद्वान् दुर्गास्नपनं समासतः प्रोक्तम् ॥ उत्त' ख. पाठः. २. 'ले अश्वत्थे वः' क. पाठः.

स्याद् विष्णुभागाभिहिता कुमार्या-
मितीतिः स्नानविधिर्द्विधात्र ॥ १४१ ॥
उत्तमत्रितयमुत्तमद्वयं मध्यमद्वयमथाधमद्वयम् ।
बाहुलेयकलशाभिषेचनं प्राहुरत्र नवधा बुधोत्तमाः ॥१४२॥[1]
शरहतशतसङ्ख्यैरेतदर्धाङ्घ्रिसङ्ख्यै-
र्नवयुतशतसङ्ख्यैरद्रिमत्या नवत्या ।
नवकृतिशरषष्टिभ्यां घटैस्तत्प्रभेदा
नव गिरिशरवर्गाभ्यां च सद्द्रव्यभेदाः ॥ १४३ ॥
त्रिंशत्सूत्रयुते घटीशरशते क्षेत्रेऽभितो वीथिकाः
कृत्वा पञ्चपुटान्तरेऽभिकृतिकोष्ठेष्वेषु खण्डेष्वथ ।

क्रममन्त्रकलितिः द्रव्यकुम्भक्रममन्त्राणां स्थितिर्विष्णुभागाभिहिता स्यात् । इत्यत्र द्विधा स्नानविधिरीरितः ॥ १४१ ॥

अथ स्कन्दस्य कलशविधिमाह — उत्तमेति । बुधोत्तमाः उत्तमादिस्नाने फलविशेषज्ञा आचार्याः अत्र स्नाने उत्तमत्रितयम् उत्तमकलशानां त्रितयम्, उत्तमद्वयं मध्यमाधमयोरुत्तमद्वयं, मध्यमद्वयं तयोर्मध्यमद्वयम्, अथाधमद्वयं तयोरधमद्वयं चेति बाहुलेयकलशाभिषेचनं नवधा प्राहुः ॥१४२॥

शरहतशतसंख्यैः पञ्चगुणितशतसङ्ख्यैः एतदर्धाङ्घ्रिसङ्ख्यैः एतदर्धसंख्यैः पञ्चाशदधिकशतद्वयेन एतदङ्घ्रिसङ्ख्यैः पञ्चविंशत्यधिकशतेन, पुनः नवयुतशतसंख्यैः, अद्रिमत्या नवत्या सप्तयुतनवत्या, नवकृतिशरषष्टिभ्यां नवकृतिरेकाशीतिः शरषष्टिः पञ्चाधिकषष्टिः, गिरिशरवर्गाभ्यां च गिरिवर्ग एकोनपञ्चाशत् शरवर्गः पञ्चविंशतिः इति घटैः हेतुभिः सद्द्रव्यभेदा द्रव्यभेदसहिताः तत्प्रभेदा स्नानभेदाः नव स्युः ॥ १४३ ॥

घटीशरशते घटानां पञ्चशते त्रिंशत्सूत्रयुते क्षेत्रे पञ्चपुटान्तरे पञ्चपञ्चपुटान्तरे अभितः समन्ताद् वीथिकाः कृत्वा अथाभिकृतिकोष्ठेषु पञ्चविंशतिकोष्ठेषु खण्डेषु स्थितेषु मर्त्याशकोणानि एकैकोपपदार्पणेन तेषां

---

१. 'त्र तद्वीथि' ख. पाठः.

एकैकोपपदार्पणेन रचयेन्मर्यादकोणाने षड्-
विंशत्या कलशैर्युतानि नवकाढ्यान्यन्तरालानि च ॥
ब्राह्मे दैविकदिग्विदिक्ष्वपि तथा गव्याज्यदुग्धं दधि
क्षौद्रं तैलगुलेक्षुतीर्थसलिलं चापूरयेन्मूलतः ।
तत्रत्योपघटाष्टकान्युदितकल्प्त्या रत्नकाद्यष्टके-
ष्वेकैकद्रविणेन शुद्धसलिलैः शेषानुदित्यन्तिमान् ॥
रत्नानां बीजानां क्काथानामष्टकानि पुष्पाणाम् ।
फलगन्धलोहकानामथौषधीनामपामपीति नव ॥ १४६ ॥
सागरभवं सरिज्जं निर्झरवापीतटाकजं च जलम् ।
हृदकूपसेतुजातं जलाष्टकेऽन्यानि पूर्वगणितानि ॥ १४७ ॥

बहिःकोणेषु एकैकपदयोगेन षड्विंशत्या कलशैर्युतानि रचयेत् । तत्रान्तरालानि नवकाढ्यानि च रचयेत् । अन्यानि सर्वखण्डान्यपि पञ्चविंशतिकान्येव ॥ १४४ ॥

ब्राह्मे कलशे दैविकदिग्विदिक्ष्वपि तथा गव्याज्यदुग्धं पञ्चगव्यमाज्यं क्षीर च, दधि, क्षौद्रं, तैलगुलेक्षुतीर्थसलिलं तैलं गुलमिक्षुसलिलं तीर्थसलिलं च मूलत आपूरयेत् । तत्रत्योपघटाष्टकानि नवसु स्थानेष्वपि तत्तन्मध्यकुम्भानन्तरगतान्यष्टकानि उदितकल्प्त्या संघातद्रव्येषूक्तया कल्प्त्या रत्नकाद्यष्टकेषु मध्ये एकैकद्रविणेनापूरयेत् । शेषान् तद्बाह्यगतषोडशषोडशकलशान् उदित्यन्तिमान् दिक्कोणानन्तरमीशेन्द्रयोर्मध्यगतान्तरालमारभ्य सोमेशयोर्मध्यगतान्तरालपर्यन्तान् कलशान् शुद्धसलिलैरापूरयेत् । स्कन्देऽन्तराले सर्वत्रायमेव क्रमः ॥ १४५ ॥

रत्नाद्यष्टकानां क्रममाह — **रत्नानामिति** । रत्नानां बीजानां क्काथानां पुष्पाणां फलगन्धलोहकानां फलानां गन्धानां लोहानां च ओषधीनामपामपीति नवविधान्यष्टकानि स्युः ॥ १४६ ॥

जलाष्टकस्य पूर्वतोऽनुक्तत्वात् संप्रत्याह — **सागरभवमिति** । जलाष्टके सागरभवं जलं, सरिज्जं नद्युद्भवं, निर्झरवापीतटाकजम् (നിർഝരം=അരിവി. വാപി=നെടുംകെണി. തടാകം=കുളം.), हृदकूपसेतुजातम्

१. 'ग्रक', २. णान्त' ख. पाठः.

धात्रीं रात्रीपिष्टमाचाममर्घ्यं
कौशं काशं दौर्व्यकं सेव्यकं च।
न्यस्येद् दिक्कोणक्रमान्मर्त्यभागे
पर्जन्यादिष्वेकशोऽत्राङ्कुरांश्च ॥ १४८ ॥
न्यग्रोधोदुम्बराश्वत्थप्लक्षबिल्वपलाशजाः।
शम्यपामार्गजाश्चैव क्रमादष्टाङ्कुराः स्मृताः ॥ १४९ ॥

(ഹദം കയ്യം. ക്ഷം കിണാ. സേതു ചിറ.) । अन्यानि रत्नादीनि पूर्वगणितानि सङ्ज्ञातकथने गणितानि ॥ १४७ ॥

पुनर्मर्त्यभागे दिक्कोणक्रमात् (ധാത്രി-നെല്ലിക്കാ. രാത്രിപിഷ്ടം-മഞ്ഞപ്പൊടി), आचामम्, अर्घ्यं, कौशं कुशजलम्, (കാശം-അരവദർ. സേവ്യകം-രാമച്ചം ദൌർവ്യകം കറുക.) एतानि न्यस्येत्। अत्र पर्जन्यादिष्वन्तरालेष्वङ्कुरांश्च एकैकशो न्यस्येत् ॥ १४८ ॥

अङ्कुरान् कथयति — न्यग्रोधेति । न्यग्रोधादयः क्रमादष्टाङ्कुराः स्मृताः। न्यग्रोधादयः प्रसिद्धा एव ॥ १४९ ॥

१. 'श्च

रत्नाष्टके वारिजरागनीलमुक्तेन्दुकान्तान् कुरुविन्दकाचौ।
प्रवालवज्रे च यवांस्तिलांश्च गोधूमसिद्धार्थिकशालिमुद्गान् ॥
माषं सनीवारकमष्टधान्यान्याहुर्वटोदुम्बरपिप्पलाख्याः।
प्लक्षाम्रविप्रद्रुशिरीषमाधूकाख्याः कषायेऽष्टमहीरुहाः स्युः ॥
उत्पलकल्हाराम्बुजकुमुदं सौगन्धिकं कशेरुयुतम्।
उत्पलयुगमपि पुष्पाण्यष्टालाभेऽत्र रक्तकरवीरम् ॥
स्यान्मातुलुङ्गसहकारसबिल्वजम्बूचोचाख्यडाडिमसभव्यकादलानि।
अष्टौ फलान्यसुगयश्शिकुप्रकीशपाथो मुर मलयज विदुरष्टगन्धम् ॥
लोहानि क्रमशः स्मृतानि शरजे चामीकरं रूप्यकं
ताम्रायस्त्रपुसीसकांस्यकसमेतं पित्तलं चाष्टमम्।
ओषध्योऽत्र सुवर्चलामलवचा ब्राह्मी तथा शङ्खपु-
ष्युद्दिष्टाः सशतावरी सहसहाकान्तिश्च लक्ष्मीरपि ॥
न्यग्रोधोदुम्बरचलदलप्लक्षबिल्वद्विजाख्याः
सम्प्रोक्ताः स्युः शरभुवि शमीमार्गजा चाङ्कुरार्हाः।
वेदीक्षेत्रेभवृषगिरिवल्मीकनद्धिजाः स्यु-
र्मृत्साश्वाष्टौ शिवबदिह चाचामपाद्यार्घ्यकाङ्गम् ॥

न्यग्रो' क. पाठः.

भूभृद्वर्गयुतद्विशत्यथ घटानां चेदिह क्षेत्रकं
कृत्वा सप्तदशप्रभेदितपुटं वीथीं च पञ्चान्तरे ।
त्रिंशत्कानि शिलीमुखोपपदसंयुक्त्या बहिर्दिक्ष्वधो
कोणेषूत्कृतिसङ्ख्यकानि रचयेदेकैककोष्ठान्वयात् ॥ १५० ॥

गव्यादितीर्थसलिलावधिभिः सरोज-
रागादिसेतुसलिलावधिभिश्च तद्वत् ।
आपूर्य चामलकपूर्वकदौर्व्यकान्तै-
र्दिक्कोणगानुपघटान् परिपूरयेत ॥ १५१ ॥

दिक्कोणगान्युपपदानि सकोणखण्डा-
न्यत्रापहाय सहतत्त्वशते घटानाम् ।
गव्यादिमध्यवधिकैरथ पद्मराग-
पूर्वैश्च पूरयतु तान् कदलीफलान्तैः ॥ १५२ ॥

अथ घटानां भूभृद्वर्गयुतद्विशती एकोनपञ्चाशदधिकशतद्वयं चेत् इह सप्तदशप्रभेदितपुटं क्षेत्रकं पञ्चपुटान्तरे वीथीं च कृत्वा बहिर्दिक्षु शिलीमुखोपपदसंयुक्त्या दिक्स्थितानां पञ्चविंशतिकानां बहिर्भागे पञ्चपञ्चोपपदयोगेन त्रिंशत्कानि रचयेत् । अधो कोणेषु एकैककोष्ठान्वयात् एकैककोष्ठयोगेन उत्कृतिसंख्यकानि षड्विंशतिसंख्यानि च रचयेत् ॥ १५० ॥

अत्र गव्यादितीर्थसलिलावधिभिः पूर्वं ब्राह्मे[2] दैविकेषूक्तैर्गव्यादितीर्थजलान्तिमैर्नवभिर्द्रव्यैस्तेषु मध्यस्थकलशानापूर्य तद्वत् पूर्वक्रमेणैव सरोजरागादिसेतुसलिलावधिभिश्च रत्नाद्यष्टकेषु रत्नेषु पद्मरागादिभिर्जलाष्टके[3] तु सेतुसलिलान्तैर्द्रव्यैरेकैकेन पूर्वोक्तानुपघटांश्चापूर्य आमलकपूर्वकदौर्व्यकान्तैः 'धात्रीं रात्रीपिष्टमि'त्याद्युक्तैरष्टभिर्द्रव्यैः दिक्कोणगान् उपघटान् दिक्कोणेषु योजितान् पञ्चकानेककांश्च परिपूरयेत ॥ १५१ ॥

अथ घटानां सहतत्त्वशते पञ्चविंशत्यधिकशतेऽपि अत्र सप्तदशपुटे दिक्कोणगानि योजितान्युपपदानि सकोणखण्डानि कोणगतानि चत्वारि खण्डानि च अपहाय त्यक्त्वा अत्र गव्यादिमध्यवधिकैः मध्ये दिक्षु च

---

१. 'मार्गे प' ख. पाठः. २. 'ह्म' ख. घ. ङ. पाठः. ३. 'केषु तु' ख. पाठः.

अन्तस्त्रयोदशपुटे शरवर्गसङ्ख्या-
नाशासु पञ्चदश सैककनन्दसंख्यान् ।
कुम्भान् विदिक्षु परिपूर्य करोतु वात्र
गव्यादिसेतुसलिलावधिभिर्जघन्यम् ॥ १५३ ॥
अन्तस्त्रयोदशपुटे शरवर्गसङ्ख्या-
स्तद्बाह्यतस्तिथिरसप्रमिताः क्रमेण ।
दिक्कोणयोर्नवशतेऽथ शते त्रिहीने
बाह्ये तु धूर्जटिगिरिप्रमिता घटाः स्युः ॥ १५४ ॥
अन्तस्तत्त्वघटेषु सर्वमणितोयं गव्यकं दुग्धकं
दध्याज्यं मधु गौलमिक्षुसलिलं तैलं हरिद्राजलम् ।

स्थितैः पञ्चभिर्द्रव्यैरन्तःस्थितान्, अथ पद्मरागपूर्वैः कदलीफलान्तैः पञ्चविधै-रष्टकैरपि पूर्ववदुपघटांश्च पूरयतु । इत्युत्तमत्रयमुक्तम् ॥ १५२ ॥

उक्त एवोत्तमत्रये अधमस्य पक्षान्तरमाह — अन्तरिति । त्रयोदश-पुटे क्षेत्रे अन्तर्बाह्ये शरवर्गसङ्ख्यान् पञ्चविंशतिसंख्यान्, आशासु पञ्च-दश, विदिक्षु सैककनन्दसंख्यान् स्वस्वकोणेष्वेकैककुम्भयोगेन नवैनवकु-म्भान् संभूय दशदशकुम्भान् गव्यादिसेतुसलिलावधिभिः नवसु मध्यस्थघ-टेषु गव्यादितीर्थसलिलावधिभिर्नवभिर्द्रव्यैः, परिकलशाष्टकेषु पद्मरागादिसेतु-सलिलान्तैर्नवविधैरष्टकैश्च परिपूर्य जघन्यम् उत्तमत्रितयेऽधमं करोतु वा ॥

उत्तमद्वयमप्याह — अन्तस्त्रयोदशपुट इति । अथ त्रयोदशपुटे अन्तर्मध्ये, शरवर्गसंख्याः पञ्चविंशतिसंख्याः तत्र नवशतें नवयुते शते चेत् तद्बाह्यतो दिक्कोणेषु क्रमेण तिथिरसप्रमिताः पञ्चदशसंख्याः षट्संख्या घटाः स्युः । अथ त्रिहीने शते सप्तयुतनवत्यां चेदन्तस्तथैव पञ्चविंशति-कम् । बाह्ये तु क्रमेण धूर्जटिगिरिप्रमिताः दिक्ष्वेकादश कोणेषु सप्त च घटाः स्युः ॥ १५४ ॥

तद्वयेऽपि द्रव्यन्यासमाह — अन्तरिति । विद्वान् कलशक्रमं तद्द्र-व्याणि च विद्वानाचार्यः अन्तःस्थितेषु पञ्चविंशतिघटेषु बाह्ये सर्वमणितोयं

---

१. 'द्वान् पू', २. 'षकु' ग्र. पाठः.

धात्रीवारि फलोदकं क्वथितकं कौशाम्बुकाशाम्बुनी
सेव्यं दौर्व्यमपीति सप्तदशकं विन्यस्य विद्वानथ ॥
पाटीरासृगयःप्लवङ्गहरमांसोतोयमुस्ताम्बुमुक्-
[illegible]
गन्धास्तेषु युगं युगं न्यसतु पर्जन्यादिकाभ्यन्तरे-
ष्वष्टौ तद्बहिरङ्कुरानभिहितान् दिक्कोणखण्डेष्वपि ॥

एकाशीत्यां प्राग्वन्नवनवकान्यादधीत रुद्रपुटे ।
अत्रैव पञ्चषष्ट्यां बहिःष्टितान्यष्ट सप्तकानि स्युः ॥१५७॥
सर्पिर्मूत्रशकृन्ति दुग्धदधिनी गोरोचनावारिकं
कौशं रत्नकगन्धमाक्षिकगुलक्काथोदबीजोदकम् ।

रत्नाष्टकयुतजलं, तस्यानन्तरदिक्कोणेषु गव्यकं दुग्धकं दधि आज्यं मधु गौडं इक्षुसलिलं तैलं, पुनस्तदनन्तरस्थदिग्विदिक्षु हरिद्राजलं धात्रीवारि फलोदकं क्वथितकं कौशाम्बुकाशाम्बुनी कुशजलं काशजलं च सेव्यं दौर्व्यमपि इति द्रव्याणां सप्तदशकं विन्यस्याथ पर्जन्यादिकाभ्यन्तरेषु ये निर्दिश्यमानाः षोडश गन्धाः, तेषु युगं युगं द्वौ द्वौ गन्धौ न्यसतु । पाटीरासृक् चन्दनं कुङ्कुमं च । अयःप्लवङ्गं (അകിലും കണ്ടിവെണ്ണയും) । मुरमांसी (മരവും മാഞ്ചിയും) । तोयमुस्तम् (ഇരുവേലിയും മുത്തങ്ങയും) । अम्बुमुक्कोरम् മുത്തങ്ങയും കർപ്പൂരവും) । एलाशशि(ഏലത്തരിയും കർപ്പൂരവും) । जातिकुष्ठकं(ജാതിക്കായും കൊട്ടവും) । लवङ्गत्वक् च (രണ്ടും ഇലവർങ്ങം തന്നെ) । तद्बहिर्दिक्कोणखण्डेष्वपि मध्यस्थकलशेषु अभिहितानुक्तान् न्यग्रोधादिकानष्टावङ्कुरांश्च न्यसतु ॥ १५५, १५६ ॥

मध्यमध्यमद्वयमाह — एकाशीत्यामिति । एकाशीत्यां घटसंख्यायां रुद्रपुटे एकादशपुटे प्राग्वत् पूर्वोक्तवत् मध्येऽष्टदिक्ष्वपि नवनवकान्यादधीत । पञ्चषष्ट्यां तु अत्रैव एकादशपुटे बहिःष्टितानि दिक्षु कोणेष्वपि सप्तकान्यष्ट स्युः ॥ १५७ ॥

अत्र द्रव्याण्याह — सर्पिरिति । मध्यमद्वन्द्वके कर्णिकातद्दिक्कोणदलादिकेष्वपि कार्णिकायां तद्दिक्कोणदलेषु, आदिशब्देन तद्दिग्विदिक्खण्डेषु च । सर्पि-

मृत्सातोयतिलोदसूनसलिलस्वर्णोदकं कर्णिका-
तद्विक्षोणदलादिकेष्वपि निदध्यान्मध्यमद्वन्द्वके ॥

गव्यक्षौद्रपयोघृतानि दधि गौलेक्षूदतैलं नवं
केरीवार्यथ पाद्यमर्घ्यसलिलं चाचामकं क्काथकम् ।
रत्नाम्भः फलवारि गन्धसलिलं पुष्पोदकं चाधम-
द्वन्द्वद्रव्यगणोऽङ्कशैलपुटयोः प्रोक्ता पदप्रक्रिया ॥

मूलेन ब्रह्मघटैर्गायत्र्या द्रव्यपूर्णपरिकलशैः ।
अङ्गाणुनावशिष्टैः स्नपयतु मध्यादिपूरणक्रमतः ॥ १६० ॥

मूलोपचाराणुकुमारसूक्ततः संस्नापयेद् ब्रह्मघटेन मूलतः ।
खण्डान्तरब्रह्मघटैर्जिनार्णतः सद्रव्यकैः शुद्धजलैर्हृदेति वा॥

मूत्रशकृन्ति आज्यं गोमूत्रं गोमयं च, दुग्धदधिनी क्षीरं दधि च, गोरोचनावारिकं, कौशं, रत्नकगन्धमाक्षिकगुलकाथोदबीजोदकं रत्नोदं गन्धोदं मधु गौलं कषायं बीजोदकं च, मृत्सातोयतिलोदसूनसलिलस्वर्णोदकं मृज्जलं तिलोदकं पुष्पोदकं हिरण्योदकं च निदध्यात् ॥ १५८ ॥

अधमद्वन्द्वमाह — गव्येति । गव्यक्षौद्रपयोघृतानि पञ्चगव्यं मधु क्षीरं घृतं च, दधि, गौलेक्षूदतैलं गौलमिक्षूदं तैलं च, नवं नवीनं केरीवारि नालिकेरोदकम्, अथ बाह्ये पाद्यम्, अर्घ्यसलिलम्, आचामकं, क्काथकं, रत्नाम्भः, फलवारि, गन्धसलिलं, पुष्पोदकं च एतानि सप्तदशद्रव्याणि पूर्वक्रमेणाधमद्वन्द्वद्रव्यगणः प्रोक्तः । अत्र अङ्कशैलपुटयोः नवसप्तपुटयोः पदप्रक्रिया पदक्लप्तिः प्रोक्ता पूर्वोक्तैवेत्यर्थः ॥ १५९ ॥

स्नानमन्त्रानाह — मूलेनेति । ब्रह्मघटैः सर्वखण्डस्थितैः ब्रह्मकलशैर्मूलेन स्नपयतु । द्रव्यपूर्णपरिकलशैर्गायत्र्या च, अवशिष्टैः शुद्धजलपूर्णैरङ्गाणुना च, मध्यादिपूरणक्रमतः ब्रह्मकलशादिभिः पूरणक्रमेणैव स्नपयतु ॥ १६० ॥

पक्षभेदमाह — मूलेति । ब्रह्मघटेन मूलोपचाराणुकुमारसूक्ततः संस्नापयेत् । खण्डान्तरब्रह्मघटैर्मूलेन, सद्रव्यकैः द्रव्यसहितापरकुम्भैः जिनार्णतो गायत्र्या, शुद्धजलैः कुम्भैः हृदा हृदयमन्त्रेण इति वा संस्नापयेत् ॥ १६१ ॥

पूर्त्यै पञ्चशतस्य यो ह्युपघटः कोणेषु तेन स्वख-
ण्डैक्यात् पञ्चकमेककं च विहितं दिक्कोणयोर्यत्पुनः ।
खण्डैकत्वजुषापि तेन मनुजांशद्रव्यभाजा पृथग्
देवेशं स्नपयेदितीह नवधा प्रोक्तोऽभिषेको गुहे ॥ १६२ ॥
विघ्नेशेऽपि महेशवद् घटपुटाद्याधाय वैधातृकं
कुम्भं द्वादशरत्नकेन परिपूर्यापूरयेत् तत्परम् ।
अन्तर्दिग्विदिशोर्बहिश्च कलशान् पाद्यादिभिर्द्व्यष्टभि-
स्तैरेवाथ तदान्तरालिकगुलाद्यालैस्तु वा त्र्यष्टभिः ॥
पाद्यार्घ्याचमनीयदुग्धदधिसर्पिः क्षौद्रगव्यं फलं
भक्ष्यं यावकशालिके सतिलरत्नाष्टापदं विद्रुमम् ।

अत्र पञ्चशतस्य पूर्त्यै कोणेषु मानुषखण्डकोणेषु यो ह्युपघटः प्रोक्तः, तेन घटेन स्वखण्डैक्यात् कोणस्थपञ्चविंशत्या सह स्नपयेत् । यत्पुनरेकोनपञ्चाशदुपेतद्विशतघटे दिक्कोणयोर्विहितं पञ्चकमेककं च विहितं, खण्डैकत्वजुषापि एकखण्ड एव स्थितवतापि तेन मनुजांशद्रव्यभाजा मानुषगतद्रव्यपूरणाद्धेतोः पृथगेव देवेशं स्नपयेत् । इति गुहे नवधा नवप्रकारेणाभिषेकः प्रोक्तः ॥ १६२ ॥

गणपतौ कलशविधिमाह — विघ्नेश इति । विघ्नेशेऽपि महेशवत् शिववत् घटपुटादि घटपुटक्रमाणां क्लृप्तिमाधाय । वैधातृकं कुम्भ ब्रह्मकलशं द्वादशरत्नकेन परिपूर्य तत्परं तदनन्तरम् अन्तर्दैविके बहिर्मानुषे च दिग्विदिशोः दिक्षु कोणेषु च पाद्यादिभिर्द्व्यष्टभिः षोडशभिर्द्रव्यैः कलशानापूरयेत् । अथवा तैरेव षोडशभिः सहैव तदान्तरालिकगुलाद्यालैः तेषां मानुषदिक्कोणानामन्तरालगतैः गुलादियुक्तैः त्र्यष्टभिश्चतुर्विंशतिद्रव्यैरापूरयेत् ॥ १६३ ॥

द्रव्याणि गणयति — पाद्येति । पाद्यार्घ्याचमनीयदुग्धदधिसर्पिः पाद्यम् अर्घ्यम् आचमनीयं क्षीरं दधि आज्यं च, क्षौद्रगव्यं मधु पञ्चगव्यं च, फलं, भक्ष्यं, यावकशालिके यवजलं शालिजलं च, सतिलरत्नाष्टापदं

---

१. 'षकोणखण्डेषु' क. घ. ङ. पाठः. २. 'आ त्र' ख. ङ पाठः. ३. 'ले' क. पाठः.

गौलं पुष्पजलं च दौर्व्यसलिलं धातूदमृत्साकुशं
मुक्ताकेरपयश्च षोडश वदन्ति द्रव्यकाण्यष्ट च ॥
तद्देवता गणेशः पितरो वाग् वह्निवल्लभा सोमः ।
रुद्रोऽग्निर्गुहसावित्र्यौ च गणेशो गजास्यकः पवनः ॥१६५॥
विश्वेदेवा यमधनदब्रह्माणोऽथ दिनकरो दुर्गा ।
विष्णुर्लक्ष्मीः सप्त च मुनयो भूर्वह्निवरुणसोमाः स्युः ॥
अत्रेदंविष्णु ऋचापोह्यणुनापःपुनन्तुमनुना च ।
आप्यायस्व धेक्राण्णःसावित्र्याख्यमधुमतीभिश्च ॥१६७॥

तिलोदकं रत्नोदकम् अष्टापदमिति हिरण्योदकं, विद्रुमं विद्रुमोदकं, गौलं, पुष्पजलं, दौर्व्यसलिलं, धातूदमृत्साकुशं धातूदं मृज्जलं कुशोदकं च, मुक्ताकेरपयश्च मुक्ताजलं नालिकेरपयश्च, एतानि षोडशाष्ट च द्रव्याणि वदन्ति । बुधा इति शेषः । सप्तदशद्रव्ये पञ्चविंशतिद्रव्येऽप्ययमेव विधिरित्यर्थः ॥ १६४ ॥

तेषां देवताः पठति—तद्देवता इति । मध्ये गणेशः, पुनः पितरः, वाक् सरस्वती, वह्निवल्लभा स्वाहा, सोमः, रुद्रः, अग्निः, गुहसावित्र्यौ स्कन्दः सावित्री च, गणेशः, गजास्यकश्च, पवनो वायुः, विश्वेदेवाः, अथ यमधनदब्रह्माणः यमो वैश्रवणो ब्रह्मा च, दिनकरः सूर्यः, दुर्गा, विष्णुर्लक्ष्मीः, सप्त च मुनयः सप्तर्षयः, भूर्भूमिः, वह्निवरुणसोमाश्च तद्देवताः स्युः ॥ १६५, १६६ ॥

अभिषेकमन्त्रानाह — अत्रेति । 'इदं विष्णु'ऋचा, 'आपोह्य'णुना, 'आपःपुनन्तु'मनुना, 'आप्यायस्व', 'दधिक्राव्णः', सावित्र्याख्यमधुमतीभिः सावित्री 'तत्सवितुरि'ति, मधुमत्यो 'मधु वाता' इति तृचम्, 'अग्निमील'

---

१. 'ब', २. 'स्युः,

विघ्नेशे स्फटिकोनितं हरिहरोक्तं रत्नमीशोदितं
पाद्यार्घ्याचमनीयपुष्पफलरत्नं दौर्गवद् धातुकम् ।
भक्ष्यं स्यात् पृथुकादिकं स्वहृषनोद्दिष्टं चतुष्कं मृदा
वेदीक्षेत्रगजोक्षपक्षगरिवल्मीकाखुतीर्थोद्भवाः ॥

अत्रे' क. पाठः.

भूयोऽग्निमीलइत्यृङ्मानस्तोकेगणेशमूलेन ।
पुनरोषधीऋचाशुश्शिशानपितरोहिरण्यवर्णैर्भिः ॥१६८॥
ब्रह्मादिजज्ञमनुना रक्षोहणमित्यृचा तथाग्नेत्वम् ।
पुष्पावतीश्च शन्नो देवीर्देवस्य चोद्धृतासीति ॥ १६९ ॥
सिञ्चेत् तथाग्नआयाह्यृचा समुद्रादिकेन मनुना च ।
याः फलिनीश्च गणानां त्वेति च पाद्यादिकान्तकलशैस्तम् ॥
आर्येऽन्तः पाद्यमन्तर्दिशि विदिशि बहिश्चार्घ्यमाचामगव्ये
गोमूत्रं दुग्धदध्याज्यमपि मधु कषायं फलं मार्जनं मृत् ।
सक्तूदं गन्धपुष्पोदकयवगुलमिक्षूदकेरीरसं स्यात्
केरोदं रत्नलोहोदकमपि सहतीर्थाक्षताम्बन्तरान्तम् ॥
तद्देवताः पितृश्रीवाक्सावित्र्यस्तथैव गायत्री ।
सोमो रुद्राग्निगुहा विश्वे विघ्नेश्वरो मही ज्येष्ठा ॥ १७२ ॥

इति, 'मा नस्तोके', गणेशमूलेन, 'ओषधीरि'त्यृचा, 'आशुः शिशानः', 'पितरः पितामहाः', 'हिरण्यवर्णा' इत्यृग्भिः, ब्रह्मादिजज्ञमनुना 'ब्रह्म जज्ञानमि'ति, 'रक्षोहणमि'त्यृचा, 'अग्ने त्वं', 'पुष्पावतीश्च', 'शन्नो देवीः', 'देवस्य त्वा', 'उद्धृतासी'ति, 'अग्न आयाह्यृ'चा, समुद्रादिकेन 'समुद्रं गच्छे'ति, 'याः फलिनीः', 'गणानां त्वा' इति एतैर्मन्त्रैः पाद्यादिकान्तकलशैः पाद्यादिभिः क इति ब्रह्मा तदन्तैः ब्रह्मकलशान्तैस्तं गणपतिं सिञ्चेत् ॥ १६७–१७० ॥

शास्तुः कलशविधिमाह — आर्य इति । आर्ये अन्तः ब्राह्मे पाद्यं स्यात् । अन्तर्बहिश्च दिशि विदीशि अन्तरान्तम् अन्तरालान्तं यथा तथा अर्घ्यम्, आचामगव्ये आचमनीयं पञ्चगव्यं च, गोमूत्रं, दुग्धदध्याज्यं क्षीरं दध्याज्यं च, मधु, कषायं, फलं, मार्जनं, मृत्, सक्तूदं, गन्धपुष्पोदकयवगुलं गन्धोदकं पुष्पोदकं यवोदकं गुलं च, इक्षूदकेरीरसम् इक्षूदकं नालिकेररसं च, केरोदं नालिकेरोदकं, रत्नलोहोदकमपि रत्नोदकं लोहोदकं च, सहतीर्थाक्षताम्बु तीर्थोदकमक्षतोदकं च, एतानि द्रव्याणि स्युः ॥ १७१ ॥

देवताः पठति — तद्देवता इति । पितृश्रीवाक्सावित्र्यः पितरः श्रीः सरस्वती सावित्री च, तथा गायत्री, सोमः, रुद्राग्निगुहाः रुद्रोऽग्निः स्कन्दश्च,

इन्द्रः सप्तर्षिमरुन्नृसिंहदुर्गास्ततः परं क्रमशः ।
श्रीधरयुगजकुबेराः पुरुषो निर्ऋतिः परश्च सम्प्रोक्ताः ॥१७३॥

षण्मूलप्रणवाणुना स्नपितयेत् सम्पूरणोक्तक्रमात्
पाद्यादिद्रविणाभिपूर्णकलशैः सस्वोपकुम्भैः सुधीः ।
सावित्र्याद्यणुपञ्चकं तदनु सावित्र्यादितत्तन्मनून्
गव्याद्येषु युनक्तु मध्ववधिषु द्रव्येषु षट्सु क्रमात् ॥
मध्वन्तिमोऽधमविधिर्यववारिनिष्ठः
स्यान्मध्यमोऽक्षतजलान्तिम उत्तमः स्यात् ।

विश्वे देवाः, विघ्नेश्वरो गणपतिः, मही पृथिवी, ज्येष्ठा स्वयमेव, इन्द्रः, सप्तर्षिमरुन्नृसिंहदुर्गाः सप्तर्षयो वायुः नरसिंहो दुर्गा च, श्रीधरयुगजकुबेराः श्रीधरः उभयत्र ब्रह्मा वैश्रवणश्च, पुरुषः, निर्ऋतिः, परः पुरुषश्च, तद्देवताः सम्प्रोक्ताः ॥ १७२, १७३ ॥

पाद्यादिद्रविणाभिपूर्णकलशैः ब्रह्मकलशादिद्रव्यकलशैः सस्वोपकुम्भैः स्वस्वपरिकलशैः सह सम्पूरणोक्तक्रमात् षण्मूलप्रणवाणुना सर्वत्र षण्मन्त्रमूलमन्त्रप्रणवैः स्नापितयेत् स्नपितं कुर्यात् । सुधीरिति तत्तद्देवतानाममन्त्रयोजनमुक्तम् । गव्याद्येषु मध्ववधिषु षट्सु द्रव्येषु क्रमात्, सावित्र्याद्यणुपञ्चकं पञ्चगव्ये, तदनु गोमूत्रदुग्धदध्याज्येषु 'तत्सवितुः' 'आप्यायस्व' 'दधि क्राव्णः' 'तेजोऽसि' इति मन्त्रान्, मधौ 'मधु वाता' इति च युनक्तु ॥ १७४ ॥

अत्र मध्वन्तिमः मध्वन्तनवद्रव्यैः अधमविधिः स्यात् । यववारिनिष्ठः यवोदकान्तसप्तदशद्रव्यैः मध्यमो मध्यमविधिः । अक्षतजलान्तिमः अक्षत-

---

१. 'क्ताः ॥
आर्ये गन्धनिशाक्षतर्व + तिलं पाद्यं सराजीतिलं
सक्षीरं कुशगन्धपुष्पभृतमर्घ्यं स्याल्लवङ्काम्बुजम् ।
गन्धाम्बाचमनं पयस्तरुकृतं कांपायकं मार्जनं
राज्यैन्द्र्यक्षतगन्धपुष्पकसदाभद्राकुशाग्रात्मकम् ॥
क्षेत्राद्रिवेदिवृषभ्यक्षनदीद्वितीरजाता मृदः प्रमथराजि हरीरितानि ।
लोहानि रुद्रगदितानि सविद्रुमानि रत्नानि गन्धकुसुमान्यपि तद्विधाप्यम् ॥'

षण्मू' क. पाठः २. 'स्व' इति मूलकोशपाठः. ३. नां मन्त्र' ख. पाठः.

तत्तत्क्षमं घटपुटादि विधाय चैतं-
त्रिष्वेकमाचरतु च स्नपनं प्रभेशे ॥ १७५ ॥

तत्तद्द्रव्यन्यसनामिति कृत्वा द्रवद्रव्यकुम्भान्
मुक्त्वा शेषान् सपरिकलशान् वारिणा वारुणेन ।
आपूर्यैषूज्ज्वलकिसलयाद्यञ्चितेषु स्वमन्त्रे-
णावाह्याभ्यर्चयतु जलगन्धादिभिश्चानुखण्डम् ॥ १७६ ॥

आचार्यः सह मूर्तिपैरथ दिशास्वग्निं विहृत्य क्रमात्
स्वस्वोक्तद्रविणाणुभिः कृतहुतिः सम्पातपातं पुनः ।
कृत्वा द्रव्यघटेषु मन्त्रमहितान् हृद्यांशुकैर्वर्मणा
तान् संछाद्य विभूषयेत् ससुमनोदर्भाक्षताद्यैरपि ॥

जलान्तपञ्चविंशतिद्रव्यैः उत्तम उत्तमविधिः स्यात् । तत्तत्क्षमं तस्य तस्योचितं घटपुटादि घटपुटकप्त्याद्याधाय एतत्त्रिष्वपि विधिषु मध्ये एकं स्वयोग्यं स्नपनं प्रभेशे आचरतु ॥ १७५ ॥

इति उक्तप्रकारेण तत्तद्द्रव्यन्यसनं तस्य तस्य द्रव्यस्य न्यासं कृत्वा द्रवद्रव्यकुम्भान् पञ्चगव्यादिद्रवद्रव्येण पूर्णान् कुम्भान् मुक्त्वा शेषान् पाद्यादिभिर्द्रव्यैर्युक्तान् सपरिकलशान् द्रव्यहीनांश्च कलशान् वारुणेन वारिणा कलशक्षेत्रोत्तरभागगतस्वस्तिकस्थजलद्रोण्यां गालितवारिणा पूर्णायां तस्यां वरुणं देवं चावाह्य सम्पूज्य पञ्चवारुणादिजप्तेन तेन वारिणापूर्य उज्ज्वलकिसलयाद्यञ्चितेषु उज्ज्वलैर्मनोहरैरश्वत्थचूतपनसस्तबकैः आदिशब्देन तण्डुलपूर्णचक्रिकादिभिरलङ्कृतेषु तेषु अनुखण्डं खण्डेखण्डे स्वस्वमन्त्रेणावाह्य जलगन्धपुष्पादिभिरभ्यर्चयतु ॥ १७६ ॥

अथाचार्यो मूर्तिपैः सह दिशासु पूर्ववदग्निं क्रमाद् विहृत्य स्वस्वोक्तद्रविणाणुभिः अधिवासपटले स्वस्वविभागोक्तैर्द्रविणैर्मन्त्रैश्च कृतहुतविधिर्भूत्वा पुनर्द्रव्यघटेषु संपातपातं कृत्वा मन्त्रमहितान् स्वस्वमन्त्रेण पूजितान् जप्तांश्च तान् हृद्यांशुकैः शुद्धैर्वस्त्रैर्वर्मणा संछाद्य ससुमनोदर्भाक्षताद्यैः पुष्पसहितदर्भाक्षतगन्धाद्यैरपि । विभूषयेत् अलङ्कुर्यात् ॥ १७७ ॥

---

१. 'पु त्रिष्वे' क. ख., 'वं त्रिष्व' ग. पाठः. २. 'द्यैः विभू' ङ. पाठः.

प्रागास्यः समवस्थितोऽत्र कलशक्षेत्राद् बहिस्तत्त्वतः
राराध्याखिलखण्डतत्त्वविहितैकाङ्गं विभाव्याथ तम् ।
भूतानि प्रविलाप्य शोषदहनाद्याधाय सृष्ट्वा लिपि-
न्यासान्ते समनूदयादि सकलाध्वन्यासनिष्ठं चरेत् ॥
इष्ट्वा पीठमिहाभिवाह्य सकलीकृत्यैकभूयं गतं
सम्पूज्यैनमथो निवेद्य परितो दद्याद् बलिं पूर्ववत् ।
स्वस्वोक्तैर्बलिमन्त्रकैरथ समाचम्यान्तरभ्येत्य तं-
नैवेद्यं प्रविसृज्य तोषणसपर्यां च प्रकुर्याद् गुरुः ॥ १७९ ॥
शुद्धा भवन्त्वित्यणुना च पञ्चविंशत्युपेतेन पवित्रपाणिः ।
सम्पातशेषान्वितवारिणोक्षेत् कुम्भान् किरेदक्षतपुष्पकैश्च ॥
शुद्धा भवन्त्विमे कुम्भाः सकुशाः सापिधानकाः ।
वातातपपरीताश्च शुभलक्षणसंयुताः ॥ १८१ ॥
पञ्चविंशतिधा विष्णोस्तत्त्वभेदेन निष्ठतः ।
द्रव्येशत्त्वाश्रयाः सर्वाः सङ्गच्छन्तां विभूतयः ॥ इति ॥

अत्राधिवासकर्मणि कलशक्षेत्राद् बहिः पश्चिमे भागे प्रागास्यः समवस्थितो भूत्वाथ तत्त्वतारराध्या तत्त्वैस्तारेण च पुष्पारागधनात् तं देवम् अखिलखण्डतत्त्वविहितैकाङ्गम् अखिलैः खण्डैः तत्त्वरूपैरुपलक्षितैकशरीरं विभाव्य तस्य भूतानि प्रविलाप्य शोषदहनाद्याधाय भूतानि सृष्ट्वा लिपिन्यासान्ते समनूदयादि मन्त्रोदयादिसहितं सकलाध्वन्यासनिष्ठं षडध्वन्यासपर्यन्तं कर्म चरेत् ॥ १७८ ॥

पुनः पीठमिष्ट्वा इहावाह्य सकलीकृत्यैकीभूयम् एकत्वं गतम् एनं देवं संपूज्य निवेद्याथो पूर्ववत् स्वस्वोक्तैर्बलिमन्त्रकैः परितो बलिं च दद्यात् । अथो समाचम्यान्तरभ्येत्य नैवेद्यं प्रविसृज्य तोषणसपर्यां प्रसन्नपूजां च प्रकुर्यात् । गुरुरिति पूर्वस्मादधिवासादत्रातिदेशं कर्तुं समर्थ इति सूचितम् ॥ १७९ ॥

ततः पवित्रपाणिर्गुरुः 'शुद्धा भवन्त्विति'त्यणुना 'पञ्चविंशतिधे'त्युपेतेन संपातशेषान्वितवारिणा संपातशेषयुक्तैर्गन्धजलैः पूजितान् कुम्भानुक्षेत् । अक्षतसूनकैः पुष्पाक्षतैः किरेच्च ॥ १८० ॥

प्रस्तुतं मन्त्रद्वयं पठति — शुद्धा भवन्त्विति । पञ्चविंशतिधेति च ॥ १८१, १८२ ॥

१. 'स्व' इति मूलकोशपाठः.

सम्प्रार्थ्य शास्त्रोदितमित्यनेन मन्त्रेण मन्त्री रचिताञ्जलिः सन्
दत्त्वावसानीयकमर्घ्यमस्मै देवाय कुर्वीत लयाङ्गकाद्यम् ॥

शास्त्रोदितमिदं चास्तु स्नपनं देवनिर्मित ! ।
अनेन स्नपनेनास्तु प्रसन्नो भगवान् हरिः ॥ १८४ ॥
अभ्येत्य देवायतनाग्रसंस्थः कृत्वा प्रसूनाञ्जलिमञ्जलिं च ।
विज्ञापयेद् विश्वजनीनहितैनं बुधोऽधिवासः कृत इत्यनेन ॥

अधिवासः कृतो देव ! स्नपनाय मया तव ।
क्षणेन मे प्रसादोऽस्य क्रियतां पुरुषोत्तम ! ॥ १८६ ॥
अत्रोदाहृतविष्णोरित्यादिपदांशकेषु मन्त्रितमः ।
शम्भोरित्यादि पदं स्वं स्वं कुर्वीत सर्वदेवेषु ॥ १८७ ॥
समेत्य मण्डपं ततो निजे निषद्य विष्टरे ।
परं पदं परामृशन्नतन्द्रितो[1] निशां नयेत् ॥ १८८ ॥

पुनश्च संप्रोक्ष्य रचिताञ्जलिः सन् मन्त्री मन्त्रार्थं स्मरन् 'शास्त्रोदितमि'-त्यनेन मन्त्रेण संप्रार्थ्य पुनरवसानीयमर्घ्यं चासौ देवाय दत्त्वा लयाङ्गकाद्यं लयाङ्गं रक्षां च कुर्वीत ॥ १८३ ॥

प्रार्थनामन्त्रं पठति—**शास्त्रोदितमिति** ॥ १८४ ॥

ततोऽन्तरभ्येत्य देवायतनाग्रसंस्थः देवालयस्याग्रतः स्थित्वा प्रसूनाञ्जलिमञ्जलिं च कृत्वा विश्वजनीनं विश्वस्य जनस्य हितकारिणम् एनं देवम् 'अधिवासः कृत' इत्यनेन मन्त्रेण विज्ञापयेत् ॥ १८५ ॥

तन्मन्त्रं पठति — **अधिवासः कृत इति** ॥ १८६ ॥

अत्रास्मिन् प्रकरणे उदाहृतविष्णोरित्यादिपदांशकेषु उक्तेषु 'पञ्च-विंशतिधा विष्णोरि'त्यादिषु विष्णोरित्यादिपदस्थानेषु मन्त्रितमः मन्त्रपदयो-जने कुशलः सर्वदेवेष्वपि शम्भोरित्यादि स्वं स्वं पदं कुर्वीत ॥ १८७ ॥

ततो मण्डपं समेत्य निजे विष्टरे आसने निषद्योपविश्य अतन्द्रितः निद्रातन्द्रादिविहीनः परं पदं योगनिद्रयोत्कृष्टं पदं गतं देवं परामृशन् ध्यायन् निशां नयेत् ॥ १८८ ॥

---

१. 'निद्रतो' इति मूलकोशपाठः

प्रातस्तूर्यदिने स्वसाम्प्रतिककृत् सम्पूज्य सर्वात्मकं
तारेणाथ पृथक् स्वतत्त्ववपुषं कृत्वार्घ्यहस्तोऽग्रतः ।
स्थित्वा मूलमनुं प्रजप्य मरुता द्वारं विदार्याभिग-
म्यान्तर्दर्शितमङ्गलोऽर्घ्यसलिलं देवाय दद्याद् गुरुः ॥

निर्माल्यं व्यपनीय विश्वमनुना विष्णौ परेष्वस्त्रतो
मन्त्री मूलत एव वा शिवहरौ गव्येन पुंसूक्ततः ।
तैलेनाज्य परेषु चास्त्रमनुना शैरीषचूर्णादिभि-
र्घृष्ट्वा भूरिजलैर्विशोध्य च विभुं सम्पूजयेत् पायसैः ॥

इष्ट्वा पीठमिहाभिवाह्य सकलीकृत्य प्रदाय क्रमात्
पाद्यार्घ्ये स्वजिनार्णतोऽस्त्रमनुना वाच्छिद्य तत्कौतुकम् ।

पुनः प्रतिष्ठायास्तुर्यदिने चतुर्थदिवसे गुरुः स्वयं स्वसांप्रतिककृत् स्वस्य सम्प्रतिभवं प्राभातिकं कर्म कृत्वा मण्डपं गत्वा सर्वात्मकम् एकीभूतं देवं तारेण संपूज्याथ स्वतत्त्ववपुषं स्वतत्त्वात्मकशरीरं देवं तत्त्वैः पुष्पाराधनेन पृथक् कृत्वा तस्माद् गत्वा देवालयस्याग्रतोऽर्घ्यहस्तः स्थित्वा मूलमनुं यथाशक्ति प्रजप्य मरुता वायुबीजमुच्चरन् द्वारं विदार्य उद्घाट्य अन्तराभिगम्य देवसमीपं गत्वा दर्शितमङ्गलो भूत्वा उत्सवपटले वक्ष्यमाणरीत्या मङ्गलानि दर्शयित्वा देवायार्घ्यसलिलं दद्यात् ॥ १८९ ॥

विष्णौ विश्वमनुना पञ्चतत्त्वेषु मध्यममन्त्रेण, परेष्वस्त्रतो मूलत एव वा निर्माल्यं व्यपनीय शिवहरौ पुंसूक्ततो गव्येन परेषु तैलेनास्त्रमनुना च आज्य अभ्यङ्गनं कृत्वा शैरीषचूर्णादिभिः अभ्यङ्गनिवर्तनसाधनैः घृष्ट्वा (शैरीषचूर्णादिभिः अभ्यङ्गनिवर्तनसाधनैः) भूरिजलैर्विशोध्य विभुं देवं पायसैः सह संपूजयेत् । मन्त्रीत्यनेनास्यां नित्यक्रियायां सर्वं कर्म मन्त्रसहितमेव कुर्यादिति सूचितम् । मन्त्रविशेषविधानाभावे मूलं प्रणवं वा तत्र योजयेदित्यपि सूचितम् ॥ १९० ॥

पुनः पीठमिष्ट्वा इह पीठे देवं चावाह्य सकलीकृत्य पाद्यार्घ्ये क्रमात् स्वस्वक्रमेण प्रदाय स्वजिनार्णतः स्वस्वगायत्र्या स्वस्वास्त्रमनुना वा तत्कौतुकं देवस्य दक्षिणकरे पूर्वमेव बद्धं कौतुकम् आच्छिद्य त्यक्त्वा स्वकरौ प्रक्षाल्य

प्रक्षाल्य स्वकरौ प्रदाय पुनराचामादि संस्नाप्य तं
सिक्त्वा तत्त्वहुतान्तहोमकलशैः प्रत्येकमभ्यर्चयेत् ॥ १९१ ॥

अथाराध्य पीठं समावाह्य देवं
तदीयाश्च मुद्राः प्रदर्श्यार्णतत्त्वं[1] ।
स्वमन्त्रोत्तरं न्यस्य दत्त्वोपहारान्
जलैः स्नानकालेऽभिषिच्यार्चयित्वा ॥ १९२ ॥

गत्वान्तर्मध्यकुम्भानुमातेकृदुद्गम्यार्च्य चोद्धार्यकुम्भं
नी[2]राज्यार्घ्यं प्रदाय स्वविहितमनुनोद्धार्य गत्वान्तरर्घ्यं[3] ।
दत्त्वा नीराज्य देवं स्नपयतु कलशेनार्चयेच्च खण्डं
नैवेद्यान्तेऽन्तरा स्नानमपि वितनुयात् तत्तदुक्ताणुनात्र ॥

सर्वत्र तत्तद्दैवतमूलतारै-
र्मध्यस्थितैश्चरतु संस्नपनं घटैस्तैः ।

पुनस्त्वाचामादि प्रदाय संस्नाप्य तत्त्वहुतान्तहोमकलशैः प्रायश्चित्तपटले वक्ष्यमाणैर्होमकलशैः सिक्त्वा होमकलशस्नाने प्रत्येकमभ्यर्चयेच्च ॥ १९१ ॥

अथ पीठमाराध्य देवं समावाह्य तदीया आवाहनादिमुद्राः प्रदर्श्य अर्णतत्त्वं[2] स्वमन्त्रोत्तरं लिपितत्त्वमन्त्राक्षरादिकं च न्यस्योपहारान् दत्त्वा स्नानकालेऽभिषिच्यार्चयित्वा मण्डपान्तर्गत्वा मध्यकुम्भानुमतिकृद् भूत्वा ब्रह्मकलशस्थदेवाय पुष्पमाराध्य तस्यानुज्ञां लब्ध्वा उद्धार्यकुम्भम् उद्धारयोग्यं कुम्भमुपगम्य किञ्चिदार्च्य संपूज्य नीराज्यार्घ्यं प्रदाय स्वविहितमनुना स्वस्वगायत्र्या द्रव्यकुम्भं[3] स्वस्वमूलेन तत्पारिकुम्भं च मूर्तिपेनोद्धार्यान्तर्गत्वा देवायार्घ्यं दत्त्वा नीराज्य कलशेन देवं स्नपयतु । अनुखण्डं खण्डे खण्डे स्नपिते देवमर्चयेच्च । अत्र खण्डानां खण्डानामन्तराले नैवेद्यान्ते तत्तदुक्ताणुना तत्तदागमेषूक्ताणुना अन्तरा स्नानमपि वितनुयात् ॥ १९२, १९३ ॥

मनुवित् मन्त्रयोजनकुशलो गुरुः सर्वत्र देवेषु प्राक् तत्तदणुदैवतमूलतारैः 'इदं विष्णुरि'त्यादितत्तन्मन्त्रानन्तं 'पितृभ्यो नमः' इत्यादितत्तद्देवतानाम[4]मन्त्रान्ते स्वस्वमूलमन्त्रं तारं चोक्त्वा मध्यस्थितैः स्वखण्डेषु मध्य-

---

१. 'रा' इति मूलकोशपाठः. २. 'त्त्वं स्वस्व' ख. पाठः. ३. 'म्भं स्वमू' ख. पाठः. ४. 'नां मन्त्रा' ख. पाठः.

दिव्यैः[1] परिघटैमनुवि[illegible] कुमार्यां
दुर्गाभिरङ्गमनुभिः शरजे हृदा वा ॥ १९४ ॥
तन्म[illegible]शमनुना महेश्वरे श्रीश[illegible]सुम्भविद्विषि ।
ब्रह्मजज्ञम[illegible]ना स्वमूलतोऽन्येषु च स्नपनमन्त[illegible] चरेत् ॥
तत्तद्भागसमीरितक्रममनूपेतैरिति स्नापयेद्
देवं [illegible]व्यघटैः स्वकीयप[illegible]म्भैश्च प्रकृत्याश्रितम् ।
आश्रित्य क्रममन्तरङ्गवश[illegible]देणादिकं वोद्धृतै-
र्मध्यान्ते स्नपनेऽत्र तद्दलघटा यद्येतदन्तेऽमुना ॥ १९६ ॥

स्थब्रह्मकलशैः तैर्घटैः संस्नपनं चरतु । तदनन्तरं तत्रतत्रस्थैः परिघटैः निर्दैवतैः देवतानाममन्त्रैर्हीनैरुक्तैर्मन्त्रैः स्नपनं चरतु । कुमार्यां[4] दुर्गाभिर्वा, शरजे त्वङ्गमनुभिर्वा हृदा वा चरतु ॥ १९४ ॥

अन्तरा स्नाने मन्त्रानाह — तन्महेशेति । महेश्वरे तन्महेशमनुना 'तन्महेशे'त्याद्यया गायत्र्यान्तरा स्नपनं चरेत् । श्रीशसेशहरिसुम्भविद्विषि विष्णुशङ्करनारायणदुर्गासु 'ब्रह्मजज्ञ'मनुना, अन्येषु देवेषु स्वस्वमूलतश्च ॥ १९५ ॥

इति एवमुक्तेन विधिना तत्तद्भागसमीरितक्रममनूपेतैः तत्र तत्र विष्ण्वादिभागेषु सम्यगुक्तैः क्रमैर्मन्त्रैश्च संयुतैर्द्रव्यघटैस्तं देवं स्नापयेत् । स्वकीयपरिकुम्भैश्च तत्र प्रकृत्याश्रितं क्रममाश्रित्य वा पञ्चविंशत्यादिकलशयुक्तेषु खण्डेषु स्नानकाले यथा प्रकृतिः सर्वकलशस्वरूपिणी स्थितिः दैविकाद्या वा मानुषाद्या वा[5] दिग्विदिक्स्था वा प्रादक्षिण्या वान्यथा वा, तथा विकृतिखण्डेष्वपि तं क्रममाश्रित्येत्यर्थः । इत्येकः पक्षः । अन्तरङ्गवशदिक्कोणादिकं सर्वखण्डेष्वपि मध्यकलशोद्धारानन्तरं तत्तदन्तर्भागसमीपस्थदिक्कोणानन्तरं तत्तद्बहिर्दिक्कोणान्तरालक्रममाश्रित्येत्यपरः पक्षः । एवमुद्धृतैः स्वस्वपरिकलशैश्च स्नापयेत् । मध्यान्ते स्नपनेऽत्र ब्रह्मखण्डे तद्दलकलशाः सन्ति यदि एतदन्ते दलकलशानामप्यन्ते अमुना ब्रह्मकलशेन स्नापयेत् ॥ १९६ ॥

---

१. 'दैं' क. ग. पाठः. २. 'दैं' ख. घ. च. पाठः. ३. 'न्त्रैर्हीनै' ङ. पाठः. ४. 'र्यां तु वु' ख. घ. ङ. पाठः. ५. 'वा तत्र दि' क. ख. पाठः. ६. 'तद', ७. 'तद्द' ङ. पाठः.

कृत्वावागन्त्यकुम्भात् स्नपनमिति समभ्यर्च्य देवं समेत्य प्रोद्वास्यान्त्ये घटे तत्सकलमिममुपानीय बिम्बोक्तनीत्या। कुम्भेशेनाभिषिच्य स्नपयतु विधिवत् तेन तत्स्थांशुकाद्यैः नीराज्य न्यस्तमन्त्रं महितमुपहृतार्घ्यं यजेत् पायसेन ॥

ततो यथाविध्यभिपूज्य देवं निवेद्य सन्तर्प्य तमग्निरूपम्। सावस्रुतोक्षं परिषद्बलिं च कृत्वा विभुं भावयतु प्रसन्नम् ॥

इति तन्त्रसमुच्चये समुद्यद्घटसङ्ख्यापरिकल्पन प्रकारः। पटलः कलशप्रसाधनैतत्स्नपनाख्यानपरोऽष्टमः समाप्तः ॥

इति तन्त्रसमुच्चये

अष्टमः पटलः।

अन्त्यकुम्भादर्वाक् पुरोगतं स्नपनमिति कृत्वा देवं समभ्यर्च्य पुनर्मण्डपं समेत्यान्त्ये घटे तत्सकलं मण्डपगततोरणध्वजद्वारकलशादिकं प्रोद्वास्येमं कलशं बिम्बोक्तनीत्या "स्यान्नीराजनमग्रत" इत्यादिश्लोकोक्तक्रमेण बिम्बस्थाने तं कलशमुपानीय कुम्भेशेन च प्रोक्तक्रमेणाभिषिच्य तत्स्थांशुकाद्यैः तत्स्थवस्त्रचक्रिकादिभिश्च नीराज्य विधिवत् स्वगुरूक्तक्रमेण तेन कलशेन स्नपयतु। पुनर्न्यस्तमन्त्रं स्वस्वोक्तसर्वमन्त्रन्यासानन्तरं महितं पूजितम् उपहृतार्घ्यमुपहारदानानन्तरं पायसेन यजेत् ॥ १९७ ॥

ततो यथाविधि देवमभिपूज्य निवेद्याग्निरूपं तं सन्तर्प्य पूजाहोमं कृत्वा सावस्रुतोक्षं कलशानामभिषेककाले सर्वकलशेभ्यः किञ्चित्किञ्चिदवस्राविताानि जलान्येकीकृत्य तेन सर्वपरिवारेपूक्षणं परिषद्बलिं प्रतिष्ठायामिव परिषदां बलिं च कृत्वा विभुं देवं प्रसन्नं भावयतु प्रसन्नपूजां च कुर्यात् ॥ १९८ ॥

पटलं समापयति — इतीति। इति तन्त्रसमुच्चयाख्ये ग्रन्थेऽष्टमः पटलः समाप्तोऽभूत्। कथंभूतः, समुद्यद्घटसंख्यापरिकल्पनाप्रकारः सम्यक्प्रकाशितानां घटसंख्यानां परिकल्पनायाः प्रकारेण युक्तः। कलशप्रसाधनैतत्स्नपनाख्यानपरश्च कलशानां प्रसाधनं पूरणपूजनाधिवासादिकम्, एतत्स्नपनम् उत्तरेद्युः करणीयं कर्म, एतयोः कर्मणोराख्याने प्रकथने तत्परस्तात्पर्येण युक्तः ॥ १९९ ॥

इति तन्त्रसमुच्चयविमर्शिन्याम्

अष्टमः पटलः।

अथ नवमः पटलः ।

अथ प्रतिष्ठास्नपनाद्यनन्तरं समाचरेत् सर्वपर्वस्वपूत्सवम् ।
ततोऽनुसंवत्सरमुक्तवासरव्यवस्थया चाखिलसम्पदाप्तये ॥
मार्गादिराधावधिकेषु षट्सु मासेष्विहैकत्र परत्र वातः ।
स्वर्क्षान्तमाकल्प्य समुप्तबीजः सप्ताह्निकाद्युत्सवमादधीत ॥

स्नाताचान्तः स्फीतभेर्यादिनादो
गर्भागारं प्राप्य नान्दीमुखान्ते ।
कृत्वा पुण्याहं समाराध्य देवं
मन्त्री सङ्कल्पं करोतूत्सवस्य ॥ ३ ॥

एवमष्टभिः पटलैः भूपरिग्रहादिस्नपनपर्यन्तं कर्माभिधाय नवमेन पटलेनोत्सवं वक्तुमारभते — **अथेति** । अथशब्दार्थमेव विवृणोति — **प्रतिष्ठास्नपनाद्यनन्तरमिति** । प्रतिष्ठास्नपनं प्रतिष्ठायाश्चतुर्थदिवसस्नपनम् । आदिशब्देन जीर्णोद्धारादिकमुच्यते । प्रतिष्ठादीनां स्नपनानन्तरं सर्वेषु पर्वसु सप्तस्वपि देवेषूत्सवमाचरेत् । तत आरभ्य अनुसंवत्सरं संवत्सरे संवत्सरे च उक्तवासरव्यवस्थया आगमेपूक्तसप्ताह्निकादिदिवसव्यवस्थायोगेन अखिलसम्पदाप्तये सर्वसम्पत्समापादनाय च ॥ १ ॥

उत्सवस्य कालनियममाह — **मार्गादीति** । मार्गादिराधावधिकेषु मार्गशीर्षादिवैशाखान्तेषु इह षट्सु मासेषु मध्ये एकत्र मासे अतः परत्र वा मासे स्वर्क्षान्तं मार्गशीर्षादितत्तन्मासविशिष्टनक्षत्रान्तम्, अथवा स्वर्क्षान्तं विष्ण्वादिदेवेषु स्वस्वपञ्चमीदिनान्तं, यद्वा स्वस्वप्रतिष्ठानक्षत्रान्तं तस्मिन्नृक्षे तीर्थस्नानं यथा भवति तथा चाकल्प्य तत्पूर्वमेव यथाकालं समुप्तबीजः कृतमङ्गलबीजावापो भूत्वा सप्ताह्निकाद्युत्सवं यथोक्तमादधीत ॥ २ ॥

तदारम्भविधिमाह — **स्नाताचान्त इति** । स्नाताचान्तः स्नानाचमनाद्यनन्तरं मन्त्री पाद्यपूजाकर्मज्ञः स्फीतभेर्यादिनादः भेरीसन्ताडनं यथोक्तं कारयित्वा गर्भागारं प्राप्य नान्दीमुखान्ते पुण्याहं कृत्वा देवं समाराध्य उत्सवस्य सङ्कल्पं करोतु एतं कालमेवंभूतमुत्सवं करिष्य इति देवाय निवेदयेदित्यर्थः ॥ ३ ॥

---

१. 'त्वा' इति मूलकोशपाठः.

तत्राग्रतः स्थापयतु ध्वजं च
तद्दण्डवाहादिकमारचय्य ।
संशोध्य सम्भूष्य च पल्लवाद्यैः
पुण्याहमाधाय यथाविधानम् ॥ ४ ॥
संशोध्य भूताप्ययधारणाद्यै-
स्तद्वाहनं वर्णतनुं विभाव्य ।
देवाग्रसंस्थात् कृतमूर्तिकेऽस्मिन्
वाहाणुना वाहनतोऽभिवाद्य ॥ ५ ॥
साकल्यमापाद्य समर्च्य केतौ
सम्यक् प्रतिष्ठाप्य समिष्टपीठे ।
केतुं च संस्थाप्य समिष्टपीठे
गर्ते पताकादिपरिष्कृताङ्गम् ॥ ६ ॥
आवाह्य सम्पूज्य निवेद्य वेद्यां
कृत्वा बलिं प्रार्थयतां च मन्त्री ।

तत्राग्रतः पुरोभागे ध्वजं च स्थापयतु । अग्रत इत्यनेन केषाञ्चित् पक्षे प्रागेव ध्वजस्थापनाङ्गीकार उत्सवस्य सूचितः । तत्स्थापनविधानमाह— तद्दण्डवाहादिकमिति । ध्वजदण्डं वाहनं पताकां घण्टादिकं चारचय्य कारयित्वा मन्त्री केतुस्थान उपविश्य केतुदण्डं दर्भमृदादिभिः संशोध्य पल्लवाद्यैः सम्भूष्य यथाविधानं मूर्तिपैः सह पुण्याहमाधाय तद्वाहनं भूताप्ययधारणाद्यैः भूतसंहारेण शोषणादिभिश्च संशोध्य वर्णतनुं लिपिप्राणायामादिभिर्लिपिमयदेहं विभाव्य पीठं प्रपूज्य कृतमूर्तिके कल्पितमूर्तिकेऽस्मिन् वाहने सति गर्भागारं गत्वा देवाग्रसंस्थाद् वाहनतो वाहाणुना वाहनमभिवाद्य साकल्यमापाद्य समर्च्य केतुस्थानं प्राप्य समिष्टपीठे केतौ सम्यग् अचञ्चलं प्रतिष्ठाप्य समिष्टपीठे गर्ते पताकादिपरिष्कृताङ्गं पताकाघण्टामालादिभिरलङ्कृतावयवं केतुं च संस्थाप्य आवाह्य सम्पूज्य निवेद्य वेद्यां तन्मूले वेदिकां कृत्वा बलिं च कृत्वा प्रार्थयतां च । मन्त्रीत्वनेन प्रार्थनामन्त्रज्ञ इति सूचितम् । यत्र तु देवालये तन्नित्यसान्निध्यकृते तस्या

---

१. 'प्तां चा' क. पाठः. २. 'क' ख. घ. ङ. पाठः.

ध्वजप्रतिष्ठापनकर्म यत्र
त नित्यस॥ध्येऽकृते कृतं प्राक् ॥ ७ ॥
तत्राधुना केतुपटेऽभिवाद्य
तद् वाहमारोप्य यजेद् यथोक्तम् ।
कुर्याच्च केतून् बहि [illegible] दे-
दिक्पीठिकान्ते बलिदेवतानाम् ॥ ८ ॥

प्राका [illegible] न्तः समन्तादू रुचिरतर [illegible] दिभिर्भूषयित्वा
पूगस्तम्भादिशुम्भ [illegible] वेततिभिर्यन्त्रदीपादिभिश्च ।
सं [illegible] ज्यालिप्य माल्यैर्बहलपरिमलैर्मण्डयित्वा विशोध्य
ग्रामे सर्वत्र संस्थापयतु शुभपताकोज्ज्वलान् केतुदण्डान् ॥
आरभ्य चैवं महमाद्यरात्रौ देवार्चनं भूतबलिं च कुर्यात् ।
प्रातश्च सायं च परेष्वहस्सु बलिं तथेज्यां सवनत्रयेऽपि ॥

ध्वजदेवताया नित्यपूजाबल्यर्थं ध्वजप्रतिष्ठापनकर्म महाध्वजस्थापनं प्रागेव कृतं, तत्र त्वधुना उत्सवारम्भे केतुपटे पताकायां तद्वाहनं यथोक्तमावाहनान्तरं केतावारोप्य लम्बयित्वा यजेत् सम्पूज्य बलिं दद्यात् । ततो बहिरग्रिमादिदिक्पीठिकान्ते बहिर्गतानाम् अग्रगतादीनां दिक्पीठिकानां समीपे कुमुदादीनां नन्द्यादीनां वान्येषां वा बलिदेवतानां स्वस्वमन्त्रेणाष्टौ केतून् कुर्याच्च ॥ ७—८ ॥

प्राकारान्तः बाह्यगतप्राकारान्तर्भागेऽपि समन्तात् चतुर्दिक्ष्वपि रुचिरतरवितानादिभिः अतिमनोहरैः वितानाच्छादनादिभिः पूगस्तम्भादिशुम्भाच्छिबिरवितततिभिः पूगस्तम्भादिभिः शोभमानैर्मण्डपविशेषैः यन्त्रदीपादिभिरन्यैश्चालङ्कारैर्भूषयित्वा भूप्रदेशं संमृज्यालिप्य बहलपरिमलैर्माल्यैः पुष्पविशेषैश्च मण्डयित्वालङ्कृत्य ग्रामेऽपि सर्वत्र विशोध्य शुभपताकोज्ज्वलान् केतुदण्डांश्च संस्थापयतु ॥ ९ ॥

एवं महम् उत्सवमारभ्य आद्यरात्रौ प्रथमदिवसरात्रौ देवार्चनं भूतबलिं च कुर्यात् । परेष्वहस्सु उत्तरदिवसेषु प्रातः सायं च तदिज्यां देवपूजां सवनत्रयेऽपि कुर्यात् ॥ १० ॥

---

१. 'माल्यैलि' इति मूलकोशपाठः ।

शुद्धोदकैः स्नानविधौ सदुग्धदध्याज्यगन्धोदकपञ्चगव्यैः ।
केरोदकैस्तं कलशैश्च साधु संस्नाप्य देवं विहितक्रमेण ॥
नवांशुकाभ्यां परिवेष्टय यज्ञसूत्रं च कृत्वाथ किरीटपूर्वैः ।
विभूषयेत् स्वार्हविभूषणैश्च गन्धैश्च माल्यैरपि मालिकाभिः॥
कालेषु त्रिषु सावनैः स्वमनुभिर्मूलेन वा सर्वतः
सम्पूज्याज्यगुलोपदंशकदलीकेरादियुक्तं हविः ।
दौग्ध्याद्यं विनिवेदयेदिह शिवे दौग्धान्नहारिद्रके
सद्यान्तं कृसरं गुलान्नसकलान्ने चाननेषु क्रमात् ॥ १३ ॥
कालद्वयेऽप्युत्सवनामधेयं
बलिं गुरुर्भूतबलिं किरेद् वा ।
कालप्रकल्प्त्योभयमाचरेद् वा
वक्ष्ये बलिं भौतिकमौत्सवं च ॥ १४ ॥

तत्र देवस्य स्नानविधौ स्नानकाले पूर्वं शुद्धोदकैः पुनः सदुग्धदध्याज्यगन्धोदकपञ्चगव्यैः पृथक् पूजितैरेतैः क्षीराद्यैः केरोदकैः नालिकेरजलैः कलशैश्च (विहित)क्रमेण तं देवं साधु संस्नाप्य वस्त्रेण बिम्बं परिमार्ज्य नवांशुकाभ्यां परिवेष्टय यज्ञसूत्रं चांसे कृत्वाथ किरीटपूर्वैः स्वार्हविभूषणैः स्वस्वयोग्यालङ्कारैः गन्धैर्माल्यैर्मालिकाभिश्च विभूषयेत् ॥ ११, १२ ॥

त्रिषु कालेषु सावनैः सवनभवैः विष्णौ द्वादशाक्षराष्टाक्षरषडक्षरैर्मन्त्रैः, शिवे प्रासादपञ्चब्रह्मषडक्षरैर्मन्त्रैः, अन्येषु स्वस्वविहितैर्मनुभिर्वा, सर्वतः सर्वदेवेषु सर्वकालेषु च स्वस्वमूलेन वा सम्पूज्याज्यगुळोपदंशकदलीकेरादियुक्तं हविर्विनिवेदयेत् । शिवे त्विह दौग्ध्याद्यमपि विनिवेदयेत् । तानि पुनः सद्यान्तं भवन्ति । ईशानतत्पुरुषाघोरवामदेवसद्योजातमुखेषु क्रमात् दौग्धान्नहारिद्रके दौग्धान्नं पायसं, हारिद्रकं निशाचूर्णेन सह पक्वं, कृसरं तिलैः सह पक्वं, गुलान्नसकलान्ने गुलान्नं सकलान्नं च गुलेन सह पक्वं सकलान्नं तच्चतुष्कमिश्रमिति ॥ १३ ॥

अथ गुरुः स्वयं कालद्वयेऽपि प्रातस्सायं चोत्सवनामधेयं बलिं वा भूतबलिं वा किरेत्। कालप्रकल्प्त्या प्रातरुत्सवबलिः सायं भूतबलिरिति कल्प्योभयमाचरेद् वा भौतिकं भूतबलिम् औत्सवम् उत्सवबलिं च क्रमेण वक्ष्ये ॥ १४ ॥

---

१. 'भूम्य य' इति मूलकोशपाठः.

त्रिधा स्वमूलाणुसमर्चितं हवि-
र्विभज्य तद्दैविकमाद्यमंशकम् ।
स[illegible]तरांशकौ क्रमात्
प्रकल्पये[illegible]त् पारिषदं च भौतिकम् ॥ १५ ॥

निर्माल्यभुक्पश्चिममुख्यदेवता-
स्विष्टं हविर्दैविकमन्यदन्यतः ।
आमन्त्रणं चाश्वितवाद्यघोषणै-
रत्रादितो भूतगणस्य कारयेत् ॥ १६ ॥

सम्प्रार्थ्य देवं ब[illegible]लैतुके स्वे
संयोज्य सन्धार्य च मूर्तिपेन ।
तत्साक्षिकं क्लृप्तसुदीप्तदीप-
वाद्यादिहृद्यं बलिमातनोतु ॥ १७ ॥

सृष्टिस्थितिविनाशानां कर्तर्भूतपते! प्रभो! ।
त्वत्पारिषदमुख्यानां बलिदानाय शाधि माम् ॥ १८ ॥

स्वमूलाणुना समर्चितं हविस्त्रिधा विभज्य तेष्वाद्यमंशकं तद्धविर्दैविकं प्रकल्पयेत् । इतरांशकौ सभूतकूरौ "पललं रजनीचूर्णं सलाजं दधि सक्तुकम्" इत्युक्तभूतकूरयुक्तौ क्रमेण पारिषदं भौतिकं च प्रकल्पयेत् ॥ १५ ॥

निर्माल्यभुक्पश्चिममुख्यदेवतासु द्वाःस्थादिनिर्माल्यधार्यन्तासु मुखभवासु विशिष्टासु वा देवतासु दैविकं हविरिष्टम् । अन्यतोऽन्यत् पारिषदेषु पारिषदं भूतेषु भौतिकं च । अत्र बलिकाले आदित आरम्भे अश्वितवाद्यघोषणैः यथोपपत्ति पूजितानां वाद्यानां घोषणैः भूतगणस्यामन्त्रणमाह्वानं कारयेत् ॥ १६ ॥

देवं संप्रार्थ्य 'सृष्टिस्थितिविनाशानामि'त्यादिना प्रार्थ्य स्वे बलिकौतुके बल्यर्थं विरचिते बिम्बे संयोज्य मूर्तिपेन सन्धार्य धारयित्वा तत्साक्षिकं देवसाक्षियुक्तं क्लृप्तसुदीप्तदीपवाद्यादिहृद्यं क्लृप्तेन सुतरां दीप्तेन दीपेन वाद्यादिना वाद्यगाननृत्तादिभिश्च हृद्यं यथा भवति तथा बलिमातनोतु ॥ १७ ॥

प्रार्थनामन्त्रं पठति — सृष्टिस्थितीति ॥ १८ ॥

---

१. 'णुस' ख. ङ. पाठः.

प्रोक्ष्याराध्य विभाव्य तत्र वसुपत्राब्जस्थितां देवतां
पाद्याद्यं प्रसमर्प्य तत्तदणुना सम्पूज्य दत्त्वा बलिम् ।
तत्तत्पार्श्वपदे प्रदाय परिषण्मन्त्रेण मूलेन च
प्राप्यापो बलिमुद्रया प्रधिनुयादेवं बलिप्रक्रिया ॥ १९ ॥

द्वाःस्थौ पार्श्वद्वये द्वार्यजितपुरमुरद्वेषिणोर्मण्डपेऽग्र्ये
वाहं पृष्ठेऽहिराजं यजतु सगणपं दक्षिणे दक्षिणेशम् ।
शेषेष्वेतानशेषान् स्मरजिति गतवाहाहिपान् द्वाःस्थवत्सु
द्वाःस्थान् सर्वेष्वथाग्र्यादिकदिगधिपतीन् वाहनान्तान्
[दशेशे ॥ २० ॥

लोकेशोपरि मातृशास्तृमहिषद्विट्षण्मुखार्थाधिभू-
निर्माल्यामृतभोजिनश्च निखिलेष्वप्यर्चयेत् स्वास्पदे ।

बलिक्लृप्तिमाह — प्रोक्ष्येति । बलिपीठेषु जलेन प्रोक्ष्य पुष्पेणाराध्य तत्र वसुपत्राब्जस्थिताम् अष्टदलपद्मे स्थितां देवतां विभाव्य ध्यात्वा पाद्याद्यमुपहारजातं प्रसमर्प्य तत्तदणुना जलगन्धादिभिः सम्पूज्य बलिं दत्त्वा तत्तत्पार्श्वपदे तस्य तस्य पार्श्वस्थाने परिषण्मन्त्रेण तत्तत्परिषण्मन्त्रेण मूलेन च बलिं प्रदाय चापः प्राप्य बलिमुद्रया प्रधिनुयात् प्रीणयेत् । एवं बलिप्रक्रिया बलिदानप्रकारः ॥ १९ ॥

अथ भूतबलेः क्रममाह — द्वाःस्थाविति । अजितपुरमुरद्वेषिणोः विष्णुशिवनारायणयोः द्वारि पार्श्वद्वये द्वाःस्थौ यजतु । अग्र्ये मण्डपे वाहं च, पृष्ठे अहिराजमनन्तं, दक्षिणे द्वारि पार्श्वद्वये सगणपं गणपतिसहितं दक्षिणेशं दक्षिणामूर्तिं च, शेषेषु पञ्चसु देवेषु एतानुक्तान् द्वाःस्थादीन् अशेषान् शेषनाम्नानन्तेन रहितान्, स्मरजिति गतवाहाहिपान् रहितवाहानन्ताभ्यां युक्तान्, द्वितीयद्वाःस्थवत्सु देवेषु द्वितीयद्वाःस्थांश्च, अथ सर्वेष्वप्यग्र्यादिकदिगधिपतीन् दश, ईशे तु वाहनान्तान् अन्ते वाहनेन युक्तान् तांश्च यजतु ॥२०॥

निखिलेष्वपि देवेषु लोकेशोपरि लोकेशानां पूजानन्तरं मातृशास्तृमहिषद्विट्षण्मुखार्थाधिभूनिर्माल्यामृतभोजिनश्च मातृः शास्तारं दुर्गां स्कन्दं वैश्रवणं निर्माल्यधारिणं च स्वास्पदे स्वस्वस्थानेऽर्चयेत् । धनाध्यक्षं वैश्रवणं

---

१. 'ता', २. 'ताः' घ. पाठः. ३. 'इनान' क. ख. ङ. पाठः.

सोमानन्तरमेव वार्हतु धनाध्यक्षं तथान्तर्बहि-
द्वार्स्थेज्योपरि वाहनादिकसमिज्या वै मन्तर्बलिः ॥२१॥
प्रासा-न्तर्बहिरपि सभान्तर्बहिश्चाजितेशे
द्वार्स्थास्तेष्वन्तिमवि-हेता वाद्यहीना रमेशे ।
अन्त्यस्थानस्थितविरहिताः शर्वशास्त्रोः कुमार्या-
माद्योना वा गुहगणपयोर्वा तथाद्यन्तहीनाः ॥ २२ ॥
प्रासादान्तर्नन्दिचण्डौ हरीशे
स्यातां तद्बाह्ये जयत्सेननामा ।
विष्वक्सेनश्चाप्युमा श्रीः सभान्तः
शूलं चक्रं तद्बहिश्च क्रमेण ॥ २३ ॥
चण्डप्रचण्डावरिशङ्खपाणी
श्रीः पुष्टिसंज्ञाप्यजितेऽग्र्यपक्षे ।

सोमानन्तरं सोमस्य पूजाया अनन्तरं तदुत्तरे वा अर्हतु पूजयेत् । तथान्तर्बहिर्द्वार्स्थेज्योपरि अन्तर्द्वार्स्थानन्तरमेव बहिर्द्वार्स्थावभ्यर्च्य पुनर्वाहनादिकसमिज्या वाहनादीनां पूजा वा कार्या । एवमन्तर्बलिः अन्तर्भागगतो बलिः स्यात् ॥ २१ ॥

द्वार्स्थानां कक्षासिमाह — प्रासादान्तरिति । अजितेशे प्रासादान्तर्बहिः प्रासादस्यान्तर्भागे बहिर्भागे च सभान्तर्बहिश्च सभाया अन्तर्बहिश्चेति चतुर्विधा द्वार्स्थाः । रमेशे तेषु द्वार्स्थेषु मध्ये अन्तिमविरहिताः सभाया बहिर्द्वार्स्थविरहिता वा आद्यहीनाः प्रासादान्तर्द्वार्स्थविरहिता वा । शर्वशास्त्रोः अन्त्यस्थानस्थितविरहिताः सभाबहिर्द्वार्स्थरहिताः । कुमार्याम् आद्योना वा चतुर्विधद्वार्स्थयुक्ता वा । गुहगणपयोस्तथा आद्यन्तहीना वा ॥ २२ ॥

तेषां नामानि कथयति — प्रासादेति । हरीशे प्रासादान्तः नन्दिचण्डौ स्याताम् । तद्बाह्ये प्रासादबाह्ये जयत्सेननामा विष्वक्सेनश्च । सभान्तश्चापि उमा श्रीरपि । तद्बहिः क्रमेण शूलं चक्रं च ॥ २३ ॥

अजिते अग्र्यपक्षे पक्षयोः प्रागुक्तपक्षे अन्तिमरहितपक्षे चण्डप्रचण्डौ अरिशङ्खपाणी चक्रपाणिः शङ्खपाणिश्च श्रीः पुष्टिसंज्ञापि स्थिताः । अन्यपक्षे

---

१. 'व बहिर्द्वार्स्थानन्तरमेव बहि' ब. पाठः.

स्थिताः क्रमाच्चक्रदरादिपाणी
श्रीपुष्टिबाह्ये भवतोऽन्यपक्षे ॥ २४ ॥
प्रासादस्थाः प्रोक्ता नन्दिमहाकालशूलपाण्यभिधाः ।
सहपरशुपाणयोऽन्तस्सदसि शिवे तीक्ष्णदन्तसमृगास्यौ ॥
शास्तरि शस्ताः क्रमशः क्षुरिकापाणिश्च खड्गहस्तश्च ।
अथ वीरबाहुसमहावीरौ तीक्ष्णश्च तीक्ष्णदन्तश्च ॥ २६ ॥
प्राक् चण्डिकाम्बिके स्तो ह्रादिन्यपि मोदिनी सभान्तःस्थे ।
तत्र बहिर्विजयन्तीकात्यायन्यौ च दुर्गायाम् ॥ २७ ॥
वह्निभुवि वज्रहस्तः प्रासादे शक्तिपाणिश्च ।
सदसि पुनरग्निकेतुर्द्वाःस्थौ स्तः सूर्यकेतुश्च ॥ २८ ॥
प्रासादद्वारगतौ विघ्नेशे वज्रदन्तसमृगास्यौ ।
स्यातां च चण्डविक्रमविघ्नकरौ कीर्तितौ सभान्तःस्थौ ॥

आद्यरहितपक्षे श्रीपुष्टिबाह्ये चक्रदरादिपाणी चक्रपाणिः शङ्खपाणिश्च भवतः । तत्र प्रासादबहिर्द्वार एव चण्डप्रचण्डौ ॥ २४ ॥

शिवे नन्दिमहाकालशूलपाण्यभिधाः नन्दी महाकालः शूलपाणिश्च सहपरशुपाणयः परशुपाणिश्च एते प्रासादस्था द्वाःस्थाः प्रोक्ताः । अन्तस्सदसि सभाया अन्तः तीक्ष्णदन्तसमृगास्यौ तीक्ष्णदन्तो मृगास्यश्च ॥ २५ ॥

शास्तरि क्षुरिकापाणिश्च खड्गहस्तश्च अथ वीरबाहुसमहावीरौ वीरबाहुः महावीरश्च तीक्ष्णश्च तीक्ष्णदन्तश्च द्वाःस्थाः शस्ताः ॥ २६ ॥

दुर्गायां प्राक् पूर्वं चण्डिकाम्बिके स्तो भवतः । प्रागित्यनेन क्वचित् पक्षे जयाविजयाभ्यां च योगः सूचितः । सभान्तःस्थे सभाया अन्तर्भागस्थे ह्रादिनी मोदिन्यपि भवतः । तत्र सभाया बहिः विजयन्तीकात्यायन्यौ च ॥

वह्निभुवि प्रासादे वज्रहस्तः शक्तिपाणिश्च, सदसि सभायां पुनरग्निकेतुः सूर्यकेतुश्च द्वाःस्थौ स्तः ॥ २८ ॥

विघ्नेशे प्रासादद्वारगतौ वज्रदन्तसमृगास्यौ वज्रदन्तो मृगास्यश्च । सभान्तःस्थौ चण्डविक्रमविघ्नकरौ कीर्तितौ स्याताम् ॥ २९ ॥

१. 'गजास्यौ' इति मूलकोशपाठः.

स्थाणौ वृषो मुररिपौ गरुडो द्वयात्मा
शार्ङ्गीश्वरेऽथ गणराजि महादिचाषः ।
आर्ये हयः शिखिभवे शिखिकुक्कुटौ च
सिंहो निसुम्भजिति वाहनकेतनाङ्काः ॥ ३० ॥
द्वाःस्थान् प्रार्च्य बहिर्निरेत्य च सभाया येसमस्तादिना
ज्ञाप्य ध्वजदेवताश्च परितस्तद्गणांस्तद्बहिः ।
पीठे स्वावरणावृतं परिषदध्यक्षं ततोऽष्टग्रहान्
दिक्षु क्षेत्रपतिं यजेदुदितिदिश्येवं बहिः स्याद् बलिः ॥
नन्दी महाकालसभूतनाथमहीधराख्यौ सहपर्वतेशौ ।
ततो गुहेशाभिधकालपाशकपालिनश्चाष्ट शिवे ध्वजेशाः ॥
सदेवसेनापतिरीक्षणेक्षणः
सदण्डहस्तोऽप्यसिधारिसंज्ञकः ।

वाहननामाह — स्थाणाविति । अथ स्थाणौ वृषः ऋषभः । मुररिपौ गरुडः । शार्ङ्गीश्वरे द्वयात्मा ऋषभगरुडात्मा । गणराजि महादिचाषः महाचाषः । आर्ये हयः अश्वः । शिखिभवे स्कन्दे शिखिकुक्कुटौ । तत्र शिखी वाहनं, कुक्कुटो ध्वजलक्षणम् । निसुम्भजिति सिंहः । एते वाहनकेतनाङ्काः वाहनानि ध्वजलक्षणानि च ॥ ३० ॥

बहिर्बलिविधिमाह — द्वाःस्थानिति । सभाद्वाःस्थान् प्रार्च्य, सभाया बहिर्निरेत्य निर्गत्य, येसमस्तादिना 'ये समस्तजगदि'त्यादिना मन्त्रेण सर्वान् विज्ञाप्य, परितो ध्वजदेवताश्च यजेत् । तद्बहिरावरणे तत्तद्गणांश्च पञ्चाशद्भूतगणादींश्च, पुनः पीठे महापीठे स्वावरणावृतं स्वस्वपरिवारोपेतं परिषदध्यक्षं हरिसेनादिभूताधिपं च, ततो दिक्ष्वष्ट ग्रहान्, उदितिदिशि ईशानपश्चिमे क्षेत्रपतिं च यजेत् । एवं बहिः बहिर्गतो बलिः स्यात् ॥ ३१ ॥

शिवादिध्वजेशान् क्रमेण पठति — नन्दीति । इति शिवे इत्यष्ट ध्वजेशाः स्युः ॥ ३२ ॥

गुहे नव ध्वजेशान् पठति — सदेवसेनापतिरिति ॥ ३३ ॥

---

१. 'स्थौ' इति मूलकोशपाठः. २. 'क्षितः ।' ग. पाठः.

सकालपालो ध्वजशेखराभिधो
गदी पुनः शूलविलासिनामकः ॥ ३३ ॥
विप्रप्रियश्चेति नव ध्वजेशा
गुहेऽन्तिमः शर्वदिशीह कार्यः ।
स्वमण्डपप्रोक्तचराः परेषु
गणेश्वरे द्वारघटे प्रदिष्टाः ॥ ३४ ॥
विंशद्भूतगणाः स्मृताः स्मररिपौ दिग्दिक्षु पञ्चाशतो-
द्विन्नाश्चाष्टसु दिक्षु शार्ङ्गभृति सप्तत्या तथेशाच्युते ।
षट्कोट्योद्विदुरा गुहे महिषहन्न्यामष्टकोट्या तथा
तत्तत्पारिषदाः प्रभेशगणपत्योश्च द्वितीयावृतौ ॥ ३५ ॥
बलिपीठस्य समन्ताद्बलिजिति बलजिन्मुखाष्टदिक्क्रमतः ।
कुमुदाद्यष्टकमिष्ट्वा मध्येपीठं यजेत हरिसेनम् ॥ ३६ ॥

गुहे अन्तिमो विप्रप्रियः शर्वदिशि कार्यः । परेषु हरौ शिवनारायण-दुर्गाशास्तृषु च स्वमण्डपप्रोक्तचराः स्वस्वमण्डपसंस्कारे ध्वजेषूक्ताः । तत्र हरौ कुमुदाद्याः, शिवनारायणे नन्दिकुमुदात्माद्याः, दुर्गायां कात्यद्याः, शास्तरि गोप्त्राद्याः, गणेश्वरे द्वारघटपूजायामुक्ता वज्रदन्ताद्याः प्रदिष्टाः ॥ ३४॥

द्वितीयावरणबलिदेवता आह — विंशदिति । द्वितीयावृतौ स्मररिपौ दिग्दिक्षु दशदिक्षु विंशद्भूतगणाः स्मृताः । शार्ङ्गभृति चाष्टसु दिक्षु पञ्चाशतोद्विन्नाः पञ्चाशद्भूतगणाः । ईशाच्युते तथा सप्तत्या उद्विन्नाः सप्ततिभूतगणाः । गुहे षट्कोट्योद्विदुराः षट्कोटिभूतगणाः । महिषहन्न्याम् अष्टकोट्या उद्विदुराः[1] अष्टकोटिभूतगणाः । प्रभेशगणपत्योः तत्तत्पारिषदाः विघ्नपार्षदाः[2] शास्तृपार्षदाश्च[3] स्मृताः ॥ ३५ ॥

महापीठावरणान्याह — बलिपीठस्येति । बलिजिति विष्णौ बलिपीठस्य समन्तात् बलजिन्मुखाष्टदिक्क्रमतः इन्द्राद्यष्टदिक्षु कुमुदाद्यष्टकमिष्ट्वा मध्येपीठं पीठोपरि मध्यभागे हरिसेनं यजेत ॥ ३६ ॥

१. 'ड' इति मूलकोशपाठः. २., ३. 'रिषदा' ख. घ. ङ. पाठः

पुरभिदि भूतिदसंज्ञं सदुर्निरीक्षं सभीमरूपमथ ।
यजतु सुलोचनसुमुखौ समहाबाहू दिशास्वधश्चोर्ध्वम् ॥

त्रिशिरस्त्रिभुजौ पिङ्गलहरिसेनौ चाह्वयैर्द्विठान्तैः स्वैः ।
चतुरो भूतिदपूर्वांश्चतुरः कुमुदादिकांश्च शार्ङ्गीशे ॥ ३८ ॥

द्वितयान् द्विशोऽखिलान् वा परितोऽधः पिङ्गलं यजेदुपरि ।
परमेष्ठीशपदाद्यं सेनमथायान्तुमन्त्रतश्चान्ते ॥ ३९ ॥

आयान्तु पार्षदाः सर्वे शाङ्करा वैष्णवास्तथा ।
बलिपीठेऽत्र सन्तुष्टा निवसन्तु यथासुखम् ॥ ४० ॥

नमः सर्वपार्षदेभ्यो नम इति ।

ब्रह्मसुपूर्वे घोष्यौ सयज्ञवेष्ट्यौ सुरङ्गिणी सुमुखी ।
सुभुजा प्रमोदिनी पुनरात्मन्यपि कीर्तितान्तिभा ब्राह्मी ॥

एताः क्रमेण पूज्या दुर्गायां दिक्षु पीठमध्ये च ।
ब्राह्मयन्तेऽब्जदलस्थाः कालयाद्याश्चात्र पूजनीया वा ॥४२॥

पुरभिदि भूतिदं दुर्निरीक्षं भीमरूपं सुलोचनं सुमुखं महाबाहुं त्रिशिरसं त्रिभुजं पिङ्गलं हरिसेनं च महापीठस्य पूर्वादिदिशास्वधश्चोर्ध्वे च द्विठान्तैः स्वाहान्तैः स्वैराह्वयैर्नामभिः 'भूतिदाय स्वाहा' इत्याद्यैर्मन्त्रैर्यजतु ! शार्ङ्गीशे भूतिदपूर्वान् शिवोक्तांश्चतुरः कुमुदादीन् विष्णूक्तांश्चतुरो यजतु ॥ ३७, ३८ ॥

द्वितयान् शैवोक्तान् वैष्णवोक्तांश्चाखिलान् परितो द्विशः द्विद्विशो वा अधः पिङ्गलम् उपरि परमेष्ठीशपदाद्यं सेनं परमेष्ठीशसेनं च यजेत् । अन्ते 'आयान्तु पार्षदा' इति मन्त्रेण च यजेत् ॥ ३९ ॥

दुर्गायाम् एताः क्रमेण दिक्षु पीठमध्ये च पूज्याः । कास्ताः, ब्रह्मसुपूर्वे घोष्यौ ब्रह्मघोषी सुघोषी च, सयज्ञवेष्ट्यौ यज्ञवेष्टी च, पुनः सुरङ्गिण्याद्याः । अन्तिमा अवसानभूता ब्राह्मी कीर्तिता । अत्र ब्राह्मयन्ते ब्राह्मया अक्साने समीपे वा अब्जदलस्थाः पीठपद्मस्य पूर्वादिदलेषु कालीकरालयाद्याः पूजनीया वा ॥ ४१, ४२ ॥

शूरोग्रशिखिजगत्पूर्वाश्च महाचण्डपूर्वकौ सेनाः ।
क्रुद्धक्रूरजयत्स्कन्दाद्याश्च दशेशवत् स्कन्दे ॥ ४३ ॥

अथवात्र भूतिदादीन् सपिङ्गलस्कन्दसेनपर्यन्तान् ।
प्रयजेद् येभूतादिग्रहादिकाभ्यामपीह बलिरिष्टः ॥ ४४ ॥

ये भूताः स्कन्दसेनस्य पार्षदा बलिभोजिनः ।
तृप्यन्तु ते मुदं यान्तु सङ्घयोऽसङ्घयो नमो नमः ॥ ४५ ॥

'ग्रहेभ्यः स्कन्दपार्षदेभ्यश्च सर्वेभ्यस्तेभ्यस्ताभ्यो नमो नमः' इति ।

अथ गजवक्त्रगणेशौ विनायकश्चण्डविक्रमः क्रमशः ।
विघ्नकरसर्पमेखलसशूर्पकर्णाख्यनागदन्त्यभिधाः ॥ ४६ ॥

नवमोऽत्र रुद्रवक्त्रजनामा दशमस्तु विघ्नसेनाख्यः ।
विघ्नेश्वरबलिपीठे दिक्ष्वध ऊर्ध्वं च पूजनीयाः स्युः ॥ ४७ ॥

आर्ये द्वारघटोक्ता दिक्ष्वर्च्या वीरबाहुपूर्वाः स्युः ।
भूतेशशास्तृसेनाव धऊर्ध्वमपीति पीठबलिक्लृप्तिः ॥ ४८ ॥

स्कन्दे शूरोग्रशिखिजगत्पूर्वाः शूरादिपदाद्याः, महाचण्डपूर्वकौ महाचण्ड इत्याद्यौ च, क्रुद्धक्रूरजयत्स्कन्दाद्याः क्रुद्धादिशब्दाद्याः दश सेनाः ईशवत् पूर्वादिदशदिक्षु, अथवा अत्र स्कन्दे भूतिदादीन् सपिङ्गलस्कन्दसेनपर्यन्तान् शैववत् स्कन्दसेनान्तानेव पूजयेत् । यथा पूर्वं बलिपीठप्रतिष्ठायां कृतं तथैवाधुनापि पूजयेदित्यर्थः । 'ये भूताः स्कन्दसेनस्य', 'ग्रहेभ्यः स्कन्दपारिषदेभ्यश्च' इति द्वाभ्यामपीह मध्ये बलिरिष्टः ॥ ४३—४५ ॥

अथ विघ्नेश्वरबलिपीठे गजवक्त्राद्याः क्रमशो दिक्ष्वध ऊर्ध्वं च पूजनीयाः स्युः । अत्र नवमो रुद्रवक्त्रजनामा । दशमस्तु विघ्नसेनाख्यश्च ॥ ४६, ४७ ॥

आर्ये दिक्षु वीरबाहुपूर्वाः द्वारघटोक्ताः, अध ऊर्ध्वं च भूतेशशास्तृसेनौ च पूजनीयाः स्युः । इति पीठबलिक्लृप्तिः महाबलिपीठस्थिता बलिक्लृप्तिः ॥ ४८ ॥

नमस्ते द्वारपालाय चण्डायामिततेजसे ।
नरसिंहतनूजाय चक्रेणाङ्कितमौलये ॥ ५४ ॥

नमस्ते द्वारपालाय प्रचण्डायामितौजसे ।
नरसिंहतनूजाय शङ्खेनाङ्कितमौलये ॥ ५५ ॥

वाहनाय महाविष्णोस्तार्क्ष्यायामिततेजसे ।
गरुडाय नमस्तेऽस्तु दुष्टसर्पेन्द्रमृत्यवे ॥ ५६ ॥

शय्या यो जगतां धातुर्विष्णोर्विविधमायिनः ।
अनन्ताय नमस्तुभ्यमहीन्द्रनमिताङ्घ्रये ॥ ५७ ॥

नमस्ते सर्वभूतेश! सर्वसम्पत्प्रदायिने ।
सर्वविघ्नविनाशाय विघ्नेशाय शिवात्मने ॥ ५८ ॥

नमस्तेऽस्तु महायोगिन्! व्याख्यामुद्रालसत्कर! ।
दक्षिणामूर्तिरूपाय रुद्राय परमात्मने ॥ ५९ ॥

नमस्ते द्वारपालाय चक्रव्यग्रमहाभुज! ।
दृष्ट्या निहतदैत्याय वैष्णवाय नमो नमः ॥ ६० ॥

नमस्ते द्वारपालाय शङ्खव्यग्रमहाभुज! ।
दृष्ट्या निहतदैत्याय वैष्णवाय नमो नमः ॥ ६१ ॥

दैत्यदर्पविनाशाय सहस्राक्षाय धीमते ।
वज्रशक्त्यग्रहस्ताय नमस्तेऽस्तु शतक्रतो! ॥ ६२ ॥

मुखं यः सर्वदेवानां येन हव्यं च नीयते ।
येन प्रवर्तते सर्वं नमस्तस्मै हविर्भुजे ॥ ६३ ॥

'उपस्थाय स्तोत्रैरि'त्याद्युक्तमुत्सवबालिं विवृण्वन् पूर्वमुपस्थानमन्त्रान् क्रमेण पठति—नमस्ते द्वारपालायेत्यादि । अत्र केषाञ्चित् प्रधानानामेवोपस्थानमन्त्रा भवन्ति । इतरेषां तु स्वस्वनाममन्त्रा एवोपस्थाने प्रयोज्या इत्यवगन्तव्यम् ॥ ५४—७५ ॥

येन संह्रियते सर्वं येन धर्मं च रक्ष्यते ।
यस्माद् बिभेति लोकोऽयं प्रेतनाथ! नमोऽस्तु ते ॥

राक्षसा यातुधानाश्च पिशाचाश्चाश्रयन्ति यम् ।
तस्मै निर्ऋतिरूपाय रक्षसां पतये नमः ॥ ६५ ॥

येन संरक्ष्यते सर्वं यस्मिन् सर्वं प्रतिष्ठितम् ।
अमोघपाशहस्ताय तस्मैऽपांपतये नमः ॥ ६६ ॥

पूर्यन्ते च ह्रियन्ते च येन प्राणादयः क्रमात् ।
भूतानां पतये नित्यं नमस्तस्मै मरुत्पते! ॥ ६७ ॥

यं प्राह्यामरतां यान्ति देवा यज्ञशरीरिणः ।
सोमाय गदिने तस्मै ज्योतिषां पतये नमः ॥ ६८ ॥

यत्प्रसादाज्जगत् सर्वं धनेन परिपूर्यते ।
यक्षगुह्यकनाथाय धननाथ! नमोऽस्तु ते ॥ ६९ ॥

येन कालाग्निना लोको युगान्तेष्ववदह्यते ।
तस्मै ते ब्रह्मणः पुत्र! विरूपाक्ष! नमोऽस्तु ते ॥ ७० ॥

येन सृष्टं जगत् सर्वं सर्गादौ विष्णुशासनात् ।
पितामह! नमस्तुभ्यं सर्वलोकेश! पद्मज! ॥ ७१ ॥

पन्नगाधिपतिर्देव! अनन्तो नाम नामतः ।
पातालवासिने नित्यं नागराज! नमोऽस्तु ते ॥ ७२ ॥

वीरभद्र! नमस्तेऽस्तु नमो विघ्नेश्वराय च ।
ब्राह्म्यादिभ्यश्च मातृभ्यः सर्वाभ्यो वै नमो नमः ॥

श्रीधराय नमस्तेऽस्तु नमस्तेऽश्वमुखाय च ।
वागीश्वर्यादिमातृभ्यः सर्वाभ्यो वै नमो नमः ॥७४॥

विष्वक्सेन! नमस्तेऽस्तु देवनिर्माल्यधारिणे ।
शङ्खचक्रगदापाणे! महापारिषदेश्वर! ॥ ७५ ॥

---

१. 'श्च सर्वाभ्यो मातृभ्यो वै' ख. ग. पाठः.

देवग्रहादिबलिकर्मणि दिग्बलिं स्व-
मूलाणुना क्षिपतु पारिषदात्मनार्थं ।
क्षिप्रप्रदक्षिणबलिं प्रविधाय शेषं
क्षेत्राधिपाय च समर्पयतूपहारैः ॥ ४९ ॥
उपस्थाय स्तोत्रैः प्रविकिरतु मन्त्रैर्निजनिजै-
र्यथान्यायं द्वाःस्थप्रभृतिदिगधीशान्तिमबलिम् ।
दशस्वाशास्वाशाधिपपरिषदन्तेऽत्र मनुनां-
नमोभूतेत्याद्येन च सकलदेवोत्सवबलौ ॥ ५० ॥
पूर्वस्यांदिशिपूर्वकेण च नमोभूतादिमन्त्रान्ततो
दिग्दिक्ष्वीशगणेशवह्निभुवि शेभूतादिमन्त्रेण च ।

देवग्रहादिबलिकर्मणि देवग्रहादि वा पितृग्रहादि वा ग्रहाणां बलिकाले **स्वमूलाणुना** दिग्बलिं च **क्षिपतु** । अथ **पारिषदात्मना** 'विष्णुपारिषदेभ्यः सर्वेभ्यो भूतेभ्यो नमः' इत्यादिपरिषण्मन्त्रेण **क्षिप्रप्रदक्षिणबलिम्** अविच्छिन्नबलिं मूलपरिषण्मन्त्रावेकीकृत्य उभयत्र वा प्रविधाय **शेषं** हविरुपहारैः सह **क्षेत्राधिपाय** समर्पयतु । समर्पयत्वित्यनेनान्ते निवेदनमपि सूचितम् ॥ ४९ ॥

अथोत्सवबलिविधानमाह — **उपस्थायेति** । सकलदेवोत्सवबलौ **सकलानां** देवानामुत्सवबलौ **निजनिजैः** स्तोत्रैस्तं तमुपस्थाय उपस्थानं कृत्वा **निजनिजैर्मन्त्रैः** 'ओं चण्डाय नमः' 'ओं प्रचण्डाय नमः' इत्यादिभिर्भूतबलावुक्तैर्मन्त्रैः **द्वाःस्थप्रभृतिदिगधीशान्तिमबलिं** द्वाःस्थादिदिक्पालपर्यन्तं बलिं **यथान्यायं** भूतबलिन्यायेन **प्रविकिरतु** । अत्र दिक्पालबलौ **दशस्वाशासु** अग्रत आरभ्याष्टदिक्ष्वीशकोणे निर्ऋतिकोणे च **आशाधिपपरिषदन्ते** दिक्पालानां तत्तत्पारिषदानां चान्ते 'ओं नमो भूतेभ्य' इत्याद्येन मनुना च **बलिं किरतु** ॥ ५० ॥

ईशगणेशवह्निभुवि शिवगणपतिस्कन्देषु नमोभूतादिमन्त्रान्ततः **'ओं नमो भूतेभ्य'** इत्यादिमन्त्रेण बलिदानानन्तरं दिग्दिक्षु दशदिक्ष्वपि **पूर्वस्यां-**

---

१. 'वा' क. पाठः. २. 'स्यामिति पू' इति मूलकोशपाठः. ३. 'वाग्रादिग्र' क, ख. पाठः.

ओजाशासु बलिं करोतु हरिवर्जं सर्वतो वा तथा
शर्वे प्रागमृतांशुपूजनविधेरर्च्यश्च वित्ताधिपः ॥ ५१ ॥
यथान्यायं मातृप्रभृतिगुहनिष्ठावृतिमथो
यजेद् गायत्र्यद्यैर्वक्ष्यमाणैरपि सर्वेषु विधिवत् ।
इमां प्रागाद्याशापरिगतकुमारादिसहितां
त्रिधामन्येवं वा सहरिहरसुम्भासुररिपौ ॥ ५२ ॥
प्राचि स्कन्दं प्रभेशं शिखिनि पितृपतौ धर्ममातॄंस्तथार्यं
भृङ्गे भानुं पितृस्थं दुहिणमुदकराजीरणे सूकरार्यं ।
स्कन्दं मुख्येऽन्यमातॄरपि तुहिनरुचावम्बिकां त्र्यम्बकं स्वे
कोणे चार्हेत् परीत्यार्चयतु पुनरुदित्यां च निर्माल्यभाजम् ॥

दिशिपूर्वकेण 'ओं पूर्वस्यां दिशि शिवस्ये'त्यादिना बलिं करोतु । ओजाशासु पूर्वदक्षिणपश्चिमोत्तरोर्ध्वदिक्षु येभूतादिमन्त्रेण 'ये भूताः पुरस्सद' इत्यादिना मन्त्रेण च बलिं करोतु । हरिवर्जं हरिं वर्जयित्वा सर्वतः सर्वदेवेषु तथा वा । शर्वे अमृतांशुपूजनविधेः सोमाराधनात् प्राग् वित्ताधिपो वैश्रवणोऽर्च्यश्च ॥५१॥

अथो सर्वेषु देवेषु मातृप्रभृतिगुहनिष्ठावृतिं मातृशास्तृदुर्गास्कन्दान् यथान्यायं न्यायाविरोधेन गायत्र्याद्यैर्वक्ष्यमाणैर्मनुभिरपि विधिवद् यजेत् । त्रिधामनि विष्णौ इमामावृतिं प्रागाद्याशापरिगतकुमारादिसहितां प्रागाद्याशासु स्थितस्कन्दाद्यावरणसहितां यजेत् । सहरिहरसुम्भासुररिपौ शिवनारायणे दुर्गायामप्येवं वा यजेत् ॥ ५२ ॥

स्कन्दाद्यावृतिमाह — प्राचीति । प्राचि इन्द्रस्य बहिर्भागे स्कन्दमर्हेत् । शिखिनि अग्नेः बहिः प्रभेशं शास्तारं, पितृपतौ यमस्य दक्षिणे धर्ममातॄः धर्मं मातृश्च, तथा भृङ्गे यमनिर्ऋत्योरन्तराले आर्यं, पितृस्थं निर्ऋतिस्थं भानुं सूर्यम्, उदकराजि वरुणे दुहिणं ब्रह्माणम्, ईरणे वायौ सूकरार्यं वराहं दुर्गां च, मुख्ये स्कन्दं, तुहिनरुचौ सोमे अन्यमातॄः उत्तरमातॄः[1] अम्बिकामपि, त्र्यम्बकं शिवं स्वे कोणे च, पुनः परीत्य परिक्रम्य उदित्याम् ईशपश्चिमे निर्माल्यभाजं चार्चयतु ॥ ५३ ॥

---

१. 'म' घ. च. पाठः. २. 'दु' क. पाठः,

इन्द्रः सुरेशश्चैव वज्रहस्तो महाबलः ।
शतयागाधिपो देवस्तस्मै यागात्मने नमः ॥ १०० ॥
सर्वदेवमयो देवो रक्षोवह्निर्महाबलः ।
सप्तजिह्वो महावीर्यो नमो वैश्वानराय च ॥ १०१ ॥
दण्डहस्तो महादेवो धर्माध्यक्षो महाबलः ।
आवाहये धर्मराजं ! तस्मै प्रेतात्मने नमः ॥ १०२ ॥
खड्गहस्तधरो देवो नैर्ऋतो नीलविग्रहः ।
निर्ऋते ! च नमस्तुभ्यं खड्गहस्तात्मने नमः ॥ १०३ ॥
जलराज ! महाराज ! विख्यात इति निम्नगः ।
पश्चिमां दिशमाचष्टे पाशहस्तात्मने नमः ॥ १०४ ॥
सर्वप्रकाशको नित्यः सर्वलोकाधिदेवता ।
ध्वजहस्तो महाप्राणस्तस्मै वायवात्मने नमः ॥ १०५ ॥
नक्षत्राणां च सर्वेषां सोमो राजा प्रकीर्तितः ।
गदापट्टसधारी च सोमराजाय ते नमः ॥ १०६ ॥
सर्वलोकाधिपो देव ईशानो नाम नामतः ।
शूलपाणेर्महादेव ! त्रैलोक्याधिपते ! नमः ॥ १०७ ॥
स्रष्टा चरस्य सर्वस्य लोकानां च पितामहः ।
आदिश्च सर्वभूतानां तस्मै वेदात्मने नमः ॥ १०८ ॥
पन्नगाधिपतिर्देव ! अनन्तो नाम नामतः ।
पातालसेने नित्यं नागराजाय ते नमः ॥ १०९ ॥
वाहनाय गणेशस्य महाचाषाय धीमते ।
मध्ये पारिषदेशानां भ्राजमानाय वै नमः ॥ ११० ॥
एवं गिरीशशार्ङ्गीशदुर्गास्कन्दादिपूदिताः ।
द्वाःस्थवाहनदिक्पादिस्तुतिमन्त्रा विशेषिताः ॥ १११ ॥

एवमुक्तप्रकारेण गिरीशशार्ङ्गीशदुर्गास्कन्दादिषु, आदिशब्देन विघ्नो गृह्यते, द्वाःस्थवाहनदिक्पादिस्तुतिमन्त्राः द्वाःस्थादीनाम् उपस्थानमन्त्रा ये ये विशेषितास्ते ते उदिता उक्ताः ॥ १११ ॥

---

१. 'च' क. पाठः. २. 'द्व' ग. घ. पाठः. ३. 'जं', ४. 'लों' ख. ग. घ. पाठः.

ताराद्यं निजनाम ङेन्तमथ विष्ण्वादीष्टदेवाक्षर-
प्रोद्यत्पारिषदाक्षरं सह चतुर्थ्या हार्दहृद्यं वदेत् ।
एवं स्यात् परिवारदैवतमनूनां लक्षणं तत्पद-
प्रोद्यत्पारिषदेभ्य एव परिषन्मन्त्रो नमोन्तः स्मृतः ॥
यद्यन्तर्द्वारमधिकौ श्रीशेऽत्रानन्दनन्दनौ ।
द्वाःस्थौ जया च विजया तथैव महिषद्विषि ॥ ११३ ॥
स्फुरस्फोटयद्वुंव्यक्षस्वाहा नन्दिमनुः शिवे ।
प्रोंकपालिन् ह इत्येष महाकालमनुर्हृदा ॥ ११४ ॥

उपस्थानमन्त्रान् पठित्वा स्वस्वमन्त्रानाह — **तारादयमिति** । तारादयम् आदौ तारविशिष्टं ङेन्तं चतुर्थ्येकवचनान्तं च निजनाम स्वस्वनाम 'ओं चण्डाये'त्यादि । अथानन्तरं विष्ण्वादीष्टदेवाक्षरप्रोद्यत्पारिषदाक्षरं विष्ण्वादीनां तत्तदिष्टानां देवानां वाचके प्रोद्यत् प्रकर्षेणोद्गच्छत् पारिषद इत्यक्षरं, तत् पुनश्चतुर्थ्या विभक्त्या सह हार्दहृद्यं नमसा युक्तं वदेत् । 'ओं चण्डाय विष्णुपारिष(दे?दाय) नमः' । एवं परिवारदैवतमनूनां परिवारदेवतामन्त्राणां लक्षणं स्यात् । तत्पदप्रोद्यत्पारिषदेभ्यः, तत्पदेन चण्डादिपरिवारदैवतनामोच्यते, 'चण्डपारिषदेभ्य' इत्यादि । अथवा तदित्ये(व?तत्)पदानन्तरं पारिषदेभ्य इति तत्पारिषदेभ्यः । एष परिषन्मन्त्रो नमोन्तश्च स्मृतः 'तत्पारिषदेभ्यो नम' इति । एतत् परिवारमन्त्रलक्षणं भूतबल्यादावपि सर्वत्र समानम् ॥ ११२ ॥

श्रीशेऽन्तर्द्वारं भवति यदि अत्रान्तर्द्वारे आनन्दनन्दनौ द्वाःस्थौ अधिकौ पूर्वोक्तादधिकौ । महिषद्विषि तथा यदि, अन्तश्चण्डिकाम्बिके बहिश्च जया च विजया च भवतः ॥ ११३ ॥

शिवे 'स्फुर स्फोटय हुं व्यक्ष स्वाहा' इति नन्दिमनुः । हृदा मनसा सहितः 'प्रोंकपालिन् ह' इति महाकालमनुः । अनयोर्मन्त्रानन्तरं नाममन्त्राभ्यामपि बलिदानं कार्यम् ॥ ११४ ॥

१. 'बहिश्च म', २. 'षि ॥ कुमारे सुकुमारश्च भद्रसेनश्च कीर्तितौ । स्फु' ग. पाठः,
३. 'द' इति व्याख्याकोशपाठः,

एते हरावुपस्थानमन्त्रास्तत्र शिवादिषु।
साधारणास्त एव स्युर्विशेषोक्तान् पृथग् ब्रुवे ॥ ७६ ॥

नमस्ते द्वारि युक्ताय शूलहस्ताय धीमते।
दृष्ट्या निहतदैत्याय शाङ्कराय नमो नमः ॥ ७७ ॥

नमस्ते द्वारि युक्ताय परशुव्यग्रपाणये।
दृष्ट्या निहतदैत्याय शाङ्कराय नमो नमः ॥ ७८ ॥

येन प्रसूयते सर्वं यस्मिन् सर्वं प्रलीयते।
अमोघपाशहस्ताय तस्मैऽपांपतये नमः ॥ ७९ ॥

वाहनाय महाशम्भोः शैलार्णवघनस्वन!।
ऋषभाय नमस्तुभ्यं सर्वदुष्टप्रशान्तये ॥ ८० ॥

नमस्ते द्वारि युक्ताय शूलहस्ताय धीमते।
दृष्ट्या निहतदैत्याय शाङ्कराय नमो नमः ॥ ८१ ॥

नमस्ते द्वारपालाय प्रचण्डायामितौजसे।
नरसिंहतनूजाय चक्रेणाङ्कितमौलये ॥ ८२ ॥

नमस्ते द्वारि युक्तायै चण्ड्यै खेटाभिधारिणि!।
नरसिंहतनूजायै चक्रेणाङ्कितमौलये ॥ ८३ ॥

नमस्ते द्वारि युक्तायै अम्बिकायै महौजसे।
नरसिंहतनूजायै शङ्खेनाङ्कितमौलये ॥ ८४ ॥

नमस्ते द्वारि युक्तायै जयायै ज्वालयावृते!।
दृष्ट्या निहतदैत्यायै कात्यायन्यै नमो नमः ॥ ८५ ॥

नमस्ते द्वारि युक्तायै विजयायै महौजसे।
दृष्ट्या निहतदैत्यायै कात्यायन्यै नमो नमः ॥ ८६ ॥

हरौ एते द्वाःस्थादिनिर्माल्यधार्यन्तेषूपस्थानमन्त्राः स्युः। शिवादिषु तत्र उक्तेषु मन्त्रेषु साधारणाः केचित् त एव। विशेषोक्तान् विशेषत उक्तान् पृथग् ब्रुवे ॥ ७६–११० ॥

१., २. 'यि' ख. ग. घ. पाठः.

वाहनाय महादेव्याः सिंहायामिततेजसे ।
अतुल्यबलवंन्नत्र नमस्तेऽस्तु हरीश्वर ! ॥ ८७ ॥
दैत्यदर्पविनाशाय सहस्राक्षाय धीमते ! ।
कुलिशव्यग्रहस्ताय नमस्तस्तु शतक्रतो ! ॥ ८८ ॥
मुखं यः सर्वदेवानां येन हव्यं च नीयते ।
येन प्रवर्तते सर्वं नमस्तेऽस्मै हविर्भुजे ॥ ८९ ॥
दण्डहस्ताय भीमाय सर्वप्राणहराय च ।
प्रेतनाथ ! नमस्तेऽस्तु पितृलोकनिवासिने ॥ ९० ॥
खड्गहस्ताय घोराय नैर्ऋताय महामते ! ।
रक्षोधिपाय तीक्ष्णाय नमस्तेऽस्तु निशाचर ! ॥ ९१ ॥
जलाधिपाय प्राणाय सर्वभूतहिताय च ।
पाशहस्ताय भीमाय नमस्तेऽस्तु अपांपते ! ॥ ९२ ॥
सदागताय प्राणाय सर्वभूतहिताय च ।
ध्वजहस्ताय शब्दाय नमस्तेऽस्तु समीरण ! ॥ ९३ ॥
नक्षत्राणां च सर्वेषां सोमो राजा प्रकीर्तितः ।
गदापट्टसधारी च सोमराजाय ते नमः ॥ ९४ ॥
धनदाय कुबेराय सर्वौषधिधराय च ।
पौलस्त्याय च नीलाय नमस्तेऽस्तु धनाधिप ! ॥ ९५ ॥
ईशानः सर्वविद्यानामक्षमालाधरो हरः ।
हरिणहस्तो महात्मा च नमस्तेऽस्तु हरिप्रिय ! ॥ ९६ ॥
स्रष्टा चरस्य सर्वस्य लोकानां च पितामहः ।
आदिश्च सर्वभूतानां तस्मै वेदात्मने नमः ॥ ९७ ॥
पन्नगाधिपतिर्देव ! अनन्तो नाम नामतः ।
पातालवासिने नित्यं नागराजाय ते नमः ॥ ९८ ॥
तर्जयन्ती जगत् सर्वं सदा निर्माल्यधारिणि ! ।
वरदाभयहस्तायै चण्डिकायै नमोऽस्तु ते ॥ ९९ ॥

---

१. 'वानत्र' क. घ. पाठः. २. 'तु' ख. पाठः. ३. 'मो' क. घ. पाठः. ४. 'रसाय' ग. पाठः.

ग[illegible]डम[illegible]स्तारादिस्वाहान्तः पक्षिराजायं ।
गरुडाय वैनतेयायेत्यपि नत्याथ तस्य गायत्री ॥ ११५ ॥

'वैनतेयाय विद्महे । पक्षिराजाय धीमहे* । तन्नो गरुडः प्रचो[illegible]दयात् ।'

सिंहस्य वज्रनखदंष्ट्रायुधायपदान्ततः ।
महासिंहाय हूं नत्या मनुरेवं समीरितः ॥ ११६ ॥

विष्ण्वादिदेवनाम्नः पुरतस्तु सुरादिजातिनामाद्यम् ।
अधिपतयेपदमत्र प्रयोज्य सिद्ध्यै देदिक्पालेषु ॥ ११७ ॥

सुरतेजःप्रेताख्या रक्षांसि तथा जलानि च प्राणाः ।
नक्षत्राण्यपि विद्या लोका नागाश्च जातयोऽत्र दश ॥ ११८ ॥

'ओं नमो भूतेभ्यो भूतकृद्भ्यः सर्वेभ्योऽरिष्टकृद्भ्यः सद्भ्योऽसद्भ्यः सदसद्भ्यः सर्वगणेभ्यो नमो नमः स्वाहा' ॥

तारादिस्वाहान्तः पक्षिराजायेति गरुडमनुः । नत्या नमसा सह गरुडाय वैनतेयायेति द्वावपि । अथ तस्य गायत्री, लिख्यत इति शेषः ॥ ११५ ॥

वज्रनखदंष्ट्रायुधायपदान्ततः 'ओं वज्रनखदंष्ट्रायुधाय' इति पदान्ते 'महासिंहाय हूं' इति नत्या च वदेत् । एवं सिंहस्य मनुः समीरितः ॥ ११६ ॥

दिक्पालमन्त्रलक्षणमाह — विष्ण्वादीति । अत्र इन्द्रादिदिक्पमन्त्रेषु विष्ण्वादिदेवनाम्नः पुरतः पूर्वं तु सुरादिजातिनामाद्यं सुरतेज इत्यादीनां जातीनां नामाद्यं यथा भवति तथाधिपतयेपदं प्रयोज्यं स्यात् । 'ओं इन्द्राय सुराधिपतये विष्णुपारिषदे नमः' इत्यादयो मन्त्रा इत्यर्थः ॥ ११७ ॥

जातीराह — सुरेति । सुरतेजःप्रेताख्याः सुरतेजःप्रेतेति तिस्र आख्याः रक्षांसि जलानि प्राणाः नक्षत्राणि विद्याः लोकाः नागाश्चेति अत्र दश जातयः स्युः ॥ ११८ ॥

पुनः 'ओं नमो भूतेभ्य' इत्याद्युक्तान् मन्त्रान् पठति — पूर्वस्यां दिशीत्यादि ॥

---

१. 'नाम्नामा' क, 'नाम्नाद्यं' च. पाठः.

---

* 'धीमहि' इत्येव प्रसिद्धो गायत्र्यां पाठः । 'धीमहे' इति तु अत्रोपरिष्टाच्च पठ्यते ।

'पूर्वस्यां दिशि हरेर्भगवतो ये गणा वज्रपाणयः श्वेताः श्वेताक्षाः श्वेतलोहिता दिव्यन्तरिक्षभौमाः पातालनिवासिनश्च तेभ्यो वै नमो नमः स्वाहा' ॥

प्राचीत्यणुरिहान्यत्राशास्त्रवर्णपदे क्रमात् ।
आग्नेय्यां शक्तिरक्ते च याम्यायां दण्डसंयुतम् ॥ ११९ ॥
कृष्णं तथैव नैर्ऋत्यां खड्गं श्यामसमन्वितम् ।
वारुण्यां पाशशबले वायव्यां पुनरङ्कुशम् ॥ १२० ॥
पीतं तथैव सौम्यायां गदां सितसमान्वितां ।
ऐशान्यां शूलकपिले तूर्ध्वायां पद्मसूक्ष्मके ॥ १२१ ॥
अधस्ताद् विषधूम्रे च योजयेन्मन्त्रवित्तमः ।
हरिस्थानेऽन्यदेवेषु शिवादि स्वस्वनाम च ॥ १२२ ॥

'ये भूताः पुरस्सदो निशाचरा रौद्राः सन्तोऽसन्तः सदसन्तो विरूपा विश्वरूपा महारूपा घोररूपा [illegible]

मन्त्रे दिगादिविशेषयोजनप्रकारमाह — प्राचीति । प्राचि पूर्वदिग्भागे इत्यणुः । अन्यत्र अग्न्यादौ इह आशास्त्रवर्णपदे दिशामायुधानां वर्णानां पदेषु स्थानेषु क्रमान्मन्त्रवित्तम एतानि पदानि योजयेत् । तानि क्रमेणाह — आग्नेय्यामित्यादि — आग्नेय्यां शक्तिरक्ते च 'आग्नेय्यां दिशि हरेर्भगवतो ये गणाः शक्तिपाणयः रक्ता रक्ताक्षा' इत्यादि । याम्यायां दण्डसंयुतं कृष्णं 'याम्यां दिशि हरेर्भगवतो ये गणा दण्डपाणयः कृष्णा' इत्यादि । नैर्ऋत्यां खड्गं श्यामसमन्वितं 'नैर्ऋत्यां खड्गपाणयः श्यामाः' । वारुण्यां पाशशबले 'वारुण्यां पाशपाणयः शबलाः' । वायव्यां पुनरङ्कुशं पीतं 'वायव्याम् अङ्कुशपाणयः पीताः' । तथैव सौम्यायां गदां सितसमन्वितां 'सौम्यायां गदापाणयः सिताः' । ऐशान्यां शूलकपिले 'ऐशान्यां शूलपाणयः कपिलाः' । ऊर्ध्वायां पद्मसूक्ष्मके 'ऊर्ध्वायां पद्मपाणयः सूक्ष्माः' । अधस्ताद् विषधूम्रे च 'अधस्ताद् दिशि हरेर्भगवतो ये गणा विषपाणयः धूम्रा धूम्राक्षा' इत्यादीत्यर्थः । अन्यदेवेषु हरिस्थाने हरेरित्यस्य स्थाने स्वस्वनाम योजयेत् । 'पूर्वस्यां दिशि शिवस्य भगवतो ये गणा वज्रपाणयः श्वेताः श्वेताक्षा' इत्यादीत्यर्थः ॥ ११९–१२२ ॥

ये गानना[1]ः ष्टिकृतोऽपुष्टिकृतः कामदाश्च बलिमिच्छन्ति, तेषां सर्वेषां बलिं हरामि महद्भ्यः क्षुद्रकेभ्यश्च तेभ्यो नमो नमः स्वाहा' ॥

इति ।

प्राचीत्यणुर्दक्षिणपश्चिमोत्तरो-
पर्यक्षराण्योजदिशास्वतोऽन्यतः ।
पुरःपदेऽग्न्यादिविदिक्पनाम च
क्रमान्नवाशासु यदीह योजयेत् ॥ १२३ ॥

ऋषभायेति नमोन्तो म[2]बलायाथ सौरभेयाय ।
हरवाहनाय चैते वृषमनवोऽथेति तस्य गायत्री ॥ १२४ ॥

'सौरभेयाय विद्महे । महाबलाय धीमहे । तन्नो वृषः प्रचोदया[3]' ।

तृतीयं मालामन्त्रमाह — ये भूता इति ॥

इति प्राचि भागे अणुः । अतोऽन्यतः ओजदिशासु अयुग्मदिक्षु पुरःपदे पुर इत्यस्य स्थाने दक्षिणपश्चिमोत्तरोपर्यक्षराणि दक्षिण-पश्चिम-उत्तर-उपरीति पदानि क्रमाद् योजयेत् । 'ये (देवा[4]? भूता) दक्षिणसद' इत्यादि । नवाशासु यदि विष्ण्वादौ कुहचिद् बहिर्बलिकाले बलिपीठबाह्यतो नवाशासु अतोऽन्यतः कोणेषु पुरःपदे क्रमाद् अग्न्यादिविदिक्पनाम च अग्न्यादिकोणपालानां नाम च योजयेत् । 'ये (देवा? भूता) अग्निसद' इत्यादि ॥ १२३ ॥

ऋषभमन्त्रानाह — ऋषभायेति । नमोन्त ऋषभायेति, नमोन्त इति प्रत्येकं सम्बध्यते । महाबलायेति, तथा सौरभेयायेति, तथा हरवाहनायेति, एते वृषभनवः । अथेति तस्य गायत्री च भवति ॥ १२४ ॥

तां लिखति — सौरभेयायेत्यादि ॥

---

१. 'तेभ्यस्ताभ्यो' ख. ग. पाठः. २. 'जाषा' ख. पाठः. ३. 'त्युपस्था' क. 'त्युरुस्था' ङ. पाठः. ४. 'वे' क. पाठः.

ओं नमः षण्मुखायेति स्कन्दमैन्द्र्यां स्थितं यजेत् ।
शास्तारमग्नौ भांबीजं भूताधिपतये नमः ॥ १२५ ॥
वीरभद्रं गणपतिं प्राक्प्रत्यक्पार्श्वयोस्ततः ।
ब्रह्माणीमपि तन्मध्ये यजेन्माहेश्वरीमपि ॥ १२६ ॥
कौमारीं वैष्णवीं तद्वद् वाराहीं च सबीजकैः ।
नाममन्त्रैस्तथेन्द्राणीं चामुण्डीं सजिनाक्षरैः ॥ १२७ ॥

'वीरभद्राय विद्महे महानंनाय धीमहे तन्नः शान्तः प्रचोदयात्' । 'एकदंष्ट्राय विद्महे गजाननाय धीमहे तन्नो दन्तिः प्रचोदयात् ।' 'ब्रह्मभूतायै विद्महे कुशहस्तायै धीमहे तन्नो ब्राह्मी प्रचोदयात्' । 'महेश्वरभूतायै विद्महे शूलहस्तायै धीमहे तन्नो माहेश्वरी प्रचोदयात्' । 'स्कन्दभूतायै विद्महे शक्तिहस्तायै धीमहे तन्नः कौमारी प्रचोदयात्' । 'विष्णुभूतायै विद्महे चक्रहस्तायै धीमहे तन्नो वैष्णवी प्रचोदयात्' । 'प्रजापतिभूतायै विद्महे गदाहस्तायै धीमहे तन्नो वाराही प्रचोदयात्' । 'इन्द्रभूतायै विद्महे वज्रहस्तायै धीमहे तन्न इन्द्राणी प्रचोदयात्' । 'रुद्रभूतायै विद्महे खड्गहस्तायै धीमहे तन्नश्चामुण्डी प्रचोदयात्' ।

स्कन्दाद्यावरणं क्रमेण विवृणोति — ओं नम इत्यादि । ऐन्द्र्यां प्राच्यां स्थितं स्कन्दम् 'ओं नमः षण्मुखाये'ति यजेत् । अग्नौ भांबीजयुक्तं 'भूताधिपतये नम' इति मन्त्रेण शास्तारं यजेत् ॥ १२५ ॥

पुनर्दक्षिणे 'ओं धर्माय नम' इति धर्ममाराध्य तत्पश्चिमे मातृर्यजेत् । तत्र प्राक्प्रत्यक्पार्श्वयोर्वीरभद्रं गणपतिं च यजेत् । ततस्तन्मध्ये सबीजकैः, वीं गं व्यों मं[3] मां ह्रौं[4] हें हों हुं एतानि बीजानि, स्वस्वनाममन्त्रैः ब्रह्माणीं माहेश्वरीं कौमारीं वैष्णवीं वाराहीमिन्द्राणीं चामुण्डीं यजेत् । सैजिनाक्षरैः[5] स्वस्वगायत्रीभिश्च ॥ १२६, १२७ ॥

गायत्रीः क्रमेण पठति — वीरभद्रायेत्यादि ॥

---

१. 'सं' ग. पाठः. २. 'न्ती' ख. ग. घ. पाठः. ३. 'ओं' ख. ग. पाठः. ४. 'हें ह्रौं हों', ५. 'स्व' ङ. पाठः.

मातृभ्यो लोकमातृभ्यः सर्वमातृभ्य इत्यपि ।
सर्वमातृगणेभ्यश्च क्रमाद् दिक्षूर्ध्वतोऽमुना ॥ १२८ ॥

'नानारूपा मातरः प्रतिदिशं व्यवस्थिताः देव्यन्तरिक्षभौमाः पातालनिवासिन्यश्चेहायान्तु विष्णवाज्ञया मामनुगृह्णन्तु प्रतिगृह्णन्तु पूजां सौम्यरूपधारिण्यस्ताभ्यो देवीभ्यो नमो नमः स्वाहा' ।

साधारणमनौ विष्णुपदे स्वस्वाक्षरं पठेत् ।
सर्वत्राकाशमातृभ्यस्तद्गणेभ्योऽपि वा हरेत् ॥ १२९ ॥

निजमन्त्रशास्तृशम्बरकुमारहस्त्यश्वनीलकालाश्च ।
आर्यार्चने कपर्द्युग्रो रुद्रसुतश्च भूतनाथश्च ॥ १३० ॥

भूतनाथाय विद्महे भवपुत्राय धीमहे ।
गायत्री चेति तत्रोक्ता तन्नः शास्ता प्रचोदयात् ॥१३१॥

चाम्बादीनां गणाः सर्वे कोटिकोटिगणाधिपाः ।
भवन्तु सहिताः सर्वे तेभ्यस्ताभ्यो नमो नमः ॥ १३२ ॥

'मातृभ्यो नम' इत्यादिभिश्चतुर्भिर्मन्त्रैः क्रमाद् दिक्षु, अमुना 'नानारूपा' इत्याद्येन मन्त्रेण ऊर्ध्वतो यजेत् ॥ १२८ ॥

मालामन्त्रं पठति — नानारूपा इति ॥

साधारणमनौ साधारणेऽस्मिन् मन्त्रे विष्णुपदे स्वस्वाक्षरं शिवादिपदं पठेत् । पुनः सर्वत्र आकाशमातृभ्यस्तद्गणेभ्य इत्यपि हरेद्वा ॥ १२९ ॥

आर्यार्चने निजमन्त्रशास्तृशम्बरकुमारहस्त्यश्वनीलकालाश्च निजमन्त्रो निजमूलमन्त्रः 'शास्त्रे नमः 'शम्बरकुमाराय नमः' 'हस्त्यश्वाय नमः' 'नीलाय नमः' 'कालाय नमः' कपर्दी 'कपर्दिने नमः' उग्रः 'उग्राय नमः' रुद्रसुतश्च 'रुद्रसुताय नमः' भूतनाथश्च 'भूतनाथाय नमः' एते मन्त्राः ॥ १३० ॥

तत्र 'भूतनाथाय विद्महे' इत्याद्या गायत्री चोक्ता ॥ १३१, १३२ ॥

---

१. 'श्च ॥ सकपर्द्युग्रो रुद्रसुताद्यं च शास्तृयजनेस्युः ॥ भू'. २. 'प्रोक्ता' ग. पा. ३. 'स्थो' क. घ. पाठः. ४. 'न्ति' क. पाठः.

चाम्बाद्यः पश्चिमे शास्तुः स्वनाम्नार्च्यो । वाकरः ।
खषोत्कायेति मन्त्रो वा हुतान्तस्तद्विधौ स्मृतः ॥ १३३ ॥
ओंतदादिद्विषट्केण ब्रह्मा हूमिति सूकरः ।
दुर्गा स्वमूलतः स्कन्दो मूलनामजिनाक्षरैः ॥ १३४ ॥
'सनत्कुमाराय विद्महे । षडाननाय धीमहे । तन्नः स्कन्दः प्रचोदयात्' ।
श्रीधराश्वमुखौ पार्श्वद्वये वागीश्वरी क्रिया ।
कीर्तिर्लक्ष्मीस्तथा सृष्टिर्विद्या शान्तिश्च मातरः ॥ १३५ ॥
तद्बीजं तुर्यषष्ठौ च द्वादशश्च त्रयोदशः ।
आद्यश्चैकादशश्चैव द्वितीयश्चेन्द्रगाः स्वराः ॥ १३६ ॥
गायत्रीरहितं सर्वं योज्यमत्रापि पूर्ववत् ।
शिवं यजेत् षडर्णेन नाम्ना निर्माल्यधारिणम् ॥ १३७ ॥

शास्तुः पश्चिमे चाम्बाद्यः 'चाम्बादीनां गणा' इत्याद्यो मन्त्रः स्यात् । 'निर्ऋतिबहिः स्वनाम्ना 'ओं सूर्याय नमः' इति वा, हुतान्तः स्वाहान्तः 'खषोत्काये'ति मन्त्रो वा तद्विधौ सूर्ययजने स्मृतः ॥ १३३ ॥

ओंतदादिद्विषट्केण 'ओं तथ्स नैमो ब्रह्मणे तथ्स नैमः' इति द्वादशाक्षरेण ब्रह्मार्च्यः । हूमिति बीजेन सूकरो वराहोऽर्च्यः । दुर्गा स्वमूलतोऽर्च्या । मूलनामजिनाक्षरैः स्वमूलेन षण्मन्त्रैर्गायत्र्या च स्कन्दोऽर्च्यः ॥ १३४ ॥

तद्गायत्रीं पठति — सनत्कुमारायेति ॥

पुनरुत्तरमातॄणां पार्श्वद्वये श्रीधराश्वमुखौ । तन्मध्ये वागीश्वरी क्रिया कीर्तिः लक्ष्मीः सृष्टिः विद्या शान्तिश्च सप्त मातरः ॥ १३५ ॥

तत्र इन्द्रगाः लकारगताः तुर्यषष्ठौ द्वादशः त्रयोदशश्च आद्यः एकादशश्च द्वितीयश्च स्वराः । लीं लूं लैं लौं लं लें लां इति तद्बीजं तासां बीजानि ॥ १३६ ॥

अत्रापि गायत्रीरहितं सर्वं मन्त्रजातं पूर्ववद् दक्षिणमातृवद् योज्यम् । षडर्णेन स्वेन षडक्षरेण शिवं यजेत् । निर्माल्यधारिणं स्वनाम्ना यजेत् ॥ १३७ ॥

---

१. 'तत्सदादिस्वष' ख. पाठः. २. 'श्च' ग. पाठः. ३., ४. 'न्न' क. ख. घ. च. पाठः. ५. 'ं स्वस्व' ख. ग घ. ङ. च. पाठः.

विष्वक्सेनोऽन्तवौङ्कारो नमोन्तः परिकीर्तितः ।
क्ष्रीं मुण्डिन्यै नम इति मुण्डनीमनुरीरितः ॥ १३८ ॥
चण्डेश्वरस्य मन्त्रोऽथ धुनिचण्डहुमस्त्रकम् ।
चण्डेति चण्डचण्डेति नाम चण्डेश्वरेति च ॥ १३९ ॥
चण्डचण्डाय विद्महे चण्डेश्वराय धीमहे ।
इति चण्डेशगायत्री तन्नश्चण्डः प्रचोदयात् ॥ १४० ॥
गोपुरद्वारि सम्पूज्यौ शङ्खपुष्पनिधी हरौ ।
शङ्खचक्रौ बहिर्द्वारि ततः सर्वत्र घोषयेत् ॥ १४१ ॥
ये समस्तं जगद् व्याप्य तिष्ठन्ति बलिकाङ्क्षिणः ।
विष्णुपारिषदाः सर्वे गृह्णन्तु बलिमुत्तमम् ॥ १४२ ॥
आराध्य ध्वजदेवतादिबहिरावारद्वयं पूर्ववद्
विष्णौ दिग्गणमन्त्रतश्च दशदिक्ष्वत्राहरेद् वा बलिम् ।
येभूतादिपुरःप्रभृत्युपरिनिष्ठैः सर्वदिक्षु क्रमात्
पीठस्याधिपतिं निजावृतिवृतं मध्ये समभ्यर्चयेत् ॥ १४३ ॥

विशेषमाह — विष्वक्सेन इति । अन्तवौङ्कारः नामान्ते वौंकारयुक्तः नमोन्तश्च विष्वक्सेनः 'ओं विष्वक्सेन वौं नमः' इति मन्त्र इत्यर्थः । 'क्ष्रीं मुण्डिन्यै नमः' इति मुण्डिनीमनुरीरितः ॥ १३८ ॥

अथ 'धुनिचण्डहुमस्त्रकम्' इति चण्डेश्वरमन्त्रः । चण्डेति चण्डचण्डेति चण्डेश्वरेति च नाम । 'चण्डाय नम' इत्याद्या नाममन्त्रा इत्यर्थः ॥ १३९ ॥

चण्डचण्डेत्याद्या तस्य गायत्री च ॥ १४० ॥

हरौ गोपुरद्वारि शङ्खपुष्पनिधी शङ्खनिधिः पुष्पनिधिश्च पूज्यौ । तत्र बहिर्द्वारि शङ्खचक्रौ चेति भूतबलेरत्र विशेषः । ततः सर्वत्र 'ये समस्तमि'-त्यादिना घोषयेत् उच्चैरुच्चरेत् ॥ १४१, १४२ ॥

विष्णौ ध्वजदेवतादिबहिरावारद्वयं कुमुदादिकं पञ्चविंशद्भूतगणस्व-रूपं चावरणद्वयं पूर्ववद् भूतबलिवदाराध्य दशदिक्षु दिग्गणमन्त्रतः 'पूर्वस्यां दिशि हरेरि'त्यादिमन्त्रेण अत्र तृतीयावरणे बलिमाहरेत् । वेति समुच्चायार्थः । येभूतादिपुरःप्रभृत्युपरिनिष्ठैः 'ये भूताः पुरस्सदः' इत्यादि 'ये भूता उपरि-

स्थाणौ भूतबलिक्रमेण बलिपीठान्तं बहिः स्याद् बलि-
र्यत्रान्तः शिववद् बहिश्च शिववत् तत्रान्यतश्चान्यथा।
दुर्गायां प्रथमोदितावरणबाह्येऽर्च्याः सुदुर्गादय-
स्तत्तद्दिश्यगणाः स्मरद्विषि महाकालादयश्चोदिताः॥
येभूतादिमनुद्वयेन पृथगावृत्त्या गुहेऽत्रार्यके
चाम्बेत्यादिभिरुत्सवार्थमिति विघ्नेशे ग्रहोपान्ततः।
सर्वत्रैकपरिक्रमात् त्रिविधमन्त्रैर्यैसमं तंनमो-
गृह्णन्त्वादिभिरीश्वरे प्रथमतो वैतैर्ध्वजावारतः॥ १४५॥

षद' इत्यन्तैर्नवाभिर्मन्त्रैः क्रमात् पीठस्य सर्वदिक्षु नवसु दिक्षु, निजावृति-वृतं कुमुदाद्यावृतिसहितम् अधिपतिं हरिसेनं मध्ये च समभ्यर्चयेत् ॥ १४३ ॥

स्थाणौ भूतबलिक्रमेण बलिपीठान्तं बहिर्बलिः स्यात्। यत्र देवेऽन्त-र्बलिः शिववत् 'पूर्वस्यां दिशी'त्यादिकं 'ये भूता' इत्यादिकं चान्तः परिगृह्यते, तत्र बहिश्च शिववत् बलिपीठपर्यन्तबलिर्भूतबलिक्रमेण स्यात् । अन्यतश्चान्यथा यत्रान्तर्विष्णुवद् भवति तत्र बहिरपि विष्णुवदित्यर्थः । दुर्गायां प्रथमोदितावरणबाह्ये कालयादिध्वजावरणबाह्येऽष्टकोटिगणेभ्य इत्यस्य स्थाने सुदुर्गादयः तत्तद्दिश्यगणाः तत्तद्दिग्भवा गणा अर्च्या उदिताः । स्मरद्विषि महाकालादयो विंशद्भूतगणाश्च ॥ १४४ ॥

गुहेऽत्र षट्कोष्ठावरणान्ते येभूतादिमनुद्वयेन 'ये भूताः स्कन्दसेनस्य' इत्यादिना 'बलिग्रहेभ्यो भूतेभ्य' इत्यादिना च पृथगावृत्त्या आवरणद्वयेन, बलिं हरेदिति शेषः । आर्यके एतत्स्थाने चाम्बेत्यादिभिः 'चाम्बादीनां गणा' इत्यादिना 'नमोऽस्तु भीमरूपेभ्य' इत्यादिना 'प्राग् गणेभ्यः' इत्यादिना 'सर्वेभ्यः पिङ्गलेभ्य' इत्यादिना च वक्ष्यमाणैश्चतुर्भिर्मन्त्रैः पृथगावृत्त्या च, विघ्नेशे एतत्स्थाने 'उत्सवार्थमि'ति मनुना च बलिं हरेत् । सर्वत्र सर्वदेवेषु ग्रहोपान्ततः देवग्रहादेः पूर्वं ये समस्तंनमोगृह्णन्त्वादिभिः 'ये समस्तमि'त्यादिना 'ओं नमो भूतेभ्य' इत्यादिना 'गृह्णन्तु बलिम्' इत्यादिना च त्रिविधमन्त्रैः एकपरिक्रमात् एकावृत्त्या च बलिं हरेत् । ईश्वरे ध्वजावारतः नन्द्यादिध्वजावरणात् प्रथमत एतैस्त्रिविधमन्त्रैर्वा ॥ १४५ ॥

सुदुर्गा च विदुर्गा च निदुर्गा सुविलोचना ।
सुलोचना सुभद्रा चातिदुर्गा दुर्गविक्रमा ॥ १४६ ॥
अकन्या च सुकन्या च रविकन्या च कन्यका ।
रक्षःकन्या मारकन्या सुरकन्या रविप्रभा ॥ १४७ ॥
कृत्तिका कार्तिका सर्वकार्तिका कार्तिकायनी ।
कृत्यान्तिका कृत्यकन्या कृत्तिनी कृत्तिकोद्भवा ॥ १४८ ॥
वामा सुवामा वामार्ची वामाङ्गी वामलोचना ।
वामोद्भवा वामसमा वाममूर्तिधरा पुनः ॥ १४९ ॥
देवी सुदेवी यादेवी समदेवी सुमर्दिनी ।
विदेवी रविदेवी च देवदेवीति कीर्तिता ॥ १५० ॥
अदण्डा च विदण्डा च सुदण्डा दण्डविक्रमा ।
शतदण्डा महादण्डा दुर्दण्डा दुरतिक्रमा ॥ १५१ ॥
अगौरी च विगौरी च सुगौरी गौरिविक्रमा ।
निर्गौरी चैव दुर्गौरी सुगौरी गौरिवल्लभा ॥ १५२ ॥
जया च विजया चैव अजया च जयावती ।
सुजया च जयाक्रान्ता जयन्ता जयविक्रमा ॥ १५३ ॥
काली चैव सुकाली च विकाली करकालिका ।
दुष्कालि कार्तिकाकाली निष्काली भद्रकालिका ॥१५४॥
समेदिनी सुमेदिनी वसुधा च वसुन्धरा ।
भूमिरुर्वी धरा पृथ्वीति क्रमात् परिकीर्तिताः ॥ १५५ ॥
सुदुर्गाद्यष्टशक्त्यन्ते प्राक्स्थिताभ्योक्षरान्ततः ।
स्याद् देवग्रहशक्तिभ्यो दुर्गावर्ण समन्वितः ॥ १५६ ॥

सुदुर्गाद्यष्टविधाः शक्तीराह — सुदुर्गेति ॥ १४६—१५५ ॥

अष्टविधशक्तीनां मन्त्रानुद्धरति — सुदुर्गाद्यष्टशक्त्यन्त इति । सुदुर्गाद्यष्टशक्तीरुक्त्वा प्राक्स्थिताभ्योक्षरान्ततः 'प्राक्स्थिताभ्य' इत्यक्षराणामन्त

---

१. 'च' क. पाठः. २. 'क्ष' ख. ग. घ. पाठः. ३. 'न्त' ख. पाठः. ४. 'का', ५. 'या' ख. ग. पाठः. ६. 'गी' क. ख. ग. पाठः. ७. 'गाम्बिका' ख. पाठः.

कोटिपारिषदीभ्योन्ते नमो नम इतीरितः।
प्राङ्मन्त्रोऽन्यत्र तच्छक्तिदिग्ग्रहार्णविभेदितः ॥ १५७ ॥

महाकालो विधाता च वज्रपाणेः क्रतुः प्रभुः।
दक्षः शतक्रतुर्मूर्तिरप्रमेयश्च वीर्यवान् ॥ १५८ ॥

नित्यो विद्युत्प्रभः शूली शूलहस्तः [illegible]न्।
स्वाङ्गदीप्तस्तमोघातः सृष्टिकृद् वीर्यविक्रमः ॥ १५९ ॥

मान्धाता सृष्टिकृद् वीर्यो नित्ययोगः प्रतापवान्।
एते विंशतिकोटीनां प्राक्स्थितानां नमो नमः ॥ १६० ॥

अग्निरग्निसमानश्च ज्वाली[1] विश्वभुगव्ययः।
हुताशी मूर्तिमान् व्यापी कपिलो रक्तलोचनः ॥ १६१ ॥

उग्रो रक्तवपुर्[illegible]ग्रः ससार्चिर्विश्वभेषजी।
हुतभुक् सत्यवान् वेगी भस्मच्छन्नो मरुत्सखः ॥ १६२ ॥

योगप्रियः सदाकाङ्क्षी दारुजः स्पन्दनो जटी।
इत्येते कोटिगुणिता अग्निरूपा नमो नमः ॥ १६३ ॥

यमो वैवस्वतो धाता शत्रुघातः प्रजान्तकः।
मृत्युः प्रेताधिपो धर्मः कृष्णः कृष्णाक्ष एव च ॥ १६४ ॥

देवग्रहशक्तिभ्योदुर्गावर्णसमन्वितः 'देवग्रहशक्तिभ्यो दुर्गा' इति वर्णैर्युक्तः, 'कोटिपारिषदीभ्य' 'इत्यन्ते नमो नम' इति प्राङ्मन्त्र ईरितः स्यात्। सुदुर्गेत्यादि पद्यमुक्त्वा वा, 'ओं सुदुर्गाविदुर्गानिदुर्गासुविलोचनासुलोचनासुभद्रातिदुर्गा-दुर्गविक्रमाभ्यः' इत्युक्त्वा वा 'प्राक्स्थिताभ्यो देवग्रहशक्तिभ्यो दुर्गाकोटि-पारिषदीभ्यो नमो नमः' इति प्राङ्मन्त्रः। अन्यत्र नवसु मन्त्रेषु तच्छक्तिदि-ग्ग्रहार्णविभेदितः तत्तच्छक्तिभिर्दिग्भिर्ग्रहार्णैश्च विशेषेण भेदितः। अक-न्याद्यष्टशक्त्यन्ते 'अग्निदिक्स्थिताभ्योऽसुरग्रहशक्तिभ्य' इत्याद्यूहयेत्। उपर्य-धोभागयोर्नक्षग्रहसर्पग्रहौ योज्यौ ॥ १५६, १५७ ॥

शिवे दशविधमहाकालादिविंशद्भूतगणमन्त्रान् पठति — महाकाल इत्यादि ॥ १५८ — १८३ ॥

---

१. 'ज्व' क. पाठः.

नित्ययोगी सुहृत्क्षेमी आत्मधर्मी सदान्तकः ।
मायारूपी प्रजाकाङ्क्षी सत्यासत्यप्रियः सुहृत् ॥ १६५ ॥
इत्येते कोटिगुणिता यमरूपा नमो नमः ।
रक्षोऽसुरः पिशाचश्च निर्ऋतिर्वीर एव च ॥ १६६ ॥
तीक्ष्णश्चासिदेही यज्ञहर्ता विनायकः ।
अतिमूर्तिरनेकाक्षी क्रूरः क्रूरवपुर्महान् ॥ १६७ ॥
सूक्ष्मरुद्रो विरूपाक्षो भस्माङ्गी धूम्रलोचनः ।
इत्येते कोटिगुणिता निर्ऋतिरूपा नमो नमः ॥ १६८ ॥
वरुणः शम्बरो भृङ्गी निम्नगाधिपतिः क्षमः ।
श्रीमानभ्रघनः कान्त आनन्दस्तत्त्वदर्शनः ॥ १६९ ॥
पाशहस्तः पशुर्वेगी आक्रन्दः श्यामलोचनः ।
कपर्दी प्राणदः श्यामः सत्यबुद्धिः सनातनः ॥ १७० ॥
इत्येते कोटिगुणिता वरुणरूपा नमो नमः ।
वायुर्गन्धवहः सूक्ष्मस्तत्त्वात्मानन्द एव च ॥ १७१ ॥
प्राणोऽपानः समानश्च ज्ञानाक्षो ज्ञानिनो वरः ।
कपाली शूलपाणिश्च व्यानोदानौ च साकली ॥ १७२ ॥
अमाली मालवान् बिन्दुर्मूलशाकी विभावरी ।
इत्येते कोटिगुणिता वायुरूपा नमो नमः ॥ १७३ ॥
यक्षोऽथ रयिवान् सोमः सूक्ष्मः कालो निराश्रयः ।
आलम्बो भैरवो भिक्षुर्विकारो वाम एव च ॥ १७४ ॥
ज्येष्ठो मालाधरश्चण्डो मनश्चोन्मन एव च ।
रौद्रो बलधरः कालः सर्वत्र बलवानपि ॥ १७५ ॥
इत्येते कोटिगुणिता यक्षरूपा नमो नमः ।
ईशान ईश्वरः शम्भुः शूलहस्तस्त्रिणेत्रवान् ॥ १७६ ॥
अनादिनिधनो रागी कपिलः कपिलाक्षधृक् ।
रुद्रो गणाधिपो योगी विश्वहर्ता दिगम्बरः ॥ १७७ ॥

---

१. 'य' ख. पाठः. २. 'क्रान्तः श्या' क. पाठः. ३. 'कि' ख. पाठः. ४. 'निर्विश्व' ख. ग. पाठः.

धूम्राक्षो धूम्ररूपश्च नीलो विश्वभुजो हरः ।
इत्येते कोटिगुणिता रुद्ररूपा नमो नमः ॥ १७८ ॥
महाबलो महानादो मूर्तिर्मूर्तिपतिः शिवः ।
पवित्रो राजयः स्थाणुरघोरो घोर एव च ॥ १७९ ॥
अरुणो लाङ्गलो मन्युरङ्गारः शिवभूषणः ।
जीमूतो मूर्तिकृद् वाग्मी [illegible]रान्तकः ॥ १८० ॥
गणाधिपाः शिवस्यैते ऊर्ध्वरूपा नमो नमः ।
बुधः प्रतर्दनः शुद्धः कालरूपोग्रदंष्ट्रवान् ॥ १८१ ॥
दीर्घबाहुः प्रकाशश्च भर्ता हर्ता विचक्षणः ।
कालाग्नी रौरवो घोरो नरकः शर्व एव च ॥ १८२ ॥
नागश्चैवाथ घोरश्च किम्बुरुर्दनुजः क्षमी ।
इत्येते कोटिगुणिताः पातालास्ते नमो नमः ॥ १८३ ॥
ये भूताः स्कन्दसेनस्य पार्षदा बलिभोजिनः ।
तृप्यन्तु ते मुदं यान्तु सङ्ख्योऽसङ्ख्यो नमो नमः ॥ १८४ ॥

'बलिग्रहेभ्यो भूतेभ्यः स्कन्दपार्षदेभ्यो नमो नमः स्वाहा ।'

चाम्बादीनां गणाः सर्वे कोटिकोटिगणाधिपाः ।
भवन्तु सहिताः सर्वे तेभ्यस्ताभ्यो नमो नमः ॥ १८५ ॥

'नमोऽस्तु भीमरूपेभ्यो भीमवक्त्रेभ्यो विविधाकृतिभ्यो वरदेभ्यश्च वो नमो नमः ।'

'प्राग्गणेभ्यो बहुरूपेभ्यो विश्वरूपेभ्यः सङ्ख्योऽसङ्ख्यः सर्वगणेभ्यो नमो नमः ।'

स्कन्दे येभूतादिमन्त्रद्वयं पठति — ये भूता इत्यादि ॥ १८४ ॥

आर्ये चाम्बादिमन्त्रचतुष्कं क्रमेण पठति — चाम्बादीनामित्यादि ॥ १८५ ॥

---

१. 'शी' ख. ग. घ. पाठः. २. 'म' ख. ग. पाठः.

एष प्राग्गणमन्त्रोऽत्र प्राक्स्थाने दक्षिणेति च ।
पश्चिमेत्युत्तरेत्यर्णं योजयेद् दक्षिणादिषु ॥ १८६ ॥

'सर्वेभ्यः पिङ्गलेभ्यो महाशनेभ्यो घोररूपेभ्यो मृगयुभ्यो विनायकेभ्यो मूकेभ्यो बधिरेभ्योऽन्धेभ्यो जळेभ्यः स्थूलेभ्यः कृशेभ्यो दीर्घेभ्यो ह्रस्वेभ्यो नपुंसकेभ्यः सङ्ख्योऽसङ्ख्यः सदसङ्ख्यः सर्वगणेभ्यो नमो नमः स्वाहा ।'

उत्सवार्थं गता ये च याश्च विघ्नप्रहर्षणाः ।
'ॐ नमो विघ्नपार्षदेभ्यो [1]क्षेत्रपालेभ्यो नमो नमः स्वाहा[2] ।'

स्वनाममन्त्रगायत्रीतत्तन्मूर्त्यादिमन्त्रकैः ॥ १८७ ॥
सासङ्ख्यदेवतामूलैर्बलिपीठे बलिं हरेत् ।
'हरिसेनाय विद्महे । महाबलाय धीमहे । तन्नः शान्तः प्रचोदयात् ।'
'अष्टमूर्तिपार्षदेभ्यः सङ्ख्योऽसङ्ख्यः सदसङ्ख्यः सर्वगणेभ्यो नमो नमः स्वाहा ।'

तत्र तृतीये मन्त्रे विशेषमाह — एष इति । एष प्राग्गणमन्त्रः । अत्र प्राक्स्थाने प्रागित्येतस्य स्थाने दक्षिणादिषु दिक्षु दक्षिणेति पश्चिमेति उत्तरेति अर्णं योजयेत् ॥ १८६ ॥

विघ्ने उत्सवार्थमित्यादिमन्त्रं पठति ॥

महाबलिपीठे भूतबलेर्विशेषमाह — स्वनामेति । स्वनाममन्त्रगायत्रीतत्तन्मूर्त्यादिमन्त्रकैः । स्वनाममन्त्रेत्यनेन विष्णौ 'बलाय नमः' 'हरिसेनाय नमः' इति मन्त्रद्वयमुक्तम् । अन्येषु हरसेनादिस्वस्वनामैव । गायत्री लिख्यते । तत्तन्मूर्त्यादिमन्त्रकैरिति विष्णुदुर्गयोः 'अष्टमूर्त्या'दि, अन्येषु 'दशमूर्तिपार्षदेभ्यः सद्भ्य' इत्यादि । सासंख्यदेवतामूलैः 'असंख्याता गणा' इत्यादिना 'देवताभ्यः पितृभ्य' इत्यादिना तत्तद्देवस्य मूलेन च बलिपीठे बलिं हरेत् ॥

---

१. 'भ्यः स्त्रीभ्यः स' क. ख., 'भ्योऽस्त्रीभ्यः स' ग. पाठः. २. 'भ्यो न' क. पाठः. ३. 'हा । ओं सर्वेभ्यो विघ्नपार्षदेभ्यो नमः । स्व' ख. ग. पाठः. ४. 'व' क. ख. ग. घ पाठः.

असङ्ख्याता गणाः सर्वे कोटिकोटिगणाधिपाः ॥ १८८ ॥
भवन्ति सहिताः सर्वे तेभ्यस्ताभ्यो नमो नमः।
देवताभ्यः पितृभ्योऽथ भूतेभ्यः सह जङ्गमैः ॥ १८९ ॥

एतत्स्थानानेव सिभ्यः प्रयच्छामि बलिं नमः ।

'हरसेनाय विद्महे। महाबलाय धीमहे ! तन्नः शक्तिः प्रचोदयात् ।'

'दशमूर्तिपार्षदेभ्यः सङ्ख्योऽसङ्ख्यः सदसङ्ख्यः सर्वगणेभ्यो नमो नमः स्वाहा ।'

ये समस्तं जगद् व्याप्य तिष्ठन्ति बलिकाङ्क्षिणः ॥ १९० ॥
विष्णुपारिषदाः सर्वे गृह्णन्तु बलिमुत्तमम् ।

'ओं नमो भूतेभ्यो भूतकृद्भ्यः सर्वेभ्योऽरिष्टेभ्यः सङ्ख्योऽसङ्ख्यः सदसङ्ख्यः सर्वगणेभ्यो नमो नमः स्वाहा।'

गृह्णन्तु बलिमेतत्तु बाह्यस्था विहगाननाः ॥ १९१ ॥
ये क्रूरा येऽल्पसत्त्वाश्च भूतप्रेतपिशाचकाः।
वेतालाश्चैव मातङ्गा हीनाहीनाश्च ये गणाः ॥ १९२ ॥
सर्वेषां चैव तेषां च हरामि बालेमुत्तमम् ।
सर्वेभ्य एव तेभ्यश्च सगणेभ्यो नमो नमः ॥ १९३ ॥

इति ।

प्रोक्तक्रमेण सकलं बलिपीठवर्जं
क्षेत्राधिपालबलिकर्मयुतं विधाय ।

तान् मन्त्रान् क्रमेण पठति — हरिसेनाय विद्महे इत्यादि ॥

पुनः येसमस्तमित्यादिमन्त्रत्रयमेकावृत्तिबलिदानाय क्रमेण पठति — ये समस्तमित्यादि, ओं नमो भूतेभ्य इत्यादि, गृह्णन्तु बलिमेतत् तु इत्यादि॥ १९०—१९३ ॥

अत्र भूतबलावुत्सवबलावपि क्रियाक्रमे पक्षभेदमाह — प्रोक्तक्रमेणेति । बलिपीठवर्जं सकलं कर्म क्षेत्राधिपालबलिकर्मयुतं प्रोक्तक्रमेण विधाय

स्वावारवीतमभिपूज्य च पीठमध्ये
पीठाधिपं विधिवदत्र समापयेद् वा ॥ १९४ ॥
बलिं विधायेति परीत्य सन्नतः
स्वाचम्य गर्भालयमभ्युपेत्य च ।
आयोज्य देवं बलिबिम्बसंस्थितं
स्वमूलबिम्बे तमथ क्षमापयेत् ॥ १९५ ॥
इत्युत्सवं त्रिषवणार्चितदेवदेव-
भूदेवदेवपरिषत्प्रकराभिरामम् ।
आतोद्यवाद्यबहुलोज्ज्वलदीपदीप्रं
कुर्वीत सर्वदिवसेषु सुभावितात्मा ॥ १९६ ॥
तीर्थस्नानादिनाधरेद्युरभिसायं सोऽयमाचार्यको
ग्रामे चैत्यचतुष्पथादिषु बलिं कुर्वन् परीत्याखिले ।

स्वावारवीतं स्वावरणपरिवृतं पीठाधिपं पीठमध्ये (विधिवत्) अभिपूज्यात्र समापयेद्वा ॥ १९४ ॥

इति उक्तक्रमेण बलिं विधाय परीत्य प्रदक्षिणीकृत्य सन्नतः सम्यङ् नमस्कृत्य स्वाचम्य गर्भालयमभ्युपेत्य बलिबिम्बसंस्थितं देवं स्वमूलबिम्ब आयोज्याथ तं क्षमापयेत् ॥ १९५ ॥

उत्सवं विशेषेण सादरं कर्तव्यमाह — इत्युत्सवमिति । सुभावितात्मा सुतरां भावित उद्योजित आत्मा मनो यस्य सः आचार्यः सर्वदिवसेषु उत्सवान्तर्भूतेषु सर्वेषु दिवसेष्वपि इति उक्तप्रकारेण त्रिषवणार्चितदेवदेवभूदेवदेवपरिषत्प्रकराभिरामं सवनत्रयेऽप्यर्चितेन देवदेवेन देवानामिन्द्रादीनामपि देवेन विष्ण्वादिना तथार्चितैर्भूदेवैर्ब्राह्मणैः तथाचार्चितेन देवस्य परिषत्समूहेन चाभिरामं मनोहरम्, आतोद्यवाद्यबहुलोज्ज्वलदीपदीप्रं च आतोद्येन वीणादिना तथान्यवाद्यविशेषैर्बहुलैरुज्ज्वलैर्दीपैश्च दीप्रमतिशयेन प्रकाशनशीलमुत्सवं कुर्वीत ॥ १९६ ॥

ततः तीर्थस्नानदिनाधरेद्युः तीर्थस्नानदिनात् पूर्वेद्युः अभिसायं सायन्तनबलिकाले सोऽयमाचार्यकः स्वयमेवाखिले ग्रामे चैत्यचतुष्पथादिषु चैत्यं

---

१. 'सूताधि' ख. पाठः. २. 'समाहिता' क. पाठः.

ग्रामान्ते मृगयाप्रचारविहृतिं कृत्वा सुयोधैः समं
प्रत्यापत्य ततः स्वकौतुकगतं मूले समायोजयेत् ॥१९७॥

मन्त्रौ शार्ङ्गिणि विष्णुपारिषदमात्रर्णादिकौ तौ शिवे
स्यातां ग्रामबलौ तु रुद्रपदभिन्नौ वा नमोभूतकः ।
गृह्णन्त्वीशहरौ निसुम्भजिति हृद्भूतादिगृह्णन्त्वणू
गृह्णन्त्वाद्यणवो गुहे प्रमथनाथे पिङ्गलाद्यस्तथा ॥ १९८ ॥

विष्णुपारिषदेभ्यश्च प्रमथेभ्यो नमो नमः ।
मातृभ्यस्तद्गणेभ्यश्च सर्वेभ्यो वै नमो नमः ॥ १९९ ॥

'ओं नमो भूतेभ्यो भूतकृद्भ्यः सर्वेभ्योऽरिष्टकृद्भ्यः सद्भ्योऽसद्भ्यः सदसद्भ्यः सर्वगणेभ्यो नमो नमः स्वाहा।'
गृह्णन्तु बलिमेतत् तु बाह्यस्था विहगाननाः ।
ये क्रूरा येऽल्पसत्त्वाश्च भूतप्रेतपिशाचकाः ॥ २०० ॥

प्रसिद्धाश्वत्थादिवृक्षस्थानं चतुष्पथं चतुर्णां पथां सङ्गमः, आदिशब्देन विशेषस्थानान्तराण्युच्यन्ते, तत्र तत्र बलिं कुर्वन् परीत्य परितो गत्वा ग्रामान्ते ग्रामसमीपस्थवने सुयोधैः सुप्रसिद्धैर्योद्धृभिः समं सह मृगयाप्रचारविहृतिं तीक्ष्णमृगहननादिक्रीडां कृत्वा प्रत्यापत्य पुनः स्वस्थानमागम्य ततः स्वकौतुकगतं देवं मूले मूलबिम्बे समायोजयेत् ॥ १९७ ॥

तत्र ग्रामबलौ शार्ङ्गिणि विष्णुपारिषदमात्रर्णादिकौ 'विष्णुपारिषदेभ्यश्च' 'मातृभ्यस्तद्गणेभ्यश्च' इत्यादिकौ मन्त्रौ स्याताम् । शिवे रुद्रपदभिन्नौ विष्णुस्थाने रुद्रपदयुक्तौ, 'ओं नमो भूतेभ्य' इत्यादि वा । ईशहरौ 'गृह्णन्त्वि'ति । निसुम्भजिति हृद्भूतादिगृह्णन्त्वणू 'ओं नमो भूतेभ्य' इत्यादि गृह्णन्तु बलिमि'त्यार्धं च । गुहे गृह्णन्त्वाद्यणवः 'गृह्णन्त्वि'त्यादि, 'ग्रामपर्वतवन' इत्यादि, 'नमोऽस्तु सिन्धुचारिभ्य' इत्यादि, 'शून्याश्रमनिवासिभ्य' इत्यादिमनवः । प्रमथनाथे तथा पिङ्गलाद्यश्च 'ओं ह्रूं नमः सर्वेभ्यः पिङ्गलेभ्य' इत्यादि ॥ १९८ ॥

तान् मन्त्रान् क्रमेण पठति—विष्णुपारिषदेभ्य इत्यादि ॥ १९९—२०२ ॥

वेतालाश्चैव मातङ्गा हीनाहीनाश्च ये गणाः ।
सर्वेषां चैव तेषां च हरामि बलिमुत्तमम् ॥ २०१ ॥
सर्वेभ्य एव तेभ्यश्च सगणेभ्यो नमो नमः ।
'ग्रामपर्वतवनचारिभ्यो नमो नमः ।'
नमोऽस्तु सिन्धुचारिभ्यश्चतुष्पथगताय च ।
शून्यागारनिवासिभ्यः सर्वेभ्यो वै नमो नमः ॥२०२॥
शून्यग्रामनिवासिभ्यो वृक्षगुल्मगताय च ।
देवागारनिवासिभ्यो भूतेभ्यश्च नमो नमः ॥ २०३ ॥

'ओं ह्रूं नमः सर्वेभ्यः पिङ्गलेभ्यो बहुरूपेभ्यो महागणेभ्यो घोररूपेभ्यो मृगयुभ्यो विनायकेभ्यो बधिरेभ्योऽन्धेभ्यो जळेभ्यः स्थूलेभ्यः कृशेभ्यो दीर्घेभ्यो ह्रस्वेभ्यो मुण्डेभ्यः स्त्रीभ्यो नपुंसकेभ्यो बहुरूपेभ्यः सद्भ्योऽसद्भ्यः सदसद्भ्यः सर्वगणेभ्यो नमो नमः ।'
इति ।

बलिं दत्त्वा यथान्यायं शेषं शुद्धे तु भूतले ।
नमः पारिषदेभ्यश्चेत्युक्त्वान्ते निक्षिपेद् गुहे ॥ २०४ ॥

अथाप्लुतो मङ्गलपालिकादिभिः
स्वलङ्कृते तत्र निषद्य मण्डपे ।
समर्चितात्मा शयने प्रसाधिते
यथापुरं पीठमपि प्रपूजयेत् ॥ २०५ ॥

गुहे तु यथान्यायं बलिं दत्त्वा शेषं हविः शुद्धे भूतले 'नमः पारिषदेभ्यश्च' इत्युक्त्वा निक्षिपेत् ॥ २०४ ॥

अथ बलिदानानन्तरम् आप्लुतः स्नात्वा मङ्गलपालिकादिभिः स्वलङ्कृते तत्राग्रगते मण्डपे निषद्य समर्चितात्मा सकलीकरणशङ्खपूरणात्माराधनकृद् भूत्वा यथापुरं प्रतिष्ठायाः पुरस्तादधिवासनमण्डपे यथा तथा शयने प्रसाधिते सति पीठमपि प्रपूजयेत् ॥ २०५ ॥

---

१. 'रेभ्यो' ख. पाठः.

गर्भालयं प्राप्य समिष्टविष्टरे
देवं समास्थाप्य समर्च्य चार्चकः ।
प्रसाद्य दत्त्वा व्यजनाद्युपाहृतीः
कृताञ्जलिः प्रार्थयतामनेन तम् ॥ २०६ ॥

तीर्थयात्रा त्वया देव ! श्वः कर्तव्या सुरेश्वर ! ।
तत्र प्रतिसरारम्भं त्वमनुज्ञातुमर्हसि ॥ २०७ ॥

अश्वत्थपत्रयुगलैरथ साग्रदूर्वा-
सिद्धार्थसंयुतघृतं परिगृह्य दोर्भ्याम् ।
मन्त्रैः सुशोभनसुभद्रसुमङ्गलार्ण-
भिन्नैर्भवत्ववसितैः क्रमशोऽधिबिम्बम् ॥ २०८ ॥

आरोपयेत् कटितटावधि कन्धरान्तं
कान्तं च दोर्विनिमयोभयपार्श्वयुक्त्या ।
प्रक्षालयेत् करयुगं पृथगत्र तत्त-
दश्वत्थपत्रकमपास्य च तस्य पृष्ठे ॥ २०९ ॥

अथार्चकः गुरुः गर्भालयं प्राप्य समिष्टविष्टरे पूजिते पीठे देवं समास्थाप्य सम्यगावाह्य समर्च्य निवेद्य व्यजनाद्युपाहृतीः तालवृन्तादिसर्वोपहारान् दत्त्वा कृताञ्जलिर्भूत्वा 'तीर्थयात्रा त्वये'त्यनेन तं देवं प्रार्थयताम् ॥ २०६ ॥

प्रार्थनामन्त्रं पठति — तीर्थेति ॥ २०७ ॥

घृतारोपणमाह — अश्वत्थेति । अथ प्रार्थनानन्तरम् अश्वत्थपत्रयुगलैस्त्रिभिः साग्रदूर्वासिद्धार्थसंयुतघृतं दूर्वाग्रसिद्धार्थसंयुतं घृतं दोर्भ्यां परिगृह्य सुशोभनसुभद्रसुमङ्गलार्णभिन्नैः सुशोभनं सुभद्रं सुमङ्गलम् इत्यक्षरसंयुक्तैः भवत्ववसितैः भवतु इत्यन्ते युक्तैः 'सुशोभनं भवतु' इत्यादिभिर्मन्त्रैः अधिबिम्बं बिम्बे कटितटावधि कटिपर्यन्तं कन्धरान्तं कण्ठान्तं कान्तं मूर्धान्तं च क्रमशो दोर्विनिमयोभयपार्श्वयुक्त्या करयोर्विनिमयाद् दक्षिणकरस्य दक्षिणपार्श्वे वामकरस्य वामपार्श्वे योगश्च यथा भवति तथारोपयेत् । अत्र पृथक् तत्तदश्वत्थपत्रं तदा तदा तस्य देवस्य पृष्ठेऽपास्य करयुगं प्रक्षालयेच्च ॥ २०८, २०९ ॥

कर्मार्चामभिषिच्य तत्र पुरतः कृत्वा विधाय द्विजैः
पुण्याहं प्रकलय्य कौतुकमघोरेणेश्वरेऽन्येषु तत् ।
प्राग्वद् भूतलयादिकं लिपिमनुन्यासान्तमाधाय त-
त्पीठं मूर्तिमपि प्रकल्प्य कुसुमाराध्या समाज्ञाप्य तम् ॥
प्रष्ठोद्गीथोपचारैर्मनुवरपुटितैः सृष्टिसंहाररीत्या
प्रोक्तैरावाहयामीत्युपरतिसहितैः पञ्चमन्त्रैस्तदीयात् ।
हृत्पद्मादात्मतेजःकणमधिदरवारि प्रणीयामुतस्तं
कर्मार्चायां सुयोज्य प्रकटयतु सहाङ्गीक्रियाद्यं च सद्यः ॥
तत्त्वन्यासप्रभृतिविधिना सुस्थितं मूलसंस्थं
कृत्वा देवं विहृतममुतो मण्डपान्तः प्रणीय ।

कर्मार्चामभिषिच्य तत्र देवस्य पुरतः कृत्वा स्थापयित्वा द्विजैः सह पुण्याहं विधाय ईश्वरे अघोरेण मन्त्रेण अन्येषु प्राग्वच्च तत् क्षौमक्षिप्तसमुक्त-सर्षपसुवर्णोर्ज्वस्वलमित्युक्तं कौतुकं प्रकलय्य बद्ध्वा पुनस्तस्यां कर्मार्चायां भूतलयादिकं भूतसंहारशोषणादि भूतसृष्टिलिपिप्राणायामं च लिपिमनुन्यासान्तं लिपिन्यासं मन्त्रप्राणायामान्तं न्यासं चाधाय तत्पीठं सम्पूज्य मूर्तिमपि प्रक-ल्प्य कुसुमाराध्या तं देवं समाज्ञाप्य प्रार्थ्यावाहयेत् ॥ २१० ॥

आवाहनविधिमाह — प्रष्ठेति । प्रष्ठोद्गीथोपचारैः प्रष्ठः पुरोभागः उद्गीथः प्रणवः पुरोभागगतप्रणवोपचारयुक्तैः मनुवरपुटितैः मूलपुटितैः सृष्टिसं-हाररीत्या प्रोक्तैः पूर्वं सृष्टिक्रमेण पुनः संहारक्रमेण च प्रोक्तैः आवाहयामी-त्युपरतिसहितैः अवसाने आवाहयामीति सहितैः स्वीयैः स्वीयैः पञ्चमन्त्रैः तदीयाद् देवस्य हृत्पद्माद् आत्मतेजःकणं परचैतन्यात्मकं तेजोलेशम् अधिदर-वारि शङ्खजले प्रणीय अमुतः शङ्खात् (तं) कर्मार्चायां सुयोज्य सद्य एव सहाङ्गीक्रियाद्यं सकलीकरणाद्यं च प्रकटयतु कुर्यादित्यर्थः ॥ २११ ॥

मूलसंस्थं मूलार्चागतं देवं तत्त्वन्यासप्रभृतिविधिना तत्त्वन्यासादिना सुस्थितं स्थिरीभूतं कृत्वा अमुतोऽस्मात् प्रदेशाद् विहृतं कौतुकगतं देवं मण्ड-पान्तः प्रणीय प्रापयित्वा प्रथममहिते शय्याराधनकाल एव पूजिते कस्मिं-

---

१. 'रैर्निजमनुपु' क. ग. पाठः. २. 'स्तत् क' ख. ग. घ. पाठः. ३. 'न्तं' ख. पाठः. ४. 'यैः प' घ. च. पाठः.

पीठे न्यस्य प्रथममहिते स्वाणुनावाह्य भूयः
साङ्गीकृत्य प्रयजतु निवेद्यान्तिमैश्चोपहारैः ॥ २१२ ॥
ताम्बूलव्यजनार्पणादिसुभगां कृत्वा प्रसन्नार्चनां
प्रागन्त्यार्घ्यविधेः स्वपञ्चमनुभिः शय्यातले शाययेत् ।
व्याप्यैनं पुनरुत्क्रमेण शरतत्त्वैर्मूलतश्चादिना
जाग्रत्स्वप्नसुषुप्तिसंज्ञितदशा[1]स्तीर्त्वा तुरीयां नयेत् ॥
दशां तुरीयामधिगम्य रम्यां
देवं स्वरूपानुभवानुषक्तम् ।
ध्यायन् धियानन्दघनं सुरक्ष्य
संवृत्य शेषां क्षपयेत् क्षपां च ॥ २१४ ॥
काल्योचितं कर्म विधाय साधु
सविग्रहीभूतसमर्चितात्मा ।

श्चित् पीठे न्यस्य भूयः स्वाणुना स्वमूलेनावाह्य साङ्गीकृत्य निवेद्यान्तिमैरुपहारैः प्रयजतु ॥ २१२ ॥

ताम्बूलव्यजनार्पणादिसुभगां ताम्बूलार्पणादिभिर्व्यजनार्पणादिभिश्च मनोहरां प्रसन्नार्चनां कृत्वा प्रागन्त्यार्घ्यविधेः अवसानीयार्घ्यदानात् पूर्वं स्वपञ्चमनुभिः स्वस्वपञ्चतत्त्वमन्त्रैः शय्यातले शाययेत् । एनं देवं पुनरुत्क्रमेण संहारमार्गेण पठितैः शरतत्त्वैः पञ्चतत्त्वैः मूलतः आदिना प्रणवेन चोत्क्रमेण पादादिकेशान्तं पृथग् व्याप्य जाग्रत्स्वप्नसुषुप्तिसंज्ञितदशाः जाग्रदवस्थां स्वप्नावस्थां सुषुप्त्यवस्थां च क्रमात् तीर्त्वा अतिक्रम्य तुरीयां दशां नयेत् प्रापयेत् ॥ २१३ ॥

रम्या तुरीयां दशामवस्थामधिगम्य देवं स्वरूपानुभवानुषक्तं स्वस्वरूपानुभवयोगयुक्तम् आनन्दघनं धिया ध्यायन् तं सुरक्ष्य संवृत्य यवनिकयाच्छाद्य शेषां क्षपां रात्रिं क्षपयेत् अतिवाहयेत् ॥ २१४ ॥

काल्योचितम् उषसि योग्यं सन्ध्यावन्दनादिकं कर्म विधाय साधु यथावत् सविग्रहीभूतसमर्चितात्मा सकलीकरणं शङ्खपूरणमात्माराधनं च

---

१. 'श्च सुभगां म' क. पाठः.

तारेण मूलेन च पञ्चतत्त्वैः
संव्याप्य तं ध्यायतु जागरूकम् ॥ २१५ ॥
उत्थाप्य धेन्वादिकमङ्गलानि
प्रदर्श्य कृत्वार्घ्यसमर्पणाद्याः ।
प्रारब्धपूजासुसमाप्तिमिष्टे
पीठे च कृत्वा सकलीकरोतु ॥ २१६ ॥
इज्योदितानि पुनराचमनावसाना-
न्यस्मै सदन्तरसनापवनानि दत्त्वा ।
गण्डूषकं बहु समर्घ्य सपाद्यकाद्यं
संस्नाप्य पाद्यमथ साचमनं प्रदद्यात् ॥ २१७ ॥
प्रोक्ष्यापोहिपुरस्सरैर्मधुघृतेनाक्त्वा हरिद्रादिभि-
र्घृष्ट्वासिच्य शुभैर्जलैः समभिषिञ्चेन्मन्त्रतोयैरपि ।

कृत्वा तारेण मूलेन पञ्चतत्त्वैश्च तं संव्याप्य सम्यक् केशादिपादान्तं व्याप्य जागरूकं जाग्रदवस्थां गतं तं ध्यायतु ॥ २१५ ॥

पुनरुत्थाप्योत्थानं कारयित्वा धेन्वादिकमङ्गलानि धेन्वादीनि शुभदर्शनयोग्यानि मङ्गलानि प्रदर्श्य अर्घ्यसमर्पणाद्यां प्रारब्धपूजासुसमाप्तिं पूर्वदिवसकृतायाः पूजायाः समाप्तिमवसानीयार्घ्यदानैलयाङ्गाद्यां कृत्वाथ इष्टे पीठे कृत्वा स्थापयित्वा सकलीकरोतु ॥ २१६ ॥

पुनरिज्योदितानि पूजापटलोक्तानि पुनराचमनावसानानि अर्घ्यान्तानि पाद्यादीनि वा सदन्तरसनापवनानि दन्तकाष्ठजिह्वाशोधनसाधनसहितानि तान्यस्मै दत्त्वा बहु बहुशो गण्डूषकं सपाद्यकाद्यं समर्घ्यं संस्नाप्याथ पाद्यं साचमनं प्रदद्यात् ॥ २१७ ॥

आपोहिपुरस्सरैः 'आपो हि ष्ठा'दिभिर्मन्त्रैः प्रोक्ष्य मधुघृतेन मधुसहितघृतेन अक्त्वाभ्यज्य हरिद्रादिभिश्चूर्णैर्घृष्ट्वा शुभैर्जलैरासिच्य मन्त्रतोयैरपि 'प्राणापानव्याने'त्यादिभिः सप्तशुद्धिमन्त्रजलैः पुरुषसूक्तादिमन्त्रजलैरपि समभि-

---

१. 'मन्त्रैः सं' क. पाठः. २. 'ना' ख. ग. घ. ङ. च. पाठः.

वस्त्रादीनि समर्प्य चोपहरणानि त्रीणि दूर्वाङ्कुरान्
पुष्पं चन्दनमञ्जनागरुरसौ चास्मै प्रदद्यात् क्रमात् ॥

सम्भूष्यादर्शमपि परिदृश्यार्चयित्वा गणेशं
दत्त्वा गोभ्यो यवसमितिहासादिकं श्रावयित्वा ।
विप्रेभ्यस्तण्डुलघटसुवर्णादि दत्त्वाथ देवं
प्राच्योद्धास्य प्रकृतशयनाद्यं नयेन्मूलधाम ॥ २१९ ॥

मूलार्चामभिषिच्य पीठमभिपूज्यात्र प्रकल्प्याणवीं
मूर्तिं तत्र सुयोज्य कौतुकगतं देवं पुरोक्ताणुभिः ।
अन्वावाह्य निजेन मूलमनुना कृत्वा सहाङ्गीक्रियां
तस्मिन् साम्प्रतिकार्चनादिकविधिं कुर्वीत सर्वं ततः ॥

यात्राहोममथादधीत विनिधायाग्निं यथोक्तक्रमात्
कृत्वास्मिन् परिवारहोमचरमं सर्पिर्हुनेदेकशः ।

षिञ्चेत् । वस्त्रादीनि त्रीणि वस्त्रोपवीतभूषणान्युपहरणानि समर्प्यास्मै दूर्वाङ्कुरान् पुष्पं चन्दनमञ्जनागरुरसौ च क्रमात् प्रदद्यात् ॥ २१८ ॥

संभूष्यालङ्कृत्य आदर्शं दर्पणमपि परिदर्श्य गणेशमर्चयित्वा गोभ्यो यवसं दत्त्वा इतिहासादिकं महाभारतपुराणादीनि श्रावयित्वा विप्रेभ्यः तण्डुलघटसुवर्णादि तण्डुलपूर्णघटं सुवर्णं तिलं गवादिकं च दत्त्वाथ देवं प्राच्यं प्रकृतशयनाद्यं प्रस्तुतशयनबीजाङ्कुराद्यमुद्धास्य देवं मूलधाम प्रासादं नयेत् ॥ २१९ ॥

पुनर्मूलार्चामभिषिच्य पीठमभिपूज्यात्राणवीं मन्त्रमयीं मूर्तिं प्रकल्प्य तत्र पुरोक्ताणुभिः पुरोक्तप्रकारेण कौतुकगतं देवं सुयोज्यान्वावाह्य स्वस्मादपि निजमन्त्रेणावाह्य सहाङ्गीक्रियां सकलीक्रियां कृत्वा सांप्रतिकार्चनादिकविधिं संप्रति योग्यं पूजादिकं च सर्वं ततः कुर्वीत ॥ २२० ॥

अथ यात्राहोममादधीत । कथं, यथोक्तक्रमात् स्वगृह्योक्तक्रमादग्निं विनिधायास्मिन् सामान्यन्यायेन परिवारहोमचरमं कृत्वा कनिक्रदत्प्रभृतिभिः

षण्मन्त्रैश्च कनिष्ठदत्प्रभृतिभिः स्वस्त्यादिपञ्चाणुभि-
श्चाथ स्वेन जुहोतु मूलमनुना द्रव्याणि चत्वार्यपि[1] ॥
गत्वा गर्भगृहं समिष्टनिजपीठे देवमास्थापितं
संस्नाप्याचमनीयकावधि समर्प्य प्रोक्ष्य चाप्यादिभिः ।
चूर्णैस्तण्डुलमुद्गमाषयवहेमादिक्षपागन्धजैः
स्थाणावग्निहृदाजिते द्रुपदया शेषेषु चोद्वर्तयेत् ॥ २२२ ॥
संस्नाप्य सम्पूज्य तथैव वा तं
कृत्वा तदग्रे शुचि कर्मबिम्बम् ।
तीर्थेति मन्त्रेण गुहे गणेशे-
ऽप्यन्येषु कर्मेत्यणुनार्थयेत ॥ २२३ ॥
तीर्थादिगमनाद् यावद् देवाभिगमनं पुनः ।
तावत् त्वं कौतुकमिदमधिष्ठाय प्रसीद नः ॥ २२४ ॥
कर्मार्चा तीर्थयात्रार्थं तवेयं कल्पिता विभो! ।
तीर्थयात्रां कुरुष्वास्यां सङ्गम्यानुग्रहाय नः ॥ २२५ ॥

षण्मन्त्रैः स्वस्त्यादिपञ्चाणुभिश्च एकशः एकैकशः सर्पिर्हुनेत् । अथ स्वेन मूलमनुना चत्वारि द्रव्याण्यपि जुहोतु ॥ २२१ ॥

पुनर्गर्भगृहं गत्वा समिष्टनिजपीठे आस्थापितमावाहितं (देवं) संस्नाप्य आचमनीयकावधि पाद्यार्घ्याचमनीयानि समर्प्य च आप्यादिभिः 'आपोहिष्ठा'दिपुण्याहमन्त्रैः प्रोक्ष्य तण्डुलमुद्गमाषयवहेमादिक्षपागन्धजैः । हेमादीत्यादिशब्देन लोहचूर्णानि गृह्यन्ते । गन्धाः स्वस्वकलशोक्ताः । तैश्चूर्णैः स्थाणौ अग्निहृदा[3] अघोरास्त्रेण, अजिते द्रुपदया 'द्रुपदादिवेन्मुमुचान' इत्यनया ऋचा, शेषेषु स्वस्वमूलेन चोद्वर्तयेत् ॥ २२२ ॥

तं संस्नाप्य संपूज्य निवेद्य प्रसाद्य वा तथैवोद्वर्तनानन्तरमेव वा तदग्रे शुचि पूर्ववच्छोधितं कर्मबिम्बं कृत्वा विन्यस्य गुहे गणेशेऽपि 'तीर्थाभिगमनादि'ति अन्येषु 'कर्मार्चा तीर्थयात्रे'ति मन्त्रेण चार्थयेत ॥ २२३ ॥

मन्त्रद्वयं पठति — तीर्थेति कर्मेति च ॥ २२४, २२५ ॥

---

१. 'पि ॥ तीर्थार्थमत्रैव जुहोतु वाज्यं स्वैः पञ्चमन्त्रैः पृथगष्टसङ्ख्यम् । तीर्थोपकण्ठाहितपावके वा कुर्यात् ततः स्विष्टकृदादिशेषम् ॥ ग' ग. घ. पाठः. २. 'श्च चूर्णैः' क. पाठः. ३. 'ह्रा' ङ. पाठः.

सम्पातं प्रसमर्प्य मूलमनुबेम्बात् कर्मबिम्बे ततो
देवं प्रोक्तविधानतः समभिवाह्याधाय साङ्गीकृताम् ।
मूलार्चां परिरक्ष्य कौतुकगतं देवं गृहीत्वा बहि-
र्निर्गच्छेन्निजमूर्तिपैः सह सुधीर्मङ्गल्यवादं वदन् ॥
जगन्निर्माणसंहारस्थित्यनुग्रहहेतवः ।
देवनामाश्वरा देवा मङ्गलं प्रदिशन्तु नः ॥ २२७ ॥
अन्तर्विकीर्य बलिमेकपरिक्रमेण
बाह्ये च तद्ध्वजचितीः प्रविलाप्य देवे ।
क्षेत्रेशगुप्तसदनोऽन्यगणैः प्रयातु
देवं निजे समधिरोप्य रथादियाने ॥ २२८ ॥
द्वाःस्थादियज्वा यजमानयुक्तो
दिङ्मन्त्रतः सालबहिः परीत्य ।

पुनर्यात्राहोमजं संपातं तन्मन्त्रैः प्रसमर्प्य ततो मूलबिम्बात् कर्मबिम्बे प्रोक्तविधानतः 'प्रष्ठोद्गीथोपचारैरि'त्यादिश्लोकोक्तविधानतः देवं समभिवाह्य साङ्गीकियामाधाय मूलार्चां परिरक्ष्य कौतुकगतं देवं गृहीत्वा निजमूर्तिपैः सह मङ्गल्यवादं वदन् निर्गच्छेत् । सुधीरिति मङ्गल्यवादे सावधानतोक्ता ॥ २२६ ॥

मङ्गल्यवादस्यादिश्लोकपठनेन तच्छेषमपि जप्तव्यमिति सूचयति — **जगन्निर्माणेति** ॥ २२७ ॥

पुनरन्तर्बहिश्च एकपरिक्रमेण एकैकेन प्रदक्षिणेन तत्तद्दिशि पूर्वप्राप्तानां परिवाराणां पूर्वपूर्वक्रमयोगेन बलिं भूतबलिं विकीर्य तदा तद्ध्वजचितीश्च देवे विलाप्योद्वास्य क्षेत्रेशगुप्तसदनः क्षेत्रपालं तत्पुररक्षणार्थं तत्रैव स्थितं कल्पयित्वा अन्यगणैरन्यपरिवारैः सह देवं निजे रथादियाने । निज इत्यनेन यानस्य स्वस्ववाहनत्वकल्पनं स्वस्ववाहनमन्त्रेणाराधनं च सूचितम् । तत्र समधिरोप्य सम्यक् स्थापयित्वा प्रयातु गच्छेत् ॥ २२८ ॥

यजमानयुक्तो महामर्यादाप्राकारगोपुरे द्वाःस्थादियज्वा द्वाःस्थाविष्ट्वा बलिं दत्त्वा बहिरपि सर्वभूतेभ्यो बलिं दत्त्वा दिङ्मन्त्रतः 'ये भूता' इत्यादिमन्त्रेण सालबहिः प्राकारबहिर्भागे बलिं दत्त्वा परीत्य हविष्याम्बुघटादि-

---

१. 'ब्जामेभि', २. 'दान्' क. पाठः.

अर्वाग् व्रजेद् योजनतः समेतो
विप्रैर्हविष्या[illegible]धटादिहस्तैः ॥ २२९ ॥

शङ्खप्रेङ्खचटुलपटहोत्तालतालोरुभेरी-
रङ्गच्छृङ्गोडुमरडमरूद्दीप्रवीणाप्रवीणाः ।
ढक्का[illegible]काविरल[illegible]रलीकमठाश्चाभियायुः
[illegible] मा[illegible]हेला महेलाः ॥ २३० ॥

पञ्चवाद्यवरवादनाविधाचुञ्चवोऽस्य पुरतः प्रयान्त्विह ।
छत्रचाम[illegible]धारिणोऽभितः पृष्ठतो जयजयादिवादिनः ॥

हस्तैः बलिदानसाधनसहितैर्विप्रैः समेतो योजनतोऽर्वाक् योजनात् किञ्चिदून-मध्वानं व्रजेत् गच्छेत् ॥ २२९ ॥

इह गमने तं देवं शङ्खप्रेङ्खचटुलपटहोत्तालतालोरुभेरीरङ्गच्छृङ्गोडुम-रुडमरूद्दीप्रवीणाप्रवीणाः शङ्खेन सह प्रेङ्खति शब्दायमाने चटुले समी-चीने पटहे वाद्यविशेषे, उत्ताले उद्गच्छत्कालक्रियामानयुक्ते ताले च वाद्यविशेषे, उर्व्यां बृहत्यां भेर्यां च, रङ्गति शब्दविशेषं कुर्वति शृङ्गे मुखवाद्यविशेषे च, उ-डुमरे शब्दायमाने च डमरौ वाद्यविशेषे च, उद्दीप्रायां प्रकाशनशीलायां वीणायां च प्रवीणाः कुशलाः ढक्काढुक्काविरलमुरलीकर्मठाश्च ढक्कायां ढुक्कायां च वाद्यवि-शेषयोः अविरल[illegible]यां मुरल्यां च कर्मठाः कर्मणि कुशलाश्च स्फायद्दीपाः प्रज्वलद्दीपयुक्ताः महितोद्दामहेलाः महनीयाश्च विशृङ्खलविलासयुक्ताः म-हेलाः प्रौढा युवतयश्च अभियायुः अग्रे गच्छेयुः ॥ २३० ॥

इहैव गमने पञ्चवाद्यवरवादनाविधाचुञ्चवः तेषां विशिष्टवाद्यानां वा-दनाविधायां प्रयोगे चुञ्चवः प्रसिद्धाः अस्य देवस्य पुरतः प्रयान्तु । छत्रचा-मरविधारिणः छत्राणि चामरादीनि च विशेषेण धारिणः अभितः पार्श्वयोश्च जयजयादिवादिनः स्तुतिपाठकाश्च पृष्ठतश्च प्रयान्तु ॥ २३१ ॥

१. 'यां च मु' क. च. पाठः.

आसाद्य नद्यादिविशिष्टतीर्थं तत्सम्मुखं न्यस्य समिष्टपीठे।
साङ्गीक्रियाद्यं प्रविधाय तस्मै दद्यादू द्वितीयाचमनावसानम्॥
विशोधिते तीर्थजले जलेशादीज्यातदर्हाहुतिजाज्यसिद्धे।
त्रिमज्जयेत् तज्जलसम्मुखीनं देवं सुधीः स्वैरथ पञ्चमन्त्रैः॥
पीठेऽत्रैव निधाय देवमर्चयाचामनिष्ठं क्रमा-
न्मन्त्री तन्मनुभिः प्रमार्ज्य महितैश्चूर्णैः समुद्वर्त्य च।
नाभीदघ्नजले स्थितोऽसुयमनं कुर्वन्नुदंशान्तभि-
र्मन्त्रैरस्य कृताघमर्षणविधिस्तीर्थे पुनः स्नापयेत्॥
पीठे निवेश्य वसनाद्यमथोपहृत्य
देवं समर्च्य विनिवेद्य निवेद्यमग्नौ।

पुनर्नद्यादिविशिष्टतीर्थं नदीनदादिप्रसिद्धतीर्थं पुण्यजलस्थानमासाद्य तत्समीपे समिष्टपीठे तत्सम्मुखं तीर्थाभिमुखं यथा तथा न्यस्य साङ्गीक्रियाद्यं प्रविधाय तस्मै देवाय द्वितीयाचमनावसानमुपहरणं दद्यात्॥ २३२॥

धारणादिभिर्विशोधिते जलेशादीज्यातदर्हाहुतिजाज्यसिद्धे तीर्थे वरुणदेवं च पृथक् पृथगावाह्य पूजिते तद्योग्यपञ्चतत्त्वमन्त्रादिहुतसंपातसंस्पृष्टे च तीर्थजले तज्जलसम्मुखीनं तज्जलाभिमुखीकृतं देवमथ स्वैः स्वैः पञ्चमन्त्रैः सुधीस्तज्जलैर्देवस्याप्यायनं स्मरन् त्रिः त्रिवारं मज्जयेत्॥ २३३॥

अत्रैव पूर्वपीठ एव निधाय आचामनिष्ठं पाद्यार्घ्याचमनान्युपचर्य मन्त्री 'आपोहिष्ठा'दिमन्त्रज्ञः तन्मनुभिः प्रोक्षणमन्त्रैः क्रमात् प्रमार्ज्य अभ्युक्ष्य महितैः पूजितैः हेमनिशादिभिश्चूर्णैः समुद्वर्त्य नाभीदघ्नजले नाभिप्रमाणजले स्थितो भूत्वा 'ऋतं च सत्यं चादि'भिर्मन्त्रैः असुयमनं प्राणायामं कुर्वन् कृताघमर्षणविधिः कृताघमर्षणकर्मा तत्र तीर्थे पुनरपि स्नापयेत्॥२३४॥

अथ पीठे[1] पुनरपि निवेश्य वसनाद्यं वस्त्रोपवीताद्यमुपहृत्य देवं समर्च्य निवेद्यं विनिवेद्य अग्नौ हुत्वा पूजाहोमं विधाय उक्तवत् तीर्थे बलिमपि

---

१. 'ठे नि' ख. ग. घ. ङ. च. पाठः.

त्वोक्तवद् बलिमपे प्रविकीर्य पूजा-
शेषं समाप्य मनुनेति निवेदयेच्च ॥ २३५ ॥

तीर्थेऽस्मिन् पावने पुण्ये स्नातोऽसि [illegible] ।
अतस्त्वमुद्गृह्णीष्व स्वस्थानोपाश्रयेण नः ॥ २३६ ॥

हरिविषये मनुरेवं परेषु परमेश्वरादिपदमत्र ।
पुरुषोत्तमपदविषये कुर्यात् स्वस्वोचितं मन्त्री ॥ २३७ ॥

उद्धास्य तीर्थं निजवाहने त-
मारोप्य मूलालयमागमय्य ।
तस्मिन्नहन्येव नियोज्य मूल-
बिम्बेऽभिषिच्य प्रयजेच्च देवम् ॥ २३८ ॥

तस्मिन् परस्मिन्नथवाह्नि देवं समुक्तनीत्या कलशैः प्रभूतैः ।
संस्नाप्य यात्रोदितदोषशान्त्यै समर्चयेद् भूतबलिं किरेच्च ॥

प्रविकीर्य पूजाशेषं समाप्य इति वक्ष्यमाणमनुना निवेदयेच्च ॥ २३५ ॥

तन्मनुं पठति — तीर्थेऽस्मिन्निति ॥ २३६ ॥

हरिविषये विष्णौ एवं मनुः । परेषु देवेषु अत्र पुरुषोत्तमपदविषये पुरुषोत्तमशब्दस्थाने मन्त्री मन्त्रपदयोजने कुशलः स्वस्वोचितं स्वस्वयोग्यं परमेश्वरादिपदं कुर्याद् योजयेत् ॥ २३७ ॥

ततस्तीर्थमुद्धास्य तं देवं निजवाहने पूर्ववदारोप्य मूलालयमागमय्य तस्मिन्नहन्येव मूलबिम्बे नियोज्याभिषिच्य देवं यथावत् प्रयजेच्च ॥ २३८ ॥

तस्मिन् परस्मिन् वा अह्नि तद्दिने उत्तरदिवसे वा समुक्तनीत्या कलशपटलोक्तरीत्या प्रभूतैर्बहुभिः कलशैर्दैवं यात्रोदितदोषशान्त्यै स्वस्थानाद् दूरगमनदोषशान्त्यै संस्नाप्य समर्चयेत् । भूतबलिं च किरेत् ॥ २३९ ॥

१. 'त्वाभितो ब' ख. पाठः. २. 'मु'. ३. 'कुर्यात् ॥' क पाठः.

इति तन्त्रसमुच्चये ध्वजेज्या-
बलिसंवेशनतैर्थिकक्रियाढ्यः ।
नवमोऽनवमार्थदायिदेवो-
त्सववादी पटलः प्रगुम्फितोऽभूत् ॥ २४० ॥

इति तन्त्रसमुच्चये
नवमः पटलः ।

पटलमुपसंहरति — इतीति । तन्त्रसमुच्चये ग्रन्थे नवमः पटलः प्रगुम्फितो बद्धोऽभूत् । कथंभूतः, अनवमार्थदायिदेवोत्सववादी अनवमानुत्कृष्टानर्थान् धर्मादिपुरुषार्थान्(दायिनः) दानशीलस्योत्सवस्य वादी । कथंभूतः पुनरुत्सवपरिकरः, ध्वजेज्याबलिसंवेशनतैर्थिकक्रियाढ्यः ध्वजेज्यया ध्वजस्थापनपूजया, बलिना भूतबलिनोत्सवबलिना च, संवेशनेन स्वापनेन च, तैर्थिकक्रियया तीर्थस्नानक्रियया च आढ्यः परिपूर्णः॥ २४० ॥

इति तन्त्रसमुच्चयविमर्शिन्यां
नवमः पटलः ।

---

१. 'जनादिभिः ब' क. घ. पाठः.

अथ दशमः पटलः ।

देवे स्वभक्तजनता-जिघृक्षयार्चौ-
पाधौ तथा नियत-सन्निधिमादधाने ।
श्रेयोदुरासदतया तदपासनार्थं
स्याद्वेन्निमित्तमथ निष्कृतिमादधीत ॥ १ ॥
क्षेत्रे मृतिर्जननमङ्गणमण्डपादौ
मूत्रासृगादिपतनं पतितादिवेशः ।
सोलूकगृध्रकरटश्वखरोष्ट्रकोल-
क्रोष्टृवृक्षडुण्डुभपुरस्सरगर्भवेशः ॥ २ ॥

एवं नवभिः पटलैः भूमिपरिग्रहादितीर्थाभिषेकावधिकं क्रमेण तूक्तं कर्मकलापमभिधायाथ प्रतिष्ठितस्य देवस्यावश्यकर्तव्याया नित्यपूजायाः केनापि निमित्तेन विरोधे प्राप्ते तत्परिहाराय दशमपटलेन निष्कृतिं वदन् तत् प्रस्तौति — देव इति । स्वभक्तजनतानुजिघृक्षया स्वस्मिन् भक्तस्य जनसमूहस्यानुग्रहेच्छया अर्चौपाधौ प्रतिमारूपे स्वाश्रये तथा उक्तक्रियाभिः नियतसन्निधिं नित्यसान्निध्यम् आदधाने कुर्वाणे देवे पूजकस्य श्रेयोदुरासदतया श्रेयसो दुष्प्रापकत्वाद्धेतोर्गर्हितं निमित्तं स्याद्चेत् संभवेद् यदि अथ तदनन्तरमेवाविलम्बितं तदपासनार्थं तस्य दुर्निमित्तस्य परिहाराय निष्कृतिं प्रायश्चित्तमादधीत ॥ १ ॥

निमित्तानि गणयति — क्षेत्र इति । क्षेत्रे मर्यादासीमाया अन्तर्भागे मृतिर्जननं च मनुष्याणां मरणं जननं च । अङ्गणमण्डपादौ प्रासादालिन्दाङ्गणमण्डपबलिपीठिकादौ मूत्रासृगादिपतनम् आदिशब्देन पुरीषादिकं च । पतितादिवेशः पतिताः स्वकुलाद् भ्रष्टाः तेषां चण्डालादीनां च गोपुरादन्तः प्रवेशः । सोलूकगृध्रकरटश्वखरोष्ट्रकोलक्रोष्टृवृक्षडुण्डुभपुरस्सरगर्भवेशः सोलूकः उलूकश्च (उलूकं=ഉമൻ. ഗൃധ്രം=കഴുക്. കരടം=കാക്ക) श्वा सारमेयः (ഖരം=കഴുത. ഉഷ്ട്രം=ഒട്ടകം. കോലം=പന്നി. ക്രോഷ്ടാ=കുറുനരി. ഋക്ഷം=വാനരം. ഡുണ്ഡുഭം=പാമ്പ്) । पुरस्सरशब्देन श्येनकुक्कुटादयः । एतेषां गर्भगृहप्रवेशः ॥ २ ॥

---

१. 'श्येनकं' ख. ग. घ ङ. च. पाठः.

बिम्बस्य पातचलनादिरथ प्रदाह-
स्वेदप्ररोदहसितानि तथाद्भुतानि ।
छत्राकनाकुमधुकादिसमुद्गमाश्च
पूजाविलुप्तिरपि चासति दिष्टदोषे ॥ ३ ॥

क्षुद्रान्यमन्त्रयजनं प्रतिषिद्धदुष्ट-
पुष्पादिपूजनमथो मरिचादिलेपः ।
एतानि तन्त्रकथितानि निमित्तकानि
ज्ञेयानि तत्र गुरुलाघवभेदवन्ति ॥ ४ ॥

प्रासादोऽर्चा च विश्वेशितुरिह वपुषी स्थूलसूक्ष्मे यतोऽतो-
ऽत्राधाराधेयभावादितरतरभवोऽन्यत्र चाभ्येति दोषः ।

अथ बिम्बस्य पातचलनादिः पतनचलनस्फुटनादीनि । तथाद्भुतानि आश्चर्यभूतानि प्रदाहस्वेदप्ररोदहसितानि प्रदाहः औष्ण्यं, स्वेदः स्वेदजलस्रवः, प्ररोदः भावे दुःखप्रतिभानम् । छत्राकनाकुमधुकादिसमुद्गमाश्च (ഛത്രാകം=കുൺ. നാകു=പുറ്. മധുകം=തേൻ. ഞൊടിശബ്ദേന കടന്നൽക്കൂടാദി)। दिष्टदोषे निर्दिष्टदोषे असति अभावे निमित्ताभावे पूजाविलुप्तिरपि । अनेन निमित्ते सति पूजा न कार्येत्यपि सूचितम् ॥ ३ ॥

क्षुद्रान्यमन्त्रयजनम् आभिचारकर्मणे क्षुद्रमन्त्रेण पूजनं च । प्रतिषिद्धदुष्टपुष्पादिपूजनं निषिद्धैरशुद्धैर्वा पुष्पादिभिः पुष्पगन्धजलनिवेद्यादिभिः पूजनम् । अथो मरिचादिलेपः मरिचादितीक्ष्णद्रव्यैर्लेपनं च । एतानि तन्त्रकथितानि तन्त्रेषु कथितानि निमित्तकानि । तत्र तेषु मध्ये गुरुलाघवभेदवन्ति एतद् गुरु एतल्लघ्विति भेदेन साधकैर्ज्ञेयानि ॥ ४ ॥

तच्छोधनादिकं प्रस्तौति — प्रासाद इति । इह दोषे सति प्रासादोऽर्चा च विश्वेशितुः देवस्य स्थूलसूक्ष्मे वपुषी प्रासादः स्थूलं वपुः प्रतिमा सूक्ष्मं वपुरिति यतः यस्मात् अतोऽस्माद्धेतोः अत्रानयोराधाराधेयभावात् प्रासाद आधारः प्रतिमा त्वाधेयमिति व्यवस्थापितत्वाद् इतरतरभवः तयोरेकस्मिन्नुद्भूतो दोषोऽन्यत्र चाभ्येति प्राप्नोति प्रासादस्थो दोषः प्रतिमां प्राप्नोति प्रतिमास्थः प्रासादं च । अत्रानयोरेकस्थितेऽपि दोषे प्रासादे प्रति-

दोषेऽत्रैकस्थितेऽप्याचरतु तदुभयोः शोधनं स्थानसंस्थे
तद्वत् तच्छोधनाद्यं यदि न परकृतावस्रुतोक्षा स्थलेऽलम्[1] ॥

खननं हरणं दाहः पूरणं गोनिवासनम् ।
विप्रैरिष्टं च गव्यं च सप्तैताः स्थानशुद्धयः ॥ ६ ॥

खदिरकृतखनित्रेणास्त्रेण खात्वा
निर्ऋतिदिशि बहिस्तत्पांसुजातं निरस्य ।
दहतु हुतभुजा दर्भादिना भस्म हुत्वा-
प्लुतयतु पशुमूत्रब्रह्मपादोदगव्यैः ॥ ७ ॥

कौशादिमृद्भिरभिपूर्य विलोड्य दार्व्य-
मापाद्य हस्तिचरणैरथ गा निवास्य ।

मायां वापि स्थिते दोषेऽपि तदुभयोः शोधनमाचरतु । प्रासादप्रतिमाभ्यामन्यत्र कुत्रचित् स्थाने स्थितो दोषश्चेत् किं कर्तव्यमित्यत्राह — स्थानसंस्थ इत्यादिश्लोकशेषेण । दोषे स्थानसंस्थे सति तच्छोधनाद्यं स्थानशोधनमाद्यं यथा भवति तथा तद्वत् प्रासादप्रतिमयोः शोधनमाचरतु । न यदि दोषः स्थानसंस्थो न चेत् स्थले सर्वत्र परकृतावस्रुतोक्षा इतरत्र कृतेन सम्पादितेनावस्रुतेनोक्षणमेव अलं पर्याप्तं भवति ॥ ५ ॥

स्थानशुद्धिं क्रमेणादिशति — **खननमिति** । एताः सप्त स्थानशुद्धयः स्युः ॥ ६ ।'

एताः क्रमेण विवृणोति — **खदिरेति** । खदिरेण कृतेन खनित्रेण खननसाधनेनास्त्रमन्त्रेणाशुद्धस्थलं यथादोषं खात्वा बहिर्निर्ऋतिदिशि तत्पांसुजातं दोषयुक्तं पांसुपटलं निरस्य दर्भादिना तद्वर्ते दर्भसमित्कुशादिकं निक्षिप्यास्त्रमन्त्रेण हुतभुजा अग्निना तत्स्थलं दहतु । तद्भस्म हुत्वा त्यक्त्वा पशुमूत्रब्रह्मपादोदगव्यैः गोमूत्रैर्ब्राह्मणपादोदकैः पञ्चगव्यैश्च आप्लुतयतु आप्लुतं करोतु ॥ ७ ॥

कौशादिमृद्भिः कुशदर्भादिस्थानाद् गृहीताभिर्मृद्भिस्तद्वर्तमभिपूर्य विलोड्य शुद्धैर्जलैरार्द्रीकृत्य **हस्तिचरणैर्**गजपादाकारैः पालाशादिकाष्ठविशेषैः

---

१. 'लम् ॥ सद्यः शवादिकमशेषमपास्य तत्र संमार्जनादिषु कृतेषु यथोपपत्ति । संक्षालने प्रथमतो बहुवारिभिर्वा स्नानादिकृद् गुरुवरः खननादि कुर्यात् ॥ ख' क. ग. घ. पाठः.

स्थानं विशोध्य परिकल्पित[illegible]त्र
सम्भोजयेद् द्विजवरान् सघृतं पयोन्न[illegible] ॥ ८ ॥
[illegible]च्छिष्टमुद्धृत्य विशोध्य भूमिं
गव्येन सिञ्चेद् विकिरैः किरेच्च ।
मूलेन तत्रा[illegible]दले सरोजे
देवं यथावत् परि[illegible]जयेच्च ॥ ९ ॥
दोषे सति स्थानगतेऽस्य शुद्धिं
[illegible]त्वेति [illegible]त्रत्रयवेष्टनाद्याम् ।
प्रासादशुद्धिं प्रविधाय पुण्या-
हान्तां विदध्यादथ बिम्बशुद्धिम् ॥ १० ॥
क्षालनप्लावनस्नानमार्जनानि यथाक्रमम् ।
धा[illegible]वगाहसेकाश्च सप्तैता बिम्बशुद्धयः ॥ ११ ॥

दार्ढ्यं स्थैर्यमापाद्याथ गाः धेनूर्निवास्य पुनस्तत्स्थानं विशोध्य परिकल्पितमण्डपे मण्डपाकारेण चतुर्दिशमावृत्यात्र द्विजवरान् आभिजात्यविद्यातपोयुक्तान् ब्राह्मणश्रेष्ठान् सघृतं पयोन्नं संभोजयेत् इच्छाभोजनं कुर्यात् ॥ ८ ॥

उच्छिष्टमुद्धृत्य भूमिं विशोध्य गव्येन सिञ्चेत् । विकिरैश्च किरेत् । अष्टदले सरोजे अष्टदलपीठादियुक्तं पद्मं कृत्वा तत्र मूलेन देवमावाह्य यथावत् परिपूजयेच्च ॥ ९ ॥

दोषे स्थानगते सति अस्य स्थानस्य शुद्धिम् इति उक्तप्रकारेण कृत्वा तत्र सूत्रत्रयवेष्टनाद्यां पुण्याहान्तां प्रासादशुद्धिं तृतीयपटले प्रोक्तक्रमेण प्रविधायाथ बिम्बशुद्धिं विदध्यात् ॥ १० ॥

बिम्बशुद्धीरुद्दिशति — क्षालनेति । क्षालनप्लावनस्नानमार्जनानि चत्वारि, धारावगाहसेकास्त्रयः सेकः पञ्चस्नानम् एताः सप्त यथाक्रमं बिम्बशुद्धयो भवन्ति ॥ ११ ॥

---

१. 'विधिज्ञः प' क. ग. पाठः. २. 'स्थानं विशोध्येति यथाईमुपवीतोऽथ सू' क. ग. घ. पाठः. ४. 'ल' ख. ग. घ. ङ. च. पाठः.

पात्रं पीठसमर्चनाद्युदितकल्प्त्या दर्भमृत्त्वग्जलै-
रेकं साक्षतगन्धपुष्पसलिलैर्न्यक्कूर्चकं चापरम्।
अन्यत् कूर्चयुतं हिरण्यफलयुक्तैस्तैः पिधानान्वितं
तुर्यं चापि तथा प्रपूर्य मनुवित् प्राच्यं प्रसाध्याग्रतः॥
तूष्णीं दर्भमृदादिभिः प्रथमतः सङ्घृष्य संक्षाल्य तद्
बिम्बं पीठयुतं द्वितीयसलिलैराप्लाव्य चामन्त्रतः।
संस्नाप्य स्नपने तृतीयसलिलैः शान्तिं स्मरन् मन्त्रतः
कूर्चाग्रैर्विधिवत् प्रमार्ज्य च तुरीयैर्देवमभ्यर्चयेत्॥१३॥

ता बिम्बशुद्धीर्विवृणोति — **पात्रमिति**। मनुवित् क्षालनादिचतुश्शुद्धौ[1] मन्त्रसम्बन्धं क्रमेण योजयेत्। गुरुरग्रतो देवस्याग्रभागे पीठसमर्चनाद्युदितकल्प्त्या प्रत्येकं पीठपूजापात्रशोधनादिकल्प्त्या चतुर्षु पात्रेषु मध्ये एकमग्निकोणस्थितं, न्यक्कूर्चकमिति सर्वत्र सम्बध्यते, दर्भमृत्त्वग्जलैः दर्भशकलैर्वल्मीकमृदा क्षीरिद्रुमत्वग्भिर्जलैश्च, अपरं निर्ऋतिकोणस्थितं पात्रं साक्षतगन्धपुष्पसलिलैश्च, अन्यद् वायुकोणगतं कूर्चयुतम् अपरेणापि कूर्चेण युतं हिरण्यफलयुक्तैः साक्षतगन्धपुष्पसलिलैश्च, तुर्यं चतुर्थम् ईशकोणगतं तैरुक्तैर्द्रव्यैः पिधानान्वितं चापि तथा क्रमेण प्रपूर्य प्राच्यं प्रसाध्य सम्पाद्य प्रथमतः प्रथमद्रव्यैर्दर्भमृदादिभिः तूष्णीं मन्त्रसम्बन्धं विना पीठयुतं तद् बिम्बं संघृष्य संक्षाल्य द्वितीयसलिलैश्चामन्त्रत आप्लाव्य स्नपने स्नानकाले शान्तिं स्मरन् मन्त्रतः संस्नाप्य तुरीयैश्च कूर्चाग्रैर्विधिवत् प्रमार्ज्य प्रोक्ष्य देवमभ्यर्चयेत्। प्रत्येकं देवं पूजयेदिति केचित्॥ १२, १३॥

---

१. 'त्॥
दोषे भूयसि मुष्टिभिस्तु तिसृभिर्वल्मीकतीर्थाकर-
क्षमाभृन्मृद्भिरहार्यवारमिह तूष्णीं क्ष्रौं निजास्त्रेण च।
पिष्टैर्द्रुग्धतरुत्वचामपि विघृष्यार्चां पृथक् क्षालयेत्
तत्तोयैर्मतिमानघोर इह शर्वादौ नृसिंहास्पदे॥
पूर्णे प्रोक्षनयेन शान्त्युपनिषन्मूलैर्महत्पात्रमि-
ष्ट्वावर्त्याष्टशतं च बिम्बममुना मन्त्रं परिप्लावयेत्।
तैरेव स्नपयेदतो वसुशतं पात्रान्तरेणार्णुभिः
प्रोक्षेत् तैः क्रमविद् गुरुः सपवमानाब्लिङ्गहोत्रादिभिः॥
ऐ' क, 'त्॥ ऐ' घ. पाठः. २. 'चि' ख. घ. च. पाठः.

आप्यैश्च पावमानैश्च होतृभिश्चेह मार्जनम् ।
कुर्वीत सर्वदेवेषु ब्रह्मभिश्चापि शूलिनि ॥ १४ ॥

ऐशान्यां धान्यराशौ हरिति[1] सुमहिते योगपीठे[2] कटाहं
लौहं संसाद्य संस्कृत्य च तदनु समुत्तानितेऽधोग्रकूर्चम् ।
विन्यस्यापूर्य वारा नवपटपरिपूतेन[3] मन्त्री जलेऽस्मिन्
विन्यस्येन्मत्स्ययुग्मं कमठयुगमपि स्वर्णदुर्वर्णकल्पे ॥

पद्मिनीं ससुमनोमृणालिनीं न्यस्य तत्र वरुणं सतीर्थकम् ।
प्रार्च्य देवमपि सन्निधाप्य तत्संस्पृशन् जपतु वारुणादिकम् ॥

पालाशादित्रिपदकलितं लोहजं हेमरन्ध्रं
धारापात्रं स्नपनसमयेऽधोग्रकूर्चं प्रकल्प्य ।

इह मार्जने सर्वदेवेषु आप्यैः 'आपोहिष्ठे'त्यादिभिः, पावमानैः 'स्वादिष्ठये'त्यादिभिः होतृभिः 'चित्तिस्रुगा'दिभिश्च मार्जनं कुर्वीत । शूलिनि एतैः पञ्चभिर्ब्रह्मभिश्चापि ॥ १४ ॥

चतुश्शुद्ध्यनन्तरमेव धारां कुर्यादित्याह — ऐशान्यामिति । देवस्य ऐशान्यां हरिति दिशि धान्यराशौ सुमहिते पूजिते योगपीठे लौहं लोहमयं कटाहं संसाद्य संस्कृत्य तदनु समुत्तानिते अधोग्रकूर्चं विन्यस्य नवपटपरिपूतेन नवीनवस्त्रगालितेन वारा जलेनापूर्यास्मिन् जले स्वर्णदुर्वर्णकल्पे सुवर्णेन रजतेन च कल्पे मत्स्ययुग्मं कमठयुगमपि विन्यस्येत् ॥ १५ ॥

तत्र ससुमनोमृणालिनीं पुष्पपत्रमृणालवतीं पद्मिनीं न्यस्य सतीर्थकं वरुणमावाह्य प्रार्च्य देवमपि सन्निधाप्य सम्पूज्य तत् पात्रं संस्पृशन् मन्त्री पञ्चवारुणादिमन्त्रज्ञः वारुणादिकम् 'अवते हेलः' 'उदुत्तमं वरुण' 'इमं मे वरुण' 'तत्त्वायामि' 'त्वन्नो अग्ने' इति पञ्चवारुणम् आदिशब्देन 'प्रसुव आप' इत्यादिसूक्तं च जपतु ॥ १६ ॥

पुनर्देवस्य पीठपूजापूर्वमावाह्य स्नपनसमये पालाशादित्रिपदकलितं पालाशादियाज्ञिकवृक्षकल्पत्रयधृतं लोहजं लोहेन निर्मितं हेमरन्ध्रं हेम्ना क-

---

१. 'दिशि महितमहायो' ख. पाठः. २. 'विष्टरे स्वे क' क. ग. घ. पाठः.
३. 'वविमलपट्टीगालितेनोदकेऽस्मिन्' ख. पाठः.

पादानिष्ट्वा प्रणवलिपिभिस्तेन पात्रं च कूर्चं
चास्मिन् पात्रे न्यसतु[1] च पुनर्गन्धपुष्पाक्षतानि ॥ १७ ॥
पात्राद् वार्यथ वारुणादधिदरं कृत्वाश्चितेनामुना[2]
तत् पात्रं परिपूर्य मूलमनुना तच्छेषतोयैरपि ।
तत्कूर्चाग्रविनिर्गतामविरलां धारां समापातये-
दर्चामूर्धनि याममात्रमभिजप्यैतान्[3] मनूंस्तन्मनाः ॥१८॥
मन्त्रान् पञ्च निजान् जपेयुरभितः पात्रं स्पृशन्तो द्विजाः
गायत्रीं दशतारकां सकलवेदादीन् स्वकीयान्यपि ।
सूक्तादीनि सपावमानपुरुषाम्नायान्तिकानि क्रमा-[4]
ज्जप्या वाखिलसंहिताऽत्र कथितान्याद्यन्तजप्यानि च ॥

लिप्तरन्ध्रप्रदेशं धारापात्रमधोग्रकूर्चं च प्रकल्प्य प्रणवलिपिभिः 'अं नमः' 'उं नमः' 'मं नमः' इति पादानिष्ट्वा तेन प्रणवेन पात्रं कूर्चं चेष्ट्वास्मिन् पात्रे । गन्धपुष्पाक्षतानि च न्यसतु ॥ १७ ॥

वारुणात् पात्रात् अधिदरं शङ्खे वारि कृत्वा अश्चितेन पूजितेनामुना मूलमनुना तच्छेषतोयैरपि तत्पात्रं परिपूर्य अर्चामूर्धनि प्रतिमाया मूर्ध्नि याममात्रं कालम् एतान् वक्ष्यमाणान् मन्त्रानभिजप्य तन्मना भूत्वा तत्कूर्चाग्रविनिर्गतां तत्कूर्चाग्रात् स्यन्दमानां धारामविरलामविच्छिन्नां समापातयेत् ॥

तत्काले अभितः परितः उपविश्य पात्रं दर्भैः स्पृशन्तो द्विजाः पूर्वं निजान्[5] वक्ष्यमाणान् पञ्च मन्त्रान् जपेयुः । दशतारकां गायत्रीं दशप्रणवगायत्रीमित्यर्थः । सकलवेदादीन् ऋग्यजुस्सामाथर्वणादीन् । स्वकीयानि वैष्णवादीनि सूक्तादीन्यपि सपावमानपुरुषाम्नायान्तिकानि । पावमानं 'स्वादिष्ठा'दिकम् । पुरुषसूक्तं 'सहस्रशीर्षा'दिकम् । आम्नायान्तिकं 'वात आवात्वा'दिकम् । अथवा अखिलसंहिता क्रमाज्जप्या । अत्र तथाचेत् कथितानि सर्वाणि आद्यन्तजप्यानि स्युः ॥ १९ ॥

---

१. 'क्षिपतु' क. ग. घ. पाठः. २. 'ह', ३. 'सावित्रीम्' इति मूलकोशपाठः. ४. 'दि' ख. पाठः. ५. 'न् प' क. ख. ग. घ. च. पाठः.

रुद्रे कद्रुद्रपूर्वं स्वभुवि पुनरतोदेवपूर्वं द्वयं त-
च्छार्ङ्गीशे यातऊत्यादिकमिदमुभयं चार्यके तारकारौ ।
अग्निर्होतादिकं स्वं प्रजपतु गणपेऽथो गणानांपदाद्यं
रुद्रोक्तं च द्वयेऽस्मिन् महिषजिति सजातादिकं वैष्णवं च॥
यामावसाने सुसमाप्य धारां देवं यथाविध्यभिपूजयेत ।
न चालयेद् वारुणमत्र पात्रं दिनत्रये यत्र करोति धाराम् ॥
और्ध्वाह्निके पर्युषिताम्बु हृत्वा
कृत्वान्यदिष्ट्वा प्रकरोतु शेषम् ।
वारे तृतीये वरुणं च देवे
प्रोद्वास्य तत्पूजनमादधीत ॥ २२ ॥

स्वस्वसूक्तान्याह — रुद्र इति । रुद्रे कद्रुद्रपूर्वं 'कद्रुद्राय प्रचेतस' इत्यादिकं प्रजपतु । स्वभुवि विष्णौ 'अतो देवा' इत्यादिकं, शार्ङ्गीशे तद् द्वयं 'कद्रुद्रा'दिकम् 'अतो देवा'दिकं च, आर्यके यातऊत्यादिकं 'या त ऊतिरव-मे'त्यादिकम् इदमुभयं रौद्रं वैष्णवं च, तारकारौ 'अग्निर्होता नो अध्वर' इत्यादिकम्, अथो गणपे गणानांपदाद्यम् , अस्मिन् द्वये स्कन्दे गणपे च रुद्रोक्तं च, महिषजिति सजातादिकं 'जातवेदस' इत्यादिकं वैष्णवं च प्र-जपतु ॥ २० ॥

यामावसाने त्रिपादसहितत्रिनाडिकावसाने धारां सुसमाप्य देवं यथा-विध्यभिपूजयेत । यथाविधीत्यनेन तदानीमेव पूजायाः योग्यतेत्यभिप्रायः । यत्र दिनत्रये धारां करोति, तत्र वारुणं पात्रं न चालयेत् । एतेन दिनत्रये धारा कर्तव्या, आपत्पक्षे त्वेकदिनमित्यपि सूचितम् ॥ २१ ॥

और्ध्वाह्निके[२] अनन्तरदिवसगतायां धारायां पर्युषिताम्बु अतिक्रान्त-दिवसगतं जलं हृत्वा त्यक्त्वा अन्यच्छुद्धजलं कृत्वा सम्पाद्य इष्ट्वा तीर्थवरु-णादिकमिष्ट्वा[३] शेषं प्रकरोतु । तृतीये वारे दिवसे धारावसाने वरुणं देवं च देवे प्रोद्वास्य तत्पूजनं धारापूजनम् आदधीत ॥ २२ ॥

१. 'त्रां' क पाठः. २. 'यां च प' ख. पाठः. ३. 'ण' ङ पाठः.

पात्रे पीठसमर्चनादिमहिते न्यक्कूर्चके स्वाणुभि-
र्गोमूत्रप्रमुखानि पञ्च परिमीयायोज्य गव्यान्यथ ।
तानि ब्रह्ममथा विलोड्य मपरेणाभ्यर्च्य मूलाणुना[1]
गन्धोदं च तथावगाहविधये सम्पूज्य संसाधयेत् ॥२३॥
गोमूत्रं निजवाञ्छया परिमितं मूत्रार्धकं गोमयं
क्षीरं सप्तगुणं दधि त्रिगुणितं गोमूत्रमात्रं घृतम् ।
प्राहुस्तत्सवितुर्वरेण्यमिति गन्धद्वारपूर्वं तथा-
प्यायस्वेति दधीति तेज इति गोमूत्रादिमन्त्रान् क्रमात् ॥
देवे पुनः स्नपनकर्मणि कर्मठोऽथ
ब्रह्मद्रुमादिकृतपञ्जरमाकलय्य ।
संवेष्टय बिम्बमपि साधु सदर्भवस्त्रै-
र्गव्यैः प्रपूर्य तनुयादवगाहकर्म ॥ २५ ॥

अवगाहविधिमाह — **पात्र** इति । अथावगाहविधये पीठसमर्चनादिमहिते पीठपूजापात्रशोधनतत्पूजादिके न्यक्कूर्चके अधःकूर्चयुक्ते पात्रे स्वाणुभिः स्वस्वमन्त्रैः गोमूत्रप्रमुखानि पञ्च गव्यानि परिमीयायोज्य परिमाणेन योजयित्वा ब्रह्ममथा पालाशेन मथनसाधनेन तान्यालोड्य एकीकृत्य मपरेण प्रणवेनाभ्यर्च्यापरस्मिन् पात्रे मूलाणुनाष्टगन्धोदकं चाभ्यर्च्य संसाधयेत् वस्त्रेणाच्छाद्याधिवास्य रक्षेत् ॥ २३ ॥

तेषां परिमाणं मन्त्रं चाह—**गोमूत्रमिति** । तत्र गोमूत्रं निजवाञ्छया परिमितं स्यात् । मूत्रार्धकं गोमूत्रार्धकं गोमयं स्यात् । गोमूत्रात् सप्तगुणं क्षीरं स्यात् । गोमूत्रात् त्रिगुणितं दधि स्यात् । गोमूत्रमात्रं तत्तुल्यं च घृतं स्यात् । गोमूत्रादिमन्त्रान् क्रमात् 'तत् सवितुर्वरेण्यमि'ति. गन्धद्वारपूर्वं 'गन्धद्वारां दुराधर्षाम्' इत्यादि, तथाच 'आप्यायस्वे'ति, 'दधिक्राव्ण' इति, 'तेजोऽसी'ति आचार्या आहुः ॥ २४ ॥

अथ कर्मठः कर्मणि कुशलो गुरुः स्नपनकर्मणि पीठपूजादिस्नानकाले प्राप्ते देवे ब्रह्मद्रुमादिकृतपञ्जरं पलाशादियाज्ञिकैर्वृक्षैः कृतं पञ्जरम् आकलय्य निश्छिद्रं सन्धयित्वा बिम्बमपि सदर्भवस्त्रैः साधु संवेष्टय गव्यैः प्रपूर्यावगाहकर्म तनुयात् ॥ २५ ॥

---

१. 'ना पुष्पग' क. पाठः.

धारावदत्र परिजप्य मनूंश्च विप्रै-
स्तद्द्रव्यजातमपनीय सुगन्धतोयैः ।
अन्तेऽवगाह्य परिशोध्य समस्तमेतद्
देवं यथोक्तविधिना परिपूजयेच्च ॥ २६ ॥
तारं नादं शरलिपि महाव्योमविद्यादि पञ्च-
ब्रह्म श्रीरुद्रकमपि शिवे गाह्यमाने जपेयुः ।
सम्पातं संस्पृशतु च शतं ब्रह्मभिस्तत्र सर्पि-
र्हुत्वा चत्वार्यहिशतमघोरेण च द्रव्यकाणि ॥ २७ ॥
व्यस्तैः समस्तैरपि पञ्चगव्यैर्गन्धोदनिष्ठैः सुगरिष्ठदोषे ।
कार्योऽवगाहः क्रमशो दिनेषु तत्सेकमात्रेण च तल्लघिम्नि ॥
न्यक्कूर्चानर्चितैकासनसमधिगतान् पञ्च कुम्भान् क्रमेण
प्रापूर्येशादिसूक्तैः स्मरजिति सकलेष्वेव वा पञ्चतत्त्वैः ।

अत्र च विप्रैः सह धारावत् धारायामिव मनून् परिजप्य तद्द्रव्यजातमपनीय त्यक्त्वान्ते सुगन्धतोयैरवगाह्य एतत् समस्तं परिशोध्य यथोक्तविधिना देवं परिपूजयेच्च ॥ २६ ॥

तत्र शिवे गाह्यमाने अवगाह्यमाने तारं, नादं, प्रासादं, शरलिपि पञ्चाक्षरं, महाव्योमविद्या महाव्योमव्यापिचतुश्शताक्षरी । आदिशब्देन दशाक्षर्यादिकमुच्यते । पञ्चब्रह्म सद्योजातादीनि प्रसिद्धानि, श्रीरुद्रं च प्रसिद्धम्, एतानि मूर्तिपाः पात्रं स्पृशन्तो जपेयुः । तत्र शिवेऽग्रतोऽग्निमाधायाग्निमुखावसाने पञ्चभिर्ब्रह्मभिः शतं सर्पिः, अघोरेण अहिशतम् अष्टोत्तरं शतं चत्वारि द्रव्यकाणि च हुत्वा तदानीं तत्सम्पातं संस्पृशतु च ॥ २७ ॥

सुगरिष्ठदोषे सुतरां गुरुतरे दोषे दिनेषु एकैकदिनेष्वपि व्यस्तैः पृथग्भूतैः समस्तैर्युक्तैश्च पञ्चगव्यैः गन्धोदनिष्ठैः गन्धोदावसानैः क्रमशोऽवगाहः कार्यः । तल्लघिम्नि तस्य दोषस्य लघुतायां तत्सेकमात्रेण पञ्चगव्याभिषेकमात्रेणालम् ॥ २८ ॥

सप्तमीं शुद्धिमाह — न्यक्कूर्चानिति । अर्चितैकासनसमधिगतान् अर्चित एकस्मिन्नेव पीठे स्थितान् न्यक्कूर्चान् अधःकूर्चान् पञ्च कुम्भान् स्मरजिति ईशादिसूक्तैः 'ईशानः सर्वविद्यानामि'त्यादिभिर्मन्त्रैर्वा मध्यादिक्रमेण, सकलेषु

तैरेवेष्ट्वा ध्रुवैकीकृत इह निजमूलाणुनावाह्य देवं
साङ्गीकृत्यार्चयित्वा विधिवदथ पृथङ् मन्त्रयेच्च स्वमन्त्रैः[1]॥
पीठार्चनादिस्नपनावसानं कृत्वाथ मध्यादिघटैः क्रमेण ।
स्वपञ्चमन्त्रैरभिषिच्य देवं तन्न्यासपूर्वं परिपूजयेच्च ॥ ३० ॥
कृत्वा शुद्धिमिहावगाहचरमां तत्संस्थतत्त्वव्रजं
संहृत्य प्रविलाप्य चात्मनि परस्मिन् धारणाभिस्ततः ।
बिम्बं साधु विशोध्य तात्त्विकमयं प्रोद्भाव्य दिव्यं वपु-
र्मन्त्राध्वप्रसमिद्धमेभिरभिषिञ्चेद् वा घटैः[2] पञ्चभिः[3] ॥

सप्तस्वपि देवेषु पञ्चतत्त्वैरेव वा प्रापूर्य तैरेवेष्ट्वा ध्रुवैकीकृते प्रणवेनैकीकृत इह निजमूलाणुना देवमावाह्य साङ्गीकृत्य विधिवदर्चयित्वाथ स्वस्वमन्त्रैः पृथङ् मन्त्रयेत् जपेच्च ॥ २९ ॥

अथ देवस्य पीठार्चनादिस्नपनावसानं कृत्वा स्वस्वपञ्चमन्त्रैर्मध्यादिघटैः क्रमेण देवमभिषिच्य तन्न्यासपूर्वं पञ्चतत्त्वन्यासादि पूर्वं यथा भवति तथा परिपूजयेच्च ॥ ३० ॥

दोषाधिक्ये विशेषमाह — कृत्वेति । इहावगाहचरमां शुद्धिं कृत्वा तत्संस्थतत्त्वव्रजं तद्बिम्बस्थिततत्त्वसमूहमधिवासपटलोक्तक्रमेण संहृत्य परस्मिन्नात्मनि प्रविलाप्य ततो धारणाभिर्बिम्बं साधु उक्तक्रमेण विशोध्य तात्त्विकमयं तत्रैवोक्तक्रमेण तत्त्वस्वरूपं दिव्यं वपुः प्रोद्भाव्य प्रकर्षेणोद्भूतं कारयित्वा मन्त्राध्वप्रसमिद्धं मूलमन्त्रावाहनषडध्वन्यासादिभिः प्रकर्षेण सन्दीप्तं तम् एभिः पञ्चभिर्घटैरभिषिञ्चेत् । वेति समुच्चयार्थः ॥ ३१ ॥

---

१. 'न्त्रैः ॥ दिश्यैश्यां धान्यपीठे कुशयुजि कलशान् पञ्च हेमाश्मगर्भान् गन्धाद्भिः संप्रपूर्याणकमलयजनाद् येषु कृत्वोक्तमन्त्रैः । सर्वैरावाह्य साङ्गीकरणयजनकृत्तानथाभ्यर्च्य तेषामेकैकेनाभिषिच्यार्चयतु महति दोषे क्रमध्यादिभिस्तम् ॥ पी' क. पाठः.
२. 'टैर्दोषावत् ॥' क. ग. घ. पाठः. ३. 'भिः ॥

पुण्याहमुक्तविधिना सहमूर्तिपालो बिम्बे विधाय महितेन सगव्यकेन ।
राज्यक्षतेन सुविकीर्य च पञ्चमन्त्रैः शेषेण वोक्षतु किरत्वपि सर्वतोऽत्र ॥
कुर्याद् दोषे महति तु पुनः प्रोक्षणं मृष्टलिप्ते
शन्नोवार्भिः सशुचिभिरिमा गन्धवार्भिः समुक्षेत् ।
प्रासादान्तर्बहिरपि तथा सर्वतः पञ्चतत्त्वै-
र्गव्यैश्चाज्येन विकिरतु राज्यक्षतैश्चाथ मन्त्री ॥

पुण्याहावधि शुद्धिरेवमखिले कार्या गुहे वाग्रतः
कौमारं कलशं पुरोवदभिपूर्यावाह्य चार्घ्यादिदः ।

अखिले देवे एवमुक्तप्रकारेण शुद्धिः पुण्याहावधि पुण्याहप्रोक्षणमवसाने यथा भवति तथा कार्या । गुहे दोषाधिक्ये महाकुम्भप्रोक्षणं कुर्यादित्याह — गुहे वेत्यादिना । अत्राग्रतो मार्जनादिभिः शोधिते स्थले षड्दलं

कृत्वा भद्रकमत्र संराचतपीठे रत्नगर्भे महा-
कुम्भे पौरुषसूक्तशुद्धजलपूर्णे स्विष्टवर्णाम्बुजे ।
मूलेन प्रयजेद्धरिं विधिवदाधारेषु विष्णुं महा-
विष्णुं मन्त्रविदर्चयेदथ सदाविष्णुं त्रितत्त्वान्वयात् ॥
अस्त्रेण वर्धनीं तद्वामत इष्ट्वा हुतं विधाय ततः ।
सम्पातशान्तितोयं तयोर्निषिच्याभिमन्त्रयेतापि ॥
पुंविष्णोर्मनुभिर्जुहोत्वथ च चित्तिस्रुक्सस्रुहोत्राचतु-
ष्पद्वोत्राज्यमथेषुतत्त्वजितसाविज्यास्त्यभूरादिभिः ।
मन्त्री हंस इति त्रिमूलजिनवर्णैर्मूलतः खादिरै-
र्ब्रीह्यार्वा सघृतान्नलाजतिलराजीश्चाष्टयुक्तं शतम् ॥
बिम्बेऽर्कवर्णबिससूत्रजकौतुकाढ्ये कुम्भे गुहे तु सामिदादिहुतान्ततोऽत्र ।
वेदाणुमात्रकृतवास्तुहुताज्यभाजि सम्पातशेषत उपस्पृशतु त्रिमूलैः ॥
प्रातः स्विष्टासनावाहितविभुविहितार्घ्यादिरिष्ट्वा परावा-
राढ्यं तं कुम्भमत्रानयतु करकधारापथेनाथ मन्त्री ।
तेन प्रोक्ष्याभिषिच्यार्चयतु च शमनोरित्यदशेषतोऽन्त-
र्धान्नः प्रोक्षेद् बहिश्चावृतिगणमणुभिः स्वैरितीत्थं हरौ स्यात् ॥
कृत्वा स्वस्तिकभद्रकं त्विह महाकुम्भ हरे पञ्चर-
त्नाढ्यं ब्रह्मभिरन्तरष्ट परिकुम्भान् दिक्षु चापूरयेत् ।
मन्त्री घोरकलाणुभिर्यजतु तैर्मन्त्रैर्यथाहं सुधीः
सम्पातं हुतकृत् सशान्त्युदकमिष्ट्वासिच्य मन्त्रान् जपेत् ॥
मध्याशास्वीशपूर्वैर्जुहुयुरिह समित्पायसव्रीहिलाजान्
व्याशासु त्र्यम्बकाद्येन च सहतिलराजीफलानाज्यनिष्ठान् ।
प्रत्येकं चाष्टयुक्तं शतमिह समिधो ब्रह्मसालोद्भवाः स्युः
पश्चात् प्रासादसंस्थं प्रयजतु विधिवत् कर्मवित्तं च देवम् ॥
सद्यो वोतापरेद्युर्विधिवदुपचिते पीठ आवाह्य देवं
स्नानान्तं प्राप्य संस्नापयतु मनुविदेनं महाकुम्भतोयैः ।
पूजाशेषं च कुर्यादथ तदुपघटैरष्टमूर्त्यादि सर्वं
संस्नाप्यावस्तुतेनायतनभुवमपि प्रोक्ष्य रक्षोदितीशे ॥

कृत्वा षड्दलमण्डलं शिखिमुखद्रव्याज्यमन्त्रेषुजे कौमारं' क. ग. घ. पाठः.

पुण्याहं स्नपने विधाय परिपूर्याप्च्छेषतोऽभ्यर्चयेद्
गव्यं तत्सविधे निधाय विकिरं चास्त्रेण संसाधयेत् ॥
विकिरमिह व्रीहियवं तिलमाषकुलत्थसर्षपं च तथा ।
दूर्वादर्भकुशाग्रं तुलसीदलनलिनकेसरं चाहुः ॥ ३३ ॥
आद्यं रौद्रं घटमभिमृशन्तो निजं शाकुनं च
स्वस्तिश्रीदैवतमपि जपेयुः शमाद्यं नृसंज्ञम् ।
सूक्तं यस्मिन्प्रभृतिकमथो वातआद्यं द्विमूलं
साङ्गं गायत्र्यणुमपि तथा षड्द्विषण्णामतारान् ॥ ३४ ॥

मण्डलमालिख्य विरचिते पीठे 'पीठान्ते ब्रह्माणमि'त्याद्युक्तप्रकारेण ब्रह्मादिभिः साकं पीठपूजां कृत्वा कौमारं कुमारदेवत्यं कलशं निधाय यथोक्तक्रमेण संशोध्योत्तानीकृत्य पुरोवद्धिरण्मयान् पद्मगजशिखिशक्तिवज्रान् निधायाभिपूर्य लिपिपङ्कजमिष्ट्वात्र स्कन्दमावाह्यार्घ्यादिदः अर्घ्याद्युपहारदो भूत्वा स्नपने स्नपनकाले कलशस्य पुण्याहं विधाय अप्च्छेषतः पुण्याहजलशेषेण च परिपूर्य परिवारपूजायां वज्रादेः प्रागित्यादिभिः सह पुरोवदभ्यर्चयेत् । तस्सविधे तस्योदग्भागस्थस्वस्तिकयोर्गव्यं विकिरं च निधायास्त्रेणाभ्यर्च्य संसाधयेत् ॥ ३२ ॥

तत्रत्यं विकिरद्रव्यमाह — **विकिरमिति** । इह व्रीहियवं तिलतण्डुलमाषसर्षपं च तथा दूर्वादर्भकुशाग्रं दूर्वादर्भकुशानामग्राणि तुलसीदलं पद्मकेसरं च विकिरमाहुः ॥ ३३ ॥

अथो मूर्तिपाः घटमभिमृशन्तः स्पृष्टवन्तः आद्यम् 'अग्निमील' इत्याद्यं सूक्तं, रौद्रं 'कद्रुद्राये'त्याद्यं श्रीरुद्रं च, निजम् 'अग्निर्होता नो अध्वर' इत्याद्यं, शाकुनं 'कनिक्रददि'त्याद्यं, स्वस्तिश्रीदैवतं 'स्वस्ति नो मिमीतामि'त्याद्यं 'हिरण्यवर्णामि'त्याद्यं च, शमाद्यं 'शन्न इन्द्राग्नी' इत्याद्यं, नृसंज्ञं पुरुषसूक्तं, यस्मिन्प्रभृतिकं 'यस्मिन् ऋक्षे सुपलाश' इत्याद्यं, वातआद्यं 'वात आवात्वि'त्याद्यं, साङ्गम् अङ्गसहितं द्विमूलं मूलमन्त्रद्वयं, गायत्र्यणुमपि, षड्द्विषण्णामतारान् षण्मन्त्रान् द्वादशनाममन्त्रान् प्रणवं च जपेयुः ॥ ३४ ॥

---

१. 'गादिल्या' ख. ग. घ. च. पाठः. २. 'लं' क. पाठः.

स्नाने तत्कलशेन देवमभिषिच्याब्लिङ्गमूलाह्वयै-
स्तच्छेषेण कुशद्विजद्रुमशमीशाखाग्रकैः प्रोक्ष्य च ।
गव्योक्षां विकिरार्पणं च सुविधायैतत्त्रिशेषार्पणं
कृत्वा तत्परिषत्सु शेषभुजि चाथो देवमभ्यर्चयेत् ॥ ३५ ॥
निमित्तवित्ताद्युपपत्तिकल्पसंपारायणाढ्यं प्रविधाय चैवम् ।
सामान्यशुद्धिं विदधीत तत्तद्दोषोपशान्त्यै विहितं हुतं च ॥
अर्धेन्दुरूपे दिशि दक्षिणस्यां सुरालयस्यारचितेऽग्निकुण्डे ।
महेशविष्ण्वीशगुहप्रभेशविघ्नेश्वरेषु प्रथमं जुहोतु ॥ ३७ ॥
वज्राणूल्लिखितेऽस्त्रमन्त्रविहितोक्षेऽआश्रिते विष्टरे
स्थाणौ सेशहरौ सवामभुवनेश्यावाह्य चेष्ट्वानया ।

अथान्तर्गत्वा पीठपूजापुरस्सरं देवमावाह्य स्नाने स्नानकाले तत्कलशेनाभिषिच्य तच्छेषेण कुशद्विजद्रुमशमीशाखाग्रकैः कुशपलाशशम्यग्रैः **अब्लिङ्गमूलाह्वयैः** 'आपोहिष्ठा'दिभिर्मूलाभ्यां षण्णामभिर्द्वादशनामभिश्च प्रोक्ष्य तथास्त्रमन्त्रेण गव्योक्षां विकिरार्पणं च सुविधाय तत्परिषत्स्वपि एतत्त्रिशेषार्पणं कलशजलगव्यविकिरैरर्पणं कृत्वा शेषभुजि धूर्तसेनेऽपि कृत्वाथो देवमभ्यर्चयेत् ॥ ३५ ॥

निमित्तवित्ताद्युपपत्तिकल्पसंपारायणाढ्यं निमित्तस्यार्थस्य, आदिशब्देन कालदेशादेरप्युपपत्त्या कल्पितेन वेदत्रयजपपारायणेनाढ्यं परिपूर्णं यथा भवति तथा सामान्यशुद्धिमेवं विधाय तत्तद्दोषोपशान्त्यै विहितं हुतं च विदधीत ॥ ३६ ॥

तत्र शङ्करप्रोक्तादीन् होमान् विधत्ते — **महेशविष्ण्वीशगुहप्रभेशविघ्नेश्वरेषु** पञ्चसु देवेषु प्रथमं प्रायश्चित्तादिहोमेभ्यः पूर्वं सुरालयस्य प्रासादस्य दक्षिणस्यां दिशि अर्धेन्दुरूपे अर्धचन्द्राकारेणारचितेऽग्निकुण्डे जुहोतु ॥३७॥

तत्र शङ्करप्रोक्ताख्यस्य होमस्य पूर्वोक्तादग्निजननाद् विशेषमाह — **वज्राणूल्लिखित** इति । सेशहरौ स्थाणौ वज्राणूल्लिखिते द्वादशपटले वक्ष्यमाणः प्रणवद्वयमध्यगतो हुंफट्कारो वज्रमन्त्रः तेनोल्लेखने कृते अस्त्रमन्त्रविहितोक्षे

---

१ 'त्या' क. पाठः.

सद्याक्तेशसुजसघोरमहिताजक्षिसहृत्पूजिते
पञ्चाग्नौ शिववामघोरनृशिवैः कुर्यात् क्रमेण क्रियाः ॥
प्रारभ्य तत्राग्निमुखं निजोक्तनीत्या स्व पार्श्वे कलशं प्रपूज्य ।
पक्वं च पञ्चप्रणवादिनास्येनाहृत्य पूजामनुभिश्च सर्पिः ॥३९॥
भीमाजाह्वयवामवक्त्रमनुभिः सौदुम्बरीमार्गजा-
ज्यान्नान्यष्टसहस्रकं वसुशतं पुंसा तिलान् सर्षपान् ।
मुद्गव्रीहियवान् घृताक्तनवदूर्वाग्राष्टसाहस्र-
मप्येतेनाष्टशतं जुहोतु दधिमध्वाज्यानि जुंसाणुना ॥
आज्यं प्राग्वज्जनितदहनेऽत्र प्रधानादि कृत्वा
षड्भिः षड्विंशतिपरिमितैः स्वाह्वयैश्च प्रभेशे ।

अस्त्रमन्त्रेण विहिता उक्षा उक्षणं यत्र अत्र अर्चिते पूजिते विष्टरे पीठे सवामभुवनेश्या वामदेवयुक्तया भुवनेश्वर्या आवाह्य अनया भुवनेश्वर्या च सद्याक्तेशसुजसघोरमहिताजक्षिसहृत्पूजिते सद्योजातेनाक्ते गृहीते ईशानेन सुतरां जसे अघोरेण पूजिते अजेन सद्योजातेन निक्षिप्ते प्रासादहृदयेन पूजिते चाग्नौ शिववामघोरनृशिवैः ईशानवामदेवाघोरतत्पुरुषेशानैः क्रमेण गर्भाधानपुंसवनसीमन्तजातकर्मनामकरणाख्याः पञ्च क्रियाः कुर्यात् ॥ ३८ ॥

तत्र शङ्करप्रोक्ते निजोक्तनीत्या स्वगृह्योक्तक्रमेणाग्निमुखं प्रारभ्य परिधिस्थापनात् पूर्वं तत्पार्श्वदेशे कलशं प्रपूज्य परिधिस्थापनाद्यनन्तरं पञ्चप्रणवादिना आस्येन तत्पुरुषेण पक्वं पूजामनुभिः सर्पिश्चाहृत्य भीमाजाह्वयवामवक्त्रमनुभिः अघोरसद्योजातवामदेवतत्पुरुषमन्त्रैः सौदुम्बरीमार्गजाज्यान्नानि उदुम्बरापामार्गघृतहवींषि प्रत्येकमष्टसहस्रं जुहोतु । तिलान् सर्षपान् मुद्गव्रीहियवांश्च पुंसा तत्पुरुषेण वसुशतमष्टोत्तरशतं च जुहोतु । घृताक्तनवदूर्वाग्राष्टसाहस्रं घृताक्तानां नवीनानां दूर्वात्रिकाणाम् अष्टोत्तरं सहस्रमपि एतेन तत्पुरुषेण जुहोतु । दधिमध्वाज्यानि प्रत्येकमष्टशतं जुंसाणुना मृत्युंजयमन्त्रेण च जुहोतु ॥ ३९,४० ॥

अत्र रेवन्तप्रोक्तस्कन्दप्रोक्तयोर्होमयोः प्राग्वद् अष्टक्रियाभिर्जनितदहने प्रधानादि पक्वहोमादिपूजामन्त्रहोमान्तं कृत्वा प्रभेशे द्वादशे पटले वक्ष्यमाणैः षड्भिः षड्विंशतिपरिमितैश्च स्वाह्वयैः स्वनामभिः 'ओं रेवन्ताय स्वाहा' इत्या-

---

१. 'याः ॥ भी' ख. पाठः.

षण्मूलाणुद्वितयजिनवर्णाणुभिर्बाहुलेये
षड्द्वन्द्वाख्यामनुभिरपि भूरादिमन्त्रैश्च हुत्वा ॥ ४१ ॥

बैल्वीरार्येऽत्र नैपीः शरभुवि समिधोऽथ द्वयोराज्यमन्नं
षण्मन्त्रैर्लाजराजीयवतिलमपि हुत्वा शतं द्व्युत्तरं तु ।
आज्यं क्षीरं दधि क्षौद्रमपि वसुशतं व्याहृतीभिः क्रमेण
त्रिस्वाद्वक्ताम्रिसाहस्रकमपि जुहुयात् जुंसमन्त्रेण दूर्वाः ॥

षण्मन्त्रैरेकमेकशो वसुशतं वैतैरधीवासगं
द्रव्यं बिल्वसमिद्घृतादिकमपूपान्तेऽत्र वा लड्डुकम् ।
भूरादैः क्रमशो दधिस्तनजमध्वाज्यं गणानामृचा
गौलं चाष्टशतं जुहोतु गणपे गव्यं च मूलाणुना ॥ ४२ ॥

दिभिः, बाहुलेये स्कन्दे षण्मूलाणुद्वितयजिनवर्णाणुभिः षण्मन्त्रैः मूलमन्त्रद्वयेन गायत्र्या च षड्द्वन्द्वाख्यामनुभिः द्वादशनाममन्त्रैरपि भूरादिमन्त्रैरपि व्याहृतिभिश्चाज्यं हुत्वा, आर्ये बैल्वीः समिधः, शरभुवि नैपीः कदम्बोद्भवाश्च समिधः। अथ द्वयोः आर्यस्कन्दयोः आज्यमन्नं लाजराजीयवतिलमपि समिदादिसप्तद्रव्यं षण्मन्त्रैः स्वस्वषण्मन्त्रैः सप्तदशकृत्व आवर्त्तितैः द्व्युत्तरं शतं हुत्वा आज्यं क्षीरं दधि क्षौद्रमपि व्याहृतीभिश्चतसृभिः क्रमेण वसुशतमष्टोत्तरशतं त्रिस्वाद्वक्ताः त्रिमधुरसिक्ता दूर्वाश्च जुंसमन्त्रेण मृत्युञ्जयेन त्रिसाहस्रमपि जुहुयात् ॥ ४१,४२ ॥

गणपे पूजामन्त्रहोमान्ते षण्मन्त्रैरेकशो वा वसुशतम् अष्टोत्तरशतं वा प्रथमं घृतं जुहोतु । पुनरेतैः षण्मन्त्रैः अधीवासगम् अधिवासगतं बिल्वसमिद्घृतादिकं बिल्वसमिदाज्यचरुलाजपृथुकलड्डुकापूपशष्कुल्याज्यानि नवद्रव्याणि । अत्र विघ्नप्रोक्ते अपूपान्ते वा लड्डुकाष्टशतं च जुहोतु । पृथुकादिनामान्युक्तानि । पुनर्भूरादैः क्रमशो दधिस्तनजमध्वाज्यं दधिक्षीरमध्वाज्यानि चाष्टशतं जुहोतु । गणानामृचा गौलं च, मूलाणुना गव्यं चाष्टशतं जुहोतु । अत्र गव्यशब्देन घृतमेवोच्यते इति केचिदाहुः । तथा क्रियासारे वैन्ने—

विश्वद्रव्यैरिति शिवशिवश्रीशयोः स्कन्दशास्त्रो-
रेकन्यूनैर्द्विरदवदने द्व्युत्तरैश्चापि देवम् ।
हुत्वा मन्त्रैर्हवनविहितैः स्नापयेत् तद्घटाद्वि-
स्तत्र स्थानाद्यधिगतमहोत्पातदोषोपशान्त्यै ॥ ४४ ॥

अथाग्रतोऽग्निं प्रजनय्य कुण्डे
तत्पार्श्वदेशे कलशं प्रपूज्य ।
कुर्यात् कृशानौ परिधानपक्व-
होमार्चनामन्त्रहुतिक्रियाद्यम् ॥ ४५ ॥

"विप्रगायत्रिया पक्वं षण्मन्त्रैर्जुहुयाद् घृतम् ।
अष्टोत्तरशतं भूयः समिदादीनि होमयेत् ॥
पूर्णाहुतिं तु मूलेन सर्वत्रैव ददेत् पृथक् ।
वैश्वास्तु समिधः प्रोक्ता हुनेदष्टोत्तरं शतम् ॥
समिदाज्यचरून् लाजान् पृथुकापूपलड्डुकान् ।
क्रमाद् वै शष्कुलीनाज्यं व्याहृतीभिरतः परम् ॥
पृथक् पृथक् समस्ताभिरन्त्यमष्टशतं पृथक् ।
दधि क्षीरं मधु घृतं गणानांत्वेत्यृचा गुलम् ॥
मूलेनाष्टोत्तरशतं गव्यं होमं समापयेत् ॥"

इति ॥ ४३ ॥

शिवशिवश्रीशयोः विश्वद्रव्यैः त्रयोदशद्रव्यैः स्कन्दशास्त्रोः एकन्यूनैः द्वादशद्रव्यैः, द्विरदवदने द्व्युत्तरैः पञ्चदशद्रव्यैश्चापि हुत्वा होमं कृत्वा हवनविहितैः होमार्थमुक्तैर्मन्त्रैः तद्घटाद्भिः तत्तद्धोमकलशजलैः तत्र तत्र स्थानाद्यधिगतमहोत्पातदोषोपशान्त्यै स्थानादौ संभूतानां 'क्षेत्रे मृतिर्जननमि'त्याद्युक्तानां महोत्पातदोषाणामुपशान्त्यै देवं स्नापयेत् ॥ ४४ ॥

प्रायश्चित्तहोमं वक्ति — अथाग्रत इति । अथ देवस्याग्रतः कुण्डेऽग्निं यथोक्तक्रमेण प्रजनय्य तत्पार्श्वदेशे कलशं च प्रपूज्य कृशानौ परिधानपक्वहोमार्चनामन्त्रहुतिक्रियाद्यं परिधिस्थापनादिपक्वहोमपूजामन्त्रहोमपूर्णाहुतीः कुर्यात् ॥ ४५ ॥

मन्त्रैः पञ्चकचोदितैस्त्रिगुणसाहस्रं घृतं साष्टकं
साहस्रं समिदाज्यशालितिललाजानां पृथङ् मूलतः ।
भूराद्यैर्जुहुयात् पलाशसमिधोऽथ द्वादशोर्ध्वं शतं
सावित्र्याष्टशतं सदुग्धदधिमध्वाज्यानि चान्ते पृथक् ॥
एकत्रेति समन्ततोऽस्य चतसृष्वाशासु चाष्टासु वा
तद्वद्राशिषु वा विहृत्य दहनं कुण्डेषु तन्मन्त्रतः ।
तत्तद्दोषबलाबलानुसरणाद्धुत्वा समुक्तक्रमात्
तत्सम्पातघटैर्गुरुः स्नपितयेद् देवं च मध्यादिभिः ॥ ४७ ॥
ब्राह्मी मूलविभावसौ परिहुताशेष्वब्धिसङ्ख्येषु चेत्
क्षीर्युत्थाष्टसु चेत् पलाशखदिराश्वत्थोत्थिता प्लक्षजा ।

पञ्चकचोदितैः पञ्चकाभिषेके कथितैर्मन्त्रैः त्रिगुणसाहस्रं स्वस्वपञ्चमन्त्रैः षट्छतावृत्त्या त्रिसहस्रं घृतं जुहुयात् । समिदाज्यशालितिललाजानां पञ्चानां द्रव्याणां साष्टकं साहस्रं पृथगष्टोत्तरसहस्रं मूलतो जुहुयात् । अथ पलाशसमिधः भूरादिरष्टाविंशत्यावर्तितैश्चतुर्भिर्मन्त्रैः द्वादशोर्ध्वं शतं च, पुनरन्ते सदुग्धदधिमध्वाज्यानि चत्वारि सावित्र्या 'तत्सवितुरि'त्यादया पृथगष्टशतं जुहुयात् ॥ ४६ ॥

तत्तद्दोषबलाबलानुसरणात् तस्य तस्य दोषस्य दौर्बल्यप्राबल्यानुसारेण इत्येकत्र कुण्डे वास्य कुण्डस्य समन्ततः चतसृष्वष्टास्वाशास्वपि वा तद्वद्राशिषु मेषादिद्वादशराशिगतस्थानेषु वा कुण्डेषु दहनमग्निं तन्मन्त्रतः विहरणोक्तमन्त्रैर्विहृत्य गुरुमूर्तिपाः समुक्तक्रमात् हुत्वा गुरुरेव मध्यादिभिस्तत्सम्पातघटैर्देवं स्नपितयेत् ॥ ४७ ॥

मूलविभावसौ मध्यकुण्डस्थाग्नौ ब्राह्मी पालाशी समित् । परिहुताशेषु परितः स्थितेष्वग्निषु अब्धिसंख्येषु चतुस्संख्येषु चेत् क्षीर्युत्था स्वस्वतोरणक्रमेण क्षीरवृक्षोद्भवा समित् । परिहुताशेष्वष्टसु चेत् पलाशखदिराश्वत्थोत्थिता पलाशोत्थिता खदिरोत्थिता अश्वत्थोत्थिता च प्लक्षजा वटभवा बैल्वी

---

१. ब्रह्मद्रुजास्तु समिधो गुरुकुण्डहोम्यास्ता वा स्वतोरणभुवोऽथ चतुर्दिशासु । ईशाधिवासविहिताश्च तथाष्टदिक्षु पालाश्य एव दहनेषु पुनार्दिषट्सु । पत' क. ख. ग. पाठः

प्रागादिक्रमतः समिद् वटभवा बैल्वी तथौदुम्बरी
काष्मर्यप्यखिलेषु वा द्विजभवा सैवार्कसङ्ख्येषु चेत् ॥
पतनादिषु दोषेषु प्रकरोतु हरौ हरे च हुतमेवम् ।
शिवशार्ङ्गिण्युभयं वै शेषेष्वपि कैश्चिदिष्यते कुहचित् ॥
प्रासादस्य त्रिकोणं शशिदिशि यमदिश्यर्धचन्द्राभमेतत्
कुण्डं चाधाय वह्निं पृथगथ जनयित्वा समुक्तक्रमेण ।
होमं कुर्यात् कुमार्यां हरिवरुणदिशोश्चापि तुर्यश्रवृत्ते
कुण्डे दोषे गरिष्ठे चरतु हवनकर्मोत्तरैन्द्रादिकल्पत्या ॥५०॥
हुत्वात्र प्रथमं दिगुत्तरशतं दुर्गाभिराज्यं ततो
जातार्घैर्निजमूलतश्च पृतनाद्यैश्च त्रिभिर्युक्तमात् ।

औदुम्बरी काष्मर्यपि प्रागादिक्रमतः समित् । अखिलेष्वपि परितः स्थितेषु चतुर्ष्वष्टसु च द्विजभवा पालाशी वा । अर्कसंख्येषु द्वादशसु चेत् सैव पालाश्येव समित् स्यात् ॥ ४८ ॥

पतनादिषु 'बिम्बस्य पातचलनादिरि'त्याद्युक्तेषु दोषेषु सत्सु हरौ हरे च एवं हुतं होमं प्रकरोतु । शिवशार्ङ्गिणि उभयं द्विविधं होमं प्रकरोतु । शेषेषु देवेषु कुहचिद् विघ्नादिष्वपि कैश्चिदिष्यते ॥ ४९ ॥

दुर्गायां प्रायश्चित्तहोमविशेषमाह—**प्रासादस्ये**ति । (कुमार्यां)प्रासादस्य शशिदिशि उत्तरभागे त्रिकोणं कुण्डं, यमदिशि दक्षिणभागेऽर्धचन्द्राभम् एतत् प्रस्तुतं कुण्डं चाधाय समुक्तक्रमेण सप्तक्रियाभिर्वह्निं पृथग् जनयित्वाथ होमं कुर्यात् । होममिति जातावेकवचनम् । दोषे गरिष्ठे गुरुतरे सति हरिवरुणदिशोः प्राक्पश्चिमदिशोश्चापि तुर्यश्रवृत्ते चतुरश्रे वृत्ते चापि कुण्डे तद्वदग्निं पृथग् जनयित्वा उत्तरैन्द्रादिकल्पत्या हवनकर्म होमं चरतु । तत्र उत्तरैन्द्रादिकल्पत्येति उत्तरप्राग्दक्षिणपश्चिमदिक्क्रमेणेति केचिद्, उत्तरदक्षिणप्राक्पश्चिमदिक्क्रमेणेति केचिदाहुः ॥ ५० ॥

अत्र होमे प्रथमं दुर्गाभिः 'जातवेदस' इत्यादिभिः पञ्चभिर्दुर्गाभिः दिगुत्तरशतं द्वाविंशत्यावृत्त्या दशोत्तरशतमाज्यं हुत्वा ततो जातार्घैः 'जातवेदस' इत्यार्घैः पञ्चभिः, निजमूलतः, पृतनाद्यैः 'पृतनाजितमि'त्यार्घैः व्यु-

---

१. 'ण्डत्रयं चा' ङ. पाठः.

[illegible] शतं हुनेत् खदिरविप्राश्वत्थकप्लक्षजा
नैयग्रोधमयूरबिल्वसमिधः सौदुम्बरीः साञ्जलीः ॥५१॥
तिलसर्षपनीवारान् मूलेन दधिमाक्षिकम् ।
आज्यं च मृत्युञ्जयतो जुहुयात् तावदन्ततः ॥ ५२ ॥
प्रा[illegible]सादं परितो विहृत्य गुरुकुण्डाज्जनिताग्राहिताः
कुर्युः शान्तिहुतानि पञ्च नव वाथाग्रेऽखिलान्येव वा ।
स्कन्दे द्वादशवासराद्यहरह[illegible]भि-
स्त्र्याद्यैकादेनेऽथवात्र च घटाः कार्याः पृथक् कर्मसु ॥
अष्टोर्ध्वं समिधः शतं सकलनाम्ना बीजनाम्ना चरुं
गोसर्पिर्महता[illegible]त्र सर्षपतिलान् बीजाणुना जुहुतु ।

त्कमात् त्रिभिः 'पृतनाजितं' 'विश्वानि नः' 'अग्ने त्वं पारये'ति त्रिभिः एवं नवभिर्मन्त्रैः खदिरविप्राश्वत्थकप्लक्षजाः नैयग्रोधमयूरबिल्वसमिधः सौदुम्बरीः साञ्जलीश्च नव समिधः क्रमेणाष्टशतं हुनेत् । (മയൂരം=കടലാടി. അഞ്ജലി=മുക്കുറ്റി.) ॥ ५१ ॥

पुनः तिलसर्षपनीवारान् मूलेन, दधिमाक्षिकमाज्यं च मृत्युञ्जयतश्च अन्ततः अवसाने तावद् अष्टशतं जुहुयात् । तत्कलशैरपि तामभिषिञ्चेदित्यपि सिद्धं भवति ॥ ५२ ॥

अथ स्कन्दे अग्राहितात् पुरोभागे स्थितात् गुरुकुण्डाज्जनितमग्निं प्रासादं परितः प्रासादस्य परितश्चतसृषु दिक्ष्वष्टासु दिक्षु वा कुण्डेषु विहृत्य गुरुमूर्तिपाः पञ्च नव वा शान्तिहुतानि शान्त्याह्वयानि हवनानि कुर्युः । अखिलान्यपि हुतानि अग्र एव वा कुर्युः । एतान् होमांस्तु द्वादशवासरादिनियमेनाहरहः तत्स्नानपूजादिभिः कुर्युः । अथवा आपत्पक्षेऽपि एकदिनेऽपि व्यावृत्त्या त्रिकृत्वः कुर्युः । आपत्पक्षे कर्मसु त्रिष्वपि पृथक् घटाः कार्याः, पृथगेव होमाः कलशाभिषेकाश्च कार्या इत्यर्थः ॥ ५३ ॥

अत्र होमे सकलनाम्ना सकलाभिधानमन्त्रेण समिधः (अष्टोर्ध्वं शतं) जुहुतु । बीजनाम्ना बीजाभिधानमन्त्रेण चरुं जुहुतु । महता महन्मन्त्रेण गोसर्पिः । गोसर्पिरित्यनेन गव्यमाज्यमेव सर्वकर्मणि ग्राह्यमित्युक्तं भवति ।

मध्ये दिक्षु विदिक्षु नीपवटजाः सोदुम्बराश्वत्थजाः
प्लक्षब्रह्ममधूकजाश्च समिधो जम्बूकपित्थोत्थिताः ॥५४॥
शान्तिहोममथ शर्वदिशि श्रुत्यश्रकुण्डजनितात्महुताशे ।
आदधीत सकलेष्विह पक्केज्याणुहुत्यवधिकर्म पुरोवत् ॥
सर्पिः स्वोपनिषद्द्विषड्वसुजिनार्णाणूपचारैर्नृसू-
क्तोत्थाभिर्जिनवारमृग्भिरपि हुत्वाज्यान्तरालेषु तैः ।
विष्णौ मार्गभवामृताः सहसहैन्द्रीभद्रिकाः साञ्जली-
र्दूर्वासर्षपशालिकान् यवतिलान्नं चोक्तसङ्ख्यं हुनेत् ॥ ५६ ॥

सर्षपतिलान् सर्षपान् तिलांश्च बीजाणुना पूर्वोक्तेन बीजमन्त्रेण जुहुतु । अत्र मध्ये दिक्षु विदिक्षु च क्रमात् नीपजाः वटजाः उदुम्बरजाः अश्वत्थजाः प्लक्षजाः ब्रह्मजाः मधूकजाः जम्बूत्थिताः कपित्थोत्थिताश्च समिधः स्युः ॥५४॥

अथ सकलेषु शर्वदिशि ईशकोणे श्रुत्यश्रकुण्डजनितात्महुताशे चतुरश्रकुण्डजनितस्वस्वाग्नौ शान्तिहोममादधीत । इह पक्केज्याणुहुत्यवधिकर्म पक्कहोमपूजामन्त्रहोमान्तं कर्म पुरोवत् पूर्ववदादधीत ॥ ५५ ॥

विष्णौ स्वोपनिषद्द्विषड्वसुजिनार्णाणूपचारैः स्वोपनिषदः स्वस्य पञ्चतत्त्वानि, द्विषडर्णं द्वादशाक्षरं, वस्वर्णमष्टाक्षरं, जिनार्णं गायत्री, उपचारो 'जितं त' इति एतैर्नवभिर्मन्त्रैः, पुनर्नृसूक्तोत्थाभिः पुरुषसूक्तभवाभिः षोडशभिः ऋग्भिः, इति पञ्चविंशत्या मन्त्रैः जिनवारं जिनाश्चतुर्विंशतिः तावद्वारं सर्पिः प्रथमं हुत्वा तैरेव मन्त्रैः आज्यान्तरालेषु मार्गभवामृताः अपामार्गसमिधोऽमृतलतोद्भवाश्च, सहसहैन्द्रीभद्रिकाः सहाभिः सहिता ऐन्द्रीभद्रिकाः सहाः, ऐन्द्रीः, भद्रिकाश्च, साञ्जलीः अञ्जलिभिः सहिताः अञ्जलीश्च, दूर्वासर्षपशालिकान् दूर्वाः, सर्षपान्, शालीश्च, यवतिलान्नं च यवांस्तिलान्, अन्नं च एतानि द्वादशद्रव्याणि उक्तसंख्यं चतुर्विंशतिवारं हुनेत् ॥ ५६ ॥

१. 'शाखा कल्पतरु' क. ख. ग. पाठः.

गायत्र्या निजया पयोद्रुसमिदाज्यान्नानि दूर्वा मधु-
क्षीराज्यस्नपिता वसूत्तरशतं लाजाः सराजीतिलाः ।
होतव्या यवशालिसक्तुघृतयुक्ता धूर्जटौ ते समि-
त्सर्पिर्मध्यगदौर्व्यकास्तिलयवव्यत्यासिनश्चेषुजे ॥ ५७ ॥

विघ्नेशे हवनं गिरीशवदिदं प्रायोऽत्र लाजादिकं
षट्कं स्वोदितमेव शास्तरि पुनः साहस्रमष्टाधिकम् ।
गायत्र्यैव तिलान् घृतं च जुहुयाद् यागाणुना केवलं
तावत् सुम्भरिपौ घृतं हरिहरे द्व्युक्तं पृथक् प्राचरेत् ॥

धूर्जटौ शिवे पयोद्रुसमिदाज्यान्नानि पयोद्रुमाः क्षीरवृक्षाः प्लक्षोदुम्बरवटाश्वत्थक्रमगताः तेषां समिधः, आज्यमन्नं च, पुनः मधुक्षीराज्यस्नपिताः त्रिमधुरसिक्ता दूर्वाः । अत्र सर्वत्र त्रिमधुरोक्तौ मधुक्षीराज्यान्येवेत्यप्यनेनोक्तं भवति । लाजाः, सराजीतिलाः सर्षपास्तिलाश्च, यवशालिसक्तुघृतयुक्ताः यवाः शालयः सक्तवो घृतं च एते चतुर्दश निजया गायत्र्या तत्पुरुषेण वसूत्तरशतमष्टाधिकं शतं होतव्याः । इषुजे तं एव समित्सर्पिर्मध्यगदौर्व्यकाः समित् दूर्वा सर्पिः क्रमात् तिलयवव्यत्यासिनः तिलयवव्यत्यासयुक्ता यवतिलक्रमेणेत्यर्थः । स्कन्दे त्वेतत्क्रमेण स्वगायत्र्यैवाष्टशतं चतुर्दश द्रव्याणि होतव्यानीत्यर्थः ॥ ५७ ॥

विघ्नेशे इदं हवनं प्रायो गिरीशवत् शिवोक्तवत् । अत्र तु लाजादिकं षट्कं स्वोदितमेव लाजपृथुकलड्डुकापूपशष्कुल्याज्यानि । शास्तरि पुनर्गायत्र्यैव तिलान् घृतं च पृथगष्टाधिकं साहस्रं जुहुयात् । सुम्भरिपौ वक्ष्यमाणेन यागाणुना केवलं घृतं तावदष्टसाहस्रं जुहुयात् । हरिहरे द्व्युक्तं शैवोक्तं वैष्णवोक्तं च पृथगुभयत्राचरेत् ॥ ५८ ॥

---

१. 'त् ॥

पूर्वोदितेषु दहनादिषु घोरसत्त्वैः क्षेत्रे श्रितेऽनवधृतावपि निष्क्रियायाः ।
हुत्वेति संस्नपयेत् कलशेन शेषेणोक्षेच्च तत्र मनुविन्मधुसम्भवादौ ॥
कुर्याद् वान्यां तु शान्तिं शिवहरिरिति यतः स्वस्तिदाः पक्त्रमाज्यं
वास्तोर्वास्तोश्च हुत्वाशामिति च पुनरिन्द्राग्न्यृचाथो कयानः ।

[illegible] तत्तदु[illegible]ऽभिषिच्य
तं तं तदीयकलशेन यजेच्च देवम्।

इति तत्तदुदितक्रमतः तत्र तत्र हुत्वा तदीयेन तदीयेन च कलशेन तं तं देवमभिषिच्य यजेच्च। अत्र चशब्देनापरः शान्तिहोमोऽपि सूचितः। तथा पाशुपते—

"यत इन्द्रादिमन्त्राभ्यां पक्वं द्वाभ्यां तु होमयेत्।"

'यत इन्द्र भयामहे', 'स्वस्तिदा विशस्पतिरि'ति मन्त्रद्वयेन पक्वं होमयेदित्यर्थः।

"वास्तोष्पते वास्तोष्पते शन्नो देवीरभीत्यृचा॥"

'वास्तोष्पते प्रतिजानीहि', 'वास्तोष्पते शग्मया', 'शन्नोदेवीरभिष्टये।'

"इन्द्राग्नीरोचना भूयः कयानश्चित्र इत्यपि।
को अद्य युङ्क्तेति हुत्वा भवतन्न इति क्रमात्॥
षड्भिः कनिक्रदाद्यैस्तु भूयः स्वस्त्यादि चाष्टभिः।
वास्तोष्पते ध्रुवाद्यैस्तु षड्भिर्जातादिपञ्चभिः।"

जातादीति सद्योजातादिभिरित्यर्थः।

"जातवेदादिभिस्तावच्छन्नवर्गैश्च पौरुषैः।
व्याहृतीभिः क्रमाद्धुत्वा सम्पातविधिना घृतम्॥
ततो ब्रह्मसमिच्चान्नलाजसिद्धार्थकांस्तिलान्।
यवान् मुद्गान् क्रमादेतैः पृथगाज्यान्तरे हुनेत्॥
पुंसा चतुर्दशद्रव्यैरष्टोत्तरशतं पृथक्।
होमं समाप्य तस्याग्रे शमीपर्णेषु दापयेत्॥
हुतशेषं विधानेन शन्नोदेवीरिति ब्रुवन्।

तद्वत् को अद्य मन्त्री भवतामिति ततश्शाकुनस्वस्तिवास्तो
मन्त्रैः पञ्चाणुभिर्दीर्घमनुभिरनलेशं पृथग् व्याहृतीभिः॥
गायत्र्या द्विजसमिदन्नलाजराजीर्हुत्वाज्यान्तरिततया तिलान् यवांश्च।
मुद्गांश्चाहितबलिरन्नशेषतोऽग्रे शान्त्याग्रे स्नपयतु तद् घटेन देवम्॥
सर्वेषु निष्कृतिहुतेषु गरिष्टदोषे शान्त्यम्बुसम्पतितशेषमवस्रुताम्भः।
गव्यं समस्तमथ सर्वहुतावशेषं पात्रेषु षट्सु हुतभस्म च सन्निधाय॥
स्वाङ्गेन तानि परिपूज्य समूर्तिपालस्तेनाभिमन्त्र्य सहसाष्टसहस्रवारम्।
तैर्मृष्टलिप्तसनिमेत्तभुवि क्रमेण प्रोक्ष्यान्नतो यजतु चाष्टदले तदब्जम्॥

श्रीनारा' क. ग. घ. पाठः।

श्वस्पर्शनादिविषये सकलेष्वथैश्यां
दिश्येव शान्तिहवनं तनुयादथैतत् ॥ ५९ ॥

आनार्च्य पञ्चसूक्तजैर्मनुमितैर्मन्त्रैरिहैकैकशः
श्रीसूक्तप्रभवैस्त्रिपञ्चभिरतोदेवेति षड्भिस्तथा ।
नासत्षोडशभिर्द्विसप्तदशकेनांहोमुचां संसमि-
त्पूर्वैरब्ध्यणुभिः सभद्रचरणैः सारायिपञ्चाणुभिः ॥ ६० ॥
गायत्र्या निजया स्वपञ्चमनुभिश्चाहुत्य सर्पिः क्रमात्
पश्चात् साष्टशतं जुहोतु समिधोऽश्वत्थोत्थिताः खादिरीः ।
प्लाक्षीर्ब्रह्ममयीः सपाटलवटोद्भूताः स्वमूलाणुना
होमान्ते कलशेन देवमदसीयेनापि सिक्त्वा यजेत् ॥ ६१ ॥

हुतमन्त्रैश्च संस्नाप्य सम्पातकलशेन तम् ॥
प्रोक्षयित्वा च तत्स्थानं दक्षिणां गां प्रदापयेत् ।"

इति ।

"महद्भूहुषु चोग्रेषु निमित्तेषूभयं स्मृतम् ।
अल्पेष्वन्यतमं वापि प्रायश्चित्तमथानयोः ॥"

इति । अथ सकलेषु श्वस्पर्शनादिविषये[1] श्वचोरस्पर्शनादिनिमित्तेऽपि ऐश्यां दिश्येव एतदपि शान्तिहवनं तनुयात् । अत्र पूर्वं पञ्चगव्यावगाहानन्तरं

"शुद्धाद्भिस्त्वग्रसैर्गन्धैस्तीर्थतोयैश्च शोधयेत् ।"

इत्युक्तप्रकारेण[2] शोधयित्वा प्रायश्चित्तशान्तिहोमाद्यनन्तरमेतच्छान्तिहोमं कुर्यात् ॥ ५९ ॥

इह होमे पूजामन्त्रहोमानन्तरं श्रीनारायणसूक्तजैर्मनुमितैश्चतुर्दशमन्त्रैः, श्रीसूक्तप्रभवैः त्रिपञ्चभिः पञ्चदशमन्त्रैः, 'अतो देवे'ति षड्भिः, तथा नासत्षोडशभिः 'नासदासीदि'त्यादिषोडशमन्त्रैः, पुनरंहोमुचां द्विसप्तदशकेन चतुस्त्रिंशता, संसमित्पूर्वैः 'संसमिदि'त्यादिभिः अब्ध्यणुभिश्चतुर्मन्त्रैः, सभद्रचरणैः 'भद्रं नो अपी'त्यादिपादयुक्तैरेतैः, सारायिपञ्चाणुभिः 'आरायिकाण' इत्यादिपञ्चमन्त्रैर्युक्तैरेतैः, निजगायत्र्या, स्वपञ्चमनुभिः स्वस्वपञ्चतत्त्वैश्च इत्यधिकशतमन्त्रैरेकैकशः क्रमात् सर्पिराहुत्य पश्चात् अश्वत्थोत्थिताः खादिरीः प्लाक्षीः ब्रह्ममयीः, सपाटलवटोद्भूताः, (പാടലം=പാതിരി) एताः षट्

---

१. 'व्येकत' ख. घ. च. पाठः. २. 'र्शादि' ख. घ. पाठः. ३. 'क्रमेण' ख. घ ङ. च. पाठः.

देवाग्रे प्रजनय्य वह्निमथ तत्पार्श्वेऽष्टपत्रेऽम्बुजे
पीठाराधिपुरस्सरेण विधिना संपूर्य कुम्भं गुरुः ।
तत्त्वावाहननिष्ठमत्र सुविधायावाह्य मूलाणुना
साङ्गीकृत्य यजेत तं हुतवहे कुर्यात् परिध्यादि च ॥ ६२ ॥
पूजामन्त्रहुतान्तमत्र सुविधायापीतिरीत्याखिलै-
स्तत्त्वैराज्यहुतिं विधाय मनुबिम्बेऽन्तः समायोज्य च ।
सम्पातं परिकल्प्य विश्वविलयं भूयः सिसृक्षार्थना-
पूर्वं प्राप्य बहिः स्वमूलमनुनाष्टाज्याहुतिं चाचरेत् ॥
सृष्टिक्रमात् स्वाखिलतत्त्वमन्त्रै-
राज्यं यथाशक्ति पृथग् जुहोतु ।
हुत्वाथ मूलेन समिद्घृतादि-
द्रव्याणि होमं सुसमापयेच्च ॥ ६४ ॥

सामिधः स्वमूलाणुनाष्टशतं जुहोतु । होमान्ते अदसीयेन अमुष्मात् सम्भूतेन कलशेन देवमपि सिक्त्वा यजेत् ॥ ६०, ६१ ॥

अथ तत्त्वहोममाह — **देवाग्र** इति । अथ गुरुः स्वयं देवाग्रे देवस्याग्रगतमण्डपे चतुरश्रकुण्डे वह्निं प्रजनय्य तत्पार्श्वे अष्टपत्रेऽम्बुजे पीठाराधिपुरस्सरं पीठपूजापूर्वं विधिना ब्रह्मकलशोक्तप्रकारेण कुम्भं सम्पूर्य तत्त्वावाहननिष्ठं तत्त्वावाहनपर्यन्तं कर्म सुविधायात्र मूलाणुनावाह्य साङ्गीकृत्य तं देवं कलशस्थं यजेत । हुतवहेऽग्नौ परिध्यादि परिधिस्थापनादि च कुर्यात् ॥ ६२ ॥

अत्रापि पूजामन्त्रहुतान्तं सुविधाय स्वैः स्वैरखिलैस्तत्त्वैरपीति रीत्या संहारक्रमेणाज्यहुतिं विधायान्तर्गत्वा मनुबिम्बे तत्त्वैर्मन्त्रैः संहारक्रमेण (सम्पातं) समायोज्य विश्वविलयं सर्वतत्त्वानां लयं परिकल्प्य भूयः सिसृक्षार्थनापूर्वं सृष्टिविधानाय देवं प्रार्थ्य नाडीसन्धानकृद् बहिरग्निसमीपं स्वमूलमनुनाष्टाज्याहुतिं चाचरेत् ॥ ६३ ॥

स्वाखिलतत्त्वमन्त्रैः स्वस्य स्वस्याखिलैस्तत्त्वमन्त्रैर्यथाशक्तिसंख्यमाज्यं पृथक् पृथक् (सृष्टिक्रमात्) जुहोतु । यथाशक्तीत्यनेन शिवे स्वानुरूपात् पञ्चतत्त्वैर्होमश्च सूचितः । अथ मूलेन समिद्घृतादिद्रव्याणि चत्वारि हुत्वा होमं सुसमापयेच्च ॥ ६४ ॥

---

१. 'त्रा' ग. पाठः. २. 'द्धि' ख., 'ति' ग. पाठः. ३. 'स्येकस्तत्' इति मूलकोशपाठः.

सम्पातं प्रसमर्प्य वह्निगतचैतन्यं समुद्वास्य त-
त्कुम्भे तं प्रतिजप्य साधितसमग्रात्मोदयं भावयेत् ।
पीठेज्यादिविधानतः स्नपितयेत् संशुद्धतत्त्वोन्मिष-
त्स्वाङ्गं तत्कलशेन देवमथ तद्विन्यासपूर्वं यजेत् ॥ ६५ ॥

प्रागुक्तकल्प्त्या कलशान् यथार्हं
सम्पूर्य सम्पूज्य ततोऽभिषिच्य ।
सम्पूजयेद् देवमवस्रुतेन
सम्प्रोक्ष्य कुर्यात् परिषद्बलिं च ॥ ६६ ॥

सम्पातं तत्कुम्भे प्रसमर्प्य वह्निगतचैतन्यं च समुद्वास्य तान् म-न्त्रान् प्रतिजप्य तं देवं साधितसमग्रात्मोदयं साधितः सम्पादितः समग्रः स-म्पूर्णः आत्मनः देवस्योदयः प्रादुर्भावो यस्मिन् कलशे तं तथा भावयेत् । अथ पीठेज्यादिविधानतः (तत्कलशेन) स्नपितयेत् स्नपितं कुर्यात् । संशुद्धत-त्त्वोन्मिषत्स्वाङ्गं सम्यक् शुद्धैस्तत्त्वैः प्रकारीभवत्स्वाङ्गयुक्तं देवं तद्विन्यासपूर्वं तत्त्वन्यासादिकं पूर्वं यथा भवति तथा यजेच्च ॥ ६५ ॥

ततः प्रागुक्तकल्प्त्या कलशपटलोक्तप्रकारेण (कलशान्) यथार्हं यथा-योग्यं सम्पूर्य सम्पूज्य देवमभिषिच्य सम्पूजयेत् । अवस्रुतेन सर्वत्र प्रोक्ष्य प-रिषद्बलिं च कुर्यात् ॥ ६६ ॥

---

१. च ॥ सवत्सां गां दाहादिषु गुरुरुपाहूय शान्त्याख्ययेष्ट्वा
प्रदायास्यै दूर्वां तदहनि पयः पद्मपत्रेऽथ दुह्यात् ।
सुमृत्पात्रे त्वातप्य घृतमपि कुर्याद् दधीति द्वितीये
तृतीये तु क्षीरं शकृदपि च गोमूत्रमप्यादधीत ॥
स्वमन्त्रैराज्यान्तान्यधिकमलपत्रेष्वधः कूर्चपत्रे-
ष्वमून्याधायेष्ट्वा विधिवदपरास्मिन्नथायोज्य तानि ।
मथित्वा तारेणाभिहतमभिमन्त्र्येषुमन्त्रैः सहस्रं
स्थलं प्रेक्षेद् दग्धं निखिलमनुना क्षालयेच्चैव बिम्बम् ॥
खननादि ततः करोतु शुद्धोदकपूरेण तु पूरणं पुरोऽत्र ।
चरतूदितगव्यशोधनं प्रागथवा प्लावनकं स्थलोक्षणं च ॥
लेपार्दा त्विष्टपीठे न्यसतु ससहा भद्रा निशा राजिदूर्वा-
क्षीरित्वक्पिष्टमग्रे शरमनुभिरधः कूर्चपात्रेऽक्षतां वा ।

इति प्रतिष्ठापितमन्त्रबिम्बके विशोधनं किञ्चन सम्प्रदर्शितम् ।

इति उक्तप्रकारेण प्रतिष्ठापितमन्त्रबिम्बके भूपरिग्रहादितीर्थस्नानपर्यन्तैः कर्मभिः सम्यक् स्थिरीकृत्य स्थापिते मन्त्रमये बिम्बे उत्पातेषु सत्सु विशोधनं विविधं शोधनं किञ्चन किञ्चिन्मात्रं सम्प्रदर्शितम् । निमित्तानां शोधनानां च बाहुविध्यान्नः सकलं प्रतिपादयितुमशक्यमेव । अत्र प्रासादादिस्थाने दग्धे सति शान्तिनाम्ना पयस्विनीं सवत्सां धेनुमाहूय दूर्वादिकं तस्यै दत्त्वा 'शान्त्यै नम' इत्यनेनेष्ट्वा पद्मपत्रे पयो दुहेत् । तत्क्षीरं नवीने मृत्पात्रे

तद्वत् प्राच्यं प्रसाध्य प्रतिकृतिममुना स्नानकाले त्रिसप्ता-
वृत्त्योद्वृध्याथवोल्लिप्य यजतु च पुरः सेकतोऽन्यत् पुरोवत् ॥
क्षीरित्वगद्भिरभिषिच्य च पिप्पलत्वड्नागाब्जकेसरमहानिजगन्धलक्ष्मीः ।
तेन स्वपञ्चमनुभिस्तु यथोक्तकल्पात्या सिद्धेन वा समनुलिम्पतु देशिकशः ॥
श्वस्पर्शनादिविषये सकलेषु शुद्धाश्वगन्धतीर्थसलिलैरपि चावगाहः ।
गव्यावगाहमनुकार्यं इहापि शव्यौ दिश्येव शान्तिहवनं तनुयादथैतत् ॥
श्वसृगालादिप्रसवे तूष्णीमनिनीय तत्र दिवसानि ।
त्रीण्यथ तत् स्पर्शनवत् कुर्यात् सकलं विशेषज्ञः ॥
चोरकार्वन्त्यजैः स्पृष्टे बिम्बे च ब्रह्महादिभिः ।
राज्यादिलिप्ते क्षुद्राणुपूजिते चोक्तशुद्धिकृत् ॥
कृत्वैश्यां हुतभुङ्मुखादि दश होत्राज्यं सहस्रावरं
सावित्र्या च तिलान् स्वमूलमनुना तावत्समित्सर्पिषा ।
सर्पिस्तु द्विषडर्णतो मुररिपौ होमावसाने पुन-
स्तत्सम्पातघटेन देवमभिषिच्याभ्यर्चयेत् कल्पवित् ॥
भूसङ्ग्रहे स्यादिह शङ्कुसूत्रभङ्गादिषु स्वाब्रत आज्यहोमः ।
तत्कर्षणे साष्टशतादिसङ्ख्यं युगादिभङ्गादिषु मूलतो वा ॥
वर्षैस्त्रिभिः कर्षणमिष्टकोषधै(कै)केन गर्भो दिवसैर्द्विषड्भिः ।
आवर्त्यतां शान्तिहुतं च कुर्यात् तदैव वर्षेण गृहे प्रवृत्ते ॥
स्यात् स्थानशुद्धिर्मृतिसम्भवादौ सशान्तिहोमोऽपि यथोपपत्ति ।
स्वनिष्कृतिः श्वप्रसवादिदोषे गृहे प्रवृत्तेष्वखिलेषु चापि ॥ नष्टेषु' क ग. घ. पाठः.

१. 'न' घ. ङ च. पाठः.

अथाङ्कुरादेश्च तदङ्गभावतः
प्रवर्तितस्योपहतौ तदुच्यते ॥ ६७ ॥

प्रताप्य तक्रेण च योजयित्वा दधिभूतं तत् पलाशदण्डेन निर्मथ्य नवनीतमाहृत्य तत् प्रताप्याज्यमाहरेत् । अपरेद्युस्तथा तामेव गां तत्पूजापुरस्सरं पद्मपत्रे दुग्ध्वा तथातप्य दधि चाहरेत् । तृतीयेऽह्नि गोमूत्रं गोमयं क्षीरं च तथैव पद्मपत्रेष्वानीय पृथक् पृथगधःकूर्चेषु पद्मपत्रेषु संस्थाप्य पञ्चमन्त्रैः सम्पूज्य पुनरपरस्मिन् पद्मपत्रे गोमूत्रादिक्रमेण स्वस्वमन्त्रैः संयोज्य प्रणवेन मथित्वा सम्पूज्याष्टसहस्रं स्वस्वपञ्चतत्त्वानि संजप्य तेन दग्धस्थानं सर्वं संप्रोक्ष्य प्रतिमां चाभिषिच्य भस्मादिकं त्यक्त्वा शुद्धजलैराप्लाव्य खननादिविधिं कुर्यात् । तथाच विष्णुसंहितायां —

"दाहे पयस्वतीं धेनुं शान्तिनाम्ना समाह्वयेत् ।
दूर्वादिकं निवेद्येष्ट्वा पद्मपत्रे पयो दुहेत् ॥
आतप्य दधि निर्मथ्य तत्संस्कृत्याज्यमाहरेत् ।
अपरेद्युस्तथा दुग्ध्वा दधि चैवं प्रकल्पयेत् ॥
तृतीयेऽह्नि शकृन्मूत्रं क्षीरं चैवं तथाहरेत् ।
पद्मपत्रेषु सम्पूज्य क्रमान्मूत्रादिपञ्चकम् ॥
पञ्चमन्त्रैस्तु संयोज्य मथित्वा प्रणवेन च ।
सम्पूज्याष्टसहस्रं तु पञ्चोपनिषदो जपेत् ॥
तेन संप्रोक्ष्य सर्वत्र स्नापयेत् प्रतिमां ततः ।
हृत्वा भस्मादिकं तोयैः प्लावयित्वा समन्ततः ॥
गोनिवासादि कर्तव्यं प्रायश्चित्तं यथाक्रमम् ।"

इति । यद्यपि सामान्यशोधनानि सामान्यप्रायश्चित्तहवनानि चात्रोक्तान्येव । तथापि एतदादीनां शोधनानामनुक्तत्वाद् विशोधनं किञ्चन सम्प्रदर्शितमित्यभिहितम् । अथ तदङ्गभावतः तस्य प्रतिष्ठाकर्मणोऽङ्गतया प्रवर्तितस्य सम्पादितस्याङ्कुरादेः उपहतौ विनाशादिदोषे प्राप्ते तत्प्रायश्चित्तमुच्यते ॥ ६७ ॥

नष्टेषु दुष्टेष्वथवोप्तबीजेषूप्त्वा स्वपात्रेष्वपरेषु वाथ ।
विशुद्धया स्वीयचिता सुयोज्य मूलाणुनावाह्य समर्चयेच्च ॥

तत्र व्यहात् प्राङ् निजबीजवापं
समाचरेत् तण्डुलवापमूर्ध्वम् ।
हुत्वेषुतत्त्वैरिषुवर्गसङ्ख्यं
पृथग् घृतं तत्र समर्पयेच्च ॥ ६९ ॥
सतारकव्याहृतिपीठमन्त्रः
स्वमूलमन्त्राष्टघृताभिरुद्धः ।

तत्र बीजाङ्कुराणामुपहतौ प्रायश्चित्तमाह — **नष्टेष्विति** । अथ यथाकालं यथोक्तविधिनोप्तबीजेषु कृतवापेषु बीजेषु सत्सु केनचिद्धेतुना नष्टेषु अथवा केनचिद्धेतुना दुष्टेषु तत्र नष्टेषु चेत् स्वपात्रेषु वा दुष्टेषु चेदपरेषु वा यथायोगम् उप्त्वा वापं कृत्वा विशुद्धया स्वीयचिता स्वचैतन्येन सुयोज्य मूलाणुनावाह्य समर्चयेच्च । अत्रायं प्रकारः — बीजानि केवलं नष्टान्येव चेत् तत्पात्रेष्वेव तद्बीजशिष्टैर्वापं कृत्वा तत्प्रायश्चित्तं कुर्यात् । अशुद्धियुक्तानि चेत् तद्गतचैतन्यमादर्शे हेम्नि वा समुद्वास्य दोषसम्पर्कितं सर्वं त्यक्त्वा स्नात्वा शोधिततत्स्थान एव पूर्ववत् सर्वं द्रव्यान्तरेण सम्पाद्य तथा वापं च कृत्वा संक्रामितचैतन्ये वस्तुनि यथावसरं सप्तशुद्धीः कृत्वा तच्चैतन्यमायोज्यानन्तरवक्ष्यमाणं प्रायश्चित्तं कृत्वा तत्सम्पातं तत्र समर्प्य मूलाणुनावाह्य समर्चयेच्चेति ॥ ६८ ॥

तत्रोपहतौ व्यहात् अहस्त्रयात् प्राक् अर्वाक् चेद् निजबीजवापं निजनिजानां बीजानां वापं समाचरेत् । तत ऊर्ध्वं चेत् तण्डुलवापं पालिकादिषु तण्डुलेन वापम् आचरेत् । पुनस्तत्प्रायश्चित्तमाह — हुत्वेति । इषुतत्त्वैः पञ्चतत्त्वैः पृथग् इषुवर्गसंख्यं पञ्चविंशतिसंख्यं घृतं हुत्वा तत्र बीजेषु समर्पयेच्च ॥ ६९ ॥

अत्रत्यानां तत्तदङ्गप्रायश्चित्तानां नियममाह — **सतारेति** । अत्र बीजाङ्कुराद्यङ्गसम्बन्धिनि प्रायश्चित्तेऽखिलो होमविधिरेवं कर्तव्यः । कथं, तस्य तस्य पुरतः स्थण्डिलं कृत्वा यथोक्तक्रमेणाग्निमाधायाज्यसंस्कारं कृत्वा पीठ-

---

१. 'पि' ग. घ. पाठः. २. 'खिलेषु' क. ग. घ पाठः. ३. 'पिवा के' क. ख. घ. पाठः. ४. 'अ' ङ. पाठः. ५. 'होमे इ' क. ख. ग. घ. च. पाठः.

अत्राखिलो होमविधिः समुक्तः
पूजामनुव्याहृतितारनिष्ठः ॥ ७० ॥
बीजेष्वरूढेषु पुनश्च वाप-
मिच्छन्ति निष्कृत्युदितं हुतं च ।
श्यामेषु तिर्यक्प्रसृतेषु चैवं
केचित् परे निष्कृतिहोममात्रम् ॥ ७१ ॥
बलिग्रहद्रव्यविपर्यये त-
ल्लोपेऽपि मूलाष्टशताज्यहोमम् ।
कुर्याद् यथार्हं च बलिं करोतु
तथा सपर्यासवनात्ययेऽपि ॥ ७२ ॥

पूजापूर्वं मूलेन देवमावाह्य सम्पूज्य होमः कर्तव्यः । स तु होमः सतारकव्याहृतिपीठमन्त्रः प्रथमं प्रणवव्याहृतिपीठमन्त्रहोमैर्युक्तः, स्वमूलमन्त्राष्टघृताभिरुद्धः तत्र तत्र विधीयमानः प्रायश्चित्तहोमः स्वस्वमूलमन्त्राष्टावृत्तिघृतहोमपुटितो भवति । पूजामनुव्याहृतितारनिष्ठः पूजामन्त्रव्याहृतिप्रणवहोमावसानश्च भवति । एवं कृत्वा समाप्य तत्तत्सम्पातं तत्र तत्र समर्पयेदिति ॥ ७० ॥

केचिदत्र बीजेष्वरूढेषु अङ्कुररहितेषु पुनर्वापं निष्कृत्युदितं प्रायश्चित्तार्थमुक्तं हुतं चेच्छन्ति । श्यामेषु श्यामवर्णेष्वङ्कुरेषु तिर्यक्प्रसृतेषु तिर्यगेव प्रसृतेष्वपि एवं पुनर्वापं प्रायश्चित्तं चेच्छन्ति । परे तु पुनर्निष्कृतिहोममात्रं न पुनर्वापमिच्छन्ति ॥ ७१ ॥

बलिग्रहद्रव्यविपर्यये बलिदेवतानां बलिद्रव्याणां वा व्यत्यासे, तल्लोपे बलेरभावेऽपि मूलाष्टशताज्यहोमं कुर्यात् । यथार्हं स्वस्वयोग्यं च बलिं करोतु । सपर्यासवनात्यये त्रिषु कालेष्वप्युक्तलक्षणपूजाकालातिपातेऽपि तथा मूलाष्टशताज्यहोमं करोतु ॥ ७२ ॥

---

१. 'पि ॥ बिम्बं प्रागुदवासतोऽशुचि यदि प्रक्षाल्य पुण्याहकं
कुर्याद् द्रव्यघटाभिषेकमुदवासं चोदवासे यदि ।
पश्चाच्चेन्निजशुद्धिकान्तिहवनं स्वद्रव्यकुम्भाभिषे-
काद्यं स्थापनतो नवीकरणमेव त्वाभिषेकाद् बुधः ॥ ब' ख. ग. घ. पाठः.

२. 'ङ्' क. ख. घ. च. पाठः,

नन्द्यादितत्तन्मनुना ध्वजोपघाते घृतं साष्टशतं जुहोतु ।
कुर्वीत शर्वे क्षुरिकाणुनैवं तदन्यतोऽस्त्रेण च वस्त्रदाहे ॥
प्रपूरितद्वारघटोपघाते तत्स्थानसंस्थं परिपूर्य चान्यम् ।
तत्सिद्धतोयेन परेण वेष्ट्वा स्वास्त्रोत्थसम्पातमिहार्पयेच्च ॥
सामान्यजातदहनापदि भस्म हृत्वा
त्रिर्गोशकृद्गुलिकयायतनं विशोध्य ।
कृत्वाग्निमष्टगुणितेरितसंस्क्रियाभि-
सङ्ख्यं सुधीर्ध्रुवघृताहवनं विधाय ॥ ७५ ॥

ध्वजोपघाते ध्वजानां विनाशे नन्द्यादितत्तन्मनुना तत्तद्ध्वजदेवता-मन्त्रेण साष्टशतं घृतं जुहोतु । शर्वे वस्त्रदाहे वक्ष्यमाणेन क्षुरिकाणुना, तद-न्यतः तदन्यदेवेषु अस्त्रेण च एवमष्टशतं घृतहोमं कुर्वीत ॥ ७३ ॥

प्रपूरितद्वारघटोपघाते द्वारघटोद्वासनात् प्राग् विनाशे सति तत्स्थान-संस्थमन्यं घटं तत्सिद्धतोयेन भिन्नघटात् तोयं लभ्यते चेत् तेन, न लभ्यते चेत् परेण जलेन परिपूर्य इष्ट्वा इह स्वास्त्रोत्थसम्पातं स्वास्त्राष्टशतघृतहोमस-म्पातमर्पयेच्च ॥ ७४ ॥

अथाग्निनाशादिप्रायश्चित्तमाह — सामान्येति । सामान्यजातदहन-पदि सामान्येन प्रायश्चित्तहोमाद्यर्थमुत्पादितस्याग्नेर्विनाशे सति तत्रस्थं भस्म हृत्वा त्यक्त्वा तदायतनं तत्कुण्डान्तर्भागं गोशकृद्गुलिकया गोमयपिण्डेन त्रिर्लिखा विशोध्याग्निं कृत्वा निक्षिप्य अष्टगुणितेरितसंस्क्रियाभिसंख्यम् अष्ट-भिर्गुणिता प्राक्प्रोक्ता संस्कारसंख्या यथा भवति तथा ध्रुवघृताहवनं ता-रेण घृतहोमं सुधीः गर्भाधानादिसंस्कारविशेषज्ञो गुरुः विधाय मनस्वत्या 'मनो ज्योतिरि'त्यनेन विधिवत् चतुर्ग्रहघृतं चतुरवदानेन परिगृहीतमाज्यं स्रुचा

---

१. 'ताशेषघ' क. ग. घ. पाठः. २. 'स्त्राणुस' इति मूलकोशपाठः. ३. 'च ॥
मिन्दाहुतिश्चापि सजीवनिद्राब्रह्माख्यकुम्भेशघटोपघाते ।
निरम्बरे कादिषु मूलमन्त्राभिमन्त्रितापूरितमर्चयेच्च ॥
पादादिश्चक्रिकादीनां यदि स्यात् तद् यथापुरम् ।
कृत्वान्यद् वा बुधः कुर्यान्मूलमन्त्राभिमन्त्रणम् ॥
ध्वजतोरणमङ्गलादि चेत् स्यात् स्खलितोल्लङ्घितभिन्नदग्धमत्र ।
निजशान्तिहुतं चरेद् विभेदेऽप्यशुचिस्पृश्यपि चापरं च कल्प्यम् ॥ सा
क. ग. घ. पाठः.

हुत्वा चतुर्गृहृतं विधिवन्मनस्व-
त्याज्यं स्रुवेण च सभूःप्रभृतीषुतत्त्वैः ।
आवाह्य मूलमनुना परिपूज्य मूले-
नास्त्रेण चाष्टशतमाज्यहुतिं विदध्यात् ॥ ७६ ॥

दुष्टाग्निं मुकुरोदरे प्रतिफलय्य क्षालनाद्याः क्रियाः
कृत्वोद्वास्य ततोऽन्यतो हुतवहं सन्त्यज्य भस्मादिभिः ।
आलिप्यात्र विभावसुं विधिवदुत्पाद्येष्टपीठस्थत-
न्मूर्तौ पूर्वचितिं प्रणीय सकलं नाशोक्तवत् प्राचरेत् ॥ ७७ ॥

अशुचौ शुचौ त्रिमनुनेत्यथाग्नये-
पवमानपावकशुचिप्रभेदिना ।
स्रुवतः स्रुचा सचतुराज्यया हुनेद्
विधिवत् तदग्निभिरथवा यथाबलम् ॥ ७८ ॥

हुत्वा सभूःप्रभृतीषुतत्त्वैः भूरादिभिः पञ्चतत्त्वैश्च स्रुवेण च हुत्वा मूलमनुनावाह्य परिपूज्य पुनर्मूलेनास्त्रेण चाष्टशतमाज्यहुतिं विदध्यात् ॥ ७५, ७६ ॥

दुष्टाग्निम् अग्निरशुद्धो भवति चेत् तमग्निं मुकुरोदरे आदर्शान्तर्भागे प्रतिफलय्य संक्रमय्य क्षालनाद्याः क्रियाः सप्तशुद्धीः कृत्वा ततोऽन्यतः आदर्शहिरण्यादावुद्वास्याशुद्धस्थलगतैर्भस्मादिभिः सह तं हुतवहमग्निं सन्त्यज्य गोमयजलेनालिप्यात्र विभावसुमग्निं विधिवत् पूर्ववदेवोत्पाद्य जनयित्वा इष्टपीठस्थतन्मूर्तौ पीठपूजानन्तरं मूर्तिकल्पनायां कृतायां पूर्वचितिं शुद्धामादर्शादिषु स्थितां तत्र प्रणीय योजयित्वा नाशोक्तवत् 'मनस्वत्या' चतुर्गृहृतहोमादिकं सकलं प्राचरेत् ॥ ७७ ॥

अशुद्धौ विशेषमाह—**अशुचाविति**। शुचावग्नौ अशुचौ अशुद्धे अथ अग्निनाशोक्तप्रायश्चित्तानन्तरम् अग्नयेपवमानपावकशुचिप्रभेदिना 'अग्नये पवमानाय स्वाहा' 'अग्नये पावकाय स्वाहा' 'अग्नये शुचये स्वाहा' इति भेदत्रयोक्तेन त्रिमनुना मनुत्रयेण यथाबलम् अशुद्धेर्बलाबलवशात् स्रुवतो वा सचतुराज्यया चतुर्गृहीतघृतयुक्तया स्रुचा वा हुनेत् । अथवा तदग्निभिः 'अग्न आ-

१. 'सहभूः' क. ग. घ. पाठः. २. 'ज्या' ग. ङ. पाठः.

प्रागाद्याशाहुताशापदि सपदि निधायाग्निमाचार्यकुण्डा-
दाज्ये सिद्धेऽत्र हुत्वा समिधमपि चतुस्सङ्गृहीतं स्रुचाज्यम् ।
तत्तद्दिक्चोदितेनाहितशिखिनि हुनेत् पञ्चहोत्रादिकेन
स्वीयेऽपादानवह्नौ स्रुवहुतिदशकं चैकहोत्रादिमन्त्रैः ॥
प्राग्याम्यसौम्यदिक्षु स्युः पञ्चचतुष्षडादिहोतारः ।
प्रत्यग्विदिक्षुविहिता मनस्वती च क्रमेण तन्मन्त्राः ॥
करोतु सावान्तरपूर्णमष्टशः
स्रुवाहुतिं व्याहृतिपञ्चतत्त्वकैः ।

यूंषि पवसे', 'अग्ने पवस्व', 'अग्ने पावकरोचिषा', 'सनः पावकदीदिवः', 'अग्निः शुचिव्रततमः', 'उदग्ने शुचयस्तव' इति द्वौद्वौ मन्त्रावुक्त्वा विधिवत् तिष्ठन् पूर्णां हुनेत् ॥ ७८ ॥

प्रागाद्याशाहुताशापदि अधिवासप्रायश्चित्तादिहोमेषु दिक्षु विहृतानामग्नीनां नाशे सपदि तदानीमेव भस्मादित्यागा(न)न्तरं गोशकृद्धुलिकयायतने शुद्धे सति आचार्यकुण्डादग्निं पुरोवन्निधाय आहितशिखिनि निक्षिप्ताग्नौ आज्ये सिद्धे सति अत्रैकां समिधमपि हुत्वा चतुस्सङ्गृहीतमाज्यं स्रुचा तत्तद्दिक्चोदितेन पञ्चहोत्रादिकेन मन्त्रेण हुनेत् । आचार्यः स्वीयेऽपादानवह्नौ स्वकुण्डस्थाग्नौ एकहोत्रादिमन्त्रैः 'ब्राह्मण एको होता', 'अग्निर्द्विहोता', 'पृथिवी त्रिहोता', 'अन्तरिक्षश्चतुर्होता', 'वायुः पञ्चहोता', 'चन्द्रमाष्षड्ढोता', 'अन्नं सप्तहोता', 'द्यौरष्टहोता', 'आदित्यो नवहोता', 'प्रजापतिर्दशहोता' इत्येभिर्दशाभिः स्रुवहुतिदशकं च हुनेत् ॥ ७९ ॥

प्राग्याम्यसौम्यदिक्षु पूर्वदक्षिणोत्तरदिक्षु क्रमात् पञ्चचतुष्षडादिहोतारः पञ्चहोता चतुर्होता षड्ढोता च । प्रत्यग्विदिक्षु च प्रत्यग्भागे कोणेषु च । मनस्वती च तन्मन्त्रा विहिताः । पञ्चहोत्रादीनां मन्त्रान् वक्ष्यति ॥ ८० ॥

अथ प्रणीतवह्नौ निक्षिप्ताग्नौ व्याहृतिपञ्चतत्त्वकैः नवभिर्मन्त्रैः सावान्तरपूर्णम् अन्तरान्तरा स्वस्वपूर्णाहुत्या संयुतमष्टशः[२] स्रुवाहुतिं करोतु ।

---

१. 'ग्निः' क. पाठः. २. 'सहितं' ख. घ. ङ. पाठः.

प्रणीतवह्नावथ मूलपावके
स्वमूलमन्त्रेण शतं च साष्टकम् ॥ ८१ ॥

नष्टे मूलविभावसौ वसुपादिकुण्डाग्निधायाखिलं
तास्मन्नष्टगुणेष्टसंस्कृतिहुतिं तन्निष्कृतिं चोक्तवत् ।
कृत्वोदग्दहनं प्रणीय विनिधायास्मिन् स्वनाशोदितं
कुर्यान्निष्कृतिकर्म मूलदहने तद्वद् दशात्माहुतिम् ॥ ८२ ॥

नष्टेऽस्मिन् दहनद्वये विधिवदुत्पाद्य स्वकुण्डेऽनलं
चित्तिस्रुक्प्रमुखैः पृथक् चतुरवत्ताज्यं स्रुचा होतृभिः ।
षड्भिः सर्पिरपि स्रुवेण दशमन्त्रैरेकहोत्रादिभि-
र्भूराद्यैश्च पृथक् चतुर्ग्रहघृतं भङ्क्त्वाष्टधात्राहुनेत् ॥ ८३ ॥

प्रत्येकं शरतत्त्वकैश्च चतुरवत्ताज्यं विभज्याष्टधा
हुत्वात्राजुहुयात् स्रुवाहुतिशतं मूलेन चाष्टाधिकम् ।

मूलपावके आचार्यकुण्डे स्वमूलमन्त्रेण साष्टकमष्टसहितं शतं च स्रुवाहुतीः करोतु ॥ ८१ ॥

मूलविभावसौ आचार्यकुण्डस्थाग्नौ नष्टे सति वसुपादिकुण्डाद् उत्तरदिग्गतात् कुण्डाद् अखिलमग्निं तस्मिन् आचार्यकुण्डे निधाय अष्टगुणेष्टसंस्कृतिहुतिं स्वस्वसंस्कारसंख्याष्टगुणसंख्याहुतिम् उक्तवत् पूर्वोक्तप्रकारेण तन्निष्कृतिं सामान्यनाशप्रायश्चितं च कृत्वा उदग्दहनम् उदक्कुण्डेऽग्निं प्रणीय नीत्वा निधायास्मिन् कुण्डे स्वनाशोदितं निष्कृतिकर्म विधिवत् कुर्यात् । मूलदहने तद्वत् तदुक्तप्रकारेण एकहोत्रादिमन्त्रैर्दशात्माहुतिं च कुर्यात् ॥ ८२ ॥

अथास्मिन् दहनद्वये आचार्यकुण्डोदक्कुण्डस्थाग्निद्वये नष्टे सति विधिवदाचार्यः स्वकुण्डेऽनलमुत्पाद्य चित्तिस्रुक्प्रमुखैः षड्भिर्होतृभिः पृथक् चतुरवत्ताज्यं स्रुचाहुनेत् । पुनरेकहोत्रादिभिर्दशभिर्मन्त्रैः सर्पिः स्रुवेणापि हुनेत् । अत्रोभयस्यापि नाशे भूराद्यैश्चतुर्भिश्चतुर्ग्रहघृतं पृथगष्टधा भङ्क्त्वाष्टधा मन्त्रं चोक्त्वा आहुनेत् ॥ ८३ ॥

पुनः शरतत्त्वैः पञ्चतत्त्वैः प्रत्येकं चतुरवत्ताज्यं तथा विभज्य हुत्वा अत्रैवाष्टाधिकं स्रुवाहुतिशतं मूलेनाजुहुयात् । पुनरमुतोऽस्मात् कुण्डात् सौ-

---

१. 'वाधकु' क. ग. घ. पाठः. २. 'दकस्व' ख. घ. च. पाठः. ३. 'ज्यं स्रुद्व' क. पाठः.

नीत्वा सौम्यविभावसुं विधिवदाधायामुतो निष्कृतिं
तन्नाशाभिहितां दशात्महवनं मूलानले चाचरेत् ॥ ८४ ॥
दशचतुरक्षरपूर्वौ पञ्चषडाद्यौ च सप्तपूर्वश्च ।
वागाद्यश्च षडेते होतारः संस्मृताः क्रमेण स्युः ॥ ८५ ॥
चित्तिः स्रुक् पृथिवीहोताग्निर्होता ततश्च सूर्यन्ते ।
तदनु महाहविराद्यो वागाद्यः स्युर्दशादिहोतारः ॥ ८६ ॥
प्रासाददक्षिणदिगाद्युदिताग्निनाशे-
ऽप्युत्पाद्य तं स्वहरिदुक्तचतुर्ग्रहाद्यम् ।
कुर्वीत वैवमथ तत्त्वहुताशनादि-
नाशेऽखिलं गुरुकृशानुविनाशवच्च ॥ ८७ ॥

म्यविभावसुम् उदक्कुण्डेऽग्निं नीत्वा तन्नाशाभिहितां तन्नाशे विहितां निष्कृतिं विधिवदाधाय मूलानले एकहोत्रादिमन्त्रैर्दशात्महवनं चाचरेत् ॥ ८४ ॥

षण्णां होतृणां संज्ञाः क्रमेण कथयति — दशेति । दशचतुरक्षरपूर्वौ दशहोता चतुर्होता च, पञ्चषडाद्यौ च पञ्चहोता षड्ढोता च, सप्तपूर्वश्च सप्तहोता च, वागाद्यश्च वाग्घोता च, एते षट् क्रमेण होतारः संस्मृताः ॥८५॥

होतृणां मन्त्रान् क्रमेण कथयति — चित्तिः स्रुगिति । एते दशादिहोतारः । चित्तिः स्रुगिति दशहोता, पृथिवीहोतेति चतुर्होता, अग्निर्होतेति पञ्चहोता, सूर्यन्त इति षड्ढोता, महाहविरित्याद्यः सप्तहोता, वागाद्यो वाग्घोता, इति विभागः ॥ ८६ ॥

प्रासाददक्षिणदिगाद्युदिताग्निनाशे प्रासादस्यापि दक्षिणादिदिग्विभागेनोत्पादितानामग्नीनां नाशे तमग्निं सामान्यनाशोक्तक्रमेणोत्पाद्य एवं स्वहरिदुक्तचतुर्ग्रहाद्यं स्वस्वदिगुक्तहोत्रा चतुर्ग्रहधृतहोमाद्यं कुर्वीत । वा अथवा सामान्याग्निनाशवदेव कुर्वीत । अथ तत्त्वहुताशनादिनाशे तत्त्वहोमादिप्रधा-

---

१. 'च ॥
कल्पोक्तवत् सति जुहोतु मिथोऽग्निसंसर्गादाविहातिविहृतिप्रभृतेर्यथार्हम् ।
ङेन्ताख्यया स्रुवहुतिं निजमन्त्रतो वा पूर्णां स्रुवाष्टहुतिमप्यथ मूलतश्च ॥ म'
क. ग. घ. पाठः. २. 'वाग्नि' क. ख. घ. च. पाठः

मनोज्योति र्याश्चाग्ने यद्यस्ति स्वस्तिनोऽपि च ।
मिन्दाद्वयं व्याहृतयश्चोक्ताः स्युः सर्वनिष्क्रियाः ॥ ८८ ॥
कृष्णलाविंशतिमितं जातरूपं द्विजोत्तमे ।
दत्तं स्यात् सर्वदोषेषु प्रायश्चित्तमनुत्तमम् ॥ ८९ ॥
क्रियामध्येऽन्तरा गच्छेद् यदि तत्र मनस्वतीम् ।
जुहोतु सर्वयज्ञं वा तत्तद्दोषोपपत्तितः ॥ ९० ॥
स्नानाय कल्पितकलशेऽशुचितां प्रपन्ने
स्वर्णेऽमुना समभिषिच्य विशोध्य तत्स्थम् ।
तत्यक्त्वान्यकलशे सुविशोधितैत-
त्स्थानस्थिते समधिरोप्य यथाविधीष्ट्वा ॥ ९१ ॥

नाग्नेर्नाशे दोषयुक्ते च गुरुकृशानुविनाशवद् आचार्यकुण्डस्थाग्निनाशवद् अखिलं प्रायश्चित्तं कुर्वीत ॥ ८७ ॥

प्रायश्चित्तेऽपरिज्ञाते सर्वप्रायश्चित्तं पूर्वैरुक्तं विमृशति — **मनोज्योतिरिति** । 'मनो ज्योतिः', 'अयाश्चाग्ने', 'यदस्मिन् कर्मणः', 'स्वस्ति नः', मिन्दाहुतिद्वयं व्याहृतयश्च दर्शिताः सर्वनिष्क्रियाश्चोक्ताः ॥ ८८ ॥

अथ प्रायश्चित्तानामूनातिरेकपरिहाराय ब्राह्मणतर्पणादिकमपि कार्यमित्याह — **कृष्णलेति** । कृष्णलाविंशतिमितं कृष्णला गुञ्जाफलं तद्विंशतिमितं जातरूपं हिरण्यं द्विजोत्तमे वैदिकविषयं तान्त्रिकविषयं च प्रायश्चित्तविधानज्ञे ब्राह्मणे दत्तं सर्वदोषेष्वनुत्तमं प्रायश्चित्तं स्यात् ॥ ८९ ॥

अथान्तरागमने प्रायश्चित्तविशेषमाह — **क्रियामध्य इति** । यत्र कुत्रचित् क्रियामध्ये यः कश्चिदन्तरा मध्ये गच्छेद् यदि तत्र मनस्वतीं जुहोतु । अथवा तद्धौरवे सर्वयज्ञं जुहोतु । पञ्चदुर्गामनस्वतीव्याहृतिभिः पूर्णाहुतिः सर्वयज्ञमित्युच्यते ॥ ९० ॥

अथ कलशानामशुद्धिसंभवादौ प्रायश्चित्तमाह — **स्नानायेति** । स्नानाय देवाभिषेचनाय कल्पितकलशे पूजिते कलशे अशुचितामशुद्धतां प्रपन्ने प्राप्ते अमुना कलशेन स्वर्णेऽभिषिच्य विशोध्य सप्तशुद्धीः कृत्वा तत्स्थं चैतन्यं सुविशोधितैतत्स्थानस्थिते तत्त्यागपूर्वं तत्स्थानं संशोध्य तत्रैव पूरितान्यकलशे

---

१. 'णि' क. पाठः

स्वैः पञ्चतत्त्वमनुभिः पृथगष्टवारं
सर्पिः स्रुवेण चतुरात्तघृतं स्रुचा च ।
हुत्वाष्टधा पृथगथाष्टशतं स्वमूले-
नास्त्रेण चार्घ्य घृतमत्र जपेच्च तावत् ॥ ९२ ॥
भिन्ने घटेऽन्यं प्रविधाय तत्र तच्छेषयुक्तान्यजलैः प्रपूर्य ।
इष्ट्वा स्रुवाज्याहुतिमुक्तनीत्या विधाय शेषं विधिमादधीत ॥

विज्ञापिते वा कलशाधिवासे
तदेकदेशस्नपने कृते वा ।
उपाहृतिश्चेत् कलशे च मन्त्र-
बिम्बे च तन्निष्कृतिमादधीत ॥ ९४ ॥
दुष्टे वा बलिकौतुके निपतिते वात्रैव संशोध्य त-
त्प्रायश्चित्तहुतिं स्वपञ्चमनुमूलास्त्रादिभिर्युक्तितः ।

समधिरोप्य संयोज्य यथाविधीष्ट्वा यथायोगं तत्पुरतःस्थाग्नौ वाधिवासकुण्डस्थाग्नौ वा स्वैः पञ्चतत्त्वमनुभिः पृथक् पृथक् अष्टवारं सर्पिः स्रुवेण वा स्रुचा (वा) चतुरात्तघृतं पृथगष्टधा हुत्वाथ स्वमूलेन स्वेनास्त्रेण चाष्टशतं घृतं च हुत्वा सम्पातं कलश आर्घ्य संस्पृश्य तावत् जपेच्च । अथ तेन यथाविध्यभिषिञ्चेत् ॥ ९१,९२ ॥

घटे कलशे भिन्ने सति अन्यं कलशमत्र प्रविधाय तत्र कलशे तच्छेषयुक्तान्यजलैः भिन्नस्य कलशस्य जलं लभ्यते चेत् तच्छेषजलयुक्तान्यजलैः प्रपूर्येष्ट्वा उक्तनीत्या पञ्चतत्त्वहोमाद्युक्तनीत्या स्रुवाज्याहुतिं विधाय शेषं विधिमादधीत ॥ ९३ ॥

कलशाधिवासे देवाय[1] विज्ञापिते वा तदेकदेशस्नपने कृते कलशाभिषेकमध्ये वा उपाहृतिर्विरोधश्चेत् कलशे मन्त्रबिम्बे च तन्निष्कृतिं तत्प्रायश्चित्तसम्पातस्पर्शनमादधीत ॥ ९४ ॥

अथ बलिकौतुकादीनामशुद्ध्यादिसम्भवे प्रायश्चित्तमाह — **दुष्टे वेति** । बलिकौतुके बल्यर्थं नीयमाने कर्मबिम्बे दुष्टेऽशुद्धे वा निपतिते वा अत्रैव

---

१. 'कय' क. पाठः.

कृत्वा कर्म समाप्य मूलम-बिम्बे योजयित्वा तत-
स्तत्तद्दोषबलाबलानुसरणात् कुर्याद् गुरुर्निष्कृतिम् ॥
भग्ने पथि प्रस्थितकर्मबिम्बे
देवं समायोज्य ततोऽन्यबिम्बे।
निष्कृत्य शेषं सुसमाप्य मूले
नीत्वाचरेन्निष्कृतिकर्म सम्यक् ॥ ९६ ॥
भूरादिमन्त्रोक्तचतुर्गृहीतं मनस्वतीपूर्वदशाहुतिश्च ।
स्वपञ्चतत्त्वोदितसास्त्रमूलाहुतिद्विजेज्यादि[३] योज्याः;
अभिहितामिह निष्कृतिमाचरेदनुदितास्वपि कर्मविपत्तिषु।
समनुचिन्त्य दुरिष्टबलाबलं त्वनुगुणं प्रकृतेर्विकृतेरपि ॥

स्थले तन्निधाय संशोध्य सप्तशुद्धीः कृत्वा स्वपञ्चमनुमूलास्त्रादिभिः पूर्वोक्तै-र्युक्तितो यथाबलं तत्प्रायश्चित्तंहुतिं कृत्वा बलिकौतुके सम्पातं संस्पृश्य शेषं कर्म समाप्यान्तरत्ये मूलमनुबिम्ब योजयित्वा ततो गुरुः परापरदोषविशेषज्ञः तत्तद्दोषबलाबलानुसरणाद् निष्कृतिं कुर्यात् ॥ ९५ ॥

प्रस्थितकर्मबिम्बे बल्यर्थं तीर्थस्नानाद्यर्थं वा प्रस्थापिते कर्मबिम्बे पथि मार्गे भग्ने सति ततोऽन्यबिम्बे देवं समायोज्य निष्कृत्य सप्तशुद्ध्यनन्तरं स्वस्वपञ्चतत्त्वहोमाद्युक्तं प्रायश्चित्तं कृत्वा शेषं विधिं सुसमाप्यं प्रकृतकर्मशेषं विधिवत् कृत्वा मूलबिम्बे नीत्वा तत्र निष्कृतिकर्म सम्यक् उत्तमविधानेना-चरेत् ॥ ९६ ॥

इहापि निष्कृतौ पूर्वोक्तप्रकारेण भूरादिमन्त्रोक्तचतुर्गृहीतं 'भूराद्यैश्च पृथक् चतुर्ग्रहघृतं भङ्क्त्वाष्टधात्राहुनेत्' इत्युक्तादिकं, मनस्वतीपूर्वदशाहु-तिश्च 'मनो ज्योतिः', 'अयाश्चाग्ने' इत्युक्तं सर्वप्रायश्चित्तं, स्वपञ्चतत्त्वोदितसास्त्र-मूलाहुतिद्विजेज्यादिः स्वस्वपञ्चतत्त्वैरष्टाष्टहोमः स्वास्त्रेण स्वमूलेन चाष्ट-शतहोमो ब्राह्मणतर्पणादिरपि योज्याः युक्तितः कार्याः ॥ ९७ ॥

उक्तान्यपि प्रायश्चित्तानि अनुक्तेष्वप्यतिदिश्य कुर्यादित्याह — **अ-भिहितामिति** । अनुदितासु अनुक्तासु कर्मविपत्तिषु कर्मविनाशेषु प्रकृते-

१. 'त' इति मूलकोशपाठः. २. 'ज्यं' ग. पाठः ३ 'त्ता' क. ङ. पाठः, ४ 'स्था' ख. घ. च. पाठः. ५ 'प्य कृ' क. ख. घ. च. पाठः ३. 'यथाव' ख. घ. ङ. च. पाठः.

अर्चास्थानविशुद्धीः काश्चन गुरुशिक्षितास्त्ववोचाम ।
अर्चकतत्साधनयोः काश्चन ताश्च ब्रवीमि विदिता याः ॥
काये स्नानाचमनमथ विष्णोत्वमित्यादिजापो
वाचि स्वान्ते भगवदभिमर्शश्च सामान्यतः स्यात् ।
कृच्छ्रं चान्द्रायणमपि घृतब्रह्मकूर्चाशनादि-
श्चोक्ता मन्वादिभिरिह विशुद्धिर्गरिष्ठे तु दोषे ॥ १०० ॥
देहे महाभूतविलायनादिः प्रत्याहृतिः स्यादखिलाक्षकेषु ।
देहिन्यथ स्वोन्नयमानसेज्ये विशेषशुद्धिर्विहितार्चनादौ ॥

विकृतेरपि अस्य दोषस्येदं प्रायश्चित्तमिति स्थिरीकृतं प्रकृतिः, अस्मिन् दोषे किं कर्तव्यमिति विचारो विकृतिः, तयोर्द्वयोरपि दुरिष्टबलाबलं दोषस्य तारतम्यं समनुचिन्त्य युक्तिज्ञैराचार्यैः सह सम्यग् विचिन्त्य तु विशेषतः अनुगुणं प्रायश्चित्तं यथा भवति तथा इहाभिहितामुक्तामेव निष्कृतिमाचरेत् ॥ ९८ ॥

अर्चास्थानविशुद्धीः प्रतिमायाः स्थानस्य च विशेषयुक्ताः शुद्धीः गुरुशिक्षिताः गुरुभिरुपदिष्टाः यास्ताः काश्चनावोचाम उक्तवन्तो वयम् । अर्चकतत्साधनयोः पूजकस्य पूजासाधनस्य च याः काश्चन शुद्धीः मया विदिताः अवधृतास्ताश्च ब्रवीम्यहम् ॥ ९९ ॥

अर्चकशुद्धिमाह — **काय** इति । काये देहे स्नानाचमनं स्नानमाचमनं च सामान्यतः शुद्धिः स्यात् । वाचि अभाष्यं प्रति वाग्विसर्गे विष्णोत्वमित्यादिजापः, स्वान्ते मनसि ग्राम्यचिन्तासम्भवे भगवदभिमर्शः भगवद्ध्यानं च सामान्यशुद्धिः स्यात् । गरिष्ठे गुरुतरे दोषे सति इह मन्वादिभिः स्मृतिकोविदैः कृच्छ्रं सान्तपनादिकं, चान्द्रायणं, घृतब्रह्मकूर्चाशनादिश्च घृतप्राशनं ब्रह्मकूर्चाशनादिश्च विशुद्धिर्विशेषशुद्धिरुक्ता ॥ १०० ॥

अथार्चनादौ देहे महाभूतविलायनादिः भूतसंहारः शोषणादिश्च, अखिलेषु चक्षुरादिष्विन्द्रियेषु प्रत्याहृतिः विषयेभ्यो निवृत्यान्तर्मुखतापादनं, देहिनि जीवे स्वोन्नयमानसेज्ये स्वोन्नयः स्वस्य जीवस्य उन्नयो द्वादशान्तस्थपरमात्मनि योजनं मानसपूजा तं हृदयकमले संस्थाप्य पञ्चभूतात्मकैरुपहारैरर्चनम्, एषा देहात्मनोर्विशेषशुद्धिर्विहिता ॥ १०१ ॥

---

१. 'दोषात्म' क. पाठः.

शुद्धिस्तक्षणदा भस्मकमृजानिर्णेजनं दारुमृ-
त्तेजस्तन्तुमये तथेज्यनदर्भोद्योतने सर्पिषि ।
ताम्रेऽम्लोदमृजा शकृज्जलमृजा दुर्वर्णशङ्खादिके
वस्त्रे क्षारजलोक्षणं रविकरस्पर्शश्च पट्टांशुके ॥ १०२ ॥
धान्ये शूर्पपरिभ्रमस्तदवघातौ तण्डुले लेपग-
न्धापायः सकले समित्कुसुमदर्भाद्येषु सम्प्रोक्षणम् ।
पुण्याहं सलिलाशये शिखिशिखोद्द्योतश्च राज्यां क्षितौ
कर्षोल्लेखनविप्रभोजनमथास्त्राणूक्षणं वाखिले ॥ १०३ ॥
अजुगुप्सितरूपा चेदुपहतिरखिलेषु साधनीयैवम् ।
तच्छुद्धिरन्यथा चेत् त्यागः श्रेयानकुप्यतोऽन्येषु ॥ १०४ ॥

पूजासाधनशुद्धिमाह — शुद्धिरिति । दारुमृत्तेजस्तन्तुमये दारवे मृण्मये स्वर्णादिमये तन्तुमये च वस्तुनि क्रमेण तक्षणदाहभस्मकमृजानिर्णेजनं दारवे तक्षणं, मृण्मये दाहः, तेजोमये भस्मजलाभ्यां मार्जनं, तन्तुमये निर्णेजनं क्षालनं शुद्धिः स्यात् । तथा सर्पिषि उत्पवनदर्भोद्द्योतने गालनं, दर्भगताग्निोद्द्योतनं च, ताम्रे ताम्रमये वस्तुनि अम्लोदमृजा अम्लजलाभ्यां मार्जनं, दुर्वर्णशङ्खादिके रजतशङ्खादौ शकृज्जलमृजा गोमयजलाभ्यां मार्जनं, वस्त्रे क्षारजलोक्षणं, पट्टांशुके रविकरस्पर्शश्च शुद्धिः स्यात् ॥ १०२ ॥

धान्ये व्रीह्यादौ शूर्पपरिभ्रमः, तण्डुले तदवघातौ शूर्पपरिभ्रमणमवहननं च शुद्धिः स्यात् । सकले वस्तुनि लेपगन्धापायः मलादेर्लेपापायो गन्धापायश्च शुद्धिर्विहिता । समित्कुसुमदर्भाद्येषु सम्प्रोक्षणं, सलिलाशये तटाकादौ पुण्याहं पुण्याहप्रोक्षणं, राज्यां राज्यास्तमोमयत्वात् शिखिशिखोद्द्योतः अग्निज्वालयोद्द्योतनं शुद्धिः । क्षितौ कर्षोल्लेखनविप्रभोजनं कर्षणम् उल्लेखनं विप्रभोजनं च यथावकाशं शुद्धिः । अथवा अखिले वस्तुन्यस्त्राणूक्षणं शुद्धिः स्यात् ॥ १०३ ॥

अखिलेषु वस्तुषु उपहतिः अशुद्धिः अजुगुप्सितरूपा चेत् उद्वेगो न जायते यदि एवमुक्तप्रकारेण तच्छुद्धिस्तस्य तस्य शुद्धिः साधनीया । अन्यथा चेत् जुगुप्सा जायते चेत् अकुप्यतः मणिहिरण्यादेरन्येषु वस्तुषु तेषां त्याग एव श्रेयान् ॥ १०४ ॥

१. 'जा हिं नि' क. ख. घ. च. पाठः.

उक्तेष्वनुक्तेषु चोपघाते-
ष्वालोच्य तज्ज्ञैः सह साधकेन्द्रः ।
श्रुतिस्मृतिन्यायपरैः प्रकुर्यात्
तन्निष्क्रियां पुष्कलता तथैव ॥ १०५ ॥
इति तन्त्रसमुच्चये श्रुतार्चा-
क्रमगुप्त्यै रविजन्मसम्प्रणीते ।
प्रकटोदितनिष्क्रियाकलापः
पटलोऽभूद् दशमोऽपि संप्रपूर्णः ॥ १०६ ॥

इति तन्त्रसमुच्चये
दशमः पटलः ।

उक्तेष्वनुक्तेषु चोपघातेषु दोषेषु सत्सु साधकेन्द्रः स्वयं साधकश्रेष्ठः सन्नपि श्रुतिस्मृतिन्यायपरैः श्रुतेर्वैदिककर्मणः स्मृतेः स्मार्तकर्मणः न्यायस्याचारस्य च तात्पर्ययुक्तैस्तज्ज्ञैः सहालोच्य विविच्य तन्निष्क्रियां तत्तन्निष्कृतिं कुर्यात् । तथैव तथा भवति चेदेव पुष्कलता परिपूर्णता स्यात् ॥ १०५ ॥

पटलमुपसंहरति — इतीति । इति उक्तप्रकारेण श्रुतार्चाक्रमगुप्त्यै गुरुमुखाच्छ्रुतस्य पूजाक्रमस्य गुप्त्यै अविस्मरणाय रविजन्मसंप्रणीते रविपुत्रेण नारायणेन विरचिते तन्त्रसमुच्चये तन्नाम्नि ग्रन्थे दशमः पटलोऽपि संप्रपूर्णोऽभूत् । कथंभूतः, प्रकटोदितनिष्क्रियाकलापः प्रकटेन व्यक्तेनोक्तो निष्क्रियाणां प्रायश्चित्तानां कलापः समूहो यस्मिन् सः ॥ १०६ ॥

इति तन्त्रसमुच्चयविमर्शिन्यां
दशमः पटलः ।

अथैकादशः पटलः ।

आकल्पान्तस्थास्नुभावेन भक्त्या
देवस्यैवं सम्प्रतिष्ठापितस्य ।
प्रासादादिस्वाङ्गजीर्त्तिर्यदि स्या-
दुद्धृत्यातस्तं नवाङ्गीकरोतु ॥ १ ॥
निष्क्रामणेन विधिनात्र तदन्तरङ्गे
वैकल्यभाजि वितनोतु यथापुरं तत् ।
सङ्कोचनेन बहिरङ्गविपद्यदश्च
निष्क्रामणेन चिरकालचिकीर्षितं चेत् ॥ २ ॥
बालालयादिसहितं कलशैककार्यं
चेति द्विधात्र खलु निष्क्रमणं स्मरन्ति ।

एवं दोषेषु सत्सु प्रायश्चित्तमभिहितम् । तत्र कालादिवशात् प्रासादादीन्यङ्गानि जीर्यन्ते चेत् तत्परिहाराय एकादशेन पटलेन जीर्णोद्धारं वदन् आदौ तस्योद्देशं करोति— **आकल्पान्तेति** । भक्त्या हेतुना आकल्पान्तस्थास्नुभावेन प्रलयकालपर्यन्तं स्थिरतया स्थितिबुद्ध्या एवमुक्तप्रकारेण सम्प्रतिष्ठापितस्य देवस्य प्रासादादिस्वाङ्गजीर्तिः प्रासादबिम्बादीनां स्वाङ्गानां श्लथनं यदि स्यात् अतो जीर्णादङ्गादुद्धृत्य तं देवं नवाङ्गीकरोतु प्रत्यग्रावयवं करोतु ॥ १ ॥

अत्र जीर्णोद्धारे तदन्तरङ्गे बिम्बादौ वैकल्यभाजि विकलाङ्गतां प्राप्ते निष्क्रामणेन प्रासादाद् निर्यापनेन विधिना तदङ्गाद् देवमुद्धृत्य तदङ्गं यथापुरं पूर्ववदेव वितनोतु विरचय्य स्थापयतु । बहिरङ्गविपदि प्रासादादौ वैकल्यं प्राप्ते संकोचनेन परिवारांस्तत्त्वानि च संहृत्य हृदयकमले योजयित्वा तन्मुकुलविधिना यथापुरं वितनोतु । अदः बहिरङ्गं चिरकालचिकीर्षितं चेत् चिरेणैव कालेन तदङ्गं क्रियते चेत् निष्क्रामणेन तद् यथापुरं वितनोतु ॥ २ ॥

अत्र खलु जीर्णोद्धारे बालालयादिसहितं बालालयोऽल्पगृहं तेन सहितं, कलशैककार्यम् एकेन कलशेनैव निर्वर्त्यं चेति द्विधा द्विप्रकारेण निष्क-

१. 'तम् । ये त' क. पाठः.

सङ्कोचनं स्वविभवस्वनिगूहनं स्या-
[illegible]मेह प्रथमं ब्रवीमि ॥ ३ ॥
मूलालयादक्षिणभागसंस्थं तत्सम्मुखं बालगृहं विधाप्य ।
समण्डपं शिल्पिभिरल्पबेम्बं प्रकल्पयेल्लौहिकमाङ्घ्रिपं वा ॥
अत्राप्यङ्कुररोपणं प्रथमतः कृत्वा गृहीत्वा नवं
बिम्बं वार्यधिवास्य बालनिलयं संशोध्य तन्मण्डपम् ।
संस्कृत्योदकतोऽल्पबिम्बमुपनीय स्नापयित्वा पुन-
स्तत्तद्बिम्बघटैः प्रणीय शयनीये शाययेद् देशिकः ॥
तत्र त्रिसूत्राकलनादि मूलप्रासादशुद्धिं विधिवद् विधाय ।
प्रक्षालनाद्याश्च यथार्हकालं कुर्वीत मूलप्रतिमाविशुद्धीः ॥

मणं स्वाद् बिम्बादुद्वास्य बहिःप्रापणं स्मरन्ति विद्वांसः । संकोचनं तु स्वविभवस्वनिगूहनं स्वस्य विभवस्य तत्त्वरूपेण परिवाररूपेण च व्याप्तेः स्वस्मिन्नेव निगूहनं हृदयकमल एव गोपनं स्यात् । इह प्रथममहं निष्क्रामणक्रमं ब्रवीमि ॥ ३ ॥

तत्र मूलालयादक्षिणभागसंस्थं मूलप्रासादस्याग्रतो वामभागस्थितं तत्संमुखं मूलप्रासादाभिमुखं समण्डपं तत्पुरोभागस्थितेशमण्डपेन च सहितं बालगृहमल्पगृहं शिल्पिभिः विधाप्य कारयित्वा लौहिकं लोहमयम् आङ्घ्रिपं दारवं वाल्पबिम्बं प्रकल्पयेत् ॥ ४ ॥

अथ देशिकः अल्पगृहाल्पमण्डपाल्पप्रतिमादीनां लक्षणज्ञो गुरुः अत्रापि कर्मणि प्रथमतः पूर्वं बालालयोदग्भागस्थगृहे सप्ताहादिकालेऽङ्कुरारोपणं कृत्वा नवं बिम्बम् अल्पबिम्बं गृहीत्वा वारि जेलऽधिवास्य बालनिलयमल्पगृहं संशोध्य यथाक्रमं प्रासादशुद्धिं कृत्वा तन्मण्डपं बालालयाग्रगतं मण्डपं संस्कृत्य उदकतो जलात् अल्पबिम्बमुपनीय तत्तद्बिम्बघटैः तस्य तस्य देवस्योक्तैर्बिम्बशुद्धिकलशैः स्नापयित्वा पुनः शयनीये तन्मण्डपस्थशय्यायां प्रणीय शाययेत् यथोक्तविधिनाधिवासं कुर्यात् ॥ ५ ॥

तत्र पुनर्यथार्हकालं त्रिसूत्राकलनादि तन्तुवेष्टनमारभ्य मूलप्रासादशुद्धिं विधिवत् यथोक्तप्रकारेण विधाय प्रक्षालनाद्याः सप्त मूलप्रतिमाविशुद्धीः कुर्वीत ॥ ६ ॥

---

१. 'ने संवेशयेद्' ख. पाठः.

संस्नाप्य देवमथ निष्कृतितत्त्वहोम-
सम्पातसिद्धकलशैः कलशैः परैश्च ।
प्रार्च्य प्रसाद्य परिषत्सु बलिं विकीर्य
प्रार्थ्यारभेत सुसमीहितकर्म मन्त्री ॥ ७ ॥

मूलालयाग्राहितमण्डपस्थे कुण्डे समुत्पाद्य कृपीटयोनिं
तत्पार्श्वदेशे कलशं प्रपूर्य कुर्याद् गुरुः संहृतितत्त्वहोमम् ॥

सम्पातसिद्धं प्रसमर्प्य कुम्भे पूजामनुद्रव्यहुतिप्रसिद्धम् ।
सृष्टिक्रमेणाखिलतत्त्वमन्त्रैः सकृत् सकृत् सर्पिरथो जुहोतु ॥

गत्वा गर्भगृहं समिष्टनिजपीठे देवमास्थाप्य तं
तत्त्वन्यासपुरस्सरं सकलितं कृत्वा समभ्यर्च्य च ।

अथ मन्त्री प्रायश्चित्तपटलोक्तविधिज्ञो गुरुः निष्कृतितत्त्वहोमसंपातसिद्धकलशैः प्रायश्चित्तहोमादिभिः सिद्धैः संपातकलशैः तत्त्वहोमसंपातकलशेन च देवं संस्नाप्य पुनः परैः स्वस्वोक्तद्रव्यकलशैश्च संस्नाप्य प्रार्च्य विशेषतः पूजां कृत्वा प्रसाद्य परिषत्सु परिवारेषु भूतबलिं च विकीर्य वक्ष्यमाणरीत्या प्रार्थ्य सुसमीहितकर्म सङ्कल्पितं निष्कामणं कर्म सावधानं प्रारभेत ॥

पुनर्गुरुः स्वयमवहितो भूत्वा मूलालयाग्राहितमण्डपस्थे मूलप्रासादस्याग्रमण्डपस्थिते कुण्डे कृपीटयोनिमग्निं समुत्पाद्याग्निमुखं कृत्वा परिधिस्थापनात् पूर्वं तत्पार्श्वदेशे कलशं यथोक्तरीत्या प्रपूर्य संपूज्य परिधिस्थापनादिपूर्वं संहृतितत्त्वहोमं संहारार्थं तत्त्वहोमं कर्यात् ॥ ८ ॥

तत्क्रियाक्रममाह — संपातमिति । अस्मिंस्तत्त्वमये कुम्भे पूजामनुद्रव्यहुतिप्रसिद्धं पूजामन्त्रहोमात् प्राप्तं तदनन्तरमेव द्रव्यहोमं च कृत्वा तत्र सिद्धं च संपातं प्रसमर्प्य अथो अखिलतत्त्वमन्त्रैः सृष्टिक्रमेण सकृत् सकृत् सर्पिर्जुहोतु ॥ ९ ॥

ततो गर्भगृहं गत्वा समिष्टनिजपीठे पीठपूजानन्तरं देवमास्थाप्य आवाह्य तत्त्वन्यासपुरस्सरं तत्त्वन्यासादिभिः तं देवं सकलितं कृत्वा समभ्यर्च्य

---

१. 'मं सम्यक् ॥' ख. पाठः.

तत्सम्पातघृतं समर्घ्य परिपूर्णं भावयित्वा ततः
संहारानुमतिं विकीर्य कुसुमं सम्प्रार्थयेत् साञ्जलिः ॥
लब्धाज्ञो गृहमूर्तिकुण्डकलशार्चोदर्चिरम्भश्चितां
नाडीयोगकृते ध्रुवेण कुसुमं दत्त्वा समेत्यानलम् ।
कृत्वा तत्र हुताशने च कलशे चैवं प्रसूनाञ्जलिं
मूलेनाष्ट घृताहुतीर्वितनुयात् तत्कर्मसांमुख्यदाः॥ ११॥
क्षेत्राधिपादिप्रतिहारकान्तैर्निर्माल्यधार्यादिगुरूत्तमान्तैः ।
हुत्वैकशः पूर्वमथो यथाशक्त्यावृत्य सर्पिर्जुहुयादमीभिः ॥
पुरः कोपतत्त्वेन तद्वत्यशेषे
ततः क्ष्मादिकाव्यक्तपर्यन्ततत्त्वैः ।

तत्सम्पातघृतं च समर्घ्य तं निखिलैः परिवारैर्निखिलैस्तत्त्वैश्च परिपूर्णं भावयित्वा ततः कुसुमं विकीर्य साञ्जलिः अञ्जलिमुद्राबन्धपूर्वं संहारानुमतिं संहारार्थमनुज्ञां देवं प्रार्थयेत् ॥ १० ॥

ततो लब्धाज्ञः गृहीतानुज्ञो भूत्वा नाडीसन्धानं कुर्यात् । तत्परिपाटीमाह — गृहेत्यादिना । गृहमूर्तिकुण्डकलशार्चोदर्चिरम्भश्चितां प्रासादमूर्तेः कुण्डस्य कलशस्य च क्रमात् प्रतिमाया अग्नेर्जलस्य च तेषां चैतन्यानां च नाडीयोगकृते तत्त्रितयस्य नाडीनां योगार्थं प्रथमं देवाय ध्रुवेण प्लुतप्रणवेन कुसुमं त्रिशो दत्त्वा अनलं कुण्डस्थाग्निसमीपं समेत्य तत्र हुताशने अग्नौ च कलशे च एवं प्लुतप्रणवेन त्रित्रिवारं प्रसूनाञ्जलिं कृत्वा एवं नाडीसन्धानानन्तरं पुनर्मूलेन तत्कर्मसांमुख्यदाः तस्य संहारकर्मण अभिमुख्यदानायाष्ट घृताहुतीर्वितनुयात् ॥ ११ ॥

ततः क्षेत्राधिपादिप्रतिहारकान्तैः क्षेत्रपालमारभ्य संहारक्रमेण द्वाःस्थपर्यन्तैर्बलिपरिवारमन्त्रैः पुनर्निर्माल्यधार्यादिगुरूत्तमान्तैः स्वस्वनिर्माल्यधारिणमारभ्य संहारक्रमेण स्थितैः परिवारमन्त्रैः समष्टिमारभ्य प्रतिलोमस्थितैः गुरुपर्यन्तैः पीठमन्त्रैश्च एकशः सकृत् सर्पिर्हुत्वा अथो अमीभिः वक्ष्यमाणैर्मन्त्रैर्यथाशक्ति अष्टशतादिसंख्यमावृत्य सर्पिर्जुहोतु ॥ १२ ॥

ततः तद्वति कोपतत्त्ववति विष्ण्वादौ पुरः आदौ कोपतत्त्वेन, अशेषे सर्वदेवेषु ततः क्ष्मादिकाव्यक्तपर्यन्ततत्त्वैः पृथिवीतत्त्वादिप्रकृत्यास्यमाणपर्यन्तैः

कृशान्वादिहृत्पुण्डरीकावसानै-
र्विशेषान्वितैः स्वैर्हुनेच्चेषुतत्त्वैः ॥ १३ ॥
जीवेन सर्वेषु शिवेऽन्तिमेन शिवेन चैतत्परमीक्रियायै ।
यथोक्तसङ्ख्यावसितौ जुहोतु पूर्णाहुतिं च प्रतितत्त्वमत्र ॥
सर्वत्र सङ्ख्याष्टशतं समुक्ताथाष्टोत्तरा विंशतिरष्ट वात्र ।
जुहोतु शर्वे निजपञ्चतत्त्वैरुद्धातवृत्त्यैकश एव वान्यैः ॥१५॥
सूत्रच्छिदाकर्मणि हुंफडन्तान्युक्तानि तत्त्वानि न चापरत्र ।
तथैव मिष्कामणकर्मवर्जे विशेषवत्त्वं न च पञ्चसूक्तम् ॥

श्चतुर्विंशतितत्त्वैः, शिवे तु शक्तितत्त्वान्तैः पञ्चत्रिंशत्तत्त्वैः, पुनः सर्वेषु कृशान्वादिहृत्पुण्डरीकावसानैः अग्निमण्डलसोममण्डलसूर्यमण्डलहृत्पुण्डरीकैः, पुनर्विशेषान्वितैः द्वादशे पटले वक्ष्यमाणविशेषयुक्तैः स्वैः स्वैः इषुतत्त्वैः पञ्चतत्त्वैश्च हुनेत् ॥ १३ ॥

पुनः एतत्परमीक्रियायै एतस्य देवस्य परत्वप्राप्तये सर्वेषु देवेषु जीवेन जीवतत्त्वेन शिवे अन्तिमेन शिवतत्त्वेन च जुहोतु । यथोक्तसंख्यावसितौ उक्तानां संख्यानामवसाने प्रतितत्त्वं तत्त्वे तत्त्वे च यथोक्तपूर्णाहुतिं च जुहोतु ॥ १४ ॥

अथ अत्र सर्वत्र तत्त्वेषु अष्टशतं वा अष्टोत्तरा विंशतिर्वा अष्ट वा संख्या समुक्ता । शिवे निजपञ्चतत्त्वैः उद्धातवृत्त्या जुहोतु । उद्धाता वृत्तिर्नाम ऊर्ध्वोर्ध्वं हननेन ह्रासेनावृत्तिः । तत्र प्रथमेन तत्त्वेन पञ्चविंशत्यधिकं शतं, द्वितीयेन शतं, तृतीयेन पञ्चसप्ततिः, चतुर्थेन पञ्चाशत्, पञ्चमेन पञ्चविंशतिरित्यादिसंख्याविभागेनेत्यर्थः । अन्यैः पञ्चत्रिंशत्तत्त्वैः एकैकश एव वा जुहोतु ॥ १५ ॥

सूत्रच्छिदाकर्मणि सूत्रच्छेदो नामायतनाद् बिम्बस्योद्धारः तत्र होमादौ योजनीयानि तत्त्वानि हुंफडन्तान्येवोक्तानि । अपरत्र सूत्रच्छेदेन विन,

१. 'त्त्वैः ॥
सर्वाद्यादिषु तत्त्वकेषु निजमूर्त्यन्तेषु गन्धादित-
न्मात्रोल्लसितस्वरूपपदमादायान्तमन्ते पुनः ।
हेन्तात्मान्तसमानपूर्वकनिजप्राणान् नमोन्तान् वदे
देवं संहृतिपञ्चतत्त्वमनवः प्रोक्ता विशेषान्विता. ॥
ओ' ख. पाठः. २. 'जुहोत् रङ्ग ब्रह्मस्तौ यथोक्त पू' इति मूलकोशपाठः.

कनिक्रदत्स्वस्तिसमुत्थमन्त्रैः सकृत् सकृत्सर्पिरिहोत्रकल्पने जुहोतु ।
सूत्रच्छिदायां च चतुर्गृहीतं वास्तोष्पतेप्रत्यृगणुद्वयेन ॥
गत्वा गर्भगृहं विधाय परमान्नप्रीणनाद्यं विभो-
स्तद्धोमं सुसमाप्य तत्त्वकलशे सम्पातपातादिकम् ।
कृत्वा स्वस्तिकविष्टरेऽन्तरुपनीयं स्थापयेदग्रतो
यात्राद्याहुतिसाधिताज्ययुगलं चास्थाप्य रक्षेत् क्वचित् ॥

निष्क्रमादौ न हुंफडन्तत्वमुक्तम् । तथैव निष्क्रामणकर्मवर्जं निष्क्रामणकर्मणोऽन्यत्र पञ्चसु तत्त्वेषु विशेषवत्त्वं विशेषयोजनं च नोक्तम् ॥ १६ ॥

निष्क्रमणे तु कनिक्रदत्स्वस्तिसमुत्थमन्त्रैः 'कनिक्रदज्जनुषम्' इत्यादिमन्त्रैः 'स्वस्ति नो मिमीताम्' इत्यादिमन्त्रैश्च सकृत् सकृत् सर्पिर्जुहोतु । सूत्रच्छिदायां सूत्रच्छेदनिमित्ते वास्तोष्पतेप्रत्यृगणुद्वयेन 'वास्तोष्पते प्रतिजानीहि' 'वास्तोष्पते शग्मया' इति मन्त्राभ्यां चतुर्गृहीतं चतुर्गृहीतपूर्णाहुतिं च जुहोतु ॥ १७ ॥

एवं कृत्वा गर्भगृहं गत्वा विभोर्देवस्य परमान्नप्रीणनाद्यं पायसं निवेद्य तत्कुण्डस्थाग्नावेव पूजाहोमं विधायान्तर्गत्वा निवेद्यविसर्जनं कृत्वा प्रसाद्य प्रसन्नपूजानन्तरं बहिरागत्य तद्धोमं स्विष्टकृद्धोमादिना सुसमाप्य तत्त्वकलशे सम्पातपातादिकं सम्पातस्पर्शान्युद्वासनादिकं कृत्वा अन्तः देवस्याग्रतः स्वस्तिकविष्टरे पूजितपीठे स्वस्तिके तत्त्वकलशमुपनीय स्थापयेत् । यात्राद्याहुतिसाधितं 'कनिक्रदा'दिहोमसाधितं 'वास्तोष्पति'होमसाधितं च संपातं क्वचित् प्रदेशे आस्थाप्य रक्षेत् ॥ १८ ॥

---

१. 'न ॥
होमं समाप्य कलशे प्रसमर्प्य तत्त्वसम्पातसर्पिरितरद्वितयं सुरक्षेत् ।
अग्रे निधाय दहनं कलशं च पार्श्वे संपूज्य तस्य तनुयादथ शान्तिहोमम् ॥
सावित्र्याष्टसहस्रमत्र जुहुयाद् वर्णान्निमध्याप्लुता
भूरादैरपि वा पयोद्रुसमिधः संपातमेतद्घटे ।
सिक्त्वाज्यं निजपञ्चतत्त्वमनुभिर्हुत्वाष्टशस्तद्भवं
सम्पातं परिरक्ष्य वह्नियतचैतन्यं घटे योजयेत् ॥
तेनाभिषिच्य विधिवत् प्रयजेच्च देवमुद्वास्य तत्त्वकलशे चितिमग्निसंस्थाम् ।
उद्वास्य चिन्मयतया परिकल्प्य नीत्वा देवाग्रतो न्यसतु तं सुसमिष्टपीठे ॥ निर्गल्य' ख. पाठः,
२. 'वा' इति मूलकोशपाठः.

निर्गत्य विप्रान् विदुषः समूह्य प्रसाद्य हेमादिसमर्पणेन ।
देवं च तत्तन्मनुना प्रणम्य कृताञ्जलिः कर्म निवेदयेत ॥

नमो ब्रह्मण्यदेवाय गोब्राह्मणहिताय च ।
जगद्धिताय कृष्णाय गोविन्दाय नमो नमः ॥ २० ॥

नमः शिवाय साम्बाय सगणाय ससूनवे ।
प्रधानपुरुषेशाय सृष्टिस्थित्यन्तहेतवे ॥ २१ ॥

पूजाबिम्बमिदं विष्णोः स्थापितं पूर्वसूरिभिः ।
अनेन दूषणेनाद्य दूषितं चेह वर्तते ॥ २२ ॥

दुष्टबिम्बस्य चोद्धारः कर्तव्य इति शासनम् ।
आगमस्य वयं कर्तुं व्यवसायमुपास्महे ॥ २३ ॥

अत्रेदं यदि कर्तव्यमगमार्थतया भवेत् ।
भवन्तो नोऽनुजानन्तु भवेमाज्ञाकरा वयम् ॥ २४ ॥

इति ॥

आद्योऽजितेऽणुः प्रणतौ द्वितीय-
स्त्र्यक्षे स्वमूलादिरणुः परेषु ।
विज्ञापनेऽन्यत् त्रितयं हरौ तत्
परेषु किञ्चिद्विदुराद्यपादम् ॥ २५ ॥

पुनर्निर्गत्य विदुषः प्राज्ञान् विप्रान् समूह्य अग्रमण्डपे समूहीकृत्य हेमादिसमर्पणेन सुवर्णादिदानेनप्रसाद्य तत्तन्मनुना स्वस्वोक्तमन्त्रेण देवं च प्रणम्य तत्र कृताञ्जलिः स्थित्वा तच्चिकीर्षितं कर्म निवेदयेत ॥ १९ ॥

प्रणामादौ विहितान् मन्त्रान् लिखति—नम इत्यादि ॥ २०–२४ ॥

उक्तानां स्तोत्रमन्त्राणां विभागमाह — आद्य इति । एषु मन्त्रेष्वाद्यो 'नमो ब्रह्मण्यदेवाये'त्याद्योऽजिते प्रणतौ नमस्कारे अणुः । द्वितीयो 'नमः शिवाये'त्याद्यस्त्र्यक्षे प्रणतावणुः । अतःपरेषु शिवनारायणादिषु स्वमूलादिरणुः । अन्यत् त्रितयं 'पूजाबिम्बमिदमि'त्यादिपद्यत्रयं हरौ विषये ज्ञाप-

---

१. 'त' ख. पाठः.

क्रियतामिति तैः समीरिते विमृश्यागमशासनं मुहुः ।
अथ विश्वजनावबोधकं वचनं चागमिकं निवेदयेत् ॥ २६ ॥

यथैव देवपूजायां विनियुक्तमनिन्दितम् ।
द्रव्यं पुष्पादिकं पश्चान्निर्माल्यमिति निन्द्यते ॥ २७ ॥

एवं बिम्बमदुष्टं यत् पूजायां विनियुज्यते ।
तदेव दूषितं पश्चान्निर्माल्यमिति निन्द्यते ॥ २८ ॥

तस्माद् दुष्टमिदं बिम्ब भवद्भिर्मुक्तसंशयैः ।
निर्माल्यबुद्ध्या त्यक्तव्यमिति शास्त्रस्य शासनम् ॥

इति ॥

संवावदूकेषु जनेषु कर्तृन् कियन्तमित्याद्यणुनानुयुज्य ।
कालावधिं तद्गतदेवताभ्यो देवाय चैवं विनिवेदयेच्च ॥

कियन्तं कालमत्रेशः प्रवासघसतिं वसेत् ।
मासादूर्ध्वं द्वादशाब्दादर्वाक् कालावधिः स्मृतः ॥ ३१ ॥

नार्वागूर्ध्वं क्लेशवासं वासुदेवोऽनुमन्यते ॥

शृण्वन्तु देवताः सर्वाः प्रासादमिममाश्रिताः ।
यदुच्यमानमस्माभिरनुगृह्णन्तु तेन नः ॥ ३२ ॥

णेभ्यो विज्ञापनेऽणुः स्यात् । परेषु देवेषु किञ्चिद्विदुराद्यपादं 'पूजालिङ्गमिदं शम्भोरि'त्यादिभेदिताद्यपादं तदेव त्रयम् ॥ २५ ॥

अथ तैः विप्रैः आगमशासनम् आगमानां नियोगं विमृश्य मुहुर्मुहुः क्रियतामिति निस्सन्दिग्धं समीरिते सत्यथ विश्वजनावबोधकं सामान्यजनप्रबोधकम् आगमिकम् आगमोक्तं वचनं च निवेदयेत् ॥ २६ ॥

तान्याह — **यथैव** देवपूजायामित्यादि ॥ २७—२९ ॥

संवावदूकेषु तस्मिन् कर्मणि संवदनशीलेषु जनेषु सत्सु कर्तॄन् प्रति 'कियन्तं कालमि'त्याद्यणुना कालावधिमनुयुज्य पृष्ट्वा तद्गतदेवताभ्यः तत्क्षेत्रस्थितदेवताभ्यः एवं 'शृण्वन्त्विव'त्याद्यणुना, देवाय 'भगवन् वास्त्वभिनवमि'त्यादिना च निवेदयेत् ॥ ३० ॥

त्रिविधं मन्त्रं पठति — कियन्तमित्यादि ॥ ३१—३८ ॥

पूर्वैः पूर्वं कृतमिदं देवालयमनारवत्।
प्राप्तं कालवशाद् भूयो वयं तत् कर्तुमुद्यताः॥ ३३॥
कालेनतु वता भूयः प्रासादेऽस्मिन् पुनर्नवे।
स्थापयामो वयं सत्यं तदनुज्ञातुमर्हथ॥ ३४॥
भगवन्! वास्त्वभिनवं बिम्बं वा तव शोभनम्।
कारयिष्यन्ति ते भक्तास्तदनुज्ञातुमर्हसि॥ ३५॥
क्लेशवा नस्त्वया देव! रोचनीयोऽल्पके गृहे।
यावन्नवं शुभं कृत्वा पुनः संस्थापयामहे॥ ३६॥
जीर्णं बिम्ब मिदं देव! सर्वदोषावहं नृणाम्।
अस्योद्धारे कृते शान्तिरित्येवं भाषितं त्वया॥ ३७॥
तत् त्वयाधिष्ठितं देव! उद्धरामि तवाज्ञया।
त पक्रान्तमस्माभिस्तदनुज्ञा मर्हसि॥ ३८॥
इति॥

एते तु विष्णुविषये प्रायो मन्त्राः परेष्वमी।
कार्याः स्वस्वागमाद्यास्तस्वविशेषपदा न्विताः॥ ३९॥

देवं समिष्टसरसीरुहमात्रपीठे
सङ्कल्प्य सन्निहितमप्ययतत्त्वतारैः।
उद्ध्याप्य तत्त्वकलशेन ततोऽभिषिच्यो-
द्ध्याप्य प्रकल्पय केवलचिन्मयं तम्॥ ४०॥

एते तु मन्त्राः प्रायो (विष्णु)विषये भवन्ति। परेषु देवेष्वमी मन्त्राः स्वस्वागमाद्यास्तस्वविशेषपदान्विताः स्वेषु स्वेष्वागमेषूक्तस्वस्वविशेषशब्देनान्विताः (कार्याः) तत्र तत्र शिवादिदेवप्रासादबिम्बादीनां शब्दा यथायोगं योजनीया इत्यर्थः॥ ३९॥

पुनरन्तर्गत्वा समिष्टसरसीरुहमात्रपीठं केवलं 'पद्माय नमः' इत्येव पूजिते पीठे देवं सन्निहितं सङ्कल्प्य अप्ययतत्त्वतारैः प्रतिलोमतत्त्वैर्मूलेन प्रणवेन चोद्ध्याप्य संहारक्रमेण त्रिर्व्यापय्य ततस्तत्त्वकलशेन तैरेव मन्त्रैरभिषिच्य तैरेवोद्ध्याप्य तं केवलचिन्मयं प्रकल्पयतु॥ ४०॥

---

१. 'प्रा' क. पाठः. २. 'मन्त्राः प्रायः प' ख. पाठः.

अग्रे निषद्य प्रणवेन नाडीयुक्त्यैत्य देवाभिदया स्थितः सन् ।
सजाग्रदाद्यात्मदशादिभिन्नहारालयाद्यात्मदलाग्रकाढ्यम् ॥

ध्यात्वा क्रमात् क्षेत्रमिदं गृहार्चा-
हृदम्बुरुट्कर्णिकमब्जयुग्मम् ।
तारेण तेजस्तडिदाभमन्त-
रास्तूपिकं व्याप्य च मूलचक्रात् ॥ ४२ ॥

विकीर्य पुष्पाञ्जलिमादिनाथ प्लुतेन विष्वग् विषुवत्सरण्या ।
प्रसार्य संव्याप्तमिदं बहिष्ठप्राकारनिष्ठं परिकल्प्य तेन ॥
ग्रस्तं समस्तं परिवारजातं जालेन मीनानिव संविभाव्य ।
पुष्पाञ्जलिं संहृतिमुद्रयात्र कुर्वन् समाहृत्य ततः क्रमेण ॥

ततो ध्यानसङ्कोचनमाह — अग्रे निषद्येति । देवस्याग्रे निषद्य नाडीयुक्त्या नाडीयोगेन एत्य देवं मनसा गत्वा प्रणवेन देवाभिदया देवैनैकीभूतः स्थितः सन् इदं क्षेत्रं महामर्यादापर्यन्तं स्थानमब्जयुग्मं ध्यात्वा । कथमित्याकाङ्क्षायामाह — सजाग्रदाद्येत्यादि । सजाग्रदाद्यात्मदशादिभिन्नहारालयाद्यात्मदलाग्रकाढ्यं जाग्रदाद्याः जाग्रत्स्वप्नसुषुप्तितुरीयाख्या दशाः अवस्थाः ताभिः सहिताः सजाग्रदाद्याः तत्स्वरूपाः सजाग्रदाद्यात्मानः तत्स्वरूपैरवस्थादिभिरन्यैश्च चतुर्विधैर्वर्गैः भिन्नाः संभिन्नाः युक्ताः हारालयाद्याः हाराद्याः आलयाद्याश्च, हाराद्याः बाह्यहारामध्यहारान्तहारान्तर्मण्डलानि आलयाद्याः प्रासादगर्भगृहपीठप्रतिमाश्च, हारालयाद्यात्मनो हारालयाद्यस्वरूपाः ते दलाग्रकाढ्या ययोरब्जयोः, दलाग्रकाद्याः दलाग्रदलदलसन्धिकेसराः, तदब्जद्वयं गृहार्चाः हृदम्बुरुट्कर्णिकं क्रमात् प्रासादकर्णिकं प्रतिमाहृदयकर्णिकं च एवं पद्मद्वयं ध्यात्वा, अन्तः सुषुम्नायां मूलचक्रात् मूलाधारादारभ्य आस्तूपिकं[3] द्वादशान्तात्मस्तूपिकाग्रपर्यन्तं तडिदाभं विद्युदाकारं तेजः तारेण प्लुतप्रणवेन व्याप्य व्यापय्य, अथ प्लुतेनादिना प्रणवेन पुष्पाञ्जलिं विकीर्य विषुवत्सरण्या सुषुम्नाख्या संव्याप्तमिदं तेजः विष्वक् परितः प्रसार्य, इदं बहिष्ठप्राकारनिष्ठं महामर्यादापर्यन्तं संव्याप्तं परिकल्प्य, तेन तेजसा समस्तं परिवारजातं परिवारसमूहं जालेन मीनानिव ग्रस्तं कबलीकृतं संविभाव्य, संहृतिमुद्रया पुष्पाञ्जलिं

---

१. 'वि' ङ. पाठः. २,३. 'वि' ङ. पाठः.

सप्तोर्मिपञ्चाम्बुधिमात्रतारै-
रामध्यहारापदमान्तहारम् ।
आनीय चान्तर्गतमण्डलान्तं
प्रासादनिष्ठं च नयद् दशाभिः ॥ ४५ ॥

त्रिद्व्येकमात्रप्रणवैर्नयेत् त-
दागर्भमापीठमथाणुबिम्बम् ।
आकृष्य बिम्बात् तदपीततत्त्व-
तारैश्चिदात्मन्यखिलं तदन्तः ॥ ४६ ॥

तत्कर्मकालप्रतियोधनान्ते तत्रोपविष्टः सुसमाहितात्मा।
समाधिसङ्कोचनमुक्तनीत्या निर्वर्त्य तस्मिन् सकलं सुयोज्य॥

कुर्वन्, ततः तस्मात् तस्मादवधेस्तत्र तत्र स्थाने क्रमेण समाहृत्य संहृत्य । संहारक्रमे विशेषं दर्शयति — सप्तेति। सप्तोर्मिपञ्चाम्बुधिमात्रतारैः सप्तषट्प ञ्च चतुर्मात्रप्रणवैः आमध्यहारापदं मध्यहारापर्यन्तम् आन्तहारम् अन्तहारापर्यन्तम् अन्तर्गतमण्डलान्तम् अष्टमूर्तिनिलयपर्यन्तं प्रासादनिष्ठं चानीय, दशाभिरवस्थाभिः सह परिवारान् नयेत् प्रापयेत् । तत्र सप्तमात्रप्रणवेन संहृतिमुद्रया पुष्पाञ्जलिं कुर्वन् महामर्यादाया आरभ्य मध्यहारापर्यन्तं स्थितान् परिवारांस्तेजसा संगृह्य जाग्रदवस्थया सहानीय तत्पर्यन्तमानयेत् । तथा तस्मात् षण्मात्रप्रणवेन पुष्पाञ्जलिं कुर्वन् स्वप्नावस्थया सह अन्तहारापर्यन्तं च, तथा पञ्चमात्रप्रणवचतुर्मात्रप्रणवाभ्यां च अन्तर्मण्डलान्तं प्रासादपर्यन्तं च क्रमेणानयेत् ॥ ४१—४५ ॥

पुनः त्रिद्व्येकमात्रप्रणवैः त्रिमात्रप्रणवेन प्रासादाद् आगर्भं गर्भगृहपर्यन्तं, द्विमात्रप्रणवेन तस्माद् आपीठं पीठपर्यन्तम्, एकमात्रप्रणवेन तस्माद् आणुबिम्बं मन्त्रबिम्बपर्यन्तं चावस्थाभिः सहाकृष्य कबलीकृतपरिवारं तत् तेजो नयेत् । पुनर्बिम्बाद् अपीततत्त्वतारैः प्रतिलोमतत्त्वैस्तारेण च तदखिलं तेजोभूतं तदन्तः बिम्बस्यान्तर्ग(त?ते) चिदात्मनि चैतन्यमये नयेत् ॥ ४६ ॥

तत्र क्रियाक्रमे पक्षभेदं दर्शयति — तत्कर्मेति । तत्कर्मकालप्रतिबोधनान्ते तस्य कर्मणस्तस्य कालस्य च देवं प्रति विज्ञापनानन्तरं तत्र बिम्बाग्रतः

---

१. 'त् ॥ पुनः त्रिद्वे' क. ग. पाठः.

तद्बिम्बकुम्भावपृथक् पृथक् च
व्याप्याभिषिच्याप्ययतत्त्वतारैः ।
तत्तत्त्वकुम्भेन पुनश्च तैस्तद्
व्याप्याहरेद् वा प्रतिमाहृदब्जे ॥ ४८ ॥
तत्तद्विभूत्या बहिरङ्गतोऽन्त-
रङ्गादपीतिक्रमतो विकृष्य ।
संयोज्य बिम्बस्थचिदात्मनीमं
चिन्मात्रमाकल्प्य निरेतु चातः ॥ ४९ ॥
कृत्वाग्रतः स्वस्तिककल्पशालीदर्भाग्रकूर्चेऽर्चितयोगपीठे ।
सुसंस्कृतं लोहमयं सकूर्चं घटं सदूर्वाक्षतकाञ्चनाढ्यम् ॥५०॥

उपविष्टः सुसमाहितात्मा सुतरां समाहितमना भूत्वा उक्तनीत्या उक्तमार्गेण समाधिसंकोचनं ध्यानसंकोचनं निर्वर्त्य कृत्वा तस्मिन् तत् सकलं परिवारतत्त्वादिकं सुयोज्य सुतरां योजयित्वा बिम्बकुम्भौ बिम्बतत्त्वकलशौ अपृथक् ऐकात्म्येन पृथक् च व्यस्तात्मतया च प्रणवेन व्याप्य अप्ययतत्त्वतारैः प्रतिलोमतत्त्वैस्तारेण तत्तत्त्वकुम्भेनाभिषिच्य पुनश्च तैस्तत्त्वतारैः प्रातिलोम्येन व्याप्य तत्तेजः (प्रतिमाहृदब्जे) आहरेद्वा ॥ ४७,४८ ॥

इतिक्रमतः पक्षयोरन्यतरक्रमेण बहिरङ्गात् प्राकारादिप्रासादपर्यन्ताद् अन्तरङ्गात् प्रासादादिप्रतिमाहृदयान्ताच्च तत्तद्विभूत्या तत्तदैश्वर्यांशेन सह विकृष्याकृष्य बिम्बस्थचिदात्मनि बिम्बहृत्कमलस्थचैतन्ये संयोज्य इमं देवं चिन्मात्रमाकल्प्य अतः अस्मात् स्वयं निरेतु निर्गच्छतु पृथग्भूतो भवतु ॥४९॥

पुनरग्रतो देवस्याग्रभागे स्वस्तिककल्पशालीदर्भाग्रकूर्चे स्वस्तिकादिभिः कल्पिते पीठे अर्चितयोगपीठे तत्र सुसंस्कृतं यथोक्तक्रमेण संस्कृतं लोहमयं घटं कृत्वा सकू(र्चकं?र्चं) कूर्चसहितं सदूर्वाक्षतकाञ्चनाढ्यं दूर्वाक्षतकाञ्चननवरत्नादिसनाथं च कृत्वा पूतजलेन गालनतीर्थार्घचर्चनेन च शुद्धजलेनैव मानसपूरणानन्तरं सावकाशमूर्ध्वार्धपर्यन्तं पूरितं च कृत्वा पुनः समिष्टार्णसरोरुहाद्यं संपूजितलिपिपङ्कजं कृतमूर्तिकलावाहनाद्यं च कृत्वा देवं 'नमस्ते सर्वलोकेशे'-

---

१. 'तू कुम्भविम्बाव' क. पाठः. २. तद्वद्' ख., 'तैर्व्योव्याप्या' ग. पाठः. ३. 'मं प्रकल्पयेत् केवलमात्मरूपम् ॥' ख. पाठः ४. 'न शुद्धेन मा' क. ग. पाठः.

आपूरितं पूतजलेन सावकाशं समिष्टार्णसरोरुहाढ्यम् ।
सम्प्रार्थ्य[2] देवं मनुबिम्बके तत्सम्पातयुग्मं प्रसमर्पयेच्च ॥

स्थूलं च सूक्ष्मं च परं च रूप-
मावाहयेद् व्युत्क्रमतोऽणुबिम्बात्[3] ।
सर्वत्र गायत्र्यणुमूलतारै-
र्वैतैर्जिनार्णाशकृतोपचारैः ॥ ५२ ॥
हरौ वसुद्वादशवर्णतारैः
षडर्णनादप्रणवैर्हरे च ।
आवाहयेद् वेति पृथक् स्वमूल-
न्यासान्तमाधाय यजेच्च किञ्चित्[4] ॥ ५३ ॥

यथापुरं वारि दरे प्रपूर्य तेन स्वमूलाणुसमर्चितेन ।
तत्त्वान्युदित्वा हृदयारविन्दाद्धुतक्रमेणाणुपराणि पञ्च ॥

त्यादिवक्ष्यमाणमन्त्रेण संप्रार्थ्य मनुबिम्बके तत्संपातयुग्मं कनिक्रदत्स्वस्त्या-दिहुतजातं वास्तोष्पतिहुताज्जातं च संपातद्वयं प्रसमर्पयेच्च ॥ ५०,५१ ॥

ततः सर्वत्र देवेषु गायत्र्यणुमूलतारैः स्वस्वगायत्र्या स्वस्वमूलेन तारेण च क्रमात् स्थूलं सूक्ष्मं परं च रूपमणुबिम्बाद् व्युत्क्रमतः उद्वासनारूपेण कलशे आवाहयेत् । जिनार्णाशकृतोपचारैः स्थूलावाहने गायत्रीस्थाने स्वस्वोपचारैर्वा हरौ वसुद्वादशवर्णतारैः अष्टाक्षरद्वादशाक्षरप्रणवैर्वा हरे षडर्णनादप्रणवैः षडक्षरप्रासादप्रणवैर्वा इति स्थूलसूक्ष्मपराणि रूपाणि चावाहयेत् । पृथक् पृथक् स्वमूलन्यासान्तं स्वस्वमूलमन्त्रन्यासपश्चिमं कर्माधाय किञ्चित् किञ्चित् स्वमूलेन यजेच्च ॥ ५२, ५३ ॥

जीवोद्वासनप्रकारस्तु गुरूपदेशादेव ग्राह्य इति मत्वा तस्य सूत्रमात्रं प्रकाशयति—यथापुरमिति । यथापुरं यथा पुरा जीवावाहनकाले तथा वारि जलं दरे

---

१. शुद्धज' ख. पाठः. २. 'र्थ्यमेवं' ग. पाठः. ३. 'तश्च वि' इति मूलकोशपाठः. ४. त् ॥

प्रणवाद्यन्तरुद्धैस्तु बिन्दुनादान्तदीपितैः ।
पञ्चब्रह्मभिरेवेशेऽत्रावाहनविधिं नयेत् ॥

ध' क. पाठः.

द्विधापि तान्यन्वितचेतनानि
नीत्वा कमप्यात्मपदं पदादेः ।
आवाह्य तस्मात् कलशस्थमूर्तौ
संयोज्य सर्वं विधिवद् विदध्यात् ॥ ५५ ॥
प्रणवाद्यन्तरुद्धैस्तु बिन्दुनादान्तदीपितैः ।
पञ्चब्रह्मभिरेवेशेऽत्रावाहनविधिं नयेत् ॥ ५६ ॥
प्राणाणुविन्यासविवर्जमात्महृत्पङ्कजान्मन्त्रमहोऽभिवाह्य ।
साङ्गीक्रियाद्यं प्रविधाय किञ्चिदिष्ट्वा निवेद्य प्रणिनोतु देवम् ॥
सुवाससाच्छाद्य सदर्भदाम्ना
समर्प्य यात्राहुतिजाज्यशेषम् ।

शङ्खे प्रपूर्य स्वमूलाणुसमर्चितेन तेन जलेन प्रतिमाया हृदयारविन्दाद् आवाह्य कलशस्थमूर्तौ संयोज्य प्राणाणुविन्यासविवर्जं प्राणन्यासं मुक्त्वा सर्वं कर्म विधिवद् विदध्यादिति योजना । हुतक्रमेणेति तत्त्वहोमक्रमेण क्षेत्रपालादिकं निर्माल्यधार्यादिकं चोदित्वा उक्त्वा । तत्त्वानि सर्वाणि तत्त्वानि त्वणुपराणि अणुर्मूलं परे ऊर्ध्वे भवन्ति येषां तान्यणुपराणि । अणोः पराण्यप्यणुपराणि । मूलपुटितपञ्चतत्त्वान्युदित्वेत्यर्थः । तान्यपि द्विधा च सृष्टिसंहारक्रमेण अन्वितचेतनानि । प्राणापानेत्यादिमन्त्रशेषः सूचितः । कं जलं पदादेः पादद्वयमारभ्य । पदादेरित्यनेनैव पादयोरादिरिति मूलाधारोऽप्युक्तः । तस्मादात्मपदं नीत्वा[1] । आ आत्मपदं द्वादशान्तरस्थपरमात्मपदपर्यन्तं नीत्वेत्यर्थः । मूलाधारहृदयभ्रूमध्यान्यप्यात्मपदान्येवेति त्रिस्थानादप्यावाहनं सूचितम् । ईशे तु अत्र कर्मणि बिन्दुनादान्तदीपितैः बिन्दुना नादेन तदन्ताभ्यां शक्तिशान्ताभ्यां च दीपितैः प्रकाशितैः एवंभूतैः प्रणवाद्यन्तरुद्धैः प्रणवैराद्यन्तरुद्धैः पञ्चब्रह्मभिरेव पञ्चब्रह्मसहितैः पञ्चतत्त्वैरेवावाहनविधिं नयेत् । तत आत्महृत्पङ्कजात् स्वहृदयपद्मात् मन्त्रमहः मन्त्रमयं तेजः मूलत आवाह्य साङ्गीक्रियाद्यं सकलीकरणाद्यं प्रविधाय किञ्चिदिष्ट्वा निवेद्य तत्रस्थं देवं प्रणिनोतु प्रीणातु ॥ ५४–५७ ॥

पुनः सुवाससा अहतवस्त्रेण सदर्भदाम्ना दर्भदामयुक्तेनाच्छाद्य यात्राहुतिजाज्यशेषं कनिक्रदादिहुतसपातशेषं समर्प्य उत्तिष्ठमनुप्रजापी कलशमु

---

१ 'त्वा । आत्म' ङ. च. पाठः.

उत्थाप्य चोत्तिष्ठमः प्रजापा
सोष्णीषमूर्धोद्धृतजीवकुम्भः ॥ ५८ ॥
निर्गत्य पर्येत्य च शाकुनाद्यैः प्रासादमेतल्लघुमण्डपं च ।
अन्तर्यथाविध्युपनीय शय्यामारोप्य मूलेन समर्च्य रक्षेत् ॥
बिम्बोद्धारविधौ सशान्तिकलशं कृत्वाग्रतः पावकं
सावित्र्याष्टसहस्रमत्र जुहुयाद् दूर्वास्त्रिमध्वाप्लुताः ।
भूराद्यैरपि वा पयोद्रुसमिधः सम्पातमेतद्घटे
सिञ्चेत् पञ्चभिरष्टशश्च जुहुयात् तत्त्वैः ससम्पातकम् ॥
संहारक्रमतः स्वतत्त्वमनुभिर्होमे सुकल्पेऽमुना
देवं शान्तिघटेन पायसनिवेद्याद्यं प्रकुर्वीत वा ।
सिक्त्वा तत्त्वघटेन जीवकलशे प्रोद्वास्य नीत्वा बहि-
र्देवं बिम्बसमुद्धृतिं वितनुयाद् वासिच्य शान्त्यम्भसा ॥

त्थाप्य सोष्णीषमूर्धा उष्णीषबन्धमूर्धा भूत्वा उद्धृतजीवकुम्भं शिरस्यधिरोप्य तस्मान्निर्गत्य शाकुनाद्यैः कनिक्रदत्स्वस्त्यादि जपन् प्रासादं पर्येत्य प्रदक्षिणीकृत्य एतल्लघुमण्डपम् अल्पमण्डपं च पर्येत्य मण्डपस्य प्रधानद्वारेण यथाविधि अर्घ्यदानपूर्वम् अन्तरुपनीय शय्यामारोप्य मूलेन समर्च्य रक्षेत् ॥ ५८,५९ ॥

अथ जीर्णस्यं बिम्बस्योद्धारविधिमाह — **बिम्बोद्धारेति** । बिम्बोद्धारविधौ[1] बिम्बत्यागपक्षे प्रासादस्याग्रतः पावकं सशान्तिकलशं कृत्वा पावकं विधाय तद्दक्षिणे शान्तिदेवत्यं कलशं च प्रपूज्य अभिमुखान्तेऽत्र सावित्र्या[2] मन्त्रेण त्रिमध्वाप्लुताः दूर्वाः अष्टसहस्रं जुहुयात् । भूराद्यैः व्याहृतिभिः पयोद्रुसमिधः पयोद्रुमाणां समिधो वा जुहुयात् । तत्संपातम् एतद्घटे शान्तिकलशे सिञ्चेत् । पुनः पञ्चभिस्तत्त्वैः प्रातिलोम्येन अष्टशश्च ससंपातं घृतं जुहुयात् ॥ ६० ॥

अत्र क्रियाक्रमे पक्षभेदमाह — **संहारक्रमत इति** । तत्त्वहोमकाले संहारक्रमतः स्वतत्त्वमनुभिः होमे सु ते सति अमुना शान्तिघटेन देवं सिक्त्वा पायसनिवेद्याद्यं प्रकुर्वीत वा । तत्त्वघटेन सिक्त्वा जीवकलशे प्रोद्वास्य देवं बहिर्नीत्वा शान्त्यम्भसा आसिच्य बिम्बसमुद्धृतिं वितनुयाद्वा ॥ ६१ ॥

---

१. 'त् ॥ अथोज्जि' ख. पाठः. २. 'नि' ख, घ, ङ, च. पाठः.

अथोज्जिहीर्षुः प्रतिमां विशीर्णा-
माचार्यवर्यः प्रणिपत्य देवम्।
विप्रोत्तमैस्तत्र पुरः स्थितः सन्
प्रवाचयेच्छान्तिमनन्यचेताः॥ ६२॥

शान्तिस्तु शिवं चास्तु पुष्टिरस्तु सुमङ्गलम्।
स्वस्ति चास्तु समृद्धयस्तु सर्वेषां सन्तु सम्पदः॥ ६३॥

गोब्राह्मणेभ्यः क्षत्रेभ्यो विट्शूद्रेभ्यस्तथैव च।
लोकेभ्यः सर्वभूतेभ्यो राज्ञे जनपदाय च॥ ६४॥

ग्रामाय यजमानाय गुरवेऽस्मै गृहाय च।
बिम्बोद्धारविधेरस्तु साकल्यमिह सर्वदा॥ ६५॥

इति।

गर्भागारमथ प्रविश्य विधिवत् पुण्याहकृत् कौतुकं
बद्ध्वा स्वस्य सकर्तृमूर्तिपजनस्यारक्ष्य सर्वान् गुरुः।
पुष्पैः संहृतिपञ्चतत्त्वहुतसम्पातान्वितैर्वासना-
शक्तिं भास्करमण्डले प्रणवतः प्रोद्भासयेत् तद्गताम्॥

अथाचार्यवर्यो विशीर्णां भग्नां प्रतिमामुज्जिहीर्षुरुद्धर्तुमिच्छुः विप्रोत्तमैः सह देवं प्रणिपत्य तत्र पुरः स्थितः सन् अनन्यचेताः शान्तिं प्रवाचयेत् शान्तिवाचनं कुर्यात्॥ ६२॥

शान्तिवाचनपद्यानि पठति — शान्तिरस्त्विति॥ ६३—६५॥

अथ गुरुः स्वयं गर्भागारं प्रविश्य विधिवत् पुण्याहकृद् भूत्वा सकर्तृमूर्तिपजनस्य यजमानस्य मूर्तिपानां स्वस्य च कौतुकं बद्ध्वा सर्वानारक्ष्य संहृतिपञ्चतत्त्वहुतसम्पातान्वितैः पूर्वं संगृहीतैः पञ्चतत्त्वहोमसंपातैः सहितैः पुष्पैः तद्गतां प्रतिमागतां वासनाशक्तिं प्रणवतो भास्करमण्डले प्रोद्भासयेत्॥ ६६॥

१. 'दा॥ ग' क. ग. पाठः.

उच्चुंचस्वेत्यादिकं नासदाद्यं सूक्तं चाप्यातेपितःपूर्वकं च।
पुंसूक्तादीन् मूलमन्त्रादिकं च मन्त्री तत्रावर्तयेन्मूर्तिपालैः॥

सौवर्णलाङ्गलमुखेन विदार्य पीठ-
बन्धं सुबध्य पशुवालकुशादिरज्ज्वा।
प्रोद्धारयेत् सुकलितेन वृषेण बिम्बं
तद्योग्यमन्त्रकृतसावयवीक्रियाद्यः॥ ६८॥

पीठिकाबन्धविश्लेषे स्वस्वमूलमनुर्मनुः।
व्याहृतित्रयतारात्मा ततो बिम्बसमुद्धृतौ॥ ६९॥

पीठे याम्यशिरस्कमत्र विनिधाय क्षालयित्वा मना-
गिष्ट्वोद्धास्य च वासनां वसनसंवीतं शिरःपूर्वकम्।
नीत्वा न्यस्य बहिः सदर्भसिकते तद्याम्यदिक्स्थण्डिले
वामीकृत्य तिलाक्षतानि विकिरन् पर्येतु बिम्बं त्रिधा॥

मन्त्री मन्त्रविशेषज्ञो गुरुः तत्रोद्धारकाले मूर्तिपालैः सह 'उच्चुंचस्वे'त्यादिकं, 'नासदासीद्' इत्यादिकम्, 'आतेपितः'पूर्वकं च सूक्तं पुंसूक्तादीन् पुरुषसूक्तादीन् मूलमन्त्रादिकं चावर्तयेत् आवृत्य[1] जपेत्॥ ६७॥

पुनर्मन्त्री तद्योग्यमन्त्रकृतसावयवीक्रियाद्यः तद्योग्यस्य निर्माल्यधारिणो मन्त्रेण सकलीकृतो भूत्वा पशुवालकुशादिरज्ज्वा पशोर्बालरोमैः कुशादिभिश्च कृतरज्ज्वा सुकलितेन यथावद् बद्धेन वृषेण सौवर्णलाङ्गलमुखेन सुवर्णमयेन लाङ्गलाग्रेण पीठबन्धं विदार्य बिम्बं प्राद्धारयेत्॥ ६८॥

पीठिकाबन्धविश्लेषे पीठिकावियोगे स्वस्वमूलमनुर्मनुः स्यात्। बिम्बसमुद्धृतौ व्याहृतित्रयतारात्मा 'भूर्भुवःस्वरोमि'ति मनुः॥ ६९॥

अत्र पीठे याम्यशिरस्कं दक्षिणशिरसं विनिधाय शाययित्वा क्षालयित्वा मनागीषदिष्ट्वा वासनां च पूर्ववदुद्धास्य वसनसंवीतं[2] वस्त्राच्छादितं[3] तैत् शिरःपूर्वकं बहिर्नीत्वा (सदर्भसिकते) तद्याम्यदिक्स्थण्डिले प्रासादस्य दक्षिणदिक्स्थमण्डले स्थण्डिलं कृत्वा सिकतादर्भांश्च विन्यस्य तत्र दक्षिणशिरस्कं न्यस्य तिलाक्षतानि विकिरन् वामीकृत्य वामकोण त्रिधा बिम्बं पर्येतु॥ ७०॥

१. 'वर्त्य ज' ख. घ. ङ. पाठः. २, ३, ४. 'तां' क. पाठः.

विसृज्य वस्त्राद्यभिषिच्य किञ्चनो-
पहृत्य तत्स्थामपि शेषवासनाम् ।
रवौ समुद्धास्य सुवेष्टय वाससा
कुशैश्च नद्यादिजलाशयं नयेत् ॥ ७१ ॥

तत्रागाधे पाथसि स्विष्टपीठे
विष्वक्सेनाद्यं स्वनिर्माल्यभाजम् ।
तन्मन्त्रेणावाह्य सम्पूज्य यज्वा
तत्सात्कृत्य प्रक्षिपेद् बिम्बमप्सु ॥ ७२ ॥

स्नात्वात्र कर्त्रा सह तर्पयेच्च स्वमूलमन्त्रेण यथाविधानम् ।
प्राचीनपीठाद्यपनीय मूलवेश्माभिरक्ष्यारचयेच्च सर्वम् ॥

अथाधिवास्योक्तवदल्पबिम्बं
हुत्वा तथाभ्यर्च्य सजीवकुम्भम् ।
समण्डलं तत्परितो बलिं च
कृत्वा प्रसन्नापचितिं च कुर्यात् ॥ ७४ ॥

पुनर्वस्त्रादि विसृज्याभिषिच्य किञ्चनोपहृत्य तत्स्थां शेषवासनामपि रवौ समुद्धास्य वाससा कुशैश्च सुवेष्टय नद्यादिजलाशयं नयेत् ॥ ७१ ॥

तत्र यज्वा गुरुरगाधे पाथसि जले स्विष्टपीठे विष्वक्सेनाद्यं स्वं स्वं निर्माल्यभाजं तन्मन्त्रेण तत्तन्मन्त्रेणावाह्य संपूज्य बिम्बं तत्सात्कृत्य तादात्म्यं कृत्वा अप्सु प्रक्षिपेत् ॥ ७२ ॥

अत्र कर्त्रा सह स्नात्वा स्वमूलमन्त्रेण यथाविधानं तर्पयेच्च । पुनरागत्य प्राचीनपीठादि निर्माल्यभूतं पीठनपुंसकशिलाद्यमपनीय मूलवेश्म मूलप्रासादमभिरक्ष्य सर्वं कर्मारचयेत् ॥ ७३ ॥

अथोक्तवदल्पबिम्बं सजीवकुम्भमधिवास्य तथा पूर्ववदेव हुत्वा समण्डलं सजीवकुम्भमल्पबिम्बगतं देवमभ्यर्च्य तत्परितो मण्डपस्य परितः बलिं च कृत्वा प्रसन्नापचितिं प्रसन्नपूजां च कुर्यात् ॥ ७४ ॥

---

१. 'प्र' क. पाठः. २. 'स्वस्वनि' क. ख. पाठः. ३. 'त्म्यं तदधीनं कृ' ख, 'त्म्याद्धीनं कृ' ङ. पाठः.

अथाल्पगेहे सुविशोधितेऽल्पपीठं च संशोध्य तथाधिवास्य।
संरक्ष्य गत्वाभिघटं निषद्य तद्रात्रि शेषं गमयेद् विनिद्रः॥

कृत्वा विधिं साम्प्रतिकं प्रभाते
नान्दीमुखादिक्रमतोऽल्पगेहे।
पीठं प्रतिष्ठाप्य ततोऽर्चयित्वा
संरक्ष्य तन्मण्डपमभ्युपेत्य॥ ७६॥

उद्वास्य बिम्बे महितेऽखिलं तन्नीत्वोक्तवद् बिम्बघटक्रमेण।
कृत्वा परावाहनपूजनाद्यं बिम्बं प्रतिष्ठापयतूक्तनीत्या॥

निद्राघटस्नपनपश्चिममत्र कृत्वा
सम्प्रार्थ्य साधु भगवन्निति सन्नतात्मा।
जीवाभिवाहनविधौ कलशेन तेन
सिञ्चेत् तदर्हमनुविन्यसनं च कुर्यात्॥ ७८॥

भगवन्नल्पगेहेऽस्मिन् वासः क्लेशोऽपि ते हरे!।
वस्तव्यो भगवंस्तावद् यावद् गेहं समाप्यते॥ ७९॥
कारकस्य परामृद्धिमनुजानन्महोदयाम्।
भक्तानामनुकम्पार्थमिह त्वं स्थातुमर्हसि॥ ८०॥

इति।

अथ सुविशोधिते अल्पगेहेऽल्पपीठं संशोध्य तथाधिवास्य संरक्ष्य मण्डपं गत्वाभिघटं घटाभिमुखं निषद्य विनिद्रस्तद्रात्रिशेषं गमयेत्॥ ७५॥

पुनः प्रभाते साम्प्रतिकं संप्रतियोग्यं विधिं सन्ध्योपासनादिकं कृत्वा नान्दीमुखादिक्रमतः पूर्वक्रमेणाल्पगेहे पीठं प्रतिष्ठाप्यार्चयित्वा संरक्ष्य तन्मण्डपमभ्युपेत्य महिते पूजिते बिम्बेऽखिलमुद्वास्य बिम्बघटक्रमेणोक्तवन्नीत्वा परावाहनपूजनाद्यं कृत्वा उक्तनीत्या बिम्बं प्रतिष्ठापयतु॥ ७६, ७७॥

अत्र निद्राघटस्नपनपश्चिमं कर्म कृत्वा साधु सन्नतात्मा भूत्वा 'भगवन्नल्पगेहेऽस्मिन्नि'ति संप्रार्थ्य जीवाभिवाहनविधौ तेन जीवकलशेन सिञ्चेत्। तदर्हमनुविन्यसनं प्राणन्यासादिकं च कुर्यात्॥ ७८॥

प्रार्थनामन्त्रं पठति— भगवन्निति॥ ७९, ८०॥

हरौ गेहविधावेवं मनुरन्येष्विहोन्नयेत्।
तत्तद्दैवतबिम्बादिसमीप्सितपदान्वयम्॥ ८१॥

स्थूलाभिवाहनपुरस्सरमत्र सर्वं
निर्वर्त्य देवमभिपूज्य चरुं निवेद्य।
दत्त्वा बलिं परिषदां परितोष्य देवं
द्वारं पिधाय गमयेत् त्रिदिनं पुरोवत्॥ ८२॥

चातुर्थिकस्नपनयागमहोत्सवाद्यं
मूलोदितं सकलमत्र समादधीत।
बालालयन्यसनकर्म नपुंसकाश्म-
गेहोपधानरहितं विहितं तदेतत्॥ ८३॥

तद्बिम्बे रचिते समग्रगुणसम्पन्ने सपीठादिके
प्रत्यासीदति च प्रतिश्रुतमुहूर्ते बीजवापादिकम्।

हरौ गेहविधौ प्रासादनवीकरणे एवं मनुः स्यात्। इहान्येषु देवेषु बिम्बादिषु च तत्तद्दैवतबिम्बादिसमीप्सितपदान्वयं हरे इति स्थाने तत्तद्देवतानां नाम 'यावद् गेहं समाप्यत' इत्यत्र 'यावद् बिम्बं समाप्यत' इत्यादीष्टपदानाम् अन्वयं योजनम् उन्नयेत् ऊहयेत्॥ ८१॥

पुनरत्र स्थूलाभिवाहनपुरस्सरं सर्वं कर्म निर्वर्त्य देवमभिपूज्य चरुं निवेद्य परिषदां बलिं दत्त्वा देवं परितोष्य द्वारं पिधाय पुरोवत् त्रिदिनं गमयेत्॥ ८२॥

चातुर्थिकस्नपनयागमहोत्सवाद्यं चतुर्थदिवसस्नानं यजनमुत्सवाद्यं च मूलोदितं मूलबिम्बे निर्दिष्टं सकलं कर्मात्रापि समादधीत कुर्यात्। तदेतद् बालालयन्यसनकर्म देवस्य बालालयस्थापनकर्म नपुंसकाश्मगेहोपधानरहितं नपुंसकशिलया प्रासादस्येष्टकादिना च रहितं विहितं स्यात्॥ ८३॥

एवं बालालये स्थापितस्य देवस्य मूलप्रासादप्रवेशे विधानमाह — **तद्बिम्ब** इति। समग्रगुणसम्पन्ने सम्पूर्णगुणयुक्ते सपीठादिके पीठनपुंसकशिलादिभिः सहिते तद्बिम्बे रचिते सति, पूर्वं प्रतिश्रुते प्रतिज्ञाते मुहूर्ते च प्र-

---

१. 'रत्नोप' क. ख. ग. पाठः.

कृत्वा तत् परिगृह्य कारुकरतो बिम्बं जले वासयेत्
तत्प्रासादविशोधनं च तनुयात् पुण्याहकर्मान्तिमम् ॥
उद्धृत्योदकतोऽभिषिच्य कलशैः स्वैर्बिम्बमग्राहिते
सम्यक्संस्कृतमण्डपेऽधिशयनं संवेश्य तत्पार्श्वतः ।
विन्यस्येत् परिशोधितालपनिलयप्राक्स्थापितार्चास्थितं
देवं प्रार्थ्य घटेऽभिवाह्य विधया सूत्राच्छिदोक्तया ॥
यात्रां कुरुष्व देवेश! भक्तानामनुकम्पया ।
जीर्णमुद्धृत्य तद् भक्तैः कल्पितं बिम्बमुज्ज्वलम् ॥ ८६ ॥
तेन गेहं विशाम्येश! उत्तिष्ठ शिखिवाहन! ।
एवं गुहार्चाविषये मन्त्रोऽन्यत्रोन्नयेद् बुधः ॥ ८७ ॥
उत्पाट्योक्तवदल्पबिम्बमपनीयातो बहिः सन्दहेद्
गोसर्पिःप्लपितं तदर्हदहने तद् दारवं चेद् गुरुः ।

त्यासीदिति समीपं प्राप्ते सति, तत्कालकृप्त्या बीजवापादिकं कृत्वा तद्योग्यकाले तद् बिम्बं च कारुकरतः पूर्ववत् परिगृह्य जले वासयेत् अधिवासयेत् । तत्प्रासादविशोधनं च पुण्याहकर्मान्तिमं यथा भवति तथा तनुयात् ॥ ८४ ॥

पुनर्बिम्बमुदकत उद्धृत्य स्वैर्बिम्बशुद्धिकलशैरभिषिच्य अग्राहिते मूलप्रासादस्याग्रतः स्थिते सम्यक्संस्कृतमण्डपे अधिशयनं शय्यायां संवेश्याधिवास्य तत्पार्श्वतः तस्याः शय्यायाः पार्श्वे एवं परिशोधितालपनिलयप्राक्स्थापितार्चास्थितं परिशोधितेऽल्पप्रासादे पूर्वं स्थापितायामर्चायां स्थितं देवं तत्त्वहोमाद्युपेतं सूत्रच्छिदासूक्तया विधया सूत्रच्छेद उक्तेन विधिना प्रार्थ्य घटे जीवकलशे अभिवाह्यानीय विन्यस्येत् ॥ ८५ ॥

प्रार्थनामन्त्रं पठति — यात्रां कुरुष्वेति । गुहार्चाविषये स्कन्दस्य बिम्बोद्धारे एवं मन्त्रो भवति । अन्यत्र देवेषु प्रासादादिषु च बुधः तत्तद्योग्यपदज्ञो गुरुः स्वस्वपदम् उन्नयेत् ऊहयेत् ॥ ८६,८७ ॥

ततः उक्तवत् पूर्वोक्तविधिनाल्पबिम्बमुत्पाट्य अतः तस्माद् बहिरुपनीय तद् दारवं चेत् गोसर्पिःप्लपितं कृत्वा तदर्हदहने अग्नौ निर्माल्यधारिण-

---

१. 'वेशं कलशेऽभि' ख. पाठः. २. 'हं' ग. पाठः. ३. 'ग्र' क. ख. ग. च. पाठः.

लौहं चेद् गुरवे समर्पयतु तद् विद्राव्य यज्वाथवा
छित्त्वा नालमिदं विशोध्य सुशुभं तत्कौतुकं कल्पयेत् ॥

आधाय प्रतिमाधिवासमधरेद्युस्तत्तदर्हार्हणा-
होमब्राह्मणतर्पणाद्युपरिषट्पीठादिवासादिकम् ।
अन्येद्युः कृतरत्नकर्मणि समानीय प्रतिष्ठाप्य तत्-
पीठे बिम्बमथ स्वकीयकलशासेकादिकं चाचरेत् ॥ ८९ ॥

यत्राहैकेन तु समुदितं कर्म निर्मेयमत्र
प्रोद्वास्यैवं कलशमधिवास्यार्चया साकमग्रे ।
मूलार्चादिच्युतिनिजविशुद्ध्यादिमन्मूलगेहे
संस्थाप्यैनां स्वचितिकलशासेचनार्घं च कुर्यात् ॥ ९० ॥

मावाह्य सम्पूज्य तत्र गुरुः स्वयं सन्दहेत् । तल्लौहं चेत् यज्वा यजमानोऽल्प-बिम्बं विद्राव्य लोहमात्रमापाद्य गुरवे समर्पयतु । अथवा नालं छित्त्वा इदं विशोध्य सुशुभं तत्कौतुकं तस्य देवस्यैव कौतुकत्वेन कल्पयेत् ॥ ८८ ॥

अधरेद्युः पूर्वदिवसे तत्तदर्हार्हणाहोमब्राह्मणतर्पणाद्युपरिषट्पीठाधिवासादिकं तत्तद्ध्यानाधिवासपूजाधिवासहोमब्राह्मणपूजनादिकानन्तरं पीठाधिवासादियुक्तं प्रतिमाधिवासमाधाय अन्येद्युरुत्तरदिवसे कृतरत्नकर्मणि कृतरत्नन्यासे तत्पीठे तद्बिम्बमानीय प्रतिष्ठाप्याथ स्वकीयकलशासेकादिकं कुम्भेशनिद्राकलशजीवकलशानामभिषेकं तदाद्यं चाचरेत् ॥ ८९ ॥

उक्त एव निष्कामणे विशेषमाह — **यत्रेति** । यत्रावस्थायामेकेनैवाह्ना समुदितं सम्यगुक्तं कर्म निर्मेयं कर्तुं शक्यं बिम्बमात्रस्यैव चेद् वैकल्यं तत्राप्येवं प्रोद्वास्य कलशं जीवकलशं सर्वलक्षणयुक्तया गृहीतया कृतजलाधिवासाद्यया अर्चया साकमग्रे मण्डपे अधिवास्य मूलार्चादिच्युतिनिजविशुद्ध्यादिमन्मूलगेहे विशीर्णां प्रतिमां पीठादिभिः सह यथोक्तप्रकारेण उद्धृत्य त्यक्त्वा कृतप्रासादशुद्ध्यादिके कृतरत्नन्यासे च तत्र प्रासादे प्रतिमां संस्थाप्य स्वचितिकलशासेचनार्घं जीवावाहनकाले जीवकलशाभिषेकार्घं च कुर्यात् ॥ ९०

बिम्बाजीर्तिविधौ विधाय सकलं सूत्रच्छिदेकोदितं
मुक्त्वा प्रार्थ्य नमस्त इत्यधिघटं संयोज्य निर्याप्य तम् ।
मूलार्चां परिरक्ष्य तक्षभिरभीष्टं कर्म निर्माप्य तत्-
कर्मान्ते परिगृह्य कारुकरतः प्रासादमुक्तक्रमात् ॥ ९१ ॥
पुण्याहावधिभिर्विशोध्य परिकल्प्यार्चिर्मयं तत्स्थितं
बिम्बं वारुणवारिणा सलिलवासे स्नापयित्वा सुधीः ।
स्वस्वोक्तक्रमबद्धकौतुकमिदं सम्भाव्य पीठेऽर्चिते
कृत्वा बिम्बघटाभिषेकयजनाद्यं कर्म तत्रैव तत् ॥ ९२ ॥
बिम्बेऽग्राहितमण्डपेऽधिशयनं न्यस्ते च बालालया-
न्नीत्वा जीवघटेऽधिवास्य विधिवन्मूलालयादेव वा ।
हुत्वा मण्डप एव जीवकलशे बिम्बे च संस्पृश्य त-
त्सम्पातं पृथगर्चनाद्यमखिलं निर्वर्त्य पूर्वोक्तवत् ॥ ९३ ॥

बिम्बाजीर्तिविधौ बिम्बस्य वैकल्याभावे प्रासादे जीर्णे सति तस्य चिरकालेनैव कर्तुं शक्यते चेत् तत्रोक्तेषु कर्मसु मध्ये सूत्रच्छिदेकोदितं सूत्रच्छिदमेकमेवोक्तं कर्म मुक्त्वा वर्जयित्वान्यत् सकलं कर्म विधाय उद्वासनात् पूर्वं 'नमस्ते सर्वलोकेशे'ति पद्याभ्यां प्रार्थ्य तं देवम् अधिघटं जीवकलशे संयोज्य निर्याप्य बहिर्नीत्वाल्पगृहे स्नापयित्वा मूलार्चां परिरक्ष्य तक्षभिरभीष्टं प्रासादकरणादिकं कर्म निर्माप्य तत्कर्मान्ते कारुकरतः प्रासादं परिगृह्य पुण्याहावधिभिः कर्मभिरुक्तक्रमाद् विशोध्य तत्स्थितं तत्र प्रासादे स्थितं बिम्बं संहृत्यार्चिर्मयमग्निमयं परिकल्प्य सलिलवासे सुधीः जलाधिवासशुद्धया वारुणवारिणा स्नापयित्वा स्वस्वोक्तक्रमबद्धकौतुकं स्वस्वकाले स्वस्वमन्त्रेण बद्धकौतुकम् इदं बिम्बम् अर्चिते पीठे सम्भाव्यावाह्य तत्रैव बिम्बघटाभिषेकयजनाद्यं कर्म कृत्वा तत्रैव तद्बिम्बे बालालयान्नीत्वा । मूलालयादिति बिम्बपीठिकादिचलनपरिहारार्थमुक्तम् । निष्क्रामणं क्रियते चेत् तथा सम्भवतीत्यभिप्रायः । अन्यथा चेत् तथा बालालयान्नीत्वा अग्राहितमण्डपे अधिशयनं शय्यायां न्यस्ते जीवघटे च उभयत्र सम्पूज्य विधिवद् अधिवास्य मण्डप एव हुत्वा जीवकलशे बिम्बे च तत्सम्पातं संस्पृश्य अर्चनाद्यम् अखिलं पृथक्

१. 'ई' इति मूलकोशपाठः.

रत्नन्यासविधिं विधाय मनसा सम्पूज्य गर्भालयं
नीत्वा जीवघटाद्यमत्र सुविभाव्यैतत्प्रतिष्ठापनम् ।
जीवन्यासविधौ स्वजीवकलशेनासिच्य पूर्वोक्तवत्
कुर्यात् कर्मकलापमित्यभिहिता निष्क्रामणप्रक्रिया ॥ ९४॥

नमस्ते सर्वलोकेश ! भूतानामभयप्रद ! ।
भक्तप्रिय ! नमस्तेऽस्तु प्रसीद भुवनेश्वर ! ॥ ९५ ॥
आगच्छ देवदेवेश ! सर्वकारणकारण ! ।
नवीकरणसिद्ध्यर्थं कुम्भेऽस्मिन् सन्निधिं कुरु ॥ ९६ ॥
इति ॥

निष्क्रामणैकविहितं विधिमत्र मुक्त्वा
शेषं विशेषविदिह प्रविधाय कर्म ।
सम्प्रार्थ्य तत्त्वकलशेन तथाभिषिच्य
सङ्कोचमाचरतु वा गृहमात्रजीर्तौ ॥ ९७ ॥

देवेश ! प्रतिमामूर्ते ! मन्त्रमूर्ते ! परावरे ।
अत्र सङ्कुचितो भूत्वा वासं कुरु तवाज्ञया ॥ ९८ ॥
इति ॥

पूर्वोक्तवत् निर्वर्त्य पुनः उत्तरदिवसे रत्नन्यासविधिं मनसा विधाय उभयत्र संपूज्य जीवघटाद्यमखिलं गर्भालयं नीत्वा अत्र पीठे एतत्प्रतिष्ठापनं सुविभाव्य मनसा कल्पयित्वा जीवन्यासविधौ (स्व)जीवकलशेनासिच्य पूर्वोक्तवत् कर्मकलापं कुर्यात् । इति निष्क्रामणप्रक्रिया क्रियारीतिरभिहिता ॥ ९१—९४ ॥

प्रार्थनापद्यद्वयं पठति — नमस्त इति ॥ ९५, ९६ ॥

अत्र गृहमात्रजीर्तौ प्रासादमात्रस्यैव वैकल्ये सति विशेषवित् निष्क्रामणात् संकोचकर्मणि विशेषं विद्वानाचार्यः निष्क्रामणैकविहितं निष्क्रामणप्रधानत्वेन विहितं विधिं मुक्त्वा शेषं कर्म प्रविधाय 'देवेशे'ति संप्रार्थ्य तथा पूर्वोक्तप्रकारेण तत्त्वकलशेनाभिषिच्य संकोचमाचरतु वा । मासादधिकं प्रासादकरणकालश्चेत् निष्क्रामणं, ततोऽर्वाक् चेत् संकोच इति विकल्पस्य विभागः ॥ ९७ ॥

प्रार्थनामात्रं पठति — देवेशेति ॥ ९८ ॥

---

१. 'भाव्यैत' क. ग. पाठः. २. 'विध्यर्थं' क. घ. पाठः. ३. 'तौं' ख. पाठः.

विष्वग्जागरिते विकृष्य बहिरङ्गादन्तरङ्गादपि
स्वस्मिन्नेव सुयोजिते स्वविभवोन्मेषे चिदेकात्मनि ।
ऊर्ध्वाधःक्रमतोऽत्र पद्मयुगलं ध्यात्वा तदावारकं
स्वेच्छाशक्तिविभावितं पृथगतः सम्भाव्य चात्मोद्भिदाम् ॥
तत्राधारसरोरुहाग्रदलमध्यास्योर्ध्वपद्मोदरा-
च्छ्योतद्भिः परितर्प्य देवमुपहारैश्चित्सुधैकात्मकैः ।
तस्मादेव तदीयमूर्ध्नि विकासं सुधा-
धारां साधु विभाव्य तन्मुकुलितं कुर्याद् बहिष्ठोऽम्बुजम् ॥
ऊर्ध्वाब्जेन तदम्बुजं कबलितं कृत्वावतार्याथ तत्
संवेष्ट्य त्रिगुणात्मकेन मपरेणारक्ष्य चास्त्रौजसा ।

संकोचनप्रक्रियामाह — विष्वग्जागरित इति । स्वयं देवाभेदेन स्थितो भूत्वा स्वविभवोन्मेषे स्वस्य देवस्य संबन्धिनो विभवस्य व्याप्तेरुन्मेषे प्राकाश्ये विष्वग्जागरिते विष्वङ् महामर्यादापर्यन्तम् उद्बुद्धे तत्र बहिरङ्गादन्तरङ्गाच्च उक्तप्रकारेणैव बाह्यपद्मादन्तःपद्माच्च विकृष्याकृष्य स्वस्मिन्नेव चिदेकात्मनि चैतन्यमात्रे हृत्कमले सुयोजिते सति अत्र स्वेच्छाशक्तिविभावितं स्वस्येच्छाशक्तेरुद्भूतं तदावारकं तस्य चैतन्यात्मनः आवारकम् आच्छादनकरम् ऊर्ध्वाधःक्रमात् पद्मयुगलं ध्यात्वा अतो देवात् पृथग् आत्मोद्भिदां स्वस्य भेदं सम्भाव्य भावयित्वा तत्रानयोः पद्मयोर्मध्ये आधारसरोरुहाग्रदलम् आधारपद्मस्याग्रस्थं दलम् अध्यास्य अस्मिन्नुपविश्य ऊर्ध्वारविन्दोदरात् श्च्योतद्भिः स्रवद्भिः चित्सुधैकात्मकैः चैतन्यामृतमयैरुपहारैः देवं परितर्प्य संपूज्य प्रसाद्य तस्मादेव ऊर्ध्वपद्मोदरात् आविकासं यावद् विकासो भविष्यति तावत्पर्यन्तं तदीयमूर्ध्नि देवस्य ब्रह्मरन्ध्रे निपतन्तीं सुधाधारां साधु स्वगुरूपदेशक्रमेण विभाव्य स्वयं तस्मादब्जाद् बहिष्ठो भूत्वा तदम्बुजं मुकुलितं कुर्यात् ॥ ९९,१०० ॥

ऊर्ध्वाब्जेनावतार्य अधोभागं नीत्वा तदम्बुजम् आधाराम्बुजं कबलितं ग्रसितं कृत्वाथ तत् पद्मं त्रिगुणात्मकेन सत्त्वरजस्तमोमयतन्तुरूपेण मपरेण

---

१. 'अ' क. पाठः. २. 'लीभूतं' ग. पाठः.

स्वस्मि- स्वोदितचित्सिराप्रसरविश्रान्त्या स्थितोऽर्चां वृतां
वस्त्राद्यैः परिरक्ष्य तक्षभिरिदं वेश्माञ्जसा कारयेत् ॥
प्रासादं परिगृह्य तद्विधिसमाप्तौ शोधयित्वाथ तद्-
बिम्बं स्वोदितसप्तशुद्धिहवनस्नानादिना शोधयेत् ।
धारायामभि. तत्सरोरुहविकासाद्यं विधेयं धिया
प्राक्सं योचिततत्त्वसृष्टिहवनादौ कर्मणा चाचरेत् ॥
जीर्णे सत्यष्टबन्धे तदधिष्ठातृं स्वार्हसम्पातसिक्तां
देवे व्याप्यादिना तन्मलमपि परिशोध्याभिषिच्यार्चिते-
[ऽस्मिन् ।

संवेष्ट्य तद्बहिरस्त्रौजसा चारक्ष्य स्वोदितचित्सिराप्रसरविश्रान्त्या स्वस्मादुद्गतस्य सुषुम्नानाड्या मार्गस्य विश्रान्त्या छेदेन हेतुना स्वस्मिन्नेव स्थितो भूत्वा वस्त्राद्यैः वस्त्रदर्भाद्यैः वृतामर्चां परिरक्ष्य इदं वेश्म प्रासादं तक्षभिरञ्जसा यथावत् कारयेत् ॥ १०१ ॥

पुनस्तद्विधिसमाप्तौ प्रासादे कृते सति प्रासादं परिगृह्य शोधयित्वाथ तद्बिम्बं तत्रस्थं बिम्बं स्वोदितसप्तशुद्धिहवनस्नानादिना उक्तैः क्षालनादिसप्तशुद्धिभिः प्रायश्चित्तादिहोमैः उक्तमादिक्रमेणोक्तैः कलशस्नानादिभिश्च शोधयेत् । आदिशब्देन दिशाहोमोत्सवादय उक्ताः । इह शोधनसमये धारायामारभ्यमाणायां तत्सरोरुहविकासाद्यं पूर्वोक्तपद्मयोः सङ्कोचापनयनम् ऊर्ध्वाधोनयनं च विधेयं कर्म धियैवाचरेत् । प्राक्संख्योचिततत्त्वसृष्टिहवनादौ पूर्वप्रोक्तसंहारतत्त्वहोमे याभिः संख्याभिः परिच्छिन्नस्तत्त्वहोमः कृतः ततोऽधिकसंख्याभिः परिच्छिन्नेन सृष्टितत्त्वहोमे तत्त्वकलशस्नाने ब्रह्मकलशस्नाने च कर्मणा सङ्कोचविकासादिकमाचरेत् । तत्त्वहोमकलशस्नानादिकमेव पद्मद्वयस्य सङ्कोचविकासादिकर्मेत्यर्थः ॥ १०२ ॥

एवं बिम्बप्रासादादिजीर्णोद्धारमभिधायाथाष्टबन्धे जीर्णे कर्तव्यं कर्माह — जीर्णे सतीति । अष्टबन्धे जीर्णे शिथिले सति प्रासादशुद्ध्यादिकलशस्नानभूतबलिपर्यन्तां शुद्धिं यथोक्तमार्गेण कृत्वा शक्तिहोमकाले पूजामन्त्रहोमावस्याने नवशक्तीनां संहारमार्गाद्धोमेन सम्पातितसम्पातं स्वीकृत्य पुन-

---

१. 'र्चो' इति मूलकोशपाठः. २. 'शो' ख. घ. च. पाठः. ३. 'थाष्ट' ग. पाठः

बीजेनावाह्य पीठे प्रकृतिमपि पुमांसं च मूलेन बिम्बे
साङ्गीकृत्योपहारान् स्नपनसमवसानान् समर्प्योभयोश्च ॥
पुण्याहप्रोक्षणान्ते द्वयमपि वसनाद्यैर्विभूष्योपहारै-
रिष्ट्वा कृत्वाष्टबन्धं विधिवदुभयसम्मेलनं भावयित्वा ।
मूलेनावाह्य देवं प्रयजतु सकलीकृत्य भक्त्योक्तनीत्या
कुर्यात् तुर्याह्निकोक्तस्नपनमपि तदिज्येह तद्बिम्ब एव ॥
शङ्खः षड्गुणितः पयोधिगुणितः सर्जो द्विवृद्धाभया
कार्पासोपलवालुकाः सजतुकाः प्रत्येकमेकांशकाः ।

र्नवशक्तिभिः सृष्टिक्रमेण यथाशक्त्याज्यं हुत्वा चतुर्द्रव्यं स्विष्टकृदादिकं च हुत्वा होमं समाप्यान्तर्गत्वा स्वार्हसम्पातसिक्तां संहारहोमात् सम्पादितेन सम्पातेन सिक्तां तदधिगतचितिं जीर्णाष्टबन्धगतचैतन्यम् आदिना प्रणवेन देवे व्याप्य उद्वास्य तन्मलं जीर्णाष्टबन्धशकलमपि परिशोध्य परितः शोधयित्वा अभिषिच्य रत्नसुवर्णसिकताभिस्तद्विवरं प्रपूर्यार्चितेऽस्मिन् पीठे बीजेन स्वस्वशक्तिबीजेन प्रकृतिं, बिम्बे मूलेन पुमांसमप्यावाह्य उभयोश्च साङ्गीकृत्य पीठे लिपिन्यासपीठन्यासादिभिः, बिम्बे लिपितत्त्वन्यासादिभिश्च सकलीकृत्य स्नपनसमवसानान् स्नानपर्यन्तानुपहारान् समर्प्य पुण्याहप्रोक्षणान्ते 'अष्टबन्धदेवताः प्रीयन्तामि'त्यादिविशेषेण सह पुण्याहं कृत्वा द्वयं पीठं बिम्बमपि वसनाद्यैर्विभूष्यालङ्कृत्य जलगन्धादिभिरुपहारैः इष्ट्वा नवशक्तिहोमाज्जातं संपातं समर्प्य विधिवत् प्रतिष्ठापटलोक्तविधिनाष्टबन्धं कृत्वा स्थापयित्वा उभयसम्मेलनं प्रकृतिपुरुषयोरन्योन्यसंयोगं प्रणवव्यापकेन भावयित्वा मूलेन देवमावाह्य सकलीकृत्य भक्त्या तं देवं प्रयजतु । पुनरुक्तनीत्या प्रागुक्तविधिना तुर्याह्निकोक्तस्नपनमपि प्रतिष्ठावच्चतुर्थदिवसस्नानमपि कुर्यात् । इहाष्टबन्धे तदिज्या त्रिदिनगता पूजा तद्बिम्ब एव । नात्र कवाटबन्धनादिकं कर्तव्यमित्यर्थः ॥ १०३, १०४ ॥

अष्टबन्धद्रव्याणि सपरिमाणान्याह--शङ्ख इति । शङ्खः षड्गुणितः षड्भिर्भागैर्युतः । सर्जः पयोधिगुणितः चतुर्भिरंशैर्युतः । (സർജ്ജം=ചെമ്പു ൽ) । अभया द्विवृद्धा द्विभागयुता । (അഭയാ=കടുക്ക) । सजतुकाः जतुकसहिताः कार्पासोपलवालुकाः प्रत्येकमेकांशकाः । एतानि चत्वारि द्रव्याणि

लाक्षाधामलकीसमेतमखिलं सञ्चूर्ण्य संयोजितं
तैलक्लिष्टसुपिष्टमात्मनवशक्त्यात्माष्टबन्धं विदुः ॥ १०५ ॥
बलिपीठमहाध्वजादिजीर्तौ
विहितैर्देवविशुद्धयवस्तुतैस्तत् ।
सुविशोध्य समर्च्य देवमस्मै
बलिमाधाय निबोधयेद् विधेयम् ॥ १०६ ॥
अथ तत्पुरतः प्रतीपवृत्त्या
शरतत्त्वैर्हवनं विधाय मन्त्री ।
अभिषिच्य च तद्घटेन तस्मिन्
स्वविभूत्यप्ययमञ्जसा प्रकल्प्य ॥ १०७ ॥
कलशे परिपूरिते तदग्रे
चितिमावाह्य ससूत्रमत्र संस्थाम् ।

प्रतिद्रव्यमेकैकांशयुक्तानि । (ജതുക്കം=അരക്ക്. കാർപ്പാസം=പരിത്തി. ഉപലം=കൊഴിപ്പുരൽ. വാലുകാ=ഞറവ് ാറ) । लाक्षार्धामलकीसमेतं लाक्षाया जतुकस्यार्धांशमानेन आमलकीफलेन युतम् । (ആമലകി=നെല്ലിക്കാ)। एतदखिलं द्रव्याष्टकं संचूर्ण्य सम्यक् सूक्ष्मचूर्णानि सम्पाद्य संयोजितं सम्यगेकीकृतं तैलक्लिष्टसुपिष्टं तैलेन क्लेदितं सुतरां पेषितं च तद् आत्मनवशक्त्यात्म स्वस्वनवशक्तिस्वरूपमष्टबन्धं बुधा विदुः । अत्र कार्पासस्तत्काले योजनीय इत्युपदेशवशाद् भवति ॥ १०५ ॥

अथ परिवाराणां जीर्णोद्धारविधिमाह — बलिपीठेति । बलिपीठमहाध्वजादिजीर्तौ इन्द्रादिबलिपीठानां महाबलिपीठस्य महाध्वजरङ्गादेश्च जीर्तौ सत्यां विहितैः कृतैः देवविशुद्धयवस्तुतैः देवस्य सप्तशुद्धिशेषैः होमकलशशेषैः कलशशेषैश्च तज्जीर्णं महापीठादिकं सुविशोध्य देवं समर्च्य भूतबलिं चाधाय अस्मै देवाय विधेयमनुष्ठेयं निबोधयेत् विज्ञापयेत् ॥ १०६ ॥

अथ मन्त्री मन्त्रातिदेशे कर्मातिदेशे च कुशलो गुरुः तत्पुरतः तस्य बलिपीठादेः पुरतः प्रतीपवृत्त्या संहारक्रमेण शरतत्त्वैः स्वस्य देवस्य पञ्चतत्त्वैः हवनं तत्त्वहोमं विधाय तद्घटेन तत्तत्त्वहोमकलशेन तमभिषिच्य

१. 'ग्र' ख. ग. पाठः.

उपनीय च गर्भधान्नि [illegible]क्त्वा
गमयेत् तत्सिरयैव देवदेवे ॥ १०८ ॥
गर्भन्यासप्रभृतिविधिना कारुणा कार[illegible]त्वा
तोयावासप्रभृतिविधिभिः शुद्धिभिः सप्तभिश्च ।
संशोध्यैतद् विधिवदधिवास्य प्रतिष्ठादि सर्वं
कुर्वीताथ प्रथमविधिवत् तुर्यवारोक्षणान्तम् ॥ १०९ ॥
जीर्णोद्धृतिं स्थापितमन्त्राबिम्ब-
गृहादिजीर्तौ सपदीति कुर्यात् ।
दुःस्थोऽन्यथा चेद् विपदे तथा चेत्
सुस्थोऽत्र देवो यदु सम्पदे स्यात् ॥ ११० ॥

तस्मिन् महाबलिपीठादौ स्वविभूत्यप्ययं स्वस्वन्यासैः संहारमञ्जसा प्रकल्प्य तदग्रे परिपूरिते कलशे ससूत्रं सूत्रच्छेदविधानयुक्तं यथा भवति तथात्र संस्थां स्थितां चितिमावाह्य कलशे योजयित्वा तत्कलशमन्तरुपनीय देवाग्रे गर्भधान्नि सिक्त्वा तत्सिरयैव तन्मार्गेणैव देवदेवे गमयेत् योजयेत् ॥१०७,१०८॥

पुनस्तत्र तत् सर्वं जले त्यक्त्वा संशोध्य गर्भन्यासप्रभृतिविधिना पूर्वोक्तविधिनैव पूर्ववदेव कारुणा कारयित्वा तदानीं तोयावासप्रभृतिविधिभिः जलाधिवासबिम्बशुद्ध्यादिभिः क्षालनादिसप्तशुद्धिभिश्च तत् संशोध्य विधिवत् पूर्वोक्तप्रकारेणैवाधिवास्य प्रतिष्ठादि सर्वं कर्म कुर्वीत। अथ प्रथमविधिवत् पूर्वप्रतिष्ठावत् तुर्यवारोक्षणान्तं चतुर्थदिवसस्नपनानन्तरं तदवस्नावप्रोक्षणबलिदानपर्यन्तं कुर्वीत ॥ १०९ ॥

जीर्णोद्धारविधिमुपसंहरति — **जीर्णोद्धृतिमिति** । स्थापितमन्त्रबिम्बगृहादिजीर्तौ प्रतिष्ठापितस्य मन्त्रबिम्बस्य गृहादेः प्रासादादीनां च जीर्तौ वैकल्ये सति सपदि तदानीमेव इति उक्तप्रकारेण जीर्णोद्धृतिं नवीकरणं कुर्यात् । अन्यथा चेत् जीर्णोद्धरणं न क्रियते चेद् दुःस्थो दुःखरूपेण स्थितो देवो विपदे तत्संबन्धिनां विनाशाय स्यात्[3] । तथाचेत् जीर्णोद्धृतिः क्रियते चेत् सुस्थः सुखेन स्थितो देवोऽत्र स्थाने तत्संबन्धिनां च संपदे अभ्युदयाय स्यात् । यदु[5] यच्च यस्मात् तस्मात् जीर्णोद्धारं कुर्यादिति पूर्वत्र संबन्धः ॥

---

१. 'दि' ग. घ. पाठः. २. 'राव' ग. पाठः. ३. 'त् । यस्मात् तथा' घ. ङ. च., 'त् । तस्मात् त' ख. पाठः ४. 'दुदय' ङ. पाठः. ५. 'धंसं' ख. घ. ङ. च. पाठः.

एकबेराविषये स्थापनाद्यं समीरितम् ।
बहुबेरविधानेऽथ भेदमात्रं प्रदर्श्यते ॥ १११ ॥

शूलं वार्यधिवास्य बिम्बकलशैः सिक्त्वाधिवास्याग्रतः
प्रासादे परिशोधिते मणिगणन्यासादि कृत्वा गुरुः ।

एकबेरप्रतिष्ठाकर्मोपसंहृत्य बहुबेरप्रतिष्ठां प्रस्तौति — इतीति । एकबेरविषये एक एव बेरो बिम्बं प्रतिमासाधनद्रव्यं यत्र स एकबेरः । तथा बहुबेरशब्दोऽपि ज्ञातव्यः । तत्रैकबेरविषये एकबेरं विषयीकृत्य स्थापनाद्यं स्थापनपूजनस्नानाद्यम् इति उक्तप्रकारेण समीरितं सम्यगुक्तम् । अथेदानीं बहुबेरविधाने बहुबेरकरणे तदनुष्ठाने च भेदमात्रं योऽयमुक्तकर्मणो भेदो विशेषः तन्मात्रमेवास्माभिः प्रदर्श्यते ॥ १११ ॥

अथ प्रस्तुतं बहुबेरानुष्ठानं सूत्रयति — शूलं वार्यधिवास्येति । तत्र

"रत्नलोहशिलाधातुमृत्काष्ठालेख्यभेदतः ।
प्रतिमा सप्तधा ज्ञेया"

इति विष्णुसंहितायां प्रतिमायाः[1] सप्तविधत्वमुक्तम् । तथान्यत्र

"प्रतिमा योनिभेदेन पञ्चधा परिकीर्तिता ।
शैलं रात्नं तथा लौहं दारवं मार्त्तिकं तथा ॥"

इति पञ्चविधत्वमुक्तम् । "प्रतिमाष्टविधा स्मृते"ति भागवते । षोढेति सिद्धान्तसारे । तत्र मणिलोहशिलाप्रतिमाः एकबेरविधानेन स्थाप्याः । इतरा बहुबेराविधानेन । तत्र मुरारिराह —

"एकबेरं शिलालोहमणिजं सर्वदेष्यते ।
मृद्दारुजं तथालेख्यं बहुबेरमिति स्थितिः ॥"

इति । तत्र दारवी प्रतिमा यथोक्तप्रकारेण दारुं परिगृह्य यथोक्तप्रकारेण कारुभिः कारयित्वा वक्ष्यमाणबहुबेरानुष्ठानक्रमेण स्थापनीया । मृन्मयप्रतिमाविधानमिह किञ्चित् प्रकाश्यते । मृन्मयी प्रतिमा द्विविधा पक्वापक्व-

१. 'तद्भेद' क. पाठः. २. 'छा', ३. 'नां' ख. घ. ङ. च. पाठः.

संस्थाप्य स्वपदेऽभिषिच्य कलशाभ्यां प्राच्यं संरक्ष्य तत्
तक्ष्णा मृन्मयमूलबिम्बमुपबिम्बं चेप्सितं कारयेत् ॥

विभागेन । तत्र पक्का नातिशुभा । अपक्का तु सर्वाचार्यैः शुभेति प्रोक्ता तथा नारदीयपद्धतौ —

"मृन्मयीं प्रतिमां वक्ष्ये यथावत् तां निबोध मे ।
पक्वापक्वे द्विधा प्रोक्ते मृन्मय्यौ प्रतिमे क्रमात् ॥
न सर्वलोकाः शंसन्ति प्रतिमां दग्धमृन्मयीम् ।
अपक्वा प्रतिमा शस्ता सैव कार्या विचक्षणैः ॥
सुधया नैव कुर्याद्वै नाश्मचूर्णैस्तु कारयेत् ।
मृदैव मृन्मयीं कुर्याद् यथावर्णानुरूपतः ॥
ब्राह्मणस्य सिता मृद्वै क्षत्रियस्यारुणा स्मृता ।
विशां पीता भवेन्मृद्वै कृष्णा शूद्रस्य कीर्तिता ॥
मृदं वर्णानुरूपेण गृह्णीयात् क्षेत्रसम्भवाम् ।
दधिसर्पिःपयोभिश्च अतसीस्नेहसंयुतैः ॥
शर्करालोहपाषाणैश्चूर्णं कृत्वानुपूर्वशः ।
समभागानि चूर्णानि मृत्तिकायां प्रयोजयेत् ॥
खादिरेण कषायेण आर्जुनेन च पेषयेत् ।
श्रीवेष्टकं सर्जरसं कुङ्कुमं कुष्ठमेव च ॥
कुन्दुरुश्च रसा ह्येते सर्वे + + रसान्विताः ।
नदीसंगमतीर्थेषु पुण्योद्यानेषु वा पुनः ॥
आदाय मृत्तिकां तत्र स्नेहचूर्णसमायुताम् ।
मासं पर्युषितां कृत्वा कारयेत् प्रतिमां ततः ॥
त्रिरात्रोपोषिता[1] सा तु शिलायससमा भवेत् ।"

इति । तत्र मुरारिराह —

"गर्तं कृत्वा निवाते[2] तु स्थापयेत् तत्र मृत्तिकाम् ।
शर्करालोहपाषाणचूर्णं दध्यादिभिः समम् ॥

---

१. 'त्रौ' ङ. पाठः. २. 'पा' ख. ग. पाठः.

चतुर्थांशं मृदि क्षिप्त्वा कषाभ्यां च पेषयेत्।
कषाये सर्वमालोड्य श्रीवेष्टादिसमन्विताम् ॥
संगमादिमृदं पिष्टां सर्वचूर्णसमन्विताम्।
मासोषितां पुनः पिष्ट्वा तनुयात् प्रतिमां शुभाम् ॥
त्रिरात्रेण शिलावच्चेज्ज्ञेया तत्र सुयुक्तता।
पुनर्मासोषितत्वोक्तिरर्चाकाठिन्यसिद्धये ॥
ततो गर्भगृहे पीठं कुर्याच्छूलसमन्वितम् ॥"

इति। शर्करालोहपाषाणमिति। (ശക്കരാ=കൊഴുപ്പുരൽ)। लोहं सुवर्ण-रजतताम्रकांस्यानि। (പാഷാണം=അറുപാറ)। एतानि समभागानि कृत्वा मृदश्चतुर्थांशं योजयेदित्यभिप्राय इति। रत्नावल्यामपि तथैवोक्तं — "पूर्वोक्तां मृदं संगृह्य विवातगतां कृत्वा स्थापयेदि"त्यादि। अथ मृत्परिग्रहे शिलापरिग्रहवदाचार्यो देवं संपूज्य शिल्पिभिः सह प्रशस्तं मृत्स्थानं गत्वा तत्रान्विष्य लब्ध्वा यथोक्तप्रकारेण होमादिकं सर्वं कृत्वा उपोष्य गृहीत्वा शिल्पिने ददेत। तथाच शूलार्थं प्रतिमार्थं विहितं वृक्षविशेषं गत्वा यथोक्तप्रकारेण छित्वानीय शिल्पिभिः शूलानि कारयेत्। तत्र शूलकरणे मुरारिराह —

"वंशदण्डैः[1] कटीदण्डो वक्षोदण्डस्तथैव च।
बाहुदण्डाश्च चत्वारः प्रकोष्ठास्तावदेव तु ॥
पाददण्डावुभौ चैवं स्थूलदण्डास्त्रयोदश।"

इति। स्थितस्य देवस्य शूलानि स्युः। तथाच तत्स्थिरीकरणाय चत्वारि शूलानि च योजयेत्। तथाच मुरारिराह —

"प्रतिमासंमितायामं पृष्ठतो वृत्तमेव च।
उपघ्नशूलं कुर्वीत प्रतिमास्थितये पुनः ॥
केचिच्चरणशूलं च पाशशूलं च कुर्वते।
चतुरः श्लेषयेद् दण्डान् द्विशिखानेव तान् पुनः ॥
दण्डाः सप्तदशैते तु स्थाने प्रोक्ता विचक्षणैः।"

---

१. 'क्षि', २. 'ण्डाः' ख. घ. ङ. च. पाठः.

इति । एवं स्थितस्य देवस्य सप्तदश वा त्रयोदश वा शूलानि कुर्वीत । आसीने देवे तु मुरारिराह —

"तत्र स्याज्जानुसन्धिकम् ।
जङ्घादि द्विशिखं कुर्यादूरुमेकशिखं तथा ॥
एकोनविंशतिर्ज्ञेयाः शूलदण्डास्तथासने ।
शयने च तथा दण्डा अत ऊर्ध्वं न कारयेत् ॥"

इति । इत्यासनशयनयोरप्येकोनविंशतिः शूलदण्डा भवन्ति । रत्नावल्यामपि तथैवोक्तं — "खादिरादीन् पूर्वोक्तान् वृक्षान् समानीय पुण्याहं कारयित्वा प्रोक्ष्य शिल्पिभिस्तक्षयित्वा शूलानि कारयेद् यथोक्तप्रमाणानी"त्यादि । तत्र शूलं वार्यधिवास्येति । शूलमिति जातावेकवचनम् । त्रयोदशसंख्यानि सप्तदशसङ्ख्यादि एकोनविंशतिसङ्ख्यानि वा शूलानि शिल्पिभ्यो यथोक्तप्रकारेण गृहीत्वा यथोक्तप्रकारेणैवैकरात्रं जलेऽधिवास्य उत्तरेद्युर्बिम्बकलशैः स्वस्वबिम्बशुद्धिकलशैः सिक्त्वाग्रतो मण्डपे यथोक्तप्रकारेणाधिवास्य अत्राधिवासहोमेन सह रत्नहोमं कृत्वा ततो यथोक्तकालं यथोक्तप्रकारेण वास्तुपुण्याहान्तकर्मणा प्रासादे परिशोधिते सति मुहूर्तदिने पुण्याहपूर्वं नपुंसकशिलां प्रतिष्ठाप्य मणिगणन्यासादि रत्नन्यासपीठस्थापनादिकं कृत्वा गुरुः प्रतिष्ठाविधानज्ञः मण्डपाच्छूलान्यानीय स्थितासीनशयानानां (स्वपदे) स्वस्वोक्ते स्थाने संस्थाप्य तानि शूलानि तत्र सम्यक् स्थिरीकृत्य कुम्भेशानिद्राकलशाभ्यामभिषिच्य प्राच्यं तत् संरक्ष्य मृन्मयमूलविम्बं स्वस्वपरिवारैर्युतं मृन्मयं मूलबिम्बं स्वेप्सितं तक्ष्णा कारयेत् । तथा उपबिम्बमर्चनाबिम्बादिकं चेप्सितं कारयेत् । अथ मूलप्रतिमा महती चेत् प्रासादरचनात् पूर्वमेव अधिष्ठाने कृते सति तत्र स्थले स्थलशुद्धिं कृत्वा यथोक्तनीत्या राक्षोघ्नहोमवास्तुहोमवास्तुबल्यादि कृत्वा रत्नहोमं च विधाय पुण्याहानन्तरं तद्गर्ते यथोक्तप्रकारेण संस्कृतां नपुंसकशिलां प्रतिष्ठाप्य तद्गर्तेषु रत्नन्यासं यथोक्तप्रकारेण कृत्वा तत्र शूलस्थापनं कृत्वा संपूज्य संरक्ष्य तक्षभिः लेप्यां महाप्रतिमां कारयेत् । उभयथापि मूलेपनात् पूर्वं शूलान्यन्योन्यं बन्धयेत् । तत्र तिष्ठतो देवस्य नपुंसकशिलाया उपरि पादशिलां पीठं च यथोपपत्ति निधाय पादशिलाया गर्तद्वये द्वे पादशूले नपुंसकशिलास्पृष्टे यथा भवति तथा कृत्वा ते पादशूले

---

१. 'क्यां' ख. ग. च. पाठः,

कटिपर्यन्ते कृत्वा तत्र कटिदण्डेन सह श्लेषयेत् । शूलानां श्लेषणे सुषिरं कीलं च न कारयेत् । त्रिशिखं द्विशिखं निम्नं[1] च कृत्वा पृथक् पृथक् श्लेषयेत् । वक्षोदण्डस्य मध्ये तथा कटिदण्डे च मध्ये भिन्नं कृत्वा तयोर्निम्नयोर्मध्ये वंशदण्डं निश्छिद्रं बन्धयेत् । वंशदण्डं तु मुखाद् मूर्धान्तं किरीटान्तं च बुधाः प्राहुः । वक्षोदण्डं त्रिशूलाग्रं कुर्यात् । बाहुमूलानि त्रिशिखानि, प्रकोष्ठं द्विशिखं कुर्यात् । पुनर्दण्डान् सर्वान् यथावच्छ्लेषयेत् । श्लेषिताञ्छ्लेषितांस्ताम्रपट्टेन वेष्टयेत् । यथा सन्धेर्दार्ढ्यं भवेत्, तथा वेष्टयेत् । एवं शूलानि बन्धयित्वा रज्जुवेष्टनं कुर्यात् । तत्र मुरारिराह —

"नालिकेरत्वचां सारं गृह्णीयाद् रज्जुकर्मणि ।
समवत्तायता रज्जुर्नातिस्थूला न वा कृशा ॥
शलाकामात्रनाहा सा शूलग्रन्थिविवर्जिता ।
न चैवातिदृढा कार्या नातिमृद्वी कदाचन ॥
एवं रज्जुमयं कृत्वा सर्वेष्वङ्गेषु वेष्टनम् ।
यथा शरीरे सर्वेषां चतुष्षष्टिः सिराः स्मृताः ॥
शूले तथैव पाशाः स्युः कर्तव्यास्तत्र कोविदैः ।
शूलमस्थि सिरा रज्जुर्मृन्मांसं त्वक् पटो भवेत् ॥
द्वाभ्यां द्वाभ्यां तु रज्जुभ्यां बद्ध्वा शूलं तु वेष्टयेत् ।
मृदं संगृह्य पूर्वोक्तां ततो मासद्वयोषिताम् ॥
चतुर्भिर्भाजिताभिश्च वालुकाभिर्विमिश्रयेत् ।
ततस्त्रिकटुकं चूर्णं विंशत्यंशं तु मिश्रयेत् ॥
नालिकेरत्वचां सारं छित्वा छित्वात्र मिश्रयेत् ।
आलोड्य त्रिफलातोये नालिकेररसान्विते ॥
नालिकेररसैः सार्धं सारयित्वा मृदं शनैः ।
श्लेषयेत् स्थूलबन्धेषु सर्वाङ्गेषु शनैः शनैः ॥
आर्द्रेष्वेव चतुष्केषु तेषु रज्ज्वा प्रवेष्टयेत् ।
वेष्टयित्वा समीकृत्य मृदा चैव शनैः शनैः ॥

१. 'म्ननं च' ख. घ. पाठः.

सप्रासादमिदं प्रगृह्य मनुबिम्बं कर्मबिम्बं तथा
तत्कृत्यावसितौ प्रणीय सलिले तद् वासयेत् कौतुकम् ।

त्रिरेव रज्जुबन्धं च त्रिशुष्कं चापि दापयेत् ।
अत ऊर्ध्वं न रज्जुं च न शुष्कं चापि दापयेत् ॥
मृदालिप्य शनैर्ज्ञात्वा शुष्काशुष्कं विचक्षणः ।
कुर्याच्छरीरसंवेष्टं छेदच्छिद्रविवर्जितम् ॥
हस्तेनैव मृदं दद्यात् कूर्चेन कटुशर्कराम् ।
पिष्ट्वा त्रिफलतोयैस्तु शर्कराकल्कमेव च ॥
कार्पासतूलसंयुक्तं सम्यक् कृत्वा विचक्षणः ।
कूर्चेनैव तु तत् कल्कं शनैरेव परामृशेत् ॥
ततः कृकणिकाग्रेण न्युप्ताङ्गानि च लेपयेत् ।
कल्पितेष्वङ्गेषु सर्वेषु पटैराच्छाद्य बुद्धिमान् ॥
शुक्तिकादिक्रियास्तत्र सर्ववर्णांश्च कारयेत् ।
वर्णयोगविधिं पश्चात् प्रकुर्वीत यथाक्रमम् ॥

इति । इत्याद्युक्तप्रकारेणोत्तमादिक्रमवशान्मूलप्रतिमाम् अतिमनोहरां कृत्वा मूलबिम्बत्रिभागादिप्रमाणनिर्मितां कर्मार्चामष्टांशादिप्रमाणकल्पितस्नानार्चादिकं च यथायोग्यं कारयित्वा कर्मण्यारभेत ॥ ११२ ॥

तत्रै प्रतिमापरिग्रहादिकमाह — सप्रासादमिति । तत्कृत्यावसितौ[1] तेषां शिल्पिनां कृत्यावसाने तत्रादौ यथाकालं बीजवापं कृत्वा तद्योग्ये दिने इदं मनुबिम्बं मूलबहुबेरबिम्बं स्थिरीकृतं चेत् सप्रासादं प्रासादेन सहितम्, अन्यथा चेत् पृथगेव मूलबिम्बं तथा कर्मबिम्बं च पूर्वोक्तप्रकारेण प्रगृह्य तत् कौतुकं कर्मबिम्बं जलाशयं प्रणीय सलिले वासयेत् जलाधिवासं कुर्यात् । परिग्रहात् पुरः कर्तव्ये नयनोन्मीलने अन्तःस्थितमूलबिम्बे घृतमधुलेशयुक्तया हेममय्या तूलिकया यथोक्तप्रकारेण वा दर्पणप्रतिबिम्बिते सम्यगुन्नयित्वा वा

---

१. 'भावये' ख. पाठः. २. 'त्वा वि' ख. च. पाठः. ३. 'अ परि', ४. 'म्बे स्थिरीकरणं चे' ग. पाठः. ५. 'ग् वाजयित्वा त' ख. ग. घ. च. पाठः.

कृत्वा वास्तुविधिं सुवस्त्रपरिमार्ष्टर्यार्चां च संशोधयेत्
संहृत्याग्रभृताप्सु दर्पणकृतच्छायाधिवास्याथवा ॥११३॥
नक्तं नक्तन्दिनं च त्रिनिशमपि जले वासयेद् रत्नलोहा-
श्मार्चास्तत्रोपनीय स्नपयतु कलशैः स्वोदितैः कर्मबिम्बम् ।
बध्नीयात् कौतुकं च स्मरजिति सकले बिम्बकेऽघोरतः प्रा-
ङ्नेत्रोन्मेषं च कुर्यात् तदनु तदुदितैरनुभिर्लक्षणोद्धारकाले ॥
कर्मार्चामधिवासयेत् सदुपनीयालङ्कृते मण्डपे
मूलार्चामनुसन्धिकल्पसकलशासेकां च मूलालये ।

तच्छेषेण कर्मार्चापरिग्रहात् पुरस्तस्यामपि नयनोन्मीलनं पूरणं च यथोक्तं कुर्यात् । पुनः वास्तुविधिं प्रासादशुद्धिं च यथोक्तप्रकारेण कृत्वा सुवस्त्रपरिमार्ष्टर्या मृदुतरवस्त्रपरिमार्जनेन मूलार्चां च संशोधयेत् । अथवा संहृत्य भूतसंहारादिकं कृत्वा अग्रभृताप्सु पुरोभागगतकटाहस्थे जले दर्पणकृतच्छाया दर्पणे प्रतिबिम्बिता छायाधिवास्या भवेत् ॥ ११३ ॥

जलाधिवासस्य कालनियममाह — **नक्तमिति** रत्नलोहाश्मार्चाः रत्नमय्यो लोहमय्यः शिलामय्यश्चार्चाः क्रमेण नक्तं रात्रिमात्रं नक्तंदिनमहोरात्रं त्रिनिशं त्रिरात्रमपि जले वासयेत् । मृद्दारुशिलालोहरत्नार्चाः क्रमेण सप्तरात्र-पञ्चरात्रत्रिरात्राहोरात्ररात्रिमात्रकालं जलाधिवासं कुर्यादिति केचिदाहुः । पुनः कर्मबिम्बं तत्र स्नानमण्डपे उपनीय स्वोदितैः स्वस्वोक्तैः बिम्बशुद्ध्यर्थं विहितैः कलशैः स्नपयतु । स्वस्वोक्तकाले कौतुकबन्धं नेत्रोल्लेखनं च कुर्यात् । तत्र स्मरजिति सकले बिम्बके बिम्बशुद्ध्यनन्तरम् अघोरतः 'अघोरेभ्य' इति मन्त्रेण कौतुकं च बध्नीयात् । तत्र प्राक् पूर्वं लक्षणोद्धारकाले लक्षणोद्धारस्य स्थाने तदुदितमनुभिः शिवनारायणस्य नेत्रोल्लेखनार्थमुक्तैर्मन्त्रैः विधिवन्नेत्रोन्मेषं च कुर्यात् ॥ ११४ ॥

तदनु कर्मार्चामलङ्कृते मण्डप उपनीयाधिवासयेत् । अनुसन्धिकल्पसकलशासेकां ध्यानेन कृतबिम्बशुद्धिकलशां मूलार्चां मूलालये प्रासादे चाधिवा-

१. 'स्व मनुभिर्मधुघातेत्यादिभिः लक्षणोद्धार उक्तै' ग. पाठः

छायावार्यधिवासनं यदि कृतं तस्यां पृथक् साम्प्रतं
छायाबिम्बघटाभिषेकमपि तच्छुद्धयै पृथक् प्राचरेत् ॥११५॥
बिम्बं प्रासादसंस्थं विधिवदखिलतत्त्वाप्ययोत्पत्तिमन्त्रा-
त्मोन्मेषाध्वौघमन्त्रन्यसनमनु यजेन्मानसैश्चोपहारैः ।
संशोध्यैतत् क्रियाबिम्बकमपि यजतां मण्डलेज्यादियुक्तं
तस्मिंस्तत्त्वाधिवासाहुतिभवमथ सम्पातमापातयेच्च ॥
लेप्यादिप्रतिमासमेतमभितः प्रासादमष्टासु दिक्ष्वा-
धेयान्यधिवासनोक्तहवनान्यग्निं प्रणीयाग्निजे ।
श्रीवृक्षप्रभवा निशाचरदिशि श्रीपर्णिकोत्थास्तथा
वायव्यां समिधोऽणुरत्र्युभयोः शेषः क्रमः पूर्ववत् ॥

सयेत् । तस्यां मूलार्चायां छायावार्यधिवासनं दर्पणच्छायायां जलाधिवासनं पृथक् कृतं यदि तर्हि साम्प्रतम् इदानीं तच्छुद्ध्यै तस्या मूलार्चायाः शुद्ध्यै (छाया)बिम्बघटाभिषेकमपि दर्पणच्छायायां पृथक् प्राचरेत् ॥ ११५॥

पुनः प्रासादसंस्थं मूलबिम्बं विधिवद् यथोक्तमार्गेण अखिलतत्त्वाप्ययोत्पत्तिमन्त्रात्मोन्मेषाध्वौघमन्त्रन्यसनमनु अखिलानां तत्त्वानां संहारं शोषणादिकं तत्त्वानां सृष्टिं मन्त्रोदयप्राणायामादिकं षडध्वन्यासादिकं च विस्तरेण कृत्वा 'मधु वाते'त्यादिभिर्लक्षणोद्धार उक्तैर्मन्त्रैः तदनु मानसैरुपहारैः यजेच्च । एतत् क्रियाबिम्बकमपि भूतसंहारादिभिः संशोध्य मूलमन्त्रप्राणायामन्यासादिसहितं मण्डलेज्यादियुक्तं मण्डलपूजादिभिः सह यजताम् । अथ तस्मिन् तत्त्वाधिवासाहुतिभवं संपातं तत्त्वहोमेनाधिवासहोमैः शान्तिहोमेन च सम्भूतं सम्पातमापातयेत् स्पृशेच्च ॥ ११६ ॥

तत्र कुमारे विशेषमाह — **लेप्यादी**ति । अग्निजे लेप्यादिप्रतिमासमेतं मृन्मयादिबहुबेरबिम्बयुक्तं प्रासादमभितः परितोऽष्टासु दिक्षु कुण्डेष्वग्रस्थाद् गुरुकुण्डादग्निं प्रणीय गुरुमूर्तिपैरधिवासनोक्तहवनान्याधेयानि । तत्र निशाचरदिशि श्रीवृक्षप्रभवा बिल्वजाः, वायव्यां तथा श्रीपर्णिकोत्थाः काष्मर्यश्च समिधः स्युः । उभयोरत्र्यमेवाणुः । शेषः क्रमः पूर्ववदेव ॥ ११७ ॥

---

१. 'स्याः' इति मूलकोशपाठः. २. 'चा' ग. पाठः. ३. 'त्वा त' ग. ङ. पाठः.

नीत्वान्तः सकलं परेद्यवि परावाहादि कृत्वा सुधी-
र्मूलार्चान्यसनं विभाव्य विधिवद् विज्ञाप्य देवं ततः ।
कर्मार्चामपि तत्पुरः पुनरियं सा देवते मूर्तिरो-
मित्युच्चार्य मनुं विहीनमणिके संस्थापयेत् स्वे पदे ॥
शैलादिस्थिरकर्मकौतुकविधौ चेष्टोऽष्टबन्धोऽत्र तत्-
प्राणन्यासवियुक्तमुक्तमखिलं कृत्वा निवेद्यान्तिमम् ।
सूनैर्निस्सलिलैस्तदाहितचितिं संयोज्य मूले ततः
प्राणन्यासपुरस्सरं समुचितं सर्वं प्रकुर्वीत च ॥ ११९ ॥

परेद्यवि उत्तरदिवसे प्रातरेव प्रासादप्रतिष्ठां कृत्वा । बहुबेरबिम्बं तदानीमेव स्थाप्यते चेत् तद् यथायोग्यं कुर्यात् । लेप्यादिप्रतिमा निश्चला प्रासादे पूर्वमेव स्थापिता चेत् प्रासादप्रतिष्ठानन्तरं नपुंसकशिलास्थापनं रत्नन्यासं पीठप्रतिष्ठां च मनसा विधाय पीठपूजां च कृत्वा । अत्रार्चनामूर्तिः स्थिरा चेत् तन्नपुंसकशिलामपि स्थापयित्वा पीठं चास्थाप्य सम्पूज्य मण्डपमासाद्य संपूज्य तत्र मूलबेरसद्भावे तत्रान्यथा चेत् कर्मबिम्बे सर्वमुद्वास्य यथाक्रममन्तः सकलं नीत्वा मूलार्चायां परावाहनमवस्थावाहनं मन्त्रावाहनं च कृत्वा मूलार्चास्थापनं यथाविधि भावयित्वा 'ध्रुवा द्यौरि'त्यादिना स्थिरीकरणं विभाव्य 'विश्वतश्चक्षुरि'त्यादिना प्रार्थयेत् । कर्मार्चायां परावाहनं मन्त्रावाहनं च कृत्वा संपूज्य मूलार्चागतं देवं विज्ञाप्य तत्पुरोभागे विहीनमणिके रत्नन्यासरहिते स्वे पदे 'इयं सा देवते मूर्तिरोमि'ति मूलमन्त्रपुटितं पञ्चतत्त्वमूलं प्रणवं चोच्चार्य कर्मार्चां संस्थापयेत् । सुधीरिति मूलबेरप्रतिष्ठायां प्रतिष्ठाकर्मोक्तमखिलं ध्यायन्नित्यर्थः ॥ ११८ ॥

शैलादिस्थिरकर्मकौतुकविधौ शिलादिभिः स्थिरा कर्मार्चा स्थापिता चेदत्र अष्टबन्ध इष्टो योग्यः । अन्येष्वपि बिम्बेषु सत्सु तत्स्थापनं च कृत्वात्र कर्मार्चायां तत्प्राणन्यासवियुक्तमुक्तमखिलम् अष्टबन्धध्रुवमन्त्रजपाद्यनन्तरं कुम्भेशनिद्राघटाभ्यां यथोक्तप्रकारेणाभिषिच्य जीवावाहनं स्थूलावाहनं स्तोत्रावाहनादिकं च कृत्वा मूलमन्त्रेणावाह्य संपूज्य पायसनिवेद्यान्तिमं च कृत्वा पुनैः निर्जलैः पुष्पैस्तदाहितचितिं तत्रस्थं चैतन्यं मूलपुटितपञ्चतत्त्वैर्मूलार्चायां

१. 'रात्मबि' ख., 'रन्तबि' घ. च. पाठः. २. 'तिमच्चतु पु' ख, पाठः. ३. 'वः धाङ्गतैः नि' ग. ङ. पाठः,

पीठेज्यादिसमुज्ज्वले समभिवाद्यात: क्रियाबिम्बके
मन्त्रन्यासपुरस्सरं विधिवदत्राभ्यर्च्य देवं स्वयम् ।
नीत्वा मूलतनौ तत: स सकलीकृत्योपहारैः परै-
रेनं मानसजैः समर्च्य परिजप्य प्रीणयेद् भक्तित: ॥
तत्तत्कर्मकृते प्रणीय मनुबिम्बात् कर्मबिम्बेऽमुना
कुर्यात् तुर्यदिनाभिषेकयजनाद्यं कर्म सर्वं सुधी: ।
स्थास्नुन्यत्र ततोऽपि देवमुपनीयान्यत्र बिम्बेऽमुना
स्नानादीनि समाचरेदिह समिज्या कर्मबिम्बे सदा ॥
शुद्धौ चाखिलकर्म कर्मकृतबिम्बे योजयित्वा पृथक्
तत्त्वापीत्युदयादि मूलमनुबिम्बे कर्मबिम्बेऽपि वा ।

संयोज्य प्राणन्यासपुरस्सरं सर्वं समुचितं कर्म तत्त्वन्यासं षडध्वन्यासादिकं मानसपूजनं च प्रकुर्वीत च 'लोकानुग्रहेत्यादि'स्तुत्यादिकं च कुर्यात् ॥११९॥

ततो नित्यपूजाविधिमाह — पीठेज्यादीति । पीठेज्यादिसमुज्ज्वले पीठपूजया मूर्तिकल्पनया च युते अतः मूलबिम्बात् क्रियाबिम्बके प्रोक्तक्रमात् समभिवाद्य मूलेन स्वहृदयादप्यावाह्य मन्त्रन्यासपुरस्सरं विधिवदत्र देवमभ्यर्च्य निवेद्य परिषद्बलिं तत्प्रार्थनं प्रसन्नपूजां च कृत्वा पुनः पूर्ववद् देवं स्वयं मूलतनौ नीत्वा ततः सकलीकृत्य मानसजैः परैरुत्कृष्टैरुपहारैः एनं समर्च्य परिजप्य भक्तितः प्रीणयेत् । पुनर्यथोक्तान् मन्त्रान् जपित्वा चिच्चेत्यसंमेलनादिकं च कृत्वा समापयेत् ॥ १२० ॥

पुनः तत्तत्कर्मकृते तत्तत्कर्मविधानार्थं मूलमनुबिम्बात् कर्मबिम्बे प्रणीय अमुना कर्मबिम्बेन तुर्यदिनाभिषेकयजनाद्यं चतुर्थदिवसस्नानपूजादिकं सर्वं कर्म कुर्यात् । सुधीरिति तत्तत्कर्मानन्तरं तत्तत्कर्मसंस्कारं मूलबिम्बे योजयितुं समर्थ इत्यर्थः । अत्र कर्मबिम्बे स्थास्नुनि निश्चले ततः तस्मादप्यन्यत्र स्नानबिम्बे देवमुपनीय अमुना स्नानादीनि समाचरेत् । अमुना स्नानबिम्बेन इह बहुबेरे समिज्या पूजा सदापि कर्मबिम्ब एव ॥ १२१ ॥

शुद्धौ प्राप्तायाम् अखिलकर्म क्षालनादीनि कर्माणि कर्मकृतबिम्बे कर्मार्थं कृते बिम्बे पृथक् पृथग् योजयित्वा पृथक् पृथक् संपूज्य पृथक् पृथग्

---

१. 'दिक्' ग. पाठः. २. 'म्बे', ३. 'म्बे अमुना दे' ङ. पाठः. ४. 'कृ कृत्वा पृ' ग. पाठः.

उद्धारे जनितत्त्वसर्पिरुपबिम्बस्थे समर्प्य स्वगे
हुत्वाभ्यर्च्य पुरोगते स्वपदगे विश्वं विलाप्याध्वगे ॥
सिक्त्वा मूलगतं प्रणीय कलशे सिक्त्वामुना कार्मिकं
तं जीवघटे सुयोज्य लघुगेहस्थाल्पबिम्बे नयेत् ।
कृत्वा सर्वमिहैकबेरविधिना सम्पाद्य सर्वं ततः
प्रत्यापत्तिमपे प्रसिद्धबहुबेरन्यायतः प्राचरेत् ॥ १२३ ॥

इति तन्त्रसमुच्चये भुताचा-
क्रमसिद्धयै रविजन्मसम्प्रणीते ।

योजयेत् । अत्र पञ्चकलशानात् पूर्वमुक्तं तत्त्वापित्युदयादि तत्त्वसंहारादि मूलबिम्बे कुर्यात्, कर्मबिम्बेऽपि कुर्याद्वा । उद्धारे जीर्णोद्धारनिमित्ततत्त्वहोमे जनितत्त्वसर्पिः सृष्टितत्त्वहोमसंपातमुपबिम्बस्थे देवे समर्प्य स्वगे मूलबिम्बयोजिते देवे हुत्वा संहारतत्त्वहोमं कृत्वा ततः पुरोगते कर्मबिम्बे योजयित्वाभ्यर्च्य पायसं निवेद्य होमं समाप्य ससम्पातं तत्त्वकलशमन्तर्नीत्वा स्वपदगे मूलबिम्बगते देवे विश्वं विलाप्यै ध्यानसंकोचं कृत्वा अध्वगे कर्मबिम्बगते देवे सिक्त्वा तत्त्वकलशेनाभिषिच्य मूलगतं मूलबिम्बयोजितं देवं यथोक्तप्रकारेण जीवकलशे प्रणीय अमुना जीवकलशेन कार्मिकं कर्मबिम्बगतं देवं सिक्त्वा तस्मादध्वगते जीवघटे सुयोज्य मण्डपमानीय तत्र शय्यायां शायितेनाल्पबिम्बेन सहाधिवास्योत्तरेद्युः लघुगेहस्थाल्पबिम्बे बालालयेऽल्पबिम्बं संस्थाप्य अत्र नयेत् योजयेत् । इहाल्पबिम्बस्थे देवे चतुर्थदिवसस्नानादिकं सर्वं कर्मैकबेरविधिना कृत्वा ततः सर्वं मूलबिम्बकर्म प्रासादादिकं संपाद्य सम्यक् कारयित्वा ततस्तस्मात् प्रत्यापत्तिं स्वप्रासादप्राप्तिमपि प्रसिद्धबहुबेरन्यायतः पूर्वोक्तबहुबेरानुष्ठानन्यायेन प्राचरेत् ॥ १२२, १२३ ॥

पटलमुपसंहरति — इतीति । इति उक्तप्रकारेण श्रुतार्चाक्रमसिद्धयै गुरुमुखाच्छ्रुतस्य पूजाक्रमस्य सिद्धयै स्थिरतायै रविजन्मसंप्रणीते रविपुत्रेण नारायणेन सम्यग् विरचिते तन्त्रसमुच्चये ग्रन्थे जीर्णसमुद्धृतिक्रियाध्यः जीर्णो-

---

१. 'म्र' इति मूलकोशपाठः. २. 'र्वं त', ३. 'प्याङ्गसं' ग. पाठः.

दशमः सुसमापितः सहैकः
पटलो जीर्णसमुद्धृतिक्रियाख्यः ॥ १२४ ॥

इति तन्त्रसमुच्चये
एकादशः पटलः ।

द्वारविधिभिः बहुबेराविधिना च परिपूर्णः सहैकः एकेन सहितो दशम एकादशः सुसमापितः सुष्ठु यथाक्रमं समापितः ॥ १२४ ॥

इति तन्त्रसमुच्चयविमर्शिन्याम्
एकादशः पटलः ।

अथ द्वादशः पटलः ।

अथाभिधा याम समुक्तकर्म-
प्रसक्ततत्साधनलक्षणादिकम् ।
अवश्यमत्रोपयिकं परामृश-
न्नीरिताः कर्मकलाश्च काश्चन ॥ १ ॥

साक्षे शङ्कुभिनाङ्गुलं समतले कृत्वा पृथक्कालज-
च्छायाग्रारचितत्रिबिन्दुपरिवृत्त्योत्पाद्य मत्स्यद्वयम् ।
तत्सौषुम्नसिरोत्थसूत्रयुगयोगाच्छङ्कुनाऽन्यन्तिमं
सूत्रं न्यस्य सुसाधयेद् यमधनेशाशे ततश्चेतरे ॥ २ ॥

एवमेकादशसंख्यैः पटलैः सप्रायश्चित्तानि सजीर्णोद्धाराणि प्रतिष्ठाकर्माण्यभिधाय द्वादशेन पटलेन सर्वपटलेष्वपि यत्किञ्चिदनुन्मीलितं कर्म विविच्याभिदधानः अत एवास्य पटलस्य कर्मशेषाख्या च भवतीति मन्यमानः तत्सङ्गतिं योजयन् पटलमारभते — अथेति । अथ कर्मणां कथनानन्तरं समुक्तकर्मसु सम्यगुक्तेष्वपि कर्मसु प्रसक्ततत्साधनलक्षणादिकं प्रकर्षेण सक्तानामनुबद्धानां तत्साधनानां लक्षणविनियोगादिकं परामृशन् अत्र साधनादौ यद्यदवश्यमौपयिकम् उपयोगि तत्तदहमभिधास्यामि वक्ष्यामि । अनीरिता अनुक्ताः काश्चन कर्मकलाश्चाभिधास्यामीति संबन्धः ॥ १ ॥

तत्र प्रथमं 'क्षमां क्षमीकृत्य दिशश्च सम्यग् ज्ञात्वे'त्यत्र प्रसक्तं दिग्विभागज्ञानविधानमाह — साक्ष इति । साक्षे दिग्विभागापरिज्ञाते प्रदेशे समतले समीकृततले इनाङ्गुलं द्वादशाङ्गुलं शङ्कुं शङ्काख्यं काष्ठविशेषं कृत्वा स्थापयित्वा पृथक्कालजच्छायाग्रारचितत्रिबिन्दुपरिवृत्त्या पृथक् पृथक् कालवशाज्जातेषु त्रिषु बिन्दुष्वितरेतरान्तरालमानेन परिवृत्त्या वृत्तीकारेण मत्स्यद्वयं रेखाद्वयसंपुटितं मत्स्याकारं संस्थानविशेषम् उत्पाद्य जनयित्वा, तत्सौषुम्नसिरोत्थसूत्रयुगयोगात् तयोर्मत्स्ययोः सौषुम्नसिरे मध्यनाड्यौ ताभ्यामुत्थिताभ्यां सूत्राभ्यां युगं युग्मं यत् तस्य योगो दक्षिणे उत्तरे वा भवेत् । तस्माद् योगात् शङ्कुनाऽन्यन्तिमं शङ्कोर्मध्यनाडीपर्यन्तं सूत्रं न्यस्य प्रक्षिप्य तेन सूत्रेण यमधनेशाशे दक्षिणां दिशमुत्तरां दिशं च सुसाधयेत् सुतरां स्थिरीकुर्यात् ।

ततश्च तस्मादेव सूत्रात् इतरे च वक्ष्यमाणरीत्या पूर्वपश्चिमांशे च सुसाधयेत् । अयं भावः — दिग्विभागं ज्ञातुं समीहिते भूप्रदेशे आदित्यातपे च प्रसरति सति समीकृते स्थले समान्तरालं वृत्तत्रयं कृत्वा तन्मध्ये स्वलक्षणयुतं शङ्कुं समं निधाय यदा यदा तस्य छायाग्रं पृथक् पृथग् वृत्तं स्पृशति, तदा तदा तत्र तत्र वृत्ते शङ्कुं कुर्यात् । तद्विन्दुत्रयं मिथोऽन्तरालमानेन वृत्तत्रयं कुर्यात् । तदा मध्यमवृत्ते द्वौ मत्स्यौ भवतः । तन्मत्स्ययोर्मध्यगते द्वे सूत्रे प्रसार्य दीर्घीकुर्वाणे यस्मिन् प्रदेशे तयोः संयोगो भवति, तत्राङ्कं कृत्वा तस्मादङ्कात् शङ्कुमध्यसूत्रान्तं सूत्रं प्रसारयेत् । तथा सति दक्षिणोत्तरदिग्विभागो भवतीति । तथाच गुरुदेव आह । तत्रायं शङ्कुलक्षणश्लोकः —

"भ्रमविरचितवृत्तस्तुल्यमूलाग्रभागो
द्विरददशनजन्मा सारदारुद्भवो वा ।
सममृजुरवलम्बादव्रणः षट्कवृत्तः
समतल इह शस्तः शङ्कुरर्कांशुलोच्चः ॥"

इति ।

"निरक्षदेशे लङ्कादौ स्यादयं दिग्विनिर्णयः ।
इत्याहुः केचिदित्यस्मात् साक्षदेशस्य कथ्यते ॥
विशेषः साक्षदेशानामस्त्येवार्कापसर्पणात् ।"

इति च ।

"छायात्रयाग्रोद्भववृत्तमत्स्यस्पृक्सूत्रयोर्यत्र युतिः प्रदेशे ।
याम्योत्तरा शङ्कुदिशा ककुप् स्यात् क्रमेण सौम्योत्तरगोलयोः स्यात् ॥"

इति शङ्कुस्थापनश्लोकः । तस्यायमभिप्रायः — जलसमीकृते स्थले प्रोक्तप्रमाणं शङ्कुं विन्यस्य पूर्वाह्णे वापराह्णे वा छायाग्रेष्वभिनिविष्टेषु त्रयो बिन्दवः कार्याः । तंत एकं बिन्दुं मध्ये कृत्वा इष्टप्रमाणेन वृत्तमालिखेत् । तावतैव द्वितीयं बिन्दुमवलम्ब्य द्वितीयं वृत्तं, तद्वत् तृतीयं बिन्दुं मध्ये कृत्वा तृतीयं वृत्तं चालिखेत् । ततस्तावत्प्रमाणमेव वृत्तं तथाच लिखेत्, यथाच मध्यबिन्दुवृत्तं पार्श्वद्वयस्य खण्डमुत्पादयति । तथा कृते मत्स्यद्वयमुत्पद्यते । तयोश्च यस्यां दिशि महदन्तरं, ते मुखे भवतः । तयोश्च यस्यां दिशि सन्निकर्षः,

स्तम्भोच्चस्य षडंशविस्तृततदष्टांशाधिकोच्चो घटः
पद्मोऽष्टांशसमुच्छ्रयोच्छ्रयनवांशोनप्रथोऽष्टच्छदः ।
अष्टांशायततद्द्विपांशरहितव्यासायतार्धोच्छ्रयः
कूर्मो नागयवाग्रतद्द्विगुणमूला योगनालप्रथा ॥ ३ ॥

ते पुच्छे भवतः । मुखयोः सूक्ष्मकीलकौ विन्यस्य तयोः सूत्रे बद्ध्वा पुच्छमध्यगे निस्सार्य स्वगत्यैकैकं नयेत् । तयोः सूत्रयोः मुखपुच्छगत्यनुसारेण यत्र सन्निपातः, सा दिक् स्थिरा भवति । एवं शङ्कुमूलयुति बिन्दुगामि सूत्रं प्रसार्य रेखां कुर्यात् । सा दक्षिणोत्तरा भवति । तत एकैकं बिन्दुं मध्ये कृत्वा वृत्तत्रयेण मत्स्यमुत्पादयेत् । तस्य मुखपुच्छावगाहि सूत्रं पूर्वपरा दिग् भवति । एवं साक्षदेशे दिक्साधनत्वमुक्तमिति ॥ २ ॥

निधिकलशादीनां प्रमाणमाह — **स्तम्भोच्चस्येति** । स्तम्भोच्चस्य प्रासादस्तम्भायामस्य षडंशविस्तृततदष्टांशाधिकोच्चः स्तम्भायामस्य षडंशेन विस्तारयुक्तः विस्तारादष्टांशाधिकायामयुक्तश्च घटो निधिकलशः स्यात् । तदूर्ध्वगतः पद्मः शिलापद्मः, स तु अष्टांशसमुच्छ्रयोच्छ्रयनवांशोनप्रथः स्तम्भोच्चस्याष्टांशेनोन्नतियुक्तः उन्नतेर्नवांशहीनप्रथया विस्तारेण च युक्तः, अष्टच्छदः अष्टभिः पत्रैश्च युक्तः स्यात् । तदूर्ध्वस्थः कूर्मः शिलाकूर्मः अष्टांशायततद्द्विपांशरहितव्यासायतार्धोच्छ्रयः स्तम्भोच्चस्य अष्टांशेन दैर्घ्ययुक्तः, तस्यायतस्य अष्टांशेन रहितविस्तारः, आयतस्य अर्धांशेनोन्नतियुक्तश्च स्यात् । योगनालप्रथा कूर्मोर्ध्वभागस्थितस्य योगनालस्य प्रथा विस्तारः नागयवाग्रतद्द्विगुणमूला अष्टयवाग्रा एकाङ्गुलपरिमिताग्रविस्तारा तद्द्विगुणमूला तस्याग्रस्य द्विगुणेन द्व्यङ्गुलमानेन विस्तृतमूला च स्यात् । तथा चाहुः —

"स्तम्भायामषडंशे स्यादेकांशो घटविस्तरः ।
विस्ताराष्टमभागे स्यान्नवांशं चोच्छ्रयं भवेत् ॥
मूलविस्तारमष्टांशो वेदांशः कण्ठविस्तरः ।
वक्रान्तरेण भूतांशं कलशस्याकृतिर्भवेत् ॥"

इति ।

"स्तम्भोच्चे वसुभागे स्यादेकांशं पाद्ममुच्छ्रयम् ।
पद्मोत्सेधे नवांशे स्यादष्टभागं तु विस्तरम् ॥

अष्टाशाभिर्हिरन्ध्रैर्यायततदर्धव्यासपादोच्छ्रिताः ।
यद्वाकाहियुगैर्मितातितिवितत्युत्सेधवत्योऽङ्गुलैः ।
मार्त्तिक्यः पुटपाकलोहितरुचः शैल्योऽथवाष्टेष्टकाः
चत्स्रोश्र रूनिताश्र रुपेता वा गृहौचित्यतः ॥ ४ ॥

उत्सेधं विभजितं कृत्वा षड्भागं तु विधीयते ।
एकांशं पद्मपट्टं स्यादधः पद्मांशकत्रयम् ॥
ऊर्ध्वं पद्मद्वियंशं तु अष्टपत्रादिशोभितम् ।"

इति ।

"योगनालोऽङ्गुलव्यासो व्यङ्गुलं मूलविस्तरम् ।"

इति ॥ ३ ॥

इष्टकानां प्रमाणमाह — अष्टेति । अष्टाशाभिर्हिरैः अष्टभिर्वा दशभिर्वा द्वादशभिर्वाङ्गुलैः त्रिधा त्रिप्रकारेण आयततदर्धव्यासपादोच्छ्रिताः आयताः तदर्धव्यासाः तत्पादोच्छ्रयाश्च, यद्वा अथवा अर्काहियुगैः द्वादशाष्टचतुर्भिरङ्गुलैः क्रमेण मिताततिवितत्युत्सेधवत्यः एतैर्मानैः परिमितेनायामेन विस्तारेणोच्छ्रयेण च युक्ताः, मार्त्तिक्यः मृत्तिकाभिर्निर्मिताः, पुटपाकलोहितरुचः पुटस्यान्तर्भागस्य पाकवशाल्लोहितवर्णाः, अथवा शैल्यः शिलानिर्मिताः अष्टेष्टकाः कर्तव्याः । गृहौचित्यतः प्रासादवशात् चतुरूनिताः चतस्रो वा चतुरुपेताः द्वादश वा । तथाच गुरुदेवः —

"अङ्गुलैः संख्यया दीर्घा जगतीपङ्क्त्यनुष्टुभाम् ।
क्रमात् तदर्धविस्तारा विस्तारार्धसमुच्छ्रयाः ॥
उत्तमादिविमानानां निर्दिष्टाः प्रथमेष्टकाः ।"

इति । पाशुपते च —

"आयामतस्तालमात्रास्तारतोऽष्टाङ्गुलाः क्रमात् ।
अष्टौ सङ्कल्पयेदेवमुत्सेधाश्चतुरङ्गुलाः ॥"

इति ।

"चतस्रोऽष्टौ द्वादश वा प्रादक्षिण्येन विन्यसेत् ।"

इति च ॥ ४ ॥

---

१. 'क', २. 'ः' ङ. पाठः ।

स्तम्भायामद्वा शांशोपपन्न-
व्यासं व्यासार्धोच्छ्रयं गर्भपात्रं ।
तुर्यश्रं तद्धृशुल्बप्रक्लृप्तं
स्वोत्सेधाङ्घ्र्यूनोच्छ्रयोर्ध्वच्छदाढ्यम् ॥ ५ ॥

नागैर्भित्तितिं विभज्य चतुरो बाह्ये विहायान्तका-
नन्तस्थानखिलेषु गोभिरजिते षड् द्वौ च षाण्मातुरे ।
त्रीनपि चैककं वितनुयाद् गर्भं परांशे स्थितं
विप्रस्योपरि पादुकस्य भुवि राज्ञोऽधः क्रमादन्ययोः ॥ ६ ॥

गर्भपात्रप्रमाणमाह — स्तम्भायामेति । स्तम्भायामद्वादशांशोपपन्न-व्यासं स्तम्भायामस्य द्वादशांशेन युक्तविस्तारं, व्यासार्धोच्छ्रयं विस्तारादर्धमात्रोच्छ्रयं च, स्वोत्सेधाङ्घ्र्यूनोच्छ्रयोर्ध्वच्छदाढ्यं स्वस्योच्चस्य पादहीनोच्चेनोर्ध्वच्छदेन च युक्तं, शुद्धशुल्बप्रक्लृप्तं निर्मलेन ताम्रेण निर्मितं, तुर्यश्रं चतुरश्रं तत् इष्टकागर्तमध्ये स्थाप्यं गर्भपात्रं स्यात् । क्रियासारे वैष्णवे—

"चतुरश्रं तदर्धोच्चं शोधयेत् तद् यथाविधि ।
सुगुप्तं तद् यथा भित्तौ भित्तिमानेन वा भवेत् ॥
भित्तिस्तम्भचतुर्भागत्रिभागैकं तु तद् विदुः ।"

इति ॥ ५ ॥

गर्भन्यासस्थानमाह — नागैरिति । नागैः अष्टाभिः भित्तितिम् आरूढभित्तेर्विस्तारं विभज्य बाह्ये चतुरः अन्तस्थानप्यंशकान् विहाय त्यक्त्वा परांशे इतरांशे बाह्यादारभ्य पञ्चमांशे अन्तरारभ्य चतुर्थांशे च स्थितं गर्भं वितनुयात् । एवम् अखिलेषु देवेषु । अजिते गोभिः नवभिर्भित्तितिं विभज्य बाह्ये षड् अन्तः द्वौ च विहाय, षाण्मातुरे भूतैः पञ्चभिर्विभज्य बाह्ये त्रीन् अन्तरेकं च विहाय परांशे स्थितं गर्भं वितनुयात् । तत् तु गर्भं विप्रस्य विप्रो यजमानश्चेत् तस्य पादुकस्योपरिभागे, राज्ञः क्षत्रियस्य भुवि भूसामान्यस्थले, अन्ययोः वैश्यशूद्रयोः क्रमादधोधश्च स्थितं गर्भं वितनुयात् । पाशुपते —

कृत्वा गर्भगृहं कुलाद्रिकृतिकोष्ठाढ्यं समन्तात् पदे
ब्राह्मे पञ्चदशांशकान् विरचयेत् सौम्याग्रसूत्रैः समम् ।
तत्पृष्ठस्थितदैवमानुषपिशाचावारकेषु क्रमाद्
विश्वोमेशनवांशकानपि ततः स्वं स्वं पदं कल्पयेत् ॥ ७ ॥

"आरूढभित्तिविस्तारमष्टधा विभजेत् पुनः ।
बाह्येऽत्र चतुरो भागानन्तर्भागत्रयं त्यजेत् ॥
तन्मध्ये स्थापयेद् गर्भं गर्तं प्रासादमानतः ।"

इति । मञ्जर्यां च —

"तद्भित्तिविस्तारमथाष्टभागं कृत्वाथ बाह्ये चतुरोऽत्र भागान् ।
त्रिभागमभ्यन्तरतो विहाय तत्रान्तरे गर्भमथो न्यसेच्च ॥"

इति । विष्णुसंहितायां —

"द्वारस्य दक्षिणे भागे तृतीयांशे द्विशेषिते ।
गोमूत्रेणाप्लुते न्यस्येद् द्वारमूलस्य पार्श्वतः ॥"

इति । स्कन्दसंहितायां —

"भित्तिं तु पञ्चधा भङ्क्त्वा त्रीणि बाह्ये परित्यजेत् ।
अन्तरेकं तु तन्मध्ये"

इति ।

"पादुकोपरि विप्राणां नृपतेस्तत् समं भवेत् ।
अधस्ताद् वैश्यशूद्राणाम् "

इति च ॥ ६ ॥

एवं प्रथमपटले प्रस्तुतान् कर्मशेषानभिधाय द्वितीयपटले प्रस्तुतान् वदन् प्रतिष्ठास्थाननियममाह — **कृत्वा** गर्भगृहमिति । गर्भगृहं समन्तात् सप्तसप्तविभागेन कुलाद्रिकृतिकोष्ठाढ्यम् एकोनपञ्चाशत्कोष्ठयुतं कृत्वा **ब्राह्मे** मध्यमे पदे सौम्याग्रसूत्रैः दक्षिणोत्तरायतैः सूत्रैः समं पञ्चदशांशकान् विरचयेत् । तत्पृष्ठास्थितदैवमानुषपिशाचावारकेषु तस्य ब्रह्मपदस्य पृष्ठ एव स्थितेषु त्रिषु दैविकमानुषपैशाचाख्येषु आवरणपदेषु क्रमात् विश्वोमेशनवांशकान् त्रयोदशैकाद(शेःश)नवभागानपि सौम्याग्रसूत्रैः समं कृत्वा ततः स्वं स्वं पदं स्थानं कल्पयेत् ॥ ७ ॥

ब्राह्मेंऽशेऽन्तरनन्तरे महति चाल्पे चेशलिङ्गे हरौ
तार्तीये द्रुहिणांशमध्यपदतस्तुर्ये गुहेशाच्युते ।
षष्ठे सुम्भजिति प्रतिष्ठितिपदं शार्ङ्गीश्वरे वाष्टमे
प्रोक्तं शास्तरि षोडशे गणपतौ विंशे तथैकोत्तरे ॥ ८ ॥

कृत्वोदङ्मुखमत्र सूत्रमथ मध्याद् द्वारविस्तारत-
स्तूत्कृत्याढ्यशतांशकं प्रतिगमय्योदीचि चैन्द्राग्रगम् ।
सर्वेष्वीशहरीशयोः पुनरिदं वार्चीशतो वाखिले
दिश्यैश्यां गमयेद् यवं यवयुगं वार्चोद्भवं सन्धितः ॥ ९ ॥

तत्र महति पञ्चकरादिदीर्घे ईशलिङ्गे स्थाप्ये सति ब्राह्मे अंशे अन्तः ब्रह्मांशस्य मध्यभाग एव प्रतिष्ठितिपदं प्रतिष्ठायाः स्थानं प्रोक्तं स्यात् । अल्पे एककरादिके ईशलिङ्गे तस्यानन्तरे अनन्तरपृष्ठपदमध्ये प्रोक्तम् । हरौ द्रुहिणांशमध्यपदतः ब्रह्मांशस्य मध्यपदमारभ्य गणने तार्तीये । गुहेशाच्युते स्कन्दे शङ्करनारायणे च तुर्ये चतुर्थे । सुम्भजिति षष्ठे पदे । शार्ङ्गीश्वरे अष्टमे वा । पूर्वं चतुर्थे प्रोक्तत्वाद् विकल्प । शास्तरि द्रुहिणांशमध्यपदतः षोडशे दैविकाद्यपदादष्टमे । तथा गणपतौ द्रुहिणांशमध्यपदत एकोत्तरे विंशे दैविकान्त्यपदे प्रतिष्ठितिपदं प्रोक्तम् ॥ ८ ॥

एवं पृष्ठतो नीत्वात्र सीम्नि उदङ्मुखं दक्षिणोत्तराग्रं सूत्रं कृत्वा तदनन्तरं सर्वेषु देवेषु मध्यात् एतत्सूत्रस्य मध्यात् द्वारविस्तारतः द्वारस्य विस्तारात् उत्कृत्याढ्यशतांशकम् उत्कृतिः षड्विंशतिः तदधिकशतांशं कृत्वा तदेकांशप्रमाणेनोदीचि च प्रतिगमय्य ऐन्द्राग्रगं प्राक्प्रत्यगग्रं सूत्रं च कृत्वा इदम् उक्तमेतदुदग्गमनमीशहरीशयोः पुनरर्चीशतो वा कृत्वा अखिले सर्वदेवेषु सन्धितः तयोः सूत्रयोः सन्धेरर्चोद्भवं यवं यवयुगं वा प्रतिमाङ्गुलादष्टांशं चतुर्थांशं वा ऐश्यां दिशि च गमयेत् । अत्र विष्णुसंहितायां —

"सप्तसप्तविभागेन गर्भागारे विभाजिते ।
ब्रह्मदेवमनुष्याणां पिशाचानां पदानि च ॥
मध्यादारभ्य यत्नेन क्रमाज्ज्ञेयानि सर्वतः ।
ब्राह्मं पञ्चदशांशं स्याद् दैवे भागास्त्रयोदश ॥

एकादशनवांशाभ्यां शिष्टयोः प्रविभागतः ।
मर्मणं त्रिविधं प्रोक्तं पृष्ठसौम्येशभेदतः ॥

कल्पनीयं यथान्यायं द्रव्यसंस्थानयोगतः ।
स्थितासीनशयानानां स्थानानि परिकल्पयेत् ॥

ब्रह्मांशे मध्यमं त्यक्त्वा द्वितीयं चापि पृष्ठतः ।
स्थितैकवीरबिम्बस्य तृतीयं स्थानमिष्यते ॥

त्रिभक्ते द्वारविस्तारे त्रिसप्तांशेषु मध्यमे ।
मध्यार्धेनोत्तरं सूत्रं गमनार्थं तु कल्पयेत् ॥

पश्चिमोत्तरसंयोगे कर्णसूत्रं प्रकल्प्य तु ।
बिम्बाङ्गुलीयवेनैशे गमयेद् द्वियवेन वा ॥"

इति । तथा मञ्जर्यां च —

"पञ्चाशत्पदमेकहीनमभितः कृत्वा च गर्भालये
ब्राह्मं दैविकमानुषौ च परितः पैशाचमन्त्यावृतिः ।
ब्राह्मं पञ्चदशांशकं बहिरतो द्वे द्वे विहीनं क्रमा-
देवं पश्चिमदिक्स्थितं च गमनं वक्ष्ये च सौम्याश्रितम् ॥

एकविंशतिविभागविभक्तं द्वारमत्र विनिधाय च मध्यम् ।
अग्निभक्तमभिकल्प्य च तेषां सोमसंस्थितपदद्वयमध्ये ॥

एकोनपञ्चदशकानि पदानि लिङ्ग-
विष्कम्भमाननिहितानि विधाय सम्यक् ।
तन्मध्यसंस्थमथ पञ्चकृतिप्रभिन्नं-
भागान्[1] प्रकल्प्य चतुरो य(माङ्गां[2]मगां)स्त्यजेद् वा ॥

लिङ्गस्य पञ्चकृतिभिः परिणह्[3]तोऽर्ध-
भागैर्विभज्य यमदिक्स्थगतं त्यजेद् वा ।
एकोनपञ्चदशभिः प्रविभज्य युक्तै-
र्भागैश्च पीठमथ मध्यगतं त्यजेद् वा ॥

---

१. 'मं', २. 'ङ्गं' ब. ङ. च. पाठः. ३. 'र्ध' क. पाठः.

ब्राह्मे कौतुकमामरे न्यसतु मूलार्चां स्थितामासितां
ईषन्मानुषसंयुते समनृदेवांशे शयानामपि ।
गर्भे षोडशवर्गभेदिनि पदैर्ब्राह्मं चतुर्वर्गकै-
स्त्रिघ्येकोन्मितपङ्क्तिभिः सुरनृपैशाचान् प्रकुर्वीत वा ॥

एवञ्च नीत्वा गमनं च सूत्रसङ्गात् ततोऽत्रापि यवद्वयं च ।
नीत्वा प्रतिष्ठां विदधीत चैशे भागे प्रवक्ष्याम्यथ पश्चिमेऽपि ॥
मध्ये महालिङ्गमथाल्पलिङ्गं नारायणः शङ्करकेशवौ च ।
तत्रैव षड्वक्त्रनिवासभूमिः स्याद् वासुदेवो भगिनी च पश्चात् ॥
सुखासनं सप्तपदे विदध्यादतोऽष्टमे वा हरवासुदेवौ ।
ततः परस्मिन् मणिलिङ्गधाम व्यासस्तथैकादशरुद्रभूमिः ॥
सूर्यस्तथाग्निर्भिषजौ वसूनां गणश्च शास्ता प्रहराणि भूयः ।
अष्टादशे मातृनिवासभूमिस्ततः परस्मादथवायुधानि ॥
स्याद् वाहनं सूकरवामनौ च लक्ष्मीश्च तत्रैव वसुन्धरा च ।
अनन्तमूर्तिप्रहराणि पञ्च पश्चादनन्तासनवाहनानि ॥
विघ्नेश्वराश्चाथ गणेश्वराश्च मार्ताण्डचन्द्रौ मुनयः प्रदिष्टाः ।
पैशाचभागे तु ततोऽनवेक्ष्य प्रायः प्रतिष्ठात्र यतो न शस्ता ॥"

इति । क्रियासारे शङ्करनारायणे उत्तरगमनविधौ —

"बिम्बमध्यमवृत्तस्य चतुर्विंशतिभागतः ।
नीत्वोत्तरे यवं तस्मादीशे नीत्वा यथाविधि ॥"

इति ॥ ९ ॥

बहुबेरे स्थाननियममाह — ब्राह्म इति । ब्राह्मेऽशे कौतुकं कर्मार्चां न्यसतु । आमरे दैविकमध्ये स्थितां तिष्ठन्तीं मूलार्चां च, ईषन्मानुषसंयुते किञ्चिन्मानुषांशयुक्ते दैविके आसितामुपविष्टां च, समनृदेवांशे दैविकं मानुषं च सममाश्रिते स्थाने शयानामपि मूलार्चां न्यसतु । ब्राह्मादिपदकल्पनायां विकल्पमाह — गर्भ इति । गर्भे गर्भगृहे षोडशवर्गभेदिनि आयामविस्ताराभ्यां षोडशपुटे सति मध्ये चतुर्वर्गैः षोडशभिः पदैः ब्राह्मं स्थानं प्रकुर्वीत । त्रिघ्येकोन्मितपङ्क्तिभिः ब्रह्मस्थानाद् बहिः पुटत्रयेण पुटद्वयेन पुटैकेन च

---

१. 'णा' घ. च. पाठः.

ब्राह्मे षोडशमंशकं स्वपुरतो मध्याद् दलाढ्यैककं
वामे चाप्यपहाय वह्निभुवि बिम्बं स्थापयेत् स्थास्नुकम् ।
एवं मानुषमध्यतोऽथ गमयित्वा पृष्ठतो वामत-
श्चांशे स्थापयतु स्वमूलमनुबिम्बं बाहुबेरे विधौ ॥ ११ ॥

क्रमात् सुरनृपैशाचान् दैविकमानुषपैशाचानावरणभागान् प्रकुर्वीत वा तथा विष्णुसंहितायां —

"किञ्चिन्मानुषमाश्रित्य कुर्यादासनकर्म च ।
दैवमानुषभागाभ्यां कुर्याच्च शयनं बुधः ॥
अर्चनापीठिका ब्राह्मे स्थापना दैविके यदा ।
मानुषेऽस्य परीवाराः पैशाचे त्वायुधानि च ॥"

इति । तत्र किञ्चिन्मानुषमाश्रित्येत्येतस्यायमर्थः —नालं चतुर्धा विभज्यांशत्रये दैविके एकं मानुष इति । तत्र बहुवीरदैविके स्थापना स्थिता प्रतिमा विहिता इति च ॥ १० ॥

षोडशमंशकमित्यस्यायमभिप्रायः — षोडशांशीकृतस्य ब्रह्मभागस्य मध्यसूत्रात् पृष्ठगतं पदं त्र्यंशीकृत्य तमेकमंशं वा अर्धसहितं द्व्यंशं वा पृष्ठतो गमयेत् । तन्मानं तदर्धं वा वामतश्च नयेदिति । वह्निभुवि बाहुबेरे विधौ ब्राह्मे उक्तैकोनपञ्चाशत्कोष्ठैः कल्पितमध्ये पदे षोडशमंशकं ब्रह्मभागस्य षोडशांशं मध्यात् स्वपुरतः अपहायातिक्रम्य दलाढ्यैककम् अर्धाधिकैकभागं वामे भागे चाप्यपहाय स्थास्नुकं निश्चलं यागबिम्बं वा स्थापयेत् । अथ मानुषमध्यतश्च एवमुक्तप्रकारेण पृष्ठतो वामतश्च गमयित्वा परस्मिन् अंशे स्वमूलमनुबिम्बं स्थापयतु । तथाच स्कन्दसद्भावे—

"पदान्येकोनपञ्चाशत् कल्पयित्वा विचक्षण! ।
पदमेकं भवेद् ब्राह्मम् "

इत्यादि । पुनः—

"ब्राह्मं षोडशधा कृत्वा भागं सूत्रेण साधकः ।
तत्रांशं वा तदर्धं वा मध्यात् प्रागुत्तरक्रमात् ॥
प्राङ्मुखे तु भवेदेवं पश्चिमे दक्षिणात् परम् ।
तन्मध्ये स्थापयेद् बिम्बं तैजसं शैलजं तु वा ॥

---

१. 'च्य' ङ. पाठः.

च । बेरविधानमूलबिम्बं सुसमं द्वारसमुच्छ्रयेण कार्यम् । चरणांशविवृद्धमर्धवृद्धं चरणोनद्विगुणं द्विसंगुणं च ॥ १२ ॥

मणिजं रत्नजं वापि इतरन्न कदाचन ।
मृन्मयं दारुजं चापि मानुषेऽप्येवमेव तु ॥
एकवीरासनं ब्राह्मे पश्चिमार्धे तु कल्पयेत् ।
एतदेवार्चनापीठं बहुबेरासने भवेत् ॥
बहुवीरासनं तद्वन्मानुषार्धे तु पश्चिमे ।"

इति । स्कन्दसंहितायां च —

"ब्राह्मं षोडशधा भङ्क्त्वा भागमेकं पुनस्त्रिधा ।
तद्भागगमनं प्राच्यां तदर्धं तत् तथोत्तरे ॥
प्राङ्मुखे तु भवेदेवं पश्चिमे दक्षिणात् परम् ।"

इत्यादि । नन्दिप्रोक्ते स्कान्दे च —

"ब्राह्मं षोडशधा भङ्क्त्वा नवमं विभजेत् त्रिधा
स्थितैकवीरबिम्बस्य तृतीयं स्थानमिष्यते ॥
तन्मानेन तदर्धेन सौम्ये चैशे यमेऽसुरे ।"

इति ॥ ११ ॥

तत्रैव वह्निभुवि बहुबेरप्रतिमाप्रमाणमाह — **बहुबेरेति** । बहुबेरविधानमूलबिम्बं द्वारसमुच्छ्रयेण द्वारोन्नत्या सुसमं कार्यम् । चरणांशविवृद्धं तच्चतुर्थांशयुक्तं द्वारोत्सेधं च, अर्धवृद्धम् अर्धेन सहितं द्वारोत्सेधं च, चरणोनद्विगुणं त्रिभागेन सहितं द्वारोत्सेधं, द्विसंगुणं द्विकृद्धं द्वारोत्सेधं च । तथा स्कन्दसंहितायाम् —

"एकवीरे भवेदेवं बहुवीरे त्वथोच्यते ।
अध्यर्धं पादहीनं वा द्विगुणं चोत्तमत्रयम् ॥
पादाधिकं पादमानं मध्यमं कन्यसं क्रमात् ।
दारुमृन्मयजान् नित्यं द्वारमानेन मानयेत् ॥"

इति ॥ १२ ॥

---

१. 'स्क' ख. ङ. पाठः. 'परिमा' ख. पाठः.

पात्राणि वापविहितानि पृथग् द्विषद् वा
स्युः पालिकाश्च घटिकाश्च शरावकाश्च ।
तत्त्वाष्टिभानुभिरिह प्रमिताङ्गुलैस्त-
दुत्सेधकल्पसिरथवाष्टिचतुर्दशार्कैः ॥ १३ ॥

तत्त्वांशकोनमुदितोच्छ्रयमत्र कृत्वा
षोढा द्वयेन वदने क्रमशः परांशैः ।
तत्पीठदण्डगलसन्धिगलेषु कुर्याद्
दैर्घ्यं पुरोविरहितेन च पीठसन्धौ ॥ १४ ॥

अङ्घ्र्यूनमंशमधिपीठमिहाधिदण्डं
चैके समुच्छ्रयमुशन्त्यपरेऽर्धवृद्धम् ।

तृतीयपटले प्रस्तुतान् कर्मशेषानाह — पात्राणीति । वापविहितानि बीजवापार्थं विहितानि पात्राणि पृथक् प्रत्येकं द्विषट् द्वादश वा स्युः । 'तेषु विनिदध्यात् पालिकाः षोडशे'त्युक्तेन ग्रन्थेनायं विकल्पः । तानि क्रमेणाह — पालिकाश्च घटिकाश्च शरावकाश्चेति । संज्ञासंस्थानभेदाभ्यां योगात् त्रिविधानि तानीत्यर्थः । तत्त्वाष्टिभानुभिः चतुर्विंशतिषोडशद्वादशभिरङ्गुलैस्तदुत्सेधकल्पसिः तेषां पात्राणामुत्सेधस्थितिः । अथवा अष्टिचतुर्दशार्कैः क्रमेण षोडशचतुर्दशद्वादशभिर्वा तदुत्सेधकल्पसिः स्यात् ॥ १३ ॥

अथ श्लोकत्रयेण पालिकालक्षणमाह — तत्त्वांशकोनमिति । अत्र एषु पात्रेषु मध्ये । मङ्गलपालिकाया इति जातावेकवचनम् । मङ्गलभूतानां पालिकानाम् उदितोच्छ्रयम् उक्तमुत्सेधं तत्त्वांशकोनं चतुर्विंशांशोनं कृत्वा शेषं षोढा कृत्वा द्वयेन व्यंशेन वदने दैर्घ्यं कुर्यात् । परांशैः परैश्चतुर्भिरंशैः क्रमशः तत्पीठदण्डगलसन्धिगलेषु तासां पालिकानां पीठे दण्डे गलसन्धौ गले च दैर्घ्यं कुर्यात्, पुरोविरहितेन पूर्वं त्यक्तेन चतुर्विंशांशेन पीठसन्धौ च ॥ १४ ॥

एके बुधाः इह उक्ते दैर्घ्ये अधिपीठं पीठे अधिदण्डं दण्डे चोक्तखंडांशाद् अङ्घ्र्यूनमंशं समुच्छ्रयं दैर्घ्यं कार्यमुशन्ति इच्छन्ति । अपरे बुधाः पीठं अर्धवृद्धम् अर्धेनाधिकम्, अपरत्र दण्डे अङ्घ्रिहीनम् उक्तांशाद् अङ्घ्रिहीनं

पीठेऽपि हीनमपरत्र च शिष्टयुक्त्या
सन्धिं गलांशगतमास्यबिलं च कार्यम् ॥ १५ ॥
दण्डे स्वदैर्घ्यसुसमं द्विगुणं स्वदैर्घ्याद्
व्यासं परेषु वियुगांशमधः शिरोधेः ।
तत्पीठिकावततिखण्डमितं च पीठ-
सन्धौ प्रकल्पयतु मण्डलपालिकायाः ॥ १६ ॥
ऊर्ध्वार्धकल्पसृथुबुध्नघटोत्तराङ्गे
दिक्षूर्ध्वतश्च घटिका घटितेषुवक्त्रैः ।
वर्णाङ्गुलप्रततिभिः सगलैरधोर्धे
तत्पालिकावदुदिताङ्घ्रिससन्धिदण्डा ॥ १७ ॥
अङ्घ्र्यङ्गुलात् समधिके सति पालिकायाः
पीठोच्छ्रये तु घटिकाघटिताङ्घ्रिदण्डा ।

च समुच्छ्रयमुशन्ति । शिष्टयुक्त्या शिष्टयोगेन सन्धिं पीठसन्धिं गलसन्धिं चेच्छन्ति । गलांशगतं गलांशेऽप्यधिगतम् आस्यबिलं मुखविवरं च कार्यम् । गलांशपर्यन्तमास्यबिलं च कार्यमिति वार्थः ॥ १५ ॥

दण्डे स्वदैर्घ्यसुसमं स्वदैर्घ्येण तुल्यं व्यासं प्रकल्पयतु । परेष्ववयवेषु स्वदैर्घ्यात् स्वस्वदैर्घ्याद् द्विगुणं, शिरोधेः (अधः) गलस्याधोभागे वियुगांशं गलाद् विगतचतुर्थांशं, पीठसन्धौ तत्पीठिकावततिखण्डमितं तस्याः पीठिकायाः विस्तृतेरर्धमितं च प्रकल्पयतु ॥ १६ ॥

घटिकालक्षणमाह—ऊर्ध्वार्धेति । ऊर्ध्वार्धकल्पसृथुबुध्नघटोत्तराङ्गे ऊर्ध्वार्धेन कल्पसो महदन्तर्भागयुतो घटो यथा भवति तथाभूतोर्ध्वप्रदेशे चतुर्षु दिक्षूर्ध्वतश्च वर्णाङ्गुलप्रततिभिः चतुरङ्गुलविस्तारैः सगलैः गलसहितैः इषुवक्त्रैः पञ्चभिर्मुखैः घटिता बद्धा घटिका स्यात् । अधोर्धे तत्पालिकावदङ्घ्रिससन्धिदण्डा अङ्घ्रिः पीठं पीठसन्धिसहितो दण्डश्च पालिकावदुदितेत्यर्थः ॥१७॥

पालिकायाः पीठोच्छ्रये अङ्घ्र्यङ्गुलात् चतुरङ्गुलात् समधिके सति तत्र तु घटिकाघटिताङ्घ्रिदण्डौ घटिकायां योजितौ पीठदण्डौ त्र्यङ्गुलोच्छ्र-

---

१. 'त्रै' क. पाठः । २. 'द् उक्तपालिकावदङ्घ्रि' घ. च. पाठः ।

त्रिव्यङ्गुलोच्छ्रयनिजोच्चसमप्रतानौ
स्यातामिनाङ्गुलमितः सकलोच्छ्रयो वा ॥ १८ ॥
व्यासेन दैर्घ्यसुसमं दहनांशहीनं
वास्ये ततो हुतवहांशततं च पीठे ।
ऊर्ध्वार्धमस्य घटिकावदथार्धमर्धम् ॥ १९ ॥
पीठाग्रकार्श्यपरिशेषितमूलकार्श्य-
वृत्तिक्रियादिरचना सकलेषु कार्या ।
स्युस्तानि लोहरचितान्यथ मार्त्तिकानि
पात्राणि विष्णुविधिधूर्जटिदैवतानि ॥ २० ॥
क्षेत्रे षट्कृतिकोष्ठके पदचतुष्केऽन्तर्गते पालिका
न्यस्येद् द्वादश दिग्द्विकेष्वपि बहिः कोणत्रिकोष्ठेष्वथ

यनिजोच्चसमप्रतानौ क्रमात् त्रिव्यङ्गुलाभ्यामुच्चौ निजोच्चसमविस्तारौ च स्याताम् । घटिकायाः सकलोच्छ्रयः इनाङ्गुलमितः द्वादशाङ्गुलप्रमितो वा स्यात् ॥ १८ ॥

शरावलक्षणमाह—व्यासेनेति । शरावम् आस्ये मुखे व्यासेन विस्तारेण दैर्घ्यसुसमं दहनांशहीनं त्र्यंशहीनं वा कुर्यात् । पीठे ततो मुखविस्तारात् हुतवहांशततं त्र्यंशविस्तारं च । अस्य शरावस्योर्ध्वार्धम् अपकन्धरपालिकावत् अपगतगलपालिकावत्, अथास्याधरार्धं घटिकावच्च कुर्यात् ॥ १९ ॥

सकलेषु पालिकाघटिकाशरावेषु पीठाग्रकार्श्यपरिशेषितमूलकार्श्यवृत्तिक्रियादिरचना पीठे क्रमेणाग्रकृशता परिशेषितेषु दण्डादिषु मूलस्य कृशता च वृत्तीकरणं रेखाविशेषादीनां रचना च कार्या । तानि पात्राणि लोहरचितानि लोहानामन्यतमेन रचितानि, अथवा मार्त्तिकानि मृदा निर्मितानि स्युः । विष्णुविधिधूर्जटिदैवतानि पालिकादयः क्रमेण विष्णुब्रह्मरुद्रदैवत्यानि च स्युः ॥

बीजवापकाले तेषां स्थापने नियममाह—क्षेत्र इति । षट्कृतिकोष्ठके आयामतो विस्तार(त)श्च षट्पुटवशात् षट्त्रिंशत्पदे क्षेत्रे अन्तर्गते पदचतुष्के चतसः, बहिर्दिग्द्वि(दे?)केषु द्वादश शरावांश्च(?) । अथवा पालिकादि-

१. 'यथ ॥' ख. पाठः. २. 'प' ख. घ. पाठः. ३. 'दै' इति व्याख्याकोशपाठः, ४. 'षातृषट्पदे' ख. पाठः,

अग्न्यार्धं घटिकाः परेष्वपि शरावान् पालिकादेत्रयं
प्राक्प्रत्यङ्मुखवीथिकाविनिमयाद् वा वह्निकोष्ठादितः ॥
तोरणानि युगहस्तमितानि क्ष्मोर्ध्वमर्धविवृतानि भवन्ति ।
केतवः सुरगृहोत्तरदीर्घाः स्वोक्तवर्णसुविचित्रपताकाः ॥
प्रागग्रं सूत्रमुर्व्यामृजुतरमभिकल्प्यास्य मूलाग्रगाभ्यां
सूत्राभ्यां मत्स्ययुग्मं यमशशिहरितोः कल्पयित्वात्र सूत्रम्

त्रयं पालिकाघटिकाशरावान् प्राक्प्रत्यङ्मुखवीथिकाविनिमयात् प्राङ्मुखानां प्रत्यङ्मुखानां षण्णां पङ्क्तीनां व्यत्यासेन वह्निकोष्ठादितः वह्निकोष्ठमारभ्य दक्षिणवीथ्यां, पश्चिमत आरभ्य तदुत्तरवीथ्यां च द्वादश पालिकाः न्यस्येत् । तदुत्तरतः पूर्वादारभ्य पश्चिमत आरभ्य च वीथिद्वये घटिकाश्च, तथैव च तदुत्तरतो वीथिद्वये शरावांश्च न्यस्येत् ॥ २१ ॥

चतुर्थपटलगतान् कर्मशेषान् वदन् तोरणादीनां प्रमाणमाह — **तोरणानीति** । तोरणानि क्ष्मोर्ध्वं भूमेरुपरि युगहस्तमितानि चतुर्हस्तप्रमितानि अर्धविवृतानि आयामादर्धेन द्विकरेण विस्तृतानि च भवन्ति । केतवः ध्वजाः सुरगृहोत्तरदीर्घाः प्रासादोत्तरदैर्घ्यसमानदीर्घाः स्वोक्तवर्णसुविचित्रपताकाः स्वस्वदिक्सूक्तेन वर्णेनारुण्यादिना सुतरां विचित्राभिः पताकाभिश्च युक्ताः ।

"अरुणोऽग्निनिभः कृष्णश्चैतः[2] पीतस्तथा सितः[3] ।
श्वेतोऽन्यो बहुवर्णश्च कुमुदादिध्वजाः क्रमात् ॥"

इत्यादयः स्वाँगमेषूक्ता[4] वर्णाः ॥ २२ ॥

पञ्चमपटलगतान् कर्मशेषान् वदन् कुण्डमण्डलादीनां निर्माणार्थं चतुरश्रसाधनक्लृप्तिमाह — **प्रागग्रमिति** । क्षेत्रक्लृप्तौ क्षेत्रकल्पनायां पुरः पूर्वम् उर्व्यां भूमौ ऋजुतरं यथा भवति तथा प्रागग्रं प्रत्यक्प्रागायतं सूत्रम् अभिकल्प्य आस्फाल्य अस्य सूत्रस्य मूलाग्रगाभ्यां मूलादग्राच्च गताभ्यां परस्परं समाभ्यां सूत्राभ्यां वृत्तीकरणेन यमशशिहरितोः दक्षिणोत्तरदिशोः मत्स्ययुग्मं कल्पयित्वा

---

१. 'द्या' घ. पाठः. २. 'श्वे' ख., 'श्वे' घ. पाठः. ३. 'सि' ङ. पाठः
४. 'स्वसूक्ता' ख. पाठः.

कृत्वा दिक्ष्वङ्कयित्वा समामिह विहितैस्सूत्रकैः कोणम- [त्स्यान्
कृत्वास्फाल्यैषु सूत्रं रचयतु चतुरश्रं पुरः क्षेत्रकल्पौ ॥
दोर्मात्रं परिसूत्र्य तत्र चतुरश्रं क्षेत्रमर्काङ्गुलं
खात्वा तद्द्विगुणं तु वावटतटे तन्मेखलाः कल्पयेत् ।
मार्तण्डाहियुगाङ्गुलोच्छ्रयमिताः श्रुत्यङ्गुलव्यासिनी-
स्तिस्रोऽन्तःक्रमतो निजावटनिभाद्यान्ध्यश्रूरूपे परे ॥ २४ ॥

अत्र मत्स्यमध्ये दक्षिणोत्तरं सूत्रं कृत्वा चतसृषु दिक्षु समप्रमाणम् अङ्कयित्वा चिह्नं कृत्वा इह अङ्के विहितैः निक्षिप्तैर्मध्यपर्यन्तैः सूत्रैः कोणमत्स्यान् चतुर्षु कोणेषु मत्स्यान् कृत्वा एषु मत्स्येषु सूत्राण्यास्फाल्य चतुरश्रं कल्पयतु चतुष्पदोपेतं चतुरश्रं कुर्यात् ॥ २३ ॥

तत्र सामान्यतः प्राप्तं चतुरश्ररूपं कुण्डमाह — दोर्मात्रमिति । अत्र कुण्डस्रुक्स्रुवमण्डलादिकरणे पूर्वोक्तपालिकादिकरणे च मात्राङ्गुलं प्रमाणं स्यात् । तथाच रत्नावल्याम् — "अङ्गुलप्रमाणं त्रिविधं मानाङ्गुलं मात्राङ्गुलं देहलब्धाङ्गुलमिति । वातायनमर्थं गत्वा ये रविरश्मयो भान्ति, तत्र सूक्ष्मं विसर्पन्तो रेणवः । ताभिरष्टाभिः केशम् । एवं लिक्षं यूकं यवमिति क्रमशोऽष्टगुणैर्वृद्धं मानाङ्गुलं भवेत् । यजमानस्याचार्यस्य वा मध्यमाङ्गुलिमध्यपर्वायामो मात्राङ्गुलं स्मृतम् । प्रतिमायामं तालगणितं दशधा विभज्य एकं भागं द्वादशधा कृत्वा एकं देहलब्धाङ्गुलम् । तत्र प्रासादमण्डपादीन् मानाङ्गुलेन गणयेत् । यागोपकरणानि मात्राङ्गुलेन । देहलब्धप्रमाणेन प्रतिमामिति" इति । अत्र कुण्डादीनां यागोपकरणत्वादत्र मात्राङ्गुलं प्रशस्तम् । तच्चतुर्विंशत्यङ्गुलमिह दोर्मात्रं विवक्षितम् । दोर्मात्रं करमितं चतुरश्रं क्षेत्रं परिसूत्र्य परितः सूत्रपातैः सम्पाद्य अर्काङ्गुलं द्वादशाङ्गुलं तद्द्विगुणं तु वा निम्नतायुक्तं खात्वा अवटतटे गर्तप्रान्ते एकामङ्गुलिं त्यक्त्वा वान्यथा वा तिस्रः तन्मेखलाः, तस्यावटस्य मेखलारूपाः संस्थानविशेषाः, कल्पयते । तास्त्वेन्तःक्रमतः अन्तरारभ्य क्रमेण मार्तण्डाहियुगाङ्गुलोच्छ्रयमिताः द्वादशाष्टचतुस्संख्यैरङ्गुलैर्मितोत्सेधयुक्ताः श्रुत्यङ्गुलव्यासिनीः चतुरङ्गुलविस्तारयुक्ताः । तास्वाद्या अन्तर्गता निजावटनिभा चतु-

१. 'नि' क. पाठः. २. 'यु' इति मूलकोशपाठः. ३. 'तृ । क्षेत्रं कुर्यात् ॥ त' ग. ङ. च. पाठः. ४. 'गु'; ५. 'स्व' ङ. पाठः

योनिं पश्चिममेखलोपरि मितामर्काङ्गुलैरुच्छ्राया-
यत्योः सार्धयुगाङ्गुलैरपि तदूनैस्तैश्च विस्तारतः ।
आम्नायाङ्गुलनालकां ससुषिरां स्वाख्यानयोग्याकृतिं
कुर्यात् कुण्डनतां स्वमूलपरिवृत्त्यग्रप्रकल्प्यादिना ॥ २५ ॥

रश्रभगाकारधनुर्वक्रादिकुण्डेषु यादृशोऽवटः तादृशी भवेत् । परे मध्यमा बाह्या च अन्त्यश्ररूपे चतुरश्रसंस्थाने च भवेताम् ॥ २४ ॥

कुण्डानां योनिलक्षणमाह — योनिमिति । पश्चिममेखलोपरि पश्चिमदिग्भवानां मेखलानामुपरि उच्छ्रायायत्योः उत्सेधे दैर्घ्ये च अर्काङ्गुलैः द्वादशाङ्गुलैर्मितां, विस्तारतः सार्धयुगाङ्गुलैः अर्धसहितयुगाङ्गुलैः । अर्काङ्गुलार्धं षडङ्गुलं, युगाङ्गुलं चतुरङ्गुलं, तैः दशाङ्गुलैरित्यर्थः । तदूनैः तस्मात् क्रमेणोनैः तैः सार्धयुगाङ्गुलैः । तत्राप्यर्धशब्देन षडङ्गुलमुच्यते । युगशब्देन चतुरङ्गुलं द्व्यङ्गुलं च । मध्ये दशाङ्गुलैः पुनः क्रमात् षडङ्गुलैश्चतुरङ्गुलैरग्रे द्व्यङ्गुलाभ्यां च मितां योनिं कुर्यात् । तथाच मञ्जर्यां —

"तालायता जलपतेर्दिशि संस्थिता स्यादश्वत्थपत्रसदृशा क्रमशोऽथ निम्ना ।
नाभिर्दशाङ्गुलषडङ्गुलतः क्रमेण विस्तारतश्च चतुरङ्गुलगोलकाग्रा ॥"

इति । अथवा उच्छ्रायायत्योः सार्धयुगाङ्गुलैरर्काङ्गुलैर्मिताम् । तत्पक्षे सार्धयुगाङ्गुलैरित्यस्यार्धसहितयुगाङ्गुलैस्त्र्यङ्गुलैरित्यर्थो भवति । ततः त्र्यङ्गुलसहितद्वादशाङ्गुलैः पञ्चदशाङ्गुलैरित्यर्थः । तत्र विस्तारतस्तदूनैः । अत्र तच्छब्देन युगाङ्गुलमेव गृह्यते । युग्माङ्गुलोनैः तैः दशाङ्गुलैरित्यर्थः । तैरिति द्वादशाङ्गुलैरिति चार्थः । तथाच प्रपञ्चसारे —

"उत्सेधायामकाभ्यां प्रकृतिविकृतिसंज्ञाङ्गुलाष्टाङ्गुला स्याद्
विस्तृत्या द्वादशार्धाङ्गुलमितनमिताग्रा प्रविष्टेव कुण्डे ।"

इति । तथाच आम्नायाङ्गुलनालकां चतुरङ्गुलमितनालयुक्तां, ससुषिराम् अधोभागे परिस्तरणादिसिद्ध्यर्थं सुषिरेण युक्तां, स्वमूलपरिवृत्त्यग्रप्रकल्प्यादिना स्वस्या योनेर्मूलप्रदेशस्य परिवर्तनेनाग्रकल्प्यादिसंस्थानविशेषेण च स्वाख्यानयोग्याकृतिं स्वस्या योनेराख्यानस्य नाम्नः सदृशाकारयुक्तां, कुण्डनतां कुण्डे क्रमेणानतां च योनिं कुर्यात् ॥ २५ ॥

क्षेत्रेऽब्धिपुटे प्रतीच्यपुटयोः कर्णार्धसूत्रं निजं
संस्थाप्याप्तिसन्धितः सुपरिवर्त्यार्कीन्दुसन्ध्यन्तिमम् ।
ताभ्यां सूत्रयुगं प्रसार्य हरिदिग्बाह्याहितेष्वंशत-
श्चिह्नेऽन्योन्यमिदं सुयोज्य शिखिकुण्डं योनिरूपं खनेत् ॥

क्षेत्रं विभज्य नवधोदगवाक् च भागौ
त्यक्त्वाचलांशकमितं परिवर्त्य सूत्रम् ।
प्रागादिकाप्यककुबन्तमुदग्भुजां च
तावत् प्रसार्य रचयेच्छशिखण्डकुण्डम् ॥ २७ ॥

षष्ठांशकं यमहिमांशुदिशोः प्रतीच्य-
सूत्रे सुयोज्य हरिदिग्बहिरङ्कयित्वा ।

योनिरूपकुण्डलक्षणमाह — क्षेत्र इति । अत्र चतुरश्ररूपे अब्धिपुटे चतुष्पदे क्षेत्रे प्रतीच्यपुटयोः पश्चिमदिग्गतयोः पदयोर्निजं कर्णार्धसूत्रं तयोरेव निजं निजं कर्णार्धं सूत्रं मध्ये संस्थाप्य अप्पतिसन्धितः पश्चिमसन्धेरारभ्य आर्कीन्दुसन्ध्यन्तिमम् आर्कियमः इन्दुः सोमः तयोः सन्ध्यन्तिमं दक्षिणपदमध्ये स्थापितं सूत्रं वारुणसन्धेरारभ्य याम्यसन्ध्यन्तिमम्, उत्तरपदे स्थापितं सूत्रं वारुणसन्धेरारभ्य सौम्यसन्ध्यन्तिमं च परिवर्त्य ताभ्याम् (अर्केःआर्की)न्दुसन्धिभ्यां सूत्रयुगं प्रसार्य हरिदिग्बाह्याहितेष्वंशतः इन्द्रदिक्सूत्रबाह्ये स्वदैर्घ्यपञ्चांशेन कृते चिह्ने इदं सूत्रद्वयम् (अन्योन्यं) सुयोज्य योनिरूपं योन्याकारं शिखिकुण्डं खनेत् ॥ २६ ॥

अर्धचन्द्राकारकुण्डलक्षणमाह — क्षेत्रमिति । दक्षिणोत्तरदैर्घ्यं क्षेत्रं नवधा विभज्योदगवाक् च भागौ उत्तरगतं दक्षिणगतं च भागं त्यक्त्वा अचलांशकमितं सप्तांशकमितं सूत्रं प्रागादिकाप्यककुबन्तं प्रागादिपश्चिमदिग्भागान्तं परिवर्त्य उदग्भुजां चोदग्गतं भुजासूत्रं च तावत् प्रसार्य शशिखण्डकुण्डं रचयेत् ॥ २७ ॥

त्रिकोणकुण्डलक्षणमाह — षष्ठांशकमिति । चतुरश्रे चतुष्पदे क्षेत्रे प्रतीच्यसूत्रे पश्चिमसूत्रे यमहिमांशुदिशोः दक्षिणोत्तरदिशोः षष्ठांशकं क्षेत्रस्य षड्भागं सुयोज्याङ्कयित्वा हरिदिग्बहिः इन्द्रदिग्बाह्ये च तेनैव षड्भागेनाङ्क-

---

१. 'धि', २. 'डु' क. पाठः.

तेनैव तेषु सुविधाय च सूत्रपातं
कुर्यात् त्रिकोणपरिमण्डितवह्निकुण्डम् ॥ २८ ॥
कर्णार्धसूत्रस्य भुजार्धतोऽतिरिक्तांशकार्धं बहिरर्पयित्वा ।
मध्यस्थसूत्रं परिवर्त्य कुण्डं कुर्वीत चण्डद्युतिमण्डलाभम् ॥
अङ्कौ प्रकल्प्य हरिपञ्चमदिक्पदिक्स्थौ
षष्ठांशतो बहिरतो निजमध्यतश्च ।
द्वौ द्वौ झषौ परदिशोरपि मत्स्यचिह्न-
षट्सूत्रकैर्विरचयेद् रसकोणकुण्डम् ॥ ३० ॥
क्षेत्रं प्रकल्प्य फणिभागयुतं समन्तात्
तद्बाहुसूत्रदलतोऽथ परिभ्रमय्य ।

यित्वा तेषु चाङ्केषु सूत्रपातं सुविधाय त्रिकोणपरिमण्डितवह्निकुण्डं त्रिभिः कोणैरलङ्कृतं वह्निकुण्डं कुर्यात् ॥ २८ ॥

वृत्तकुण्डलक्षणमाह— कर्णार्धेति । चतुरश्रे चतुष्पदे क्षेत्रे कर्णार्धसूत्रस्य कर्णसूत्रार्धस्य भुजार्धतः भुजासूत्रस्यार्धाद् अतिरिक्तः अधिको योंऽशः तस्यार्धं दिक्सूत्राद् बहिरर्पयित्वा योजयित्वा मध्यस्थसूत्रं क्षेत्रस्य मध्यसन्धिस्थं सूत्रं परिवर्त्य चण्डद्युतिमण्डलाभम् आदित्यमण्डलाकारं वृत्तकुण्डं कुर्वीत ॥२९॥

षट्कोणकुण्डलक्षणमाह — अङ्कावितिं । चतुरश्रे चतुष्पदे क्षेत्रे क्षेत्रस्य षष्ठांशतः हरिपञ्चमदिक्पदिक्स्थौ हरिरिन्द्रः तत्पञ्चमो वरुणः अथवा हरिर्यमः तत्पञ्चमः सोमः तयोर्दिक्पयोः दिक्स्थितौ बहिः बाह्यभागे अङ्कौ प्रकल्प्य अतः अस्मात् अङ्कद्वयात् निजमध्यतः क्षेत्रमध्यगतसन्धेश्च सूत्रप्रसरेणेन परदिशोः, प्राक्प्रत्यग्भागगतावङ्कौ चेद् दक्षिणोत्तरदिशोः दक्षिणोत्तरदिग्गतावङ्कौ चेत् प्राक्प्रत्यग्दिशोः द्वौ द्वौ झषौ मत्स्यावपि प्रकल्प्य मत्स्यचिह्नषट्सूत्रकैः चतुर्षु मत्स्येषु द्वयोश्चिह्नयोश्च विहितैः षड्भिः सूत्रकैः रसकोणकुण्डं षट्कोणकुण्डं विरचयेत् ॥ ३० ॥

पद्माकारकुण्डलक्षणमाह — क्षेत्रमितिं । पूर्वोक्तं क्षेत्रं समन्तात् चतुर्दिक्ष्वपि फणिभागयुतं स्वस्याष्टभागसहितं प्रकल्प्याथ तद्बाहुसूत्रदलतः तच्च-

---

१ 'रि' क. ग. घ. पाठः. २. 'त्रे', ३. 'तः' ख. घ. च. पाठः. ४. 'रेण प' ख. च. पाठः.

आख्यास्यमानविधिनाष्टदलं लिखित्वा
खात्वा प्रकल्पयेत् पद्मनिभं च कुण्डम् ॥ ३१ ॥
क्षेत्रे तत्र समन्ततो द्वादशांशं न्यस्य तुर्यश्रिते
कोणेभ्यो भुजसूत्रकेषु निहितैः स्वैः कर्णसूत्रार्धकैः ।
द्वौ द्वौ दिक्षु झषान् प्रकल्प्य मकरेष्वास्फालितैरष्टभिः
सूत्रैरीशमुखे विरचयेदष्टाश्रकुण्डं सुधीः ॥ ३२ ॥
दोर्मात्रकुण्डे विधिरेष शेषेषून्नीय तन्वीत समस्तमस्मात् ।
कुण्डानि तत्तद्धवनोपपत्त्या द्वित्रादिदोरस्रिमितान्यपि स्युः ॥
कुर्यात् स्रुवं खदिरजं द्विजदारुजं वा
मित्राङ्कुलं शशधरार्धलसत्स्य वक्त्रम् ।

तुरश्रीकृतक्षेत्रस्य भुजासूत्रस्यार्धेन परिभ्रमण्य वृत्तीकृत्य आख्यास्यमानविधिना मण्डलनिर्माणे वक्ष्यमाणविधानेनाष्टदलं लिखित्वा खात्वा पद्मनिभं कुण्डं च प्रकल्पयेत् ॥ ३१ ॥

अष्टाश्रकुण्डलक्षणमाह — क्षेत्र इति । चतुरश्रे क्षेत्रे समन्ततः चतुर्दिक्ष्वपि दिनकरांशं स्वस्य द्वादशांशं न्यस्य योजयित्वा तुर्यश्रिते चतुरश्रीकृते सति चतुर्भ्यः कोणेभ्योऽपि भुजसूत्रकेषु कोणानामुभयदिग्गतभुजासूत्रकेषु निहितैः निक्षिप्तैः स्वैः स्वीयैः कर्णसूत्रार्धकैः चतसृषु दिक्षु द्वौ द्वौ एवं समुदायतोऽष्टौ झषान् मत्स्यान् प्रकल्प्य मकरेषु मत्स्येष्वास्फालितैरष्टभिः सूत्रैरष्टाश्रकुण्डं विरचयेत् । ईश्वरदिङ्मुखे सुधीरिति पदयोः तत्तद्दिशि तत्तद्योग्यमेव कुण्डं विरचयेदित्यभिप्रायः ॥ ३२ ॥

एष विधिः दोर्मात्रकुण्डे हस्तमिते कुण्डे स्यात् । शेषेषु द्विहस्तादिषु अर्धहस्तादिषु अस्माद् एकहस्ताद् उन्नीय अतिदिश्य समस्तं गर्तमेखलायोन्यादिकं तन्वीत । तत्तद्धवनोपपत्त्या तत्तद्धोमसंख्यातारतम्येन द्वित्रादिदोरस्रिमितानि द्विकरत्रिकरादिमितानि अर्धकरादिमितानि च कुण्डानि स्युः ॥ ३३ ॥

होमसाधनकुण्डलक्षणमभिधाय पुनः स्रुवादीनां लक्षणमाह — कुर्यादिति । खदिरजं खदिरोद्भवं द्विजदारुजं वा पलाशोद्भवं वा मित्राङ्कुलं द्वाद-

---

१. 'ध्ये' ङ. पाठः.

अङ्गाग्निनेत्रयवदीर्घवितानिनम्न-
गर्तद्वयं यव[illegible]ल॥ [illegible]तनेमिवीतम् ॥ ३४ ॥

[illegible]लाग्रशातयवनिम्नबिलार्गलाढ्य-
माश्यानप[illegible]गतधेनुपदोपमं[1] च ।
मूले यवा[illegible]कततं यवह[illegible]मग्रे
दण्डं सुवर्[illegible]लमिलाययववेष्टनाग्र[illegible] ॥ ३५ ॥

मार्ताण्डाङ्गुलदैर्घ्यतच्छरदशांशव्यासतीव्रा जुहू-
र्ब्राह्म्यायामशरांशतोऽत्र चतुरश्रं पुष्करं कल्पयेत् ।
अर्धांशाहितमेखलावृतपदांशाखातगर्तान्वितं
तस्याग्रे गलमर्धविस्तृतिदर्घायामतो[2]द्युज्ज्वलम् ॥३६॥

शाङ्गुलं स्रुवं कुर्यात् । अस्य स्रुवस्य वक्त्रं शशधराङ्गुलम् एकाङ्गुलं कुर्यात् । अङ्गाग्निनेत्रयवदीर्घवितानिनम्नगर्तद्वयं तद्वक्त्रं तु षड्यवदीर्घं त्रियवविस्तारं द्वियवनिम्नं च गर्तद्वयेन युक्तं च यवदलाहितनेमिवीतम् अर्धयवेन कृतया नेम्या परिवृतं च मूलाग्रशातयवनिम्नबिलार्गलाढ्यं मूलाग्रयोः कार्श्ययुक्तेन यवमात्राभोगतेन बिलमध्यस्थेन रेखारूपेणार्गलेन युक्तम्, आश्यानपङ्कगतधेनुपदोपमम् ईषदार्द्रपङ्कस्थितेन पशोः पदचिह्नेन समानं च । अस्य दण्डं सुवर्तुलं कुर्यात् । तस्य मूले यवाष्टकततम् अङ्गुलमात्रविस्तारयुक्तम् । अग्रे दण्डाग्रे ततो यवहीनं सप्तयवविस्तृतम् । इलाययवेष्टनाग्रं दण्डाग्रे एकयवप्रमाणेन वलयाकारेण वेष्टनेन युक्तं च ॥ ३४,३५ ॥

जुहूलक्षणमाह—मार्ताण्डेति । ब्राह्मी पालाशी । मार्ताण्डाङ्गुलदैर्घ्यतच्छरदशांशव्यासतीव्रा द्वादशाङ्गुलदीर्घा दैर्घ्यपञ्चांशविस्तारा दैर्घ्यदशांशघना च जुहूः स्यात् । अत्र जुहूम् आयामशरांशतः दीर्घात् पञ्चभागेन चतुरश्रं पुष्करसंज्ञं स्थानं कल्पयेत् । तत्तु अर्धांशाहितमेखलावृतपदांशाखातगर्तान्वितं पुष्करस्य सप्तांशेन कृतया मेखलयावृ(ता?तं) चतुर्थांशनिम्नेन गर्तेन

---

१. 'क्षुरोप', २. 'मानम्' क. पाठः.

पञ्चांश यतताग्रेपादशशिपादव्यासमूलाग्रकं
कुर्याद् व्यासगुणांशखातघृतकुल्योल्लासितं तन्मुखम् ।
तच्छिष्टेन सुवृत्तपुष्करदलव्यासाढ्यमूलानलां-
शोनव्यासयुताग्रकं विरचयेद् दण्डं च गोपुच्छवत् ॥३७॥
हस्तायामयुगांशविस्तृतितदर्धोत्सेधयुक्ता महा-
स्रुक् स्याद् विस्तृतिदीर्घपुष्करगुणांशाखातवृत्तावटा ।
बाह्याद्यर्धतदर्धतद्दलवशाच्छेषे चतुर्धा कृते
कुर्यात् तद्दशनात्रयं त्रिभिरथान्तस्थैः क्रमादंशकैः॥३८॥
बाह्येऽर्धे त्रियवं तदर्धमपरेंऽशे तद्दलं चान्यतः
संशोध्यावटमेखलां सुपरिवृत्तां पीठमब्जोज्ज्वलम् ।

चान्वितम् । तस्य पुष्करस्याग्रे अर्धविस्तृतितदर्धायामताभ्युज्ज्वलं पुष्करार्ध-प्रमाणविस्तारेण तदर्धमानदैर्घ्येण चाभ्युज्ज्वलं दीप्तं गलं च कुर्यात् ॥ ३६ ॥

तन्मुखं तु गलोपरि पञ्चांशायततत्रिपादशशिपादव्यासमूलाग्रकं स्व-दैर्घ्यपञ्चांशेनायतम् आयतत्रिपादविस्तारयुक्तमूलम् एकपादविस्तारयुक्ताग्रं च, तथा व्यासगुणांशखातघृतकुल्योल्लासितं स्वविस्तारत्रिभागखातया घृतकु-ल्यया चोल्लासितं शोभितं च कुर्यात् । तच्छिष्टेन पुष्करगलमुखेभ्यः शिष्टेन दण्डं च विरचयेत् । तं तु सुवृत्तपुष्करदलव्यासाढ्यमूलानलांशोनव्यासयुता-ग्रकं शोभनवृत्तं पुष्करार्धविस्तारमूलं तत्रिभागोनविस्तारयुक्ताग्रं गोपुच्छवद् गोपुच्छसदृशं विरचयेत् ॥ ३७ ॥

महास्रुग्लक्षणमाह — **हस्तायामेति** । हस्तायामयुगांशविस्तृतितदर्धो-त्सेधयुक्ता करमात्रायामा षडङ्गुलविस्तारा त्र्यङ्गुलघना च महास्रुक् स्यात् । सा तु विस्तृतिदीर्घपुष्करगुणांशाखातवृत्तावटा स्वविस्तारसमदीर्घे चतुरश्ररूपे पुष्करे तत्त्रिभागखातेन वृत्तरूपेणावटेनोपलक्षिता च । शेषे अवटाच्छिष्टे पुष्करे बाह्याद्यर्धतदर्धतद्दलवशात् बहिरारभ्यार्धे तदर्धे तस्याप्यर्धे च चिह्नं कृत्वा च-तुर्धा कृते अथान्तस्थैः त्रिभिरंशकैः क्रमात् तद्दशनात्रयं तस्यावटस्य मेखला-त्रयं कुर्यात् ॥ ३८ ॥

तत्र बाह्ये अर्धे त्रियवम् अपरे अंशे तदर्धम् एकार्धयवम् अन्यतस्त-दन्तस्तु तद्दलं पादोनयवं च संशोध्य संतक्ष्य अवटमेखलाम् अवटपरिवृतां मे-

---

१. 'पदांश' ख. पाठः.

दण्डं त्र्यंशततं गलं ससुषिरं पादत्रिभागाताति-
व्यासं पादविहीनपुष्करमितं कुर्याज्जुहूवन्मुखम् ॥३९॥
कर्षार्धं घृतमोदनं प्रजुहुयाद् ग्रासार्धकं मुष्टिगान्
लाजान् स्वप्रसृतिप्रमान् सपृथुकाञ्छालीन् यवांस्तण्डुलान् ।
सक्तून् कर्षमितान् समुद्गतिलसिद्धार्थाह्वयान् पञ्चशो
दूर्वाग्राणि पुनस्त्रिशो दधिपयःक्षौद्रादि शुक्त्युन्मितम् ॥

एकद्विसागरकरप्रमितानि तानि
स्युर्भद्रकप्रकृतिकान्यथ मण्डलानि ।
चक्राम्बुजं द्विकरमप्यवरं वरिष्ठं
तद् वेददोःप्रभृतिपन्नगहस्तनिष्ठम् ॥ ४१ ॥

खलां सुपरिवृत्तां शोभनवृत्तोपेतां कुर्यात् । इतरे चतुरश्रे चेत्यर्थाद् भवति । पीठं मेखलाभ्योऽवशिष्टं स्थानमब्जोज्ज्वलं पद्मेन शोभितं च कुर्यात् । दण्डं त्र्यंशततं त्र्यङ्गुलविस्तृतं च दण्डं कुर्यात् । गलं पुष्करादुपरि गतं कण्ठं पाद-त्रिभागाततिव्यासं पादेन सार्धैकाङ्गुलायामेन त्रिभागेनाङ्गुलद्वयविस्तारेण च युक्तं ससुषिरं घृतमार्गसुषिरयुक्तं च कुर्यात् । मुखं तदूर्ध्वभागं तु पादवि-हीनपुष्करमितं साधचतुरङ्गुलमितं जुहूवद् घृतकुल्यादिसमन्वितं च कुर्यात् ॥

होमद्रव्याणां प्रमाणमाह — कर्षार्धमिति । घृतं कर्षार्धं कर्षः पलाश्च-तुर्भागः तदर्धं प्रजुहुयात् । ओदनमन्नं ग्रासार्धं ग्रासस्यार्धं, लाजान् मुष्टिगान्, पृथुकान् शालीन् तण्डुलान् यवांश्च स्वप्रसृतिप्रमान् स्वकरप्रसृतिमितान्, अ-ङ्गुल्यग्रैरुद्धृता प्रसृतिः, सक्तून् कर्षमितान्, मुद्गतिलसिद्धार्थान् पञ्चशः दूर्वाग्राणि त्रिशः, दधिपयःक्षौद्रादिद्रवद्रव्यं शुक्त्युन्मितं, पुष्पफललड्डुकापू-पादीन्येकैकशश्च जुहुयात् ॥ ४० ॥

मण्डलानां लक्षणमाह — एकेति । अथ तानि अधिवासपटले प्रस्तु-तानि भद्रकप्रकृतिकानि भद्रकमूलानि मण्डलानि एकद्विसागरकरप्रमितानि एकद्विचतुष्करमितानि अधममध्यमोत्तमक्रमेण स्युः । चक्राम्बुजमपि द्विकरम्

१. 'पवर्ति' ख. पाठः. २. 'च' ङ. पाठः.

विकृतिकृतिपुटे षट्त्रिंशतान्तःस्थकोष्ठै-
र्नलिनमवनिपङ्क्त्या पीठिका वीथिकाथ ।
पुटयुगपरिकल्पा द्वारशोभोपशोभा-
श्रियुतपुटयुगल्या मुद्रिता भद्रके स्यात् ॥ ४२ ॥
अब्जक्षेत्रे यवांशं बहिरिह परितोऽपास्य वृत्तीकृतेऽर्धे
मित्रांशेऽग्रार्थमन्तः सुसममथ चतुर्धा विभक्ते दलार्थम् ।
सन्ध्यर्थं केसरार्थं भ्रमयतु परितः कर्णिकार्थं च सूत्रं
दिक्कोणाभ्यन्तरेऽष्टौ क्षिपतु च परितस्तत्र सूत्राणि तिर्यक् ॥

अवरम् अधमम् । वेददोःप्रभृतिपन्नगहस्तनिष्ठं चतुष्करादि अष्टहस्तावसानं तत् चक्राब्जं क्रमोत्कर्षेण वरिष्ठम् उत्तमं स्यात् ॥ ४१ ॥

विकृतिकृतिपुटे विकृतयः षोडश तासां विकृतीनां कृतिर्वर्गः आयामतो विस्तारतश्च षोडशपुटे क्षेत्रे इत्यर्थः । अत्रायं भावः — 'प्राग्ग्रं सूत्रमुर्व्यामि'ति श्लोकोक्तप्रकारेण चतुरश्रं चतुष्पदं स्वेष्टमानमितं क्षेत्रं कृत्वा तेषु चतुर्षु कोणकोष्ठेषु कोणसूत्राण्युभयथाप्यास्फाल्य तन्मध्ये प्राग्ग्रमुदग्ग्रं च सूत्रमास्फाल्य चतुष्पुटं कृत्वा तत्कोणकोष्ठेष्वपि तथा कोणसूत्राण्यास्फाल्य तथा तन्मध्ये च दिक्सूत्राण्यास्फाल्य एवंक्रमेण षोडशपुटानि प्रत्यक्प्रागायतानि दक्षिणोत्तरायतानि च यथा भवन्ति तथा कृत इति । तत्र भद्रके षट्त्रिंशतान्तःस्थकोष्ठैः अन्तर्गतैः षट्त्रिंशत्कोष्ठैः नलिनं पद्मक्षेत्रं स्यात् । अवनिपङ्क्त्या[1] पद्मस्य परितो गतयैकपङ्क्त्या पीठिका च । अथ पुटयुगपरिकल्पा तत्पीठबाह्यगतेन पुटद्वयेन परितः कल्पा वीथिका च तथा तद्बाह्ये द्वारशोभोपशोभाश्रियुतपुटयुगल्या द्वारशोभोपशोभाश्रिभिः युतया पुटद्वय्या मुद्रिता च वीथिका स्यात् ॥ ४२ ॥

अब्जक्षेत्रे मध्यगते पद्मक्षेत्रे बहिर्यवांशं यवमात्रमंशं परितोऽपास्य त्यक्त्वा वृत्तीकृते इहार्धे मित्रांशे द्वादशांशे च अग्रार्थं दलाग्रार्थम्, अन्तः तदन्तर्भागे चतुर्धा सुसमं विभक्ते सति बाह्यादारभ्य परितो दलार्थं सन्ध्यर्थं दलसन्ध्यर्थं, केसरार्थं केसरसीमार्थं, कर्णिकार्थं च सूत्रं भ्रमयतु वृत्तीकरोतु । तत्र

१. 'ङ' इति मूलकोशपाठः. २. 'द्वाह्य', ३. 'यं के', ४. 'यं क', ५. 'तु । त' ख. घ. च. पाठः.

अग्रादिसन्धिचरमं दलमध्यसंस्थं
सूत्रं सुवर्त्य परिलिख्य दलं तदग्रम् ।
[illegible]म्मुखतयान्तिमवृत्तसंस्थं
तन्मात्र[illegible] भेवर्त्य लिखेद् द्विपार्श्वे ॥ ४४ ॥
दिशि करयुगकोष्ठद्वा मन्तबहिष्ठै-
स्त्रिशशिपदविपर्यस्तैश्च शोभोपशोभे ।
त्रि[illegible]वनपदकृत्स्नं कोणमम्भोजपीठं
श्रुतिदहनपदोद्यद्गात्रपादान्वितं च ॥ ४५ ॥
पीता पङ्कजकर्णिका दलततिः श्वेतान्तरालं हरि-
द्वर्णं रक्तरुचोऽश्रयः सितपद[illegible]कं पीठकम् ।

दिक्कोणाभ्यन्तरे[2] दिक्षु कोणाभ्यन्तरालेष्वपि अष्टौ तिर्यक् सूत्राणि च परितः क्षिपतु ॥ ४३ ॥

पुनर्दलमध्यसंस्थं दलानां मध्यगतसूत्रस्थितं सूत्रम् अग्रादिसन्धिचरमं दलाग्रगतवृत्तादारभ्य दलसन्ध्यन्तं सुवर्त्य दलं परिलिख्य तदग्रं दलाग्रं तु तत्सूत्रसंमुखतया दलसूत्राभिमुख्येन[3] अन्तिमवृत्तसंस्थम् अन्तिमवृत्तस्थितं तन्मात्रसूत्रं द्वादशांशतः क्षिप्त्वान्त्यवृत्तविस्तारमात्रं सूत्रं द्विपार्श्वे तस्याग्रस्य पार्श्वद्वयेऽभिवर्त्य लिखेत् ॥ ४४ ॥

पुनर्वीथ्या बहिर्द्वारशोभादिस्थाने[4] अन्तर्बहिष्ठैः अन्तर्गतैः बहिर्गतैश्च क्रमेण करयुगकोष्ठैः द्विचतुष्कोष्ठैः द्वारं स्यात् । त्रिशशिपदविपर्यस्तैः शोभोपशोभे अन्तस्त्रिभिर्बहिरेकेन शोभा, तद्व्यत्यासेनोपशोभा । त्रिभुवनपदकृत्स्नम् अन्तर्बहिश्च त्रिभिस्त्रिभिः कोष्ठैः कोणम् । अम्भोजपीठम् अष्टदलबहिर्गतं पीठं श्रुतिदहनपदोद्यद्गात्रपादान्वितं दिक्षु चतुष्पदगात्रान्वितं कोणेषु त्रिपदपादान्वितं च ॥ ४५ ॥

अथ पङ्कजकर्णिका पद्मस्य कर्णिका पीता पीतवर्णा । दलततिः दलसमूहः श्वेता । अन्तरालं दलान्तरालं हरिद्वर्णं श्यामम् । अष्टदलाद् बहिः पीठस्यान्तर्गताः अश्रयः रक्तरुचः रक्तवर्णाः । पीठकं सितपदारक्तेषकं सि-

---

१. 'पु' घ. पाठः २. 'रे अ' ख. ग. घ. च. पाठः. ३. 'न दिग्गते द्वे कोणगते द्वे अन्तराले चतस्र इत्यत्राभिमुख्येन अ' घ. ङ. च. पाठः ४. 'ने दिग्गते द्वे कोणगते द्वे अन्तराले चतस्र इत्यत्र अ' ख. पाठः.

वीथी[1] [illegible]देचित्रिततराथ द्वारशोभोपशो-
भाश्रि[3] स्यात् सितरक्तपीतशितिवर्णाकीर्णचूर्णोज्ज्वलम्[4] ॥

पीताणुमूलपृथुलारुणमध्यशुभ्र-
बिन्द्वग्रकाः प्रतिदलं युगलात्मकाः स्युः ।
तत्केसरा बहिरथ त्रिगुणात्मकाश्च
रेखा लघीयसि महीयसि भूतरूपाः ॥ ४७ ॥

चक्राब्जेऽत्र विकारवर्गपदवत्क्षेत्रेऽन्तरर्धेऽभितो
वीथीक्षेत्रशरद्विभाग[illegible] वृत्तीकृतेऽर्धीकृते ।

तवर्णपादम् आरक्तवर्णगात्रं च । वीथी कल्पलतादिचित्रिततरा कल्पलतादिभिर्वैचित्र्ययुक्ता । द्वारशोभोपशोभाश्रि[3] क्रमेण सितरक्तपीताशितिवर्णाकीर्णचूर्णोज्ज्वलं श्वेतरक्तपीतकृष्णवर्णैः आकीर्णैः क्षिप्तैः चूर्णैः रजोभिः उज्ज्वलं दीप्तं स्यात् ॥ ४६ ॥

तत्केसराः तस्याष्टदलपद्मस्य केसराः पीताणुमूलपृथुलारुणमध्यशुभ्रबिन्द्वग्रकाः पीतवर्णकृशमूलाः अरुणवर्णस्थूलमध्याः सितवर्णबिन्दुयुक्ताग्रकाश्च प्रतिदलं दले दले युगलात्मकाः द्विद्विसंख्याश्च स्युः । अथ लघीयसि अल्पे मण्डले द्वारादीनां बहिः त्रिगुणात्मकाः सत्त्वरजस्तमोरूपाः श्वेतरक्तकृष्णवर्णाः रेखाश्च स्युः । महीयसि महत्तरे मण्डले भूतरूपाः पृथिव्यप्तेजोवाय्वाकाशात्मकाः पीतश्वेतरक्तश्यामकृष्णवर्णा रेखाः[4] स्युः । तत्र सर्वमण्डलेष्वपि हरिद्रादिरजोभिरेव[5] वर्णाः कल्पनीयाः । तथाच प्रपञ्चसारे—

"हारिद्रं स्याद् रजः पीतं ताण्डुलं च सितं भवेत् ।
तथा दोषारजः क्षारसंयुक्तं रक्तमुच्यते ॥
कृष्णं दग्धपुलाकोत्थं श्यामं बिल्वदलादिकम् ।"

इति ॥ ४७ ॥

अथ चक्राब्जे मण्डले विकारवर्गपदवत्क्षेत्रे पूर्वविधिना षट्पञ्चाशदधिकद्विशतपदसहिते क्षेत्रे अत्रान्तर्धे अभितश्चतुर्ष्वपि दिक्षु वीथीक्षेत्रशरद्विभागसहिते वीथीक्षेत्रं पञ्चांशीकृत्य तद्विभागमन्तर्योजिते तत्र वृत्तीकृते

---

१. 'थिः' ख. पाठः. २. 'लाः' क. पाठः. ३. 'श्रीः' ङ. पाठः. ४. 'खाश्च स्युः', ५. भिर्देव', ६. 'अ' ग. पाठः.

बाह्यार्धे दहनांशनेमिपरिशिष्टं स्यादरक्षेत्रकं
शेषार्धे श्रुतिभागनाभिपरिशिष्टं चाम्बुजक्षेत्रकम् ॥ ४८ ॥
प्राग्वत् पञ्चविभक्तमम्बुजपदं त्रित्रिद्विभक्तं क्रमात्
कृत्वा नाभ्यरनेमिकं च परिवर्त्याराण्यथास्फालयेत् ।
दिक्सूत्रस्पृगरान्तवृत्तनिहितैराकर्णिकान्तायतैः
सूत्रैर्द्वादशधा भ्रमादरपदं षोढा च भङ्क्त्वैकशः ॥ ४९ ॥
एष्वष्टादशकोष्ठवत्स्वरपदेष्वन्तःस्थषट्कोष्ठगा-
न्यन्तर्वृत्तगतैककोच्छ्रितपार्श्वद्वन्द्वतुन्दीनि च ।
इत्यष्टाष्टपदैरराण्यपदिशं कुर्यादिह द्वादशा-
थैतावन्ति हरित्पदानि परिशिष्टान्यन्तरालान्यपि ॥ ५० ॥

च सति, अर्धीकृते तद्वृत्तविस्तारस्यार्धेन वृत्तीकृते च सति, तयोरर्धयोर्बाह्यार्धे दहनांशनेमिपरिशिष्टं तृतीयांशं बहिर्नेम्यर्थं त्यक्त्वा तदवशिष्टमरक्षेत्रं स्यात् । शेषार्धेऽन्तरर्धे श्रुतिभागनाभिपरिशिष्टं चतुर्थांशं बहिर्नाभ्यर्थं त्यक्त्वा तदवशिष्टम् अम्बुजक्षेत्रकं च स्यात् ॥ ४८ ॥

पञ्चविभक्तं पञ्चधा विभक्तम् अम्बुजपदम् अष्टदलपद्मस्थानं प्राग्वत् भद्रकोक्तवत् कुर्यात् । नाभ्यरनेमिकं नाभ्यरनेमिस्थानानि क्रमात् त्रित्रिद्विभक्तं नाभ्यरस्थानं च त्रित्रिभक्तं नेमिस्थानं द्विभक्तं च कृत्वा तानि स्थानानि परिवर्त्य वृत्तीकृत्याथाराण्यास्फालयेत् । आस्फालनप्रकारमाह— दिक्सूत्रेति । दिक्सूत्रस्पृगरान्तवृत्तनिहितैः दिक्सूत्रस्पृष्टेषु अरपर्यन्तवृत्तेषु निहितैः स्थापितैः आकर्णिकान्तायतैः कर्णिकामध्यपर्यन्तदीर्घैः सूत्रैर्भ्रमात् अरपदम् अरस्थानं द्वादशधा भङ्क्त्वा पुनरेकशः षोढा च भङ्क्त्वा अष्टादशकोष्ठवत्सु एषु अरपदेषु अन्तःस्थषट्कोष्ठगानि अन्तर्गतषट्कोष्ठेषु गतानि अन्तर्वृत्तगतैककोच्छ्रितपार्श्वद्वन्द्वतुन्दीनि मध्यमवृत्तगतैकैकस्योच्छ्रणेन वर्धनेन पार्श्वद्वये तुन्दीनि उदरयुक्तानि च इति उक्तेन विधिनाष्टाष्टपदैः अपदिशं दिग्भ्योऽन्यत्र गतानि द्वादश अराणि कुर्यात् । अथेह एतावन्ति द्वादशसंख्यानि हरित्पदानि द्वादशपदानि दिग्गतानि च परिशिष्टानि अरेभ्यः परिशिष्टान्यन्तरालान्यपि कुर्यात् ॥ ४९, ५० ॥

---

१. 'त्र च द्वि' ग. पाठः. २. 'ध्यवृ' ख. घ. च. पाठः.

अन्तःस्थानरमध्यबध्नदुभयान्तान् द्वादशाथ *प्रथीन्
बाह्यानान्तरमध्यबद्धशिरसः कुर्यात् पुनस्तावतः ।
सत्त्वाद्युक्तरुचिस्त्रिनाभिररुणाराल्यन्तरं कृष्णरुक्
पर्यायारुणपीतरुक् प्रथिगणोऽन्यद् भद्रकोद्दिष्टवत् ॥५१॥
धृतिकृतिपुटक्षेत्रे मध्ये विधाय विधानतो
विकृतिकृतिसङ्ख्यातैः कोष्ठैः समीरितभद्रकम् ।
लिखतु परितः पङ्क्तौ शक्त्यष्टकं रसकोष्ठकै-
र्दिशि विदिशि च स्वोपान्तस्थोपकोष्ठदलाञ्चलम् ॥
मध्येशक्ति पदद्वयेन रचयेन्मुष्टिं दिशास्वश्रिषु
त्यक्त्वा कोणगतैककं पदयुजा तत्प्रान्तयुक्स्थास्नुना ।

अथान्तःस्थान् द्वादश प्रथीन् अरमध्यबध्नदुभयान्तान् अराणां मध्येषु सम्बन्ध्यमानोभयाग्रान् कुर्यात् । पुनर्बाह्यानपि आन्तरमध्यबद्धशिरसः अन्तरालानां मध्येषु बद्धशिरसः तावतः द्वादश कुर्यात् । त्रिनाभिः नाभित्रयं सत्त्वाद्युक्तरुचिः सत्त्वरजस्तमसामुक्तश्चेतरक्तकृष्णवर्णम् । अराली अराणां समूहः अरुणा रक्तवर्णा । अन्तरम् अन्तरालं कृष्णरुक् कृष्णवर्णम् । प्रथिगणः प्रथीनां गणः पर्यायारुणपीतरुक् पर्यायेण एकैकान्तरेणारुणपीतवर्णः । अन्यत् कर्णिकादि वीथीद्वारादि च भद्रकोद्दिष्टवत् भद्रकोक्तप्रकारेण ॥ ५१ ॥

शक्तिदण्डकभद्रकलक्षणमाह — धृतीति । धृतिकृतिपुटक्षेत्रे धृतिरष्टादश तत्कृतिस्तद्वर्गः तत्संख्यपदे क्षेत्रे मध्ये विकृतिकृतिसंख्यातैः षोडशवर्गसंख्यैः कोष्ठैर्विधानतः समीरितभद्रकम् उक्तं भद्रकं विधाय परितः पङ्क्तौ रसकोष्ठकैः षट्कोष्ठैः दिशि विदिशि च अष्टदिक्षु शक्त्यष्टकं शक्तीनामष्टकं लिखतु । स्वोपान्तस्थोपकोष्ठदलाञ्चलं स्वानां स्वानां षण्णां कोष्ठानां समीपस्थेऽर्धकोष्ठेऽञ्चलमग्रं यथा भवति तथा लिखतु ॥ ५२ ॥

तत्र शक्तीनां लेखनप्रकारमाह — **मध्येशक्ती**ति । दिशासु मध्येशक्ति शक्तेर्मध्ये पदद्वयेन मुष्टिं शक्तेर्मुष्टिप्रदेशं रचयेत् । अश्रिषु कोणगतैकैकं पदं त्यक्त्वा तत्प्रान्तयुक्स्थास्नुना तस्य कोणपदस्य समीपस्थितेन पदद्वयेन मुष्टिं

१. 'र्णः' क. पाठः.

* 'प्रथमे प्रथिरित्येके' इति क्षीरस्वामी.

मुष्टयुद्दिष्टपदान्तपार्श्वयुगदोस्सूत्रेण शक्त्यग्रके
तत्तार्तीयककोष्ठमध्यमिलिताग्रेणालिखेद् द्वे अपि ॥५३॥

विन्यस्यच्छोटिकां मुष्ट्यभिहितपदयुङ्मध्यदिक्सूत्रसंस्थां
सूत्रं तावत्प्रमाणं भ्रमयतु बहिरन्तश्च दोस्सूत्रसंस्थम् ।
सूत्रं तत्प्रान्तयोस्तद्दलमितमपि संवर्तयेत् कोणसिद्ध्यै
दिश्येवं कोणमुष्टिं विरचयतु तथा सन्धिभुग्नावलग्नम् ॥

शक्त्यग्रान्तरमुष्टिशिष्टपदवर्णं रक्तपीतारुणा-
कृष्णं श्यामलकोणगैककविराजद्देवताविग्रहम् ।
शोभे पीतहरिद्रुची विरचयेत् कोणं त्रिशूलोज्ज्वलं
पीतां वीथिमथाङ्घ्रिगात्रमसितारक्तं परं पूर्ववत् ॥५५॥

रचयेत् । द्वे शक्त्यग्रके शक्तीनां द्वे द्वे अग्रे अपि मुष्टयुद्दिष्टपदान्तपार्श्वयुग-दोस्सूत्रेण मुष्टयुद्दिष्टपदद्वयान्तस्य पार्श्वयुग्मस्थितेन भुजासूत्रेण तत्तार्तीयककोष्ठमध्यमिलिताग्रेण तस्या मुष्टेरन्तद्वयात् तृतीयकोष्ठमध्ये संयुक्ताग्रेण सूत्रद्वयेनालिखेत् ॥ ५३ ॥

मुष्ट्यभिहितपदयुङ्मध्यदिक्सूत्रसंस्थाम् मुष्टेरुक्तपदद्वयमध्यगतदिक्सूत्रस्थितां छोटिकां छोटिकामुद्रां बहिरन्तश्च विन्यस्य तावत्प्रमाणं दोस्सूत्रसंस्थं सूत्रं भ्रमयतु । तत्प्रान्तयोः तस्य समीपयोः कोणसिद्ध्यै तद्दलमितं तदर्धसम्मितमपि संवर्तयेत् । एवं दिशि विरचयतु । तथा कोणमुष्टिं कोणगतां मुष्टिं सन्धिभुग्नावलग्नं सन्धिषु भुग्नं वक्रीभूतमवलग्नं मध्यं यथा भवति तथा विरचयतु ॥ ५४ ॥

तत्पूरणप्रकारमाह — शक्त्यग्रेति । शक्त्यग्रान्तरमुष्टिशिष्टपदवर्णं शक्त्यग्रस्य तदन्तरस्य मुष्टेरवशिष्टपदस्य च वर्णं क्रमात् रक्तपीतारुणाकृष्णं विरचयेत् । श्यामलकोणगैककविराजद्देवताविग्रहं श्यामलेषु कोणगतैकपदेषु शोभमानं देवताया भगवत्या विग्रहं च विरचयेत् । अत्र शोभे शोभोपशोभे पीतहरिद्रुची पीतश्यामवर्णे । कोणं त्रिशूलोज्ज्वलं कोणानि त्रिशूलेनोज्ज्वलानि । वीथिं पीताम् । अथ अङ्घ्रिगात्रं पीठस्य पादान् गात्राणि च असितारक्तं कृष्णानि रक्तानि च । परम् उक्तादवशिष्टं पूर्ववत् भद्रकोक्तवत् ॥ ५५ ॥

कुर्यात् षड्दलमब्धिवर्गपुटकेऽन्तश्चतुष्कस्फुरद्-
वृत्तेषु त्रिषु कर्णिकां च दलसन्धिं षड्दलान्यंशकैः ।
सन्ध्यर्धेऽत्र तु केसरांश्च रचयेद् द्वाराणि दिक्षु द्विकैः
कोणान्येकपदैरितीषुजनुषि स्यात् षड्दलं मण्डलम् ॥५६॥

सम्यक्साधितमण्डपेऽथ जनिमज्जाज्वल्यमानानलो-
दीप्ते स्वेप्सितमन्त्रदैवतसमिज्याभ्युज्ज्वलन्मण्डले ।
काथोदादिसुसम्भृताञ्चितघटाढ्ये दीक्षणीयं गुरुः
शुद्धं प्राशितगव्यमन्तरुपनीयं स्थापयेदग्रतः ॥ ५७ ॥

अब्धिवर्गपुटके षोडशपदक्षेत्रे षड्दलं मण्डलं कुर्यात् । अत्र अन्तश्चतुष्कस्फुरद्वृत्तेषु अन्तर्गतचतुष्के स्फुरत्सु त्रिषु वृत्तेषु अंशकैः क्रमात् कर्णिकां दलसन्धिं षड्दलानि च रचयेत् । अंशकैरित्यनेन षड्दलानां विभागोऽप्युक्तः । तत्र दक्षिणोत्तरसूत्रस्पृष्टबहिर्वृत्ते स्थित्वा तस्मात् कर्णिकामध्यमानेन तस्मिन् वृत्ते चतुरोऽङ्कान् कृत्वा तेषु सूत्राण्यास्फाल्य षोढा विभजेदित्यर्थः । अत्र तु अत्रापि सन्ध्यर्धे दलसन्धेरर्धप्रमाणान् केसरांश्च रचयेत् । दिक्षु द्विकैर्द्वाराणि, एकपदैरेकैकपदैः कोणानि च रचयेत् । अत्र पूरणं भद्रकोक्तवदेव । इति इषुजनुषि स्कन्दे षड्दलं मण्डलं स्यात् ॥ ५६ ॥

इति मण्डलान्यभिधाय तत्प्रसङ्गादाचार्यकसिद्धयेऽवश्यकरणीयं दीक्षाविधिं संक्षेपेणाह — सम्यगिति । अथ सम्यक्साधितमण्डपे यथोक्तप्रकारेण संस्कृते मण्डपे जनिमज्जाज्वल्यमानानलोद्दीप्ते कृताभिजननत्वात् कृताभिमुखत्वाच्च प्रदीप्ताग्नौ स्वेप्सितमन्त्रदैवतसमिज्याभ्युज्ज्वलन्मण्डले च स्वस्येप्सितमन्त्रदेवतावाहनपूजनादिना प्रशोभमाने मण्डले काथोदादिसुसम्भृताञ्चितघटाढ्ये कषायपञ्चगव्यादिना सम्पूर्णेन पूजितेन कलशेन च युक्ते अन्तः अन्तर्भागे गुरुः दीक्षणीयं दीक्षायोग्यं, शुद्धम् उभयकुलपरिशुद्धं स्नानादिना च शुद्धं, प्राशितगव्यं दीक्षार्थमुपोषितं प्राशितपञ्चगव्यं शिष्यमुपनीय स्वस्याग्रतः स्थापयेत् ॥ ५७ ॥

१. 'न्धीन्' इति मूलकोशपाठः. २. 'य' क. पाठः. ३. 'दैः-को' ख. ङ. च. पाठः. ४. 'त्व', ५. 'त' ख. घ. ङ. च. पाठः.

पृथ्व्यादिप्रतिसर्गविग्रहविशु-द्ध्युत्पत्तिमन्त्रोदय-
न्यासार्चेशकराभिमर्शविधिभिः संशुद्धिबुद्धात्मनि ।
तत्राराधितपूर्णपुष्पयुगलौ मण्डलेऽधिगतदेवेक्षात्तपुण्योच्चये-
ऽन्वारब्धेऽथ करोतु तत्त्वहवनं तत्संस्क्रियार्हं सुधीः ॥
हुत्वाज्यं मनुभिः शतं विहितबीजस्थैः पृथिव्यादिभि-
र्मन्त्री तत्र निवृत्तिपूर्वकलात्मान्तैः क्रमात् पञ्चभिः ।
अन्त्यं वात्मनि पूर्णया परतरे नीत्वा समित्पूर्वकं
हुत्वा निष्कृतयेऽस्रतः प्रणवतः शान्त्यै च तावद् हुनेत् ॥
कृत्वा होमसमाप्तिमत्र परिशुद्धे धारणाभिस्ततः
क्षेत्रे क्षेत्रविदं सुयोज्य जनयित्वा तात्त्विकं विग्रहम् ।

अथ सुधीः दीक्षाविधानतत्त्वज्ञो गुरुः पृथ्व्यादिप्रतिसर्गविग्रहविशु-द्ध्युत्पत्तिमन्त्रोदयन्यासार्चेशकराभिमर्शविधिभिः पृथ्व्यादिप्रतिसर्गेण पृथि-व्यादितत्त्वानां संहारेण विग्रहविशुद्ध्या शरीरस्य शोषणदाहनादिविशेषशुद्ध्या उत्पत्त्या तत्त्वसृष्ट्या मन्त्रोदयप्राणायामेन मन्त्रन्यासैरर्चनेन स्वस्येशस्य करा-भिमर्शेन विष्णुहस्तादिभिः स्पर्शनेन च एवंविधैर्विधिभिः संशुद्धिबुद्धात्मनि स-म्यक्शुद्ध्या प्रबुद्धात्मस्वरूपे आराधितमण्डलाधिगतदेवेक्षात्तपुण्योच्चये आरा-धितपूर्णपुष्पाञ्जलौ मण्डलेऽधिगतस्य देवस्येक्षणेन परिगृहीतपुण्यसञ्चये तत्र शिष्ये अन्वारब्धे अग्निसमीपे दर्भेण संस्पृश्य दक्षिणत उपविष्टे सति तत्सं-स्क्रियार्हं तस्य शिष्यस्य संस्काराय योग्यं तत्त्वहवनं करोतु ॥ ५८ ॥

तत्र होमे मन्त्री दीक्षायां प्रसक्तानां मन्त्राणां प्रयोगकुशल आचार्यः विहितबीजस्थैः ह्रां ह्रीं ह्रूं ह्रैं ह्रौं ह्रः इति बीजानामुपरिगतैः निवृत्तिपूर्वककला-मान्तैः 'निवृत्तिकलात्मने स्वाहा' 'प्रतिष्ठाकलात्मने स्वाहा' इत्याद्यवसाने युक्तैः पृथिव्यादिभिः पञ्चभिर्मनुभिः क्रमाच्छतं शतमाज्यं हुत्वा अन्त्यं तत्त्वं पूर्णया परतरे स्वात्मनि नीत्वा समित्पूर्वकं चतुर्द्रव्यैकं हुत्वा निष्कृतये प्रायश्चित्ताया-स्रतः शान्त्यै प्रणवतश्च तावत् शतं हुनेत् ॥ ५९ ॥

पुनर्गुरुः स्वयं होमसमाप्तिं कृत्वा ततो धारणाभिः परिशुद्धेऽत्र क्षेत्रे क्षेत्रविदं जीवात्मानं सुयोज्य तात्त्विकं विग्रहं जनयित्वा साकल्यं परिकल्प्य

१. 'द्ध' ख. ग. पाठः. २. 'दिना वि' ग. ङ. पाठः. ३. 'द्ध' इति व्या-ख्याङ्कोशपाठः. ४. 'ल्यादिवी' ग. घ. ङ. पाठः. ५. 'ह्रा ह्', ६. 'ह्यं हु' ग. पाठः. ७. 'णादिप' ङ. पाठः.

साकल्यं परिकल्प्य पूर्णकलशेनासिच्य देवाग्रतः
संश्राव्याणुवरं तदर्हसमयाद्यं च स्वयं शिक्षयेत् ॥
आद्येषुस्वरभान्तबिन्दुरुदितस्ताराभिधो मन्त्रराड्
ब्रह्माद्योऽस्य मुनिः प्रजापतिरथो दैव्यादिगायत्र्यपि ।
छन्दः स्यान्मनुदेवता च परमात्मा क्लीबहीनस्वर-
द्वन्द्वान्तर्गततारतोऽङ्गमथवा सत्योनभूरादिभिः ॥६१॥
अथ शिवनारायणयोस्तारनमोन्ते स्वनामनी ङेन्ते ।
रसवसुनगाक्षरोक्तो मूलमनू मन्त्रविद्भिरुदिष्टौ ॥ ६२ ॥

पूर्णकलशेनासिच्य देवाग्रतोऽणुवरं संश्राव्य तदर्हसमयाद्यं च शिक्षयेत् । संश्राव्येत्यस्यायमभिप्रायः — मन्त्रोपदेशकाले क्वचिच्छुद्धे भूतले अष्टवर्गिणीं मातृकामालिख्य तयैवावाह्य संपूज्य तस्या मातृकाया मन्त्रगतानक्षरानुद्धृत्य क्वचिदालिख्य तद्गतान् दोषान् परिहृत्य सम्पूज्य शिष्यायोपदिशेदिति ॥ ६० ॥

अत्र प्रस्तुतान् मन्त्रानुद्धरन् पूर्वं प्रणवमुद्धरति — आद्येति । आद्येषुस्वरभान्तबिन्दुः आद्योऽक्षरः अकारः, इषुस्वरः पञ्चमस्वर उकारः, भान्तो मकारः, बिन्दुरनुस्वारः, एवं चतुर्भिर्वर्णैरुपेतः ताराभिधो मन्त्रराट् । सर्वेषां मन्त्राणामाधिपत्याद् राजशब्दोपचारः कृतः । अस्य तारस्य ब्रह्माद्यः प्रजापतिः ब्रह्मप्रजापतिः मुनिः ऋषित्वे उदितः । अथो दैव्यादिगायत्र्यपि दैवी गायत्री छन्दः स्यात् । परमात्मा मनुदेवता मन्त्रस्य देवता च स्यात् । क्लीबहीनस्वरद्वन्द्वान्तर्गततारतः ऋ ॠ ऌ ॡ इति चत्वारः क्लीबाः नपुंसकानि, तैर्हीना अवशिष्टा द्वादशस्वराः, तेषां स्वरद्वन्द्वानामन्तर्गतैस्तारैः 'अं ओं आं हृदयाय नमः' इत्याद्यैरङ्गम् । अथवा सत्योनभूरादिभिः सत्यरहितैर्भूरादिभिः षड्भिः 'ओं भूरात्मने हृदयाय नमः' इत्याद्यैरित्यर्थः ॥ ६१ ॥

मूलमन्त्रानुद्धरति — अथेति । अथ मन्त्रविद्भिः शिवनारायणयोः शिवे विष्णौ च तारनामोन्ते 'ओं नम' इत्यवसाने ङेन्ते चतुर्थ्येकवचनान्ते

१. 'त् ॥ अथ शि' ख. पाठः. २. 'त् ॥ अत्र', ३. 'नि । संश्राव्येत्यस्यायमभिप्रायः — मन्त्रोपदेशकाले क्वचिच्छुद्धे भूतले अष्टवर्गिणीं मातृकामालिख्य तयैवावाह्य सम्पूज्य तस्या मातृकाया मन्त्रगतानक्षरानुद्धृत्य क्वचिदालिख्य तद्गतान् दोषान् परिहृत्य तत्तन्मन्त्रेण सम्पूज्य शिष्यायोपदिशेदिति । तैः' ख. घ. ङ. च. पाठः.

तारोपरि सवसुस्वरलवावियदन्तस्थङेन्तनिजनाम ।
शिवनारायणमूलं नत्यन्तं मन्त्रिभिः समुद्दिष्टम् ॥ ६३ ॥
तारभुवनाधिनाथान्तस्थं निजनाम ङेनमोन्तमिह ।
दुर्गायां सप्तार्णं मूलं दुंबीजि नाम वस्वर्णे ॥ ६४ ॥
मेदःस्पृग्प्रसवर्णस्पृक्षोडशभिन्नतच्चतुर्विंशः ।
उद्योतितः षडर्णो वेनम इति षण्मुखेऽण् राद्यादेः ॥ ६५ ॥
स्पर्शतृतीयं गणपे प्रथमेन चतुर्दशेन वाचाढ्यम् ।
लवलासितमेकवर्णं मूलमुशन्त्य।दिनोऽत्रापि ॥ ६६ ॥

स्वनामनी 'शिवाय' 'नारायणाय' इति द्वे रसवसुवर्णसमेतौ षडक्षरयुक्तोऽष्टाक्षरयुक्तश्च मूलमनू उद्दिष्टौ ॥ ६२ ॥

तारोपरि प्रणवोर्ध्वभागे सवसुस्वरलववियदन्तस्थङेन्तनिजनाम वसुस्वरेण ऋकारेण लवेन बिन्दुना च सहितं वियत् हकारः 'हृं' इत्यर्थः, तदवसाने स्थितं चतुर्थ्येकवचनान्तं निजनाम 'ओं हृं' इत्यन्ते 'शिवनारायणाय' इति नत्यन्तं नमोन्तमेतद् मन्त्रिभिः शिवनारायणमूलं समुद्दिष्टमुक्तम् । मन्त्रिभिः समुद्दिष्टमित्यनेन अत्र नामान्तरं न युञ्ज्यादित्यभिप्रायः ॥ ६३ ॥

दुर्गायां तारभुवानाधिनाथान्तस्थं 'ओं ह्रीं' इत्यनयोरन्तस्थितं ङेनमोन्तं चतुर्थ्येकवचननमोन्तं निजनाम 'दुर्गायै नमः' इति सप्तार्णं मूलं, वस्वर्णे अष्टार्णे दुंबीजि दुंबीजयुक्तं नाम भवति ॥ ६४ ॥

षण्मुखे मेदस्पृग्प्रसवर्णस्पृग्षोडशभिन्नतच्चतुर्विंशः मेदो वकारः, स्पृग्प्रसवर्णः स्पर्शानां षष्ठश्चकारः, स्पृक्षोडशेन तकारेण भिन्नः सम्भिन्नो युक्तः, तच्चतुर्विंशो भकारः, स तु उद्योदितः उकारेणालङ्कृतः, वेनम इति स्वरूपम् इति षडर्णोऽणुः आद्यादिः आदिः प्रणवः स आदौ युक्तश्च भवति ॥ ६५ ॥

गणपे स्पर्शतृतीयं गकारः, प्रथमेनाकारेण चतुर्दशेन औकारेण वा अचा स्वरेणाढ्यं युक्तं लवलसितं बिन्दुनालङ्कृतं च एकवर्णं मूलम् उशन्ति इच्छन्ति । आचार्या इति शेषः । अत्राप्यादितः आदिं प्रणवं चेच्छन्ति॥६६॥

स्पर्शचतुर्थहुताशनषष्ठस्वरबिन्दुरूपबीजान्ते ।
सनतिपरायाष्टार्णं गोप्त्रेर्णं शास्तृमूलमाद्यादि ॥ ६७ ॥
साध्यनारायणो दैवी गायत्री हरिमूलके ।
ऋषिच्छन्दोदेवताः स्युः परमात्मापि च क्रमात् ॥ ६८ ॥
ऋष्याद्या गिरिशे वामदेवपङ्क्तिसदाशिवाः ।
ब्रह्मातिजगती स्थाणुहरौ हरिहरः क्रमात् ॥ ६९ ॥
क्रमान्नारदगायत्रीदुर्गा महिषविद्विषि ।
सनत्कुमारगायत्रीसुब्रह्मण्याः षडानने ॥ ७० ॥
गणकाख्यो निचृद्गायत्र्यथो गणपतिः स्वयम् ।
विघ्ने रेवन्तगायत्रीशास्तारो भूतनायके ॥ ७१ ॥
अङ्गान्यथ हृदयशिरःशिखाश्च कवचं च नेत्रमस्त्रमिति ।
प्रायोऽखिलेषु षट् स्युः सोदरपृष्ठानि तानि हरिमूले ॥ ७२ ॥

स्पर्शचतुर्थहुताशनषष्ठस्वरबिन्दुरूपबीजान्ते स्पर्शचतुर्थः घकारः, हुताशनो रेफः, षष्ठस्वर ऊकारः, बिन्दुरनुस्वारः, एतद्रूपबीजस्य 'घ्रूं' इत्यस्यान्ते सनतिपराय 'नमःपराय'सहितं 'गोप्त्र' इत्यर्णम् अष्टार्णं शास्तृमूलम् आद्यादि प्रणवादि च भवति ॥ ६७ ॥

तेषां मूलमन्त्राणामृष्यादिकं कथयति — **साध्येत्यादिभिः** । हरिमूलके साध्यनारायण ऋषिः, दैवीगायत्री छन्दः, परमात्मापि देवता च क्रमात् स्युः ॥ ६८ ॥

गिरिशे वामदेवपङ्क्तिसदाशिवाः ऋष्याद्याः । स्थाणुहरौ ब्रह्मा, अतिजगती, हरिहरश्च क्रमाद् ऋष्याद्याः ॥ ६९ ॥

महिषविद्विषि क्रमान्नारदगायत्रीदुर्गाः स्युः । षडानने सनत्कुमारगायत्रीसुब्रह्मण्याः ॥ ७० ॥

विघ्ने गणकाख्यः गणकः, निचृद्गायत्री, अथो गणपतिः स्वयं च । भूतनायके रेवन्तगायत्रीशास्तारश्च ॥ ७१ ॥

अङ्गनामान्याह — **अङ्गानीति** । अथाखिलेषु हृदयशिरःशिखाश्च कवचं च नेत्रमस्त्रमिति प्रायः सामान्येन षडङ्गानि स्युः । हरिमूले तानि सोदरपृष्ठानि उदरपृष्ठयुक्तानि ॥ ७२ ॥

---

१. 'य नवार्णं', २. 'शाङ्करीशे ब्रह्मजगतीशिवनारायणाः स्मृताः ॥' ख. पाठः.

नेत्रास्त्रक्रमविनिमयवन्ति हरिस्कन्ददुर्गासु ।
स्वोदितबीजार्णान्ते ङेन्ताख्यानानि जातियुक्तानि ॥७३॥

लवलसितमूलवर्णैर्हरौ हरे तैर्विसर्गिवर्णास्त्रैः ।
अङ्गानि मूलवर्णैः पञ्चमवर्णान्वितेक्षणानि गुहे ॥ ७४ ॥

अक्लीबसमकलालवयुतवियतेशाच्युतेऽमुनाग्निमता ।
व्यत्यस्तान्त्ययुगाचा दुर्गायैवर्णशालिनार्यायाम् ॥ ७५ ॥

गामाद्यैराद्यमनौ द्वितीयमन्त्रेऽङ्गकानि तैरेव ।
पञ्चदशस्वरनेत्रैर्विघ्ने षण्मन्त्रकैः प्रभानाथे ॥ ७६ ॥

हरिस्कन्ददुर्गासु तानि नेत्रास्त्रक्रमविनिमयवन्ति नेत्रास्त्रयोः क्रमस्य व्यत्यासयुक्तानि । अङ्गमन्त्रानाह — स्वोदितेति । स्वोदितबीजार्णान्ते स्वस्वोदितबीजरूपाणाम् अक्षराणामन्ते ङेन्ताख्यानानि चतुर्थ्यन्तानि नामानि । 'हृदयाय' 'शिरसे' इत्यादीनि जातियुक्तानि 'नमः' 'स्वाहे'त्यादिभिः वक्ष्यमाणाभिर्जातिभिर्युक्तानि ॥ ७३ ॥

अङ्गानां बीजान्याह — लवेति । हरौ लवलसितमूलवर्णैः बिन्दुसहितमूलाक्षरैः सहितान्यङ्गानि स्युः । हरे च विसर्गिवर्णास्त्रैः विसर्गसहितषष्ठाक्षरयुक्तास्त्रैः तैर्वर्णैः । गुहे च मूलवर्णैः लवलसितैरित्यवगन्तव्यम् । पञ्चमवर्णान्वितेक्षणानि मूलपञ्चमवर्णान्वितनेत्राण्यङ्गानीति ॥ ७४ ॥

ईशाच्युते अक्लीबसमकलालवयुतवियता क्लीबरहितयुग्मस्वरबिन्दुयुतेन हकारेण 'हां हृदयाय नमः' 'हीं शिरसे स्वाहा' इत्याद्येन । आर्यायाम् अग्निमता रेफयुक्तेन अमुना अक्लीबसमकलालवयुतवियता (व्यत्यस्तान्त्ययुगाचा) दुर्गायैवर्णशालिना प्रत्येकं 'दुर्गायै' इति वर्णयुक्तेन ॥ ७५ ॥

विघ्ने आद्यमनौ 'गं' इति मन्त्रे गामाद्यैः 'गां' 'गीं' इत्याद्यैः, द्वितीयमन्त्रे 'गौं' इति मन्त्रेऽपि तैरेवाङ्गानि । तत्र पञ्चदशस्वरनेत्रैरिति विशेषः । प्रभानाथे षण्मन्त्रकैः रेवन्तादिभिर्वक्ष्यमाणैः ॥ ७६ ॥

१. 'लस्य प' ख. पाठः.

उत्कपदैः क्रुद्धमहावीरद्युसहस्रपूर्वठयुगान्तैः ।
साख्याजातिभिरजिते पञ्चाङ्गान्यखिलमन्त्रयोग्यानि ॥७७॥

सनमःस्वाहावषडथ हुंवौषट्फट् च जातयः षट् स्युः ।
अस्त्रान्तेषु तदूर्ध्वं नम इति पञ्चाङ्गके न नेत्रविधिः ॥७८॥

नारायणाय विद्महे वासुदेवाय धीमहे ।
तन्नो विष्णुरिति श्रीशे गायत्री स्यात् प्रचोदयात् ॥७९॥

नारायणादित्रिपदस्थाने शङ्कर इत्यपि ।
नारायणश्च पुरुषः संयोज्याः शिवशार्ङ्गिणि ॥ ८० ॥

कार्त्यायन्यादिदुर्गान्तार्यायां कन्याकुमार्यपि ।
गुह्येऽत्र शक्तिहस्तादिस्कन्दान्तश्च षडाननः ॥ ८१ ॥

पञ्चाङ्गमाह — **उत्कपदैरिति** । अजिते क्रुद्धमहावीरद्युसहस्रपूर्वठयुगान्तैः 'क्रुद्धमहावीरद्युसहस्र' इति पूर्वैः युक्तैः ठयुगान्तैः 'स्वाहा' इत्यन्तैः युक्तैश्च । ठयुगान्तैरित्यनेनोत्कपदस्य चतुर्थ्येकवचनान्तत्वमपि द्रष्टव्यम् । 'क्रुद्धोत्काय स्वाहा' इत्यादिरित्यर्थः । साख्याजातिभिः 'हृदयाय नम' इत्यादियुक्तैः पञ्चाङ्गानि नेत्ररहितान्यखिलमन्त्रयोग्यानि सर्ववैष्णवमन्त्रेषु योग्यानि ॥ ७७ ॥

जातीः कथयति — **सनम** इति । अथ सनमःस्वाहावषट् नमः स्वाहा वषडिति युक्तं हुंवौषट्फडिति षट् जातयश्चास्त्रान्तेष्वङ्गेषु क्रमेण स्युः । तदूर्ध्वम् उदरादिषु नम इति । पञ्चाङ्गके नेत्रविधिर्न भवति ॥ ७८ ॥

गायत्रीः कथयति — **नारायणायेत्यादिभिः** । श्रीशे इति गायत्री स्यात् ॥ ७९ ॥

शिवशार्ङ्गिणि नारायणादित्रिपदस्थाने शङ्करः नारायणश्च पुरुष इत्यपि त्रयः शब्दाः संयोज्याः ॥ ८० ॥

आर्यायां दुर्गायां कार्त्यायन्यादिदुर्गान्ता कार्त्यायन्याद्या दुर्गान्ता च । मध्यगता कन्याकुमारी । गुह्ये अत्र त्रिपदं शक्तिहस्तादिस्कन्दान्तो मध्यस्थः षडाननश्च ॥ ८१ ॥

---

१. 'त्र्यक्षेनो' इ. घ. ङ. च पाठः. २. 'नि ता' घ. ङ. च. पाठः.

विनायकादिर्[1]विघ्नान्तो गजवक्त्रो गणाधिपे ।
भूताधिपादिशास्त्रन्तो भवपुत्रोऽत्र[2] शास्तरि ॥ ८२ ॥
तन्महेशाय विद्महे वाग्विशुद्धाय धीमहे ।
ब्रवीतु शिवगायत्र्यां तन्नः शिवः प्रचोदयात् ॥ ८३ ॥
व्योमव्योमाय विद्महे व्योमेश्वराय धीमहे ।
ब्रवीतु व्योमगायत्र्यां तन्नो व्योमः प्रचोदयात् ॥ ८४ ॥
श्रियो बीजं वह्नीलवसहितमस्थ्यस्य च भृगु-
र्निचृच्छ्रीर्ऋष्याद्या गगनमिति शक्तेः पुनरजः ।
तथा गायत्री च प्रकृतिरपि मूलाक्षरयुता
द्वयोरङ्गं दीर्घाज्भिदुरनिजबीजेन गदितम् ॥ ८५ ॥

तारप्रणामौ भगवाक्षराणि तेवासुदेवाय हरावितार्णः ।
मन्त्रः प्रजापत्यभिधोऽस्य गायत्र्यृष्यादयो विष्णुरपि क्रमेण ॥

गणाधिपे विनायकादिः विघ्नान्तः मध्यस्थो गजवक्त्रश्च । शास्तरि अत्र भूताधिपादिशास्त्रन्तः 'भूतनाथाये'त्यादिशास्त्रन्तः । मध्यस्थो भवपुत्रश्च[3] ॥ ८२ ॥

शिवगायत्र्याम् एवं ब्रवीत्वित्यर्थः ॥ ८३ ॥

व्योमगायत्र्यां तद्वदेव व्याख्येयम् ॥ ८४ ॥

श्रीबीजादिकमुद्धरति — **श्रिय** इति । वह्नीलवसहितं रेफेण ईकारेण बिन्दुना च सहितम् अस्थि शकारः श्रियो बीजम् । अस्य बीजस्य भृगुर्निचृत् श्रीश्च ऋष्याद्याः । शक्तेः[4] पुनः इति एवंभूतं गगनं हकारः बीजम् । तथा अजः गायत्री मूलाक्षरयुता प्रकृतिः मूलप्रकृतिश्च ऋष्याद्याः । द्वयोः श्रीशक्तिबीजयोः दीर्घाज्भिदुरनिजमूलेन दीर्घाज्भिः भेदयुक्तेन निजमूलेन 'श्रां' 'श्रीं' इत्यादिना 'ह्रां' 'ह्रीं' इत्यादिना च अङ्गं गदितमित्यर्थः ॥ ८५ ॥

वैष्णवं द्वादशाक्षरमुद्धरति — **तारे**ति । हरौ तारप्रणामौ 'ओं नम' इति, भगवाक्षराणि, 'भगव' इत्यक्षराणि तेवासुदेवाय इत्यक्षराणि च

---

१. 'वि' ख. पाठः. २. 'थ' घ. पाठः. ३. 'श्च भवति ॥' ख. घ. ङ. च. पाठः. ४. 'क्तेश्च पु' ग. पाठः.

मन्त्रार्णैर्द्विषडङ्गकान्युदितवत् तेष्वष्टकं कल्पयेद्
बाहूरुद्वयजानुपादसमभिख्यातानि चत्वार्यथ ।
पञ्चाङ्गानि मनोर्मनीषिभिरमुष्योक्तानि वर्णैः क्रमात्
पृथ्वीनेत्रपयोधिसायकमितैः सर्वैश्च मन्त्रोदितैः ॥ ८७ ॥

विष्णौ षड्वर्णमन्त्रो भुवनतिसहितं विष्णवेर्णं निराख्यै-
र्हूं कं शिं हुं हः इत्येभिरिह नतियुतैः स्युस्तदङ्गानि पञ्च ।
तारान्ते हूंसमेतो यदि भवति सबीजोऽणुरङ्गानि तारा-
द्यर्णैर्हामादिमत्स्वाह्वयनतिसहितैर्नेत्रनिष्ठानि षट् स्युः ॥

इनार्णः द्वादशाक्षरो मन्त्रः स्यात् । अस्य प्रजापत्यभिधः प्रजापतिः गायत्री विष्णुश्च ऋष्यादयः ॥ ८६ ॥

अस्य मन्त्रार्णैः द्विषडङ्गकानि द्वादशाङ्गानि । तेष्वङ्गेषु मध्ये अष्टकम् उदितवत् अष्टाक्षरोक्ताष्टाङ्गवत् । अथ बाहूरुद्वयजानुपादसमभिख्यातानि 'सुं बाहुभ्यां नमः' 'दें ऊरुभ्यां नमः' 'वां जानुभ्यां नमः' 'यं पादाभ्यां नमः' इति चत्वारि कल्पयेदित्यर्थः । अस्यैव मन्त्रस्य पञ्चाङ्गान्याह — पञ्चाङ्गानीति । अमुष्य मनोर्मनीषिभिः मन्त्रोदितैः मन्त्रोक्तैः पृथ्वीनेत्रपयोधिसायकमितैः एकद्विचतुष्पञ्चमितैः सर्वैश्च वर्णैः क्रमात् पञ्चाङ्गान्युक्तानि ॥ ८७ ॥

षडक्षरमाह — **विष्णौ** षड्वर्णेति । विष्णौ भुवनतिसहितं 'ओं नम' इति युक्तं 'विष्णवे' इत्यर्णं षड्वर्णमन्त्रः । इह मन्त्रे निराख्यैः हृदयादिनामरहितैः हूं कं शिं हुं हः इत्येभिर्बीजैर्नतियुक्तैः 'हूं नमः' 'कं नमः' 'शिं नमः' 'हुं नमः' 'हः नमः' इति तदङ्गानि पञ्च स्युः । तारान्ते हूंसमेतो यदि प्रणवान्ते 'हूं' इति युक्तश्चेत् तर्हि सबीजोऽणुः सबीजः षडक्षरो भवति । हामादिमत्स्वाह्वयनतिसहितैः 'हां' 'हीं' इत्यादियुक्तैः हृदयादिस्वस्वनाम्ना प्रत्येकं नत्या च युक्तैः ताराद्यर्णैः प्रणवादिभिः षड्भिरक्षरैः नेत्रनिष्ठानि षडङ्गानि स्युः । 'ओं हां हृदयाय नमः' 'नं हीं शिरसे नमः' 'मों हूं शिखायै नमः' इत्यादीत्यर्थः ॥ ८८ ॥

१. 'तैः कुर्वीत सवैरपि ॥' ख. पाठः.

अन्तर्याम्यभिधः स्यादस्य मनो रसलिपेर्ऋषिः प्रोक्तः ।
गायत्री चच्छन्दो विष्णुः स्वयमेव देवता तद्वत् ॥ ८९ ॥

प्रोक्तस्तारसहस्रपूर्वमरहुंफट् चक्रमन्त्रोऽहिर-
स्यर्षिर्बुध्न्ययुतः सुदर्शनमहाविष्णुः स्मृता देवता ।
छन्दोऽनुष्टुबथाङ्गकानि गदितान्यायाग्निजायान्तिकै-
श्चक्रैराविसुधीसमित्यपि पुनर्ज्वालेति चादौ युतैः ॥ ९० ॥

जितं ते पुण्डरीकाक्ष! नमस्ते विश्वभावन! ।
सुब्रह्मण्य! नमस्तेऽस्तु नमः पुरुषपूर्वज! ॥ ९१ ॥

उपचारमनुः सोऽयमजिते सम्प्रकीर्तितः ।
केवलाद्यद्वितीयोपान्त्यान्त्याच्प्रपुटिताः क्रमात् ॥ ९२ ॥

स्युर्वासुदेवसङ्कर्षणप्रद्युम्नानिरुद्धकाः ।
नमोभगवतेर्णाद्या ङेन्ताश्च हरिमूर्तयः ॥ ९३ ॥

अस्य रसलिपेः षडर्णस्य सबीजस्याबीजस्यापि मनोरन्तर्यामी इत्यभिधः ऋषिः प्रोक्तः स्यात् । गायत्री च छन्दः । तद्वद् विष्णुः स्वयमेव देवता ॥ ८९ ॥

सुदर्शनमन्त्रमुद्धरति — **प्रोक्त** इति । तारसहस्रपूर्वं प्रणवान्ते सहस्र इति पदपूर्वम् अरहुंफडिति चक्रमन्त्रः प्रोक्तः । अस्य ऋषिः बुध्न्ययुतः अहिः अहिर्बुध्न्यः, स ऋषिरित्यर्थः । सुदर्शनमहाविष्णुर्देवता स्मृता । अनुष्टुप् छन्दः स्मृतम् । अथ आयाग्निजायान्तिकैः 'आय स्वाहा' इत्यन्ते युक्तैः आविसुधीसमिति पुनः ज्वालेति चादौ युतैश्चक्रैः अङ्गानि गदितानि उक्तानि । 'आचक्राय स्वाहा हृदयाय नमः' 'विचक्राय स्वाहा शिरसे स्वाहा' इत्याद्यङ्गानीत्यर्थः ॥ ९० ॥

उपचारमनुं वदन् पूर्वं तदेव पठति — **जितं त** इति ॥ ९१ ॥

अजिते स पठितः अयमुपचारमन्त्रः सम्प्रकीर्तितः । मूर्तिमन्त्रानुद्धरति — केवलेत्यादिना । केवलाद्यद्वितीयोपान्त्यान्त्याच्प्रपुटिताः, अत्र केवलशब्दः प्रत्येकं संबध्यते, केवलेन आद्येन केवलेन द्वितीयेन उपान्त्येन अन्त्येन च अचा स्वरेण प्रपुटिताः, नमोभगवतेर्णाद्याः नमो भगवत इत्यक्षरैः आदौ युक्ताः ङेन्ताः चतुर्थ्येकवचनान्ताः वासुदेवसङ्कर्षणप्रद्युम्नानिरुद्धकाः क्रमात् हरिमूर्तयः स्युः ।

तथैव हादिशान्तार्णैः[1] सप्रतिष्ठैः सबिन्दुभिः ।
शान्तिश्च श्रीसरस्वत्यौ रतिस्तन्मूर्तिशक्तयः[2] ॥ ९४ ॥
किरीटकेयूरहारपदान्याभाष्य मन्त्रवित् ।
मकरान्ते कुण्डलं[3] च चक्रशङ्खगदादिकम्[4] ॥ ९५ ॥
अब्जहस्तं[5]पदं चोक्त्वा पीताम्बरधरेति च ।
श्रीवत्साङ्कितमाभाष्य वक्षःस्थलमथो वदेत्[6] ॥ ९६ ॥
श्रीभूमिसहितं[7]स्वात्मज्योतिर्द्वयपदं वदेत् ।
दीप्तं[8]मुक्त्वा करायेति सहस्रादित्यतेजसे ।
हृदन्तः प्रणवादिः स्यात् किरीटादिमनुस्त्वयम्[9] ॥ ९७ ॥

'अ ओं नमो भगवते वासुदेवाय अ' 'आ ओं नमो भगवते सङ्कर्षणाय आ' इत्याद्या इत्यर्थः ॥ ९२,९३ ॥

शक्तिमन्त्रानाह — **तथैवेति** । तथैवेत्यनेन चतुर्थ्यैकवचनान्तत्वं गृह्यते । हादिशान्तार्णैः हकारादिशकारान्तैः ह स प श इत्यक्षरैः सप्रतिष्ठैः प्रतिष्ठया आकारेण युक्तैः सबिन्दुभिः बिन्दुयुक्तैः एवंभूतैर्बीजैर्युक्ताः शान्तिः श्रीसरस्वत्यौ रतिश्च तन्मूर्तिशक्तयः वासुदेवादीनां शक्तयः । 'ओं हां शान्त्यै नमः' इत्याद्या इत्यर्थः ॥ ९४ ॥

किरीटमन्त्रमुद्धरति—**किरीटेति** । 'किरीटकेयूरहार' इति पदानि आभाष्य उक्त्वा । मन्त्रविदित्यनेन मकरान्ते 'मकर' इत्यन्ते 'कुण्डलालङ्कृत' इत्यध्याहार्यः । चक्रशङ्खगदादिकं 'चक्रशङ्खगद।' इत्यादिकम् अब्जहस्तपदम् 'अब्जहस्त' इति पदं चोक्त्वा 'पीताम्बरधर' इति च 'श्रीवत्साङ्कित' इति पदमाभाष्य 'वक्षःस्थल' इति पदं वदेत् । 'श्रीभूमिसहित' इति पदं स्वात्मज्योतिर्द्वयपदं 'स्वात्मज्योतिर्द्वय' इति पदं वदेत् । 'दीप्त' इति पदं 'कराय' इति 'सहस्रादित्यतेजसे' इति च उक्त्वा इति किरीटादिमनुः । अयं हृदन्तः नमोन्तः अन्ते 'नम' इति युक्तः, प्रणवादिः स्यात् ॥ ९५—९७ ॥

---

१. 'यः ॥ ईशे' इति ख. ग. पाठः. २. 'लार्णं चक्र', ३, 'दान्ततः ॥', ४. 'स्तेति पीताम्बरेति चोक्त्वा धरेति च ।', ५. 'तशब्दान्ते वक्षस्थलपदं ततः ॥', ६. 'तात्मान्ते ज्यो', ७. 'ततो दीप्तिक' घ. पाठः. ८. 'प्ति' इति मूलकोशपाठः. ९. 'नम इत्युच्चरेदेष किरीटाख्यो महामनुः ॥ ई' घ. पाठः. १०. 'प्रो' इति व्याख्याकोशपाठः. ११. 'प्ति' घ. ङ. च. पाठः.

ईशे मनुस्वरलवोद्भिदुरं विहायः
प्रासादनाममनुरुक्तचराः शिवान्ताः ।
ऋष्यादिकाः सलवदीर्घकलाविभिन्न-
व्योम्नाङ्गषट्कमिह विश्वकलाक्ष्यभीष्टा ॥ ९८ ॥

ईशानस्तत्पुरुषाघोराख्यौ वामदेवनामाथ ।
सद्योजातश्चोक्ता मन्त्रितमैः पञ्च मूर्तयो गिरिशे ॥ ९९ ॥

नाद्यैः पञ्चार्णविधौ नादविधौ विश्वपूर्वविषमाद्यैः ।
विक्लीबैर्बिन्दुयुतैर्भिदुरेण विहायसा युताः प्रोक्ताः ॥१००॥

पञ्चब्रह्ममहामनुराम्नायाम्नानतोऽत्र विज्ञेयः ।
ईशपुरुषाग्निवामादिकदेवहराश्च भूर्यनुष्टुबथ ॥ १०१ ॥

शैवान् मन्त्रानुद्धरति — **ईश** इति । ईशे मनुस्वरलवोद्भिदुरं चतुर्दशस्वरबिन्दुभ्यां युक्तं विहायः हकारः प्रासादनाममनुः प्रासादमन्त्रः स्यात् । शिवान्ता उक्तचराः षडक्षरे उक्तपूर्वाः ऋष्यादिकाः । सलवदीर्घकलाविभिन्न-व्योम्ना बिन्दुयुक्तदीर्घस्वरैः भेदितेन हकारेणाङ्गषट्कं स्यात् । इह प्रासादमन्त्रे अक्ष्णि विश्वकला त्रयोदशस्वरः अभीष्टा उक्ता । 'ह्रीं नेत्रत्रयाय वौषट्' इत्यर्थः ॥ ९८ ॥

मूर्तिमन्त्रानाह — **ईशान** इति । मन्त्रितमैः गिरिशे ईशान इत्याद्याः पञ्च मूर्तय उक्ताः ॥ ९९ ॥

पञ्चार्णविधौ एताः नाद्यैः नकारादिपञ्चभिरक्षरैः युताः । नादविधौ प्रासादविधौ विक्लीबैः नपुंसकार्णरहितैः बिन्दुयुतैः विश्वपूर्वविषमाद्यैः त्रयोदशैकादशपञ्चमतृतीयप्रथमस्वरैः भिदुरेण भेदयुक्तेन विहायसा हकारेण युताः प्रोक्ताः ॥ १०० ॥

अत्र पञ्चब्रह्मोपदेशेन आम्नायाम्नानतः वेदपाठरीत्या पञ्चब्रह्ममहामनुर्विज्ञेयः । ऋष्यादीनाह — ईशेति । ईशपुरुषाग्निवामदेवहराः ऋषयः । अथ भूर्यनुष्टुप्, गायत्री, अनुष्टुप्, कृतिरनुष्टुप् च छन्दांसि । ईश्वरः आपः

१. 'नाद्यैताः ॥' इति मूलकोशपाठः. २. 'ईशन आ' स. पाठः.

गायत्र्यनुष्टुभौ कृत्यनुष्टुभावीश्वरस्तथापश्च ।
आपो भगो भगश्चेतीशानादिक्रमात् तदृष्याद्याः ॥ १०२ ॥

पञ्चध्रुवोपरिष्टात् सर्वज्ञायेति हृन्मनुः प्रोक्तः ।
अमृतेतेजोमालिनितृसायैब्रह्मशिरस इति च शिरः ॥ १०३ ॥

ज्वलितशिखिशिखे च शिखा
त्वनादिबोधा समीरिता ङेन्ता ।
वर्ममनुर्वज्रिणे इति
वज्रधराय द्विठः स्वतन्त्राय ॥ १०४ ॥

सौंचौंहौमितिपूर्वः प्रोक्तोऽत्रालुप्तशक्तयेऽक्षिमनुः ।
पाशुपतमन्त्रपूर्वः प्रोक्तश्चानन्तशक्तयेऽस्त्रमनुः ॥ १०५ ॥

ईशानादिकलाः स्युः शशिनी पुनरङ्गदेष्टदा च मरीचिः ।
ज्वालिन्यपि च निवृत्तिः प्रतिष्ठया विद्यया च शान्त्यभि-
[धाना ॥

आपः भगो भगश्च देवता । तदृष्याद्याः ईशानादिक्रमाज्ज्ञातव्या इत्यर्थः । ईशानादिक्रमादित्यनेन तथैवात्र मन्त्रपाठ इत्यपि सूचितः ॥ १०१,१०२ ॥

अङ्गमन्त्रानुद्धरति — पञ्चेति । पञ्चध्रुवोपरिष्टात् पञ्चप्रणवोपरिभागे 'सर्वज्ञाय' इति हृन्मनुः हृदयमन्त्रः प्रोक्तः । 'अमृते' इत्यादि 'शिरसे' इत्यन्तः शिरोमन्त्रः ॥ १०३ ॥

ज्वलितशिखिशिखे इति ङेन्ता अनादिबोधा 'ज्वलितशिखिशिखे अनादिबोधायै' इति शिखा समीरिता इत्यर्थः । वज्रिणे इति, वज्रधरायेति, द्विठः स्वाहा इति, स्वतन्त्राय इति च 'वज्रिणे वज्रधराय स्वाहा स्वतन्त्राय' इति वर्ममनुः कवचमन्त्रः ॥ १०४ ॥

सौं चौं हौमिति बीजत्रयपूर्वः 'अलुप्तशक्तये' इत्यक्षिमनुः नेत्रमन्त्रः प्रोक्तः । पाशुपतमन्त्रपूर्वः वक्ष्यमाणपाशुपतास्त्रमन्त्रान्ते 'अनन्तशक्तये' इत्यस्त्रमनुः प्रोक्तः ॥ १०५ ॥

अष्टात्रिंशत्कला आह — ईशानादीति । इति ईशानादिकलाः, 'ईशानः सर्वविद्यानामि'त्यादिमन्त्रखण्डानामष्टात्रिंशत्संख्याः कलाः क्रमशः समी-

तामस्याख्या मोहा क्षया च निद्राह्वया पुनर्व्याधिः ।
अथ मृत्युरूपिणी च क्षुधा तृषाख्या ततो रजोरूपा ॥१०७॥
रक्षा रतिश्च कामा क्षमा च संयमनिका क्रिया सन्ध्या ।
स्थिरया च कालरात्रिर्भ्रामण्यपि मोहिनी तथा श्रीश्च ॥
सिद्धिरथर्द्धिर्द्युतिरपि मेधा कान्त्याह्वया तथा प्रज्ञा ।
भूयः प्रभा सुधा चेत्यष्टात्रिंशत् समीरिताः क्रमशः ॥१०९॥
मातङ्गोरगविश्वबाणनिगमैरष्टाष्टवेदाब्धिभि-
र्वेदेषुद्व्यृतुभूतवह्निशरबाणैस्तत्कलाः संयुताः ।
सप्तेष्विष्विषुदोर्नगेषुदृगगाङ्काशाश्विषड्भिः क्रमा-
दष्टाष्टाश्विगुणेषुवेदनयनाङ्गैश्चाक्षरैर्मन्त्रजैः ॥ ११० ॥

रिताः स्युः । शशिनी अङ्गदा इष्टदा मरीचिः ज्वालिनी इति पञ्चेशानकलाः । निवृत्तिः प्रतिष्ठा विद्या शान्तिश्च इति चतस्रस्तत्पुरुषकलाः । तामसी मोहा क्षया निद्रा व्याधिः मृत्युरूपिणी क्षुधा तृषा इत्यष्टावघोरकलाः । रजोरूपा रक्षा रतिः कामा क्षमा संयमनी क्रिया सन्ध्या स्थिरा कालरात्रिः भ्रामणी मोहिनी श्रीः इति त्रयोदश वामदेवकलाः । सिद्धिः ऋद्धिः द्युतिः मेधा कान्तिः प्रज्ञा प्रभा सुधा इत्यष्टौ सद्योजातकलाः इति ॥ १०६ — १०९ ॥

ईशानादीनामक्षरसंख्याविभागमाह — मातङ्गेति । तत्कलाः ईशानादीनां कलाः मन्त्रजैः अक्षरैः क्रमात् संयुताः इत्यन्वयः । मातङ्गाः अष्टौ, उरगाश्चाष्टौ, विश्वेदेवास्त्रयोदश, बाणाः पञ्च, निगमाः चत्वार इतीशानखण्डाः । अष्ट, अष्ट, वेदाश्चत्वारः, अब्धयश्चत्वार इति तत्पुरुषखण्डाः । वेदाश्चत्वारः, इषवः पञ्च, द्वि, ऋतवः षट्, भूतानि पञ्च, वह्नयस्त्रयः, शराः पञ्च, बाणाश्च पञ्च इत्यघोरखण्डाः । सप्त, इषुशब्दास्त्रयोऽपि पञ्चैव, दोरिति द्वे, नगाः सप्त, इषवः पञ्च, दृग् द्वे, अगाः सप्त, अङ्काः नव, आशा दश, अश्विनौ द्वौ, षडिति वामदेवखण्डाः । अष्टाष्ट, अश्विनौ द्वौ, गुणास्त्रयः, इषवः पञ्च, वेदाश्चत्वारः, नयने द्वे, अङ्गानि षडिति सद्योजातखण्डाः इति ॥ ११० ॥

१. 'वक्त्रलाख' ख. ग, पाठः.

तारान्ते बिन्द्वन्वितादित्रिदीर्घान्
ब्रूयाद् व्योमव्यापिनेर्णं ध्रुवं च ।
सोऽयं व्योमव्यापिमन्त्रो दशार्णो
व्योमाद्यर्णैः स्युस्तदङ्गानि पञ्च ॥ १११ ॥

तारं व्योमव्यापिनेव्योमरूपायार्णं सर्वव्यापिनेर्णं शिवाय ।
भूयोऽनन्तायेत्यनाथाय चेति प्रोदीर्याथानाश्रिताय ध्रुवाय ॥
ङेन्तं ब्रूयाच्छाश्वतं योगपीठा-
र्णाद्यं तद्वत् संस्थितायेति वर्णम् ।
नित्यार्णाद्यं योगिनेवर्णमुक्त्वा
ध्यानाहारायेति वर्णं ब्रवीतु ॥ ११३ ॥
तारप्रणामसहितं च शिवायवर्णं
सर्वप्रभुं वदतु ङेसहितं शिवाय ।

व्योमव्यापिमन्त्रमुद्धरति — **तारान्त** इति । तारान्ते प्रणवान्ते बिन्द्वन्वितादित्रिदीर्घान् बिन्दुयुक्तानादौ भवांस्त्रिदीर्घान् 'आं' 'ईं' 'ऊं' इति, 'व्योमव्यापिने' इत्यर्णं, ध्रुवं च प्रणवं ब्रूयात् । सोऽयं दशार्णो व्योमव्यापिमन्त्रः स्यात् । व्योमाद्यर्णैः 'व्योमव्यापिने' इति पञ्चभिरक्षरैः पञ्च तदङ्गानि स्युः ॥ १११ ॥

महाव्योमव्यापिमन्त्रं पदविभागेन सहोद्धरति —**तारमि**ति । प्रणवमाद्यं पदं, 'व्योमव्यापिने' इति 'व्योमरूपाय' चेत्यर्णम् अक्षराणि, 'सर्वव्यापिने' इत्यर्णं, 'शिवाये'ति । अर्णमिति पदे पदे योज्यम् । भूयः 'अनन्ताये'ति 'अनाथाय'इति च प्रोदीर्य उक्त्वा अथ 'अनाश्रिताये'ति 'ध्रुवाये'ति च, शाश्वतं ङेन्तं 'शाश्वताये'ति ब्रूयात् । योगपीठार्णाद्यं संस्थितायेति वर्णम् अक्षराणि 'योगपीठसंस्थिताये'त्यर्थः । नित्यार्णाद्यं योगिनेवर्णं 'नित्ययोगिने' इत्युक्त्वेत्यर्थः । 'ध्यानाहाराय' इति वर्णम् अक्षराणि ब्रवीतु ॥ ११२,११३ ॥

तारप्रणामसहितं 'ओं नम' इति युक्तं शिवायेतिवर्णं 'ओं नमः शिवाये'त्येकं पदमित्यर्थः । ङेसहितं सर्वप्रभुं 'सर्वप्रभवे' इति वदतु, 'शिवाये'ति । इह ईशानपूर्वेशरमूर्त्युपरि ईशानादिपञ्चमूर्तीनामूर्ध्वभागे मूर्धवक्त्रहृद-

ईशानपूर्वशरमूर्त्युपरीह ङेन्ताः
स्युर्मूर्धवक्त्रहृदयान्यपि गुह्यमूर्ती ॥ ११४ ॥
तारप्रणामद्वितयं च गुह्यातिगुह्यमायार्णयुतं च गोप्त्रे ।
ब्रूयात् तदन्तेऽनिधनाय सर्वविद्याधिपायेति पदं च मन्त्री ॥
अथ वदतु सर्वयोगाधिगताय ज्योतिरादिरूपाय ।
परमेश्वरपरपदमथ चैकोनत्रिंशमीरयेन्ङेन्तम् ॥ ११६ ॥
अचेतनव्योमिपदे तथैव व्यापिन्नरूपिन् प्रथमेति तेजः ।
ज्योतिश्च सम्बोध्य वदेदचेतनादीनि संवीप्स्य पदानि सप्त॥
भूयोऽरूपानग्नेऽधूमाभस्माक्षराण्यनादेर्णम् ।
नानाना धूधूधू व्याहृतयस्तारपूर्विकास्तिस्रः ॥ ११८ ॥

यानि गुह्यमूर्ती च ङेन्ता मूर्तयः स्युः । 'ईशान*मूर्धाय' 'तत्पुरुषवक्त्राय' 'अघोरहृदयाय' 'वामदेवगुह्याय' 'सद्योजातमूर्तय' इति मूर्तिप्रधानानि पञ्च पदानि वदत्वित्यर्थः ॥ ११४ ॥

तारप्रणामद्वितयं 'ओं नमो नमः' इत्येकं पदम्, 'आय' इत्यर्णयुतं गुह्यातिगुह्यं 'गुह्यातिगुह्याये'ति, 'गोप्त्रे' इत्यर्णं ब्रूयात् । तदन्ते 'गोप्त्रे' इति पदमुक्त्वा पुनः 'अनिधनाय' सर्वविद्याधिपाये'ति च पदं वदतु ब्रूयात् । मन्त्री पदविभागज्ञः ॥ ११५ ॥

अथ 'सर्वयोगाधिगताये'ति, ज्योतिरित्यादिरूपाय 'ज्योतीरूपाये'ति च वदतु । अथ ङेन्तं परमेश्वरपरपदं 'परमेश्वरपराये'ति ॥ ११६ ॥

भूयः 'परमात्मन्' 'अचेतनव्योमि'पदे 'व्यापिन्' 'अरूपिन्' 'प्रथमा' 'तेजः' 'ज्योतिः' इत्यष्टौ पदानि संबोध्य संबोधनविभक्त्या सह, तत्राचेतनादीनि सप्त पदानि सवीप्स्य द्विरुक्त्या च सह वदेत् । 'परमात्मन् अचेतनाचेतन' इत्यादिरूपः ॥ ११७ ॥

भूयः 'अरूप' 'अनग्ने' 'अधूम' 'अभस्म' इत्यक्षराणि, 'अनादे' इत्यर्णं च, 'नानाना' इति, 'धूधूधू' इति च, तारपूर्विकाः प्रणवाद्याः तिस्रो व्याहृतयः 'ओं भूः' 'ओं भुवः' 'ओं स्वः' इति स्युः इति दश पदानि वदेदित्यर्थः ॥ ११८ ॥

---

१. 'मो नमः' घ. ङ. च. पाठः.

* 'मूर्ध्ने' इति केषाञ्चित् पाठः.

अनिधननिधने निधनोद्भवशिवशर्वान् क्रमात् ससम्बुद्धीन्।
तद्वन्महेश्वरमहादेवेत्युक्त्वा ततश्च सम्बुद्ध्या ॥ ११९ ॥

सद्भावेश्वर समहातेजोऽथो योगसंयुताधिपते।
मुञ्चप्रथमद्वितये शर्वयुगं भवयुगं भवोद्भव च ॥ १२० ॥

स्यात् सर्वभूतादिसुखप्रदान्ते
सर्वादिसान्निध्यकरेति वर्णम्।
सब्रह्मविष्ण्वन्तनिविष्टरुद्र-
परेति चानर्चितयुग्मकं च ॥ १२१ ॥

भूयोऽसंस्कृतपूर्वस्थितसाक्षिपदानि तुरुपतङ्गौ च।
पिङ्गं ज्ञानं शब्दं सूक्ष्मं ब्रूयान्नव वीप्सया ससम्बुद्धीनि ॥

अनिधननिधने इति निधनोद्भवशिवशर्वान् सम्बुद्धियुक्तान् 'अनिधन' 'निधन' 'निधनोद्भव' 'शिव' 'शर्व' इति संबुद्धयन्तानि पञ्च पदानीत्यर्थः, 'महेश्वर' इति 'महादेव' इति च तद्वत् संबुद्धयन्तमुक्त्वा ततः संबुद्ध्या संबोधनविभक्त्या सह 'सद्भावेश्वर' इति, समहातेजः 'महातेज' इत्येकं पदं, योगसंयुताधिपते 'योगाधिपते', मुञ्चप्रथमद्वितये 'मुञ्च मुञ्चे'ति 'प्रथमप्रथमे'ति च, शर्वयुगं 'शर्वशर्वे'ति, भवयुगं 'भवभवे'ति, भवोद्भव च चशब्द एवार्थे, 'भवोद्भव' इति। स्यादिति पदे पदे योज्यम्। सर्वभूतादिसुखप्रद 'सर्वभूतसुखप्रद' इति, सर्वादिसान्निध्यकर इति वर्ण 'सर्वसान्निध्यकर' इति, सब्रह्मविष्ण्वन्तनिविष्टरुद्रपर ब्रह्मसहितविष्णोरन्ते निवेशितरुद्रपर इति 'ब्रह्मविष्णुरुद्रपर'इत्यर्थः, अनर्चितयुग्मकम् 'अनर्चितानार्चित' इति द्वादश पदानि संबुद्ध्या सह उक्त्वा भूयः 'असंस्कृतपूर्वस्थितसाक्षि'पदानि 'तुरुपतङ्गौ' 'पिङ्गं' 'ज्ञानं' 'शब्दं' 'सूक्ष्मम्' इति नव पदानि ससंबुद्धीनि संबुद्धियुक्तानि वीप्सया द्विरुक्त्या सह 'असंस्कृतासंस्कृत' 'पूर्वस्थित पूर्वास्थित' 'साक्षिन्साक्षिन्' 'तुरुतुरु' 'पतङ्गपतङ्ग' 'पिङ्गपिङ्ग' 'ज्ञानज्ञान'

१. 'इत्थं सम्बुद्धयन्तौ परमात्ममहेश्वरौ महादेवः ॥ सद्भा', २. 'ङौ ।' ख. पाठः

शिवशर्वसर्वदेति [illegible] युगमथो शिवायेति ।
प्र[illegible]मेति व्योमव्यापी मनुः समुद्धार्यः ॥ १२३॥

प्रोक्तोऽयं मनुराट् चतुश्शतलिपिः पञ्चादिनादादिम-
द्दीर्घत्र्ययुदितं यदादिमपदं स्यात् सर्वदान्ते ततः ।
षड्वर्णं स्वयमेव शक्तिसुसमेतं शक्तिनादान्वितं
चास्य त्रीणि तदा पदान्यथ लिखाम्यङ्गानि चास्य क्रमात् ॥

'ओं नमः सर्वात्मने पराय परमेश्वरपराय योगाय योगसम्भवाय तुरुतुरु भवभव! भवोद्भव! वामदेव! सर्वकार्यप्रशमन! सदाशिव! नमोऽस्तु ते स्वाहा हृदयाय नमः[3]। ओं सुं[4] शिवशिव! नमो ब्रह्मशिरसे[5] शिरसे स्वाहा। ओं शिवहृदये! ज्वालिनि! स्वाहा । ज्वालिन्यै शिखायै वषट्। ओं,

शिवात्मकं महादेवं सर्वज्ञं प्रभुमव्ययम्।
आवर्तये महाघोरं कवचं पिङ्गलं शुभम् ॥ १२५ ॥

'शब्दशब्द' 'सूक्ष्मसूक्ष्म' इति ब्रूयात् । 'शिव' इति 'शर्व' इति 'सर्वदे'ति पदानि, अथो प्रणवनमोयुगम् 'ओं नमो नम' इति पदम्, 'शिवाय' इति, पुनरपि प्रणवनमोयुगलम् 'ओं नमो नम' इति पदमिति व्योमव्यापी मनुः समुद्धार्यः सम्यगुद्धरणीयः ॥ ११९—१२३ ॥

अत्र यदा पञ्चादिनादादिमद्दीर्घत्रय्युदितं पञ्चभिरादिभिः प्रणवैः नादेन प्रासादेन आदिना प्रणवेन च सहितेन दीर्घत्रयेण च उक्तं भवति 'ओं ओं ओं ओं ओं हौं ओं आं ईं ऊं' इत्यादिमपदं स्यात्, तदा सर्वदान्ते सर्वदेतिपदावसाने षड्वर्णं स्वयमेव, ततः शक्तिसुसमेतं भुवनेश्वरीयुक्तं षड्वर्णं, शक्तिनादान्वितं भुवनेश्वरीप्रासादाभ्यां युक्तं षड्वर्णं चास्य मन्त्रस्य त्रीणि पदानि स्युः । एतस्मिन् पक्षे अयं मनुराट् चतुःशतलिपिः प्रोक्तः । अथास्य मन्त्रस्याङ्गानि क्रमाल्लिखामि ॥ १२४ ॥

अङ्गमन्त्रान् लिखति — ओं नमः सर्वात्मने परायेत्यादि ॥ १२५॥

---

१. 'कश्चाणुरर्णं च' ख. पाठः. २. 'त्॥ न', ३. 'सुं', ४. 'स स्वा' ग. पाठः. ५. 'म्म' च. पाठः.

आयाहि पिङ्गल! महाकवच! शिवाज्ञया हृदयं बन्ध बन्ध ज्वलज्वल घूर्णघूर्ण किरिकिरि[1][2] सूक्ष्मसूक्ष्म वज्रधर वज्रपाश वज्रशरीर मम शरीरमनुप्रविश्य सर्वदुष्टान् स्तम्भयस्तम्भय हुंफट् स्वाहा। पिङ्गलाय कवचाय हुं[3]। ओं ह्रीं जुं[4] सः ज्योतीरूपाय नेत्रत्रयाय वौषट्। ओं ह्रीं स्फुरस्फुरेत्याद्यघोरान्तेऽस्त्राय फट्॥

वसिष्ठोऽनन्तगायत्री चर्ष्याद्याः परमेश्वरः।
अमोघत्रिष्टुभौ व्योमव्यापिरुद्रः परैः स्मृताः॥ १२६॥

तारं स्पर्शाष्टममपि सविन्दुश्रवोऽर्णं ससर्गं
सार्णं मृत्युञ्जयमृषिमुखानस्य चाहुः कहोलम्।
गायत्रीं दैव्युपपदसमेतां च मृत्युञ्जयाद्यं
रुद्रं चाङ्गान्यपि सलवदीर्घेण शुक्लाक्षरेण॥ १२७॥

तारं श्रीं[5] पशु हुंफट् पाशुपतास्त्रं तदङ्गकान्यर्णैः।
ऋष्याद्याः स्युरघोरो गायत्री चास्य पाशुपतरुद्रः॥ १२८॥

अस्य मन्त्रस्य ऋष्यादीनाह — वसिष्ठ इति। वसिष्ठः अनन्तगायत्री परमेश्वरश्च ऋष्याद्याः। पक्षान्तरमाह — अमोघ इति। परैः अमोघः ऋषिः त्रिष्टुप् छन्दः व्योमव्यापिरुद्रो देवता इति स्मृताः॥ १२६॥

मृत्युञ्जयमन्त्रमुद्धरति — तारमिति। तारं प्रणवं, सविन्दुश्रवः बिन्दुना दक्षिणश्रोत्रेण उकारेण च युक्तं स्पर्शाष्टममर्णं, ससर्गं विसर्गसहितं सार्णं 'स' इत्यक्षरं 'ओं जुं सः' इति मृत्युञ्जयमन्त्रमाहुः बुधाः। अस्य मन्त्रस्य कहोलं, दैव्युपपदसमेतां 'देवी' इत्युपपदयुक्तां गायत्रीं, मृत्युञ्जयाद्यं रुद्रं च ऋषिमुखान् ऋषिच्छन्दोदेवताः आहुः। सलवदीर्घेण बिन्दुदीर्घाभ्यां सहितेन शुक्लाक्षरेण सकारेण, 'सां सीं' इत्यादि, अङ्गानि चाहुः॥ १२७॥

पाशुपतमुद्धरति — तारमिति। तारं ओं, 'श्रीं[5] पशु हुंफट्' इति पाशुपतास्त्रम्। तस्यार्णैः तदङ्गकानि स्युः। अस्य अघोरः गायत्री पाशुपतरुद्रश्च ऋष्याद्याः स्युः॥ १२८॥

१.,२. 'त' क. पाठः. ३. 'ओं जुं' ख पाठः. ४. 'जुं' ग. पाठः. ५. 'श्रीं' ङ. पाठः.

तारान्ते शक्तिमुक्त्वा स्फुरपदयुगलं प्रस्फुरद्वन्द्वघोर-
द्वन्द्वे भूयस्तरार्णं तनुपदयुतरूपं चटद्वन्द्वकं च ।
प्रार्णप्रोद्यच्चटद्वन्द्वकमथ कहयुग्मं वमद्वन्द्वबन्ध-
द्वन्द्वान्ते घातयद्वन्द्वमपि वदतु हुंफट् तदाघोरमस्त्रम् ॥

ऋष्याद्याः स्युरघोरत्रिष्टुबघोरादिरुद्रकाश्चास्य ।
पञ्चषडाशादशवसुभिहिरार्णैर्मन्त्रजैस्तदङ्गानि ॥ १३० ॥

स्पर्शान्त्याष्टमवर्णावन्त्यार्णं च त्रयं कृशानुस्थम् ।
षष्ठस्वरलवयुक्तं त्रिवर्णकं बीजमुख्यमनुमाहुः ॥ १३१ ॥

अघोरास्त्रमुद्धरति — **तारान्त** इति । तारान्ते शक्तिमुक्त्वा 'ओं ह्रीं' इत्युक्त्वा स्फुरपदयुगलं 'स्फुरस्फुर' इति, प्रस्फुरद्वन्द्वघोरद्वन्द्वे 'प्रस्फुर-प्रस्फुर' 'घोरघोर' इति, भूयः तरार्णं 'तर' इति, तनुपदयुतरूपं 'तनुरूप', चटद्वन्द्वकं 'चटचट' इति, प्रार्णप्रोद्यच्चटद्वन्द्वकं 'प्रचटप्रचट' इति, कहयुग्मं 'कहकह' इति, वमद्वन्द्वबन्धद्वन्द्वान्ते 'वमवम' 'बन्धबन्ध' इत्युक्त्वा तदन्त घातयद्वन्द्वमपि 'घातयघातय' इति, हुंफडिति च वदतु । तद् आघोरमस्त्रं स्यात् ॥ १२९ ॥

अस्य अघोरत्रिष्टुबघोरादिरुद्रकाः अघोर ऋषिः त्रिष्टुप् छन्दः अघोर-रुद्रो देवता इति ऋष्याद्याः स्युः । अस्याङ्गान्याह — पञ्चेति । मन्त्रजैः मन्त्राज्जातैः पञ्चषडाशादशवसुभिहिरार्णैः पञ्चभिः 'ह्रीं स्फुरस्फुर' इत्यक्षरैः, षड्भिः 'प्रस्फुरप्रस्फुर' इत्यक्षरैः, दशभिः 'घोरघोर तर तनुरूप' इत्यक्षरैः, दशभिः 'चटचट प्रचटप्रचट' इति, अष्टभिः 'कहकह वमवम' इति, द्वादशभिः 'बन्धबन्ध घातयघातय हुंफट्' इत्यक्षरैः तदङ्गानि स्युः ॥ १३० ॥

बीजमुख्यमन्त्रमुद्धरति — **स्पर्शेति** । स्पर्शान्त्याष्टमवर्णौ मकारजकारौ, अन्त्यार्णः क्षकारश्च, एतत्त्रयं कृशानुस्थं रेफोपेतं षष्ठस्वरलवयुक्तम् ऊकारेण बिन्दुना च युक्तम् 'म्रूं ज्रूं क्ष्रूं' इति त्रिवर्णकं बीजमुख्यमनुम् आहुः गुरवः ॥ १३१ ॥

१. 'श्रीं' इति व्याख्याकोशपाठः.

स्याद्विच्छिखेछिदिक्षिकृदिति तारायष्टवर्णका क्षुरिका।
तारयुगमध्यसंस्थो हुंफट्कारः स्मृतश्च वज्रमनुः ॥१३२॥
तारः सशक्तिवाग्भवमन्मथबीजो विहायसा सौः स्यात्।
प्रारूढतारको हंसोऽष्टार्णो वर्णितोऽणुरौमेयः ॥ १३३ ॥
नमोऽस्तु स्थाणुभूताय ज्योतिर्लिङ्गावृतात्मने ।
चतुर्मूर्तिवपुश्छायाभासिताङ्गाय शम्भवे ॥ १३४ ॥
एष स्थाणुमनुः स्याज्ज्योतिः स्थानेऽत्र बाणलिङ्गाद्यम् ।
तत्तत्पदं सुयोज्यं मन्त्रितमैः शेषषण्मनूद्धारे ॥ १३५ ॥
अथ दुर्गार्या देवी भगवत्यपि कन्यका चतुर्थ्यन्ताः स्युः।
दुर्गाणवो नमोन्ताः पञ्चैताः सेदवेतजार्णैः सलवैः ॥

तारादि चिच्छिखेछिदिक्षिकृदिति क्षुरिका अष्टवर्णका स्यात् । तार युगमध्यसंस्थः हुंफट्कारः 'ओं' हुंफट् ओं' इति वज्रमनुः स्मृतः ॥ १३२ ॥

औमेयमष्टाक्षरमुद्धरति — तार इति । तारः सशक्तिवाग्भवमन्मथबीजः शक्तिः भुवनेश्वरी, वाग्भवः ऐंकारः, मन्मथः क्लींकारः, विहायसा हकारेण सह सौः इति 'ह्सौः' इत्यर्थः, प्रारूढतारकः प्र इत्यस्मिन्नारूढस्तारः 'प्रों' इति, 'हं स' इति स्वरूपम् 'ओं ह्रीं ऐं क्लीं ह्सौः प्रों हं स' इति औमेयः अष्टाक्षरो मन्त्रः वर्णित उक्तः॥ १३३ ॥

स्थाणुमन्त्रसप्तकं वदन् अत्रान्त्यस्योपचारत्वेन प्रसिद्धत्वात् तं मनुं पठति — नमोऽस्त्विति ॥ १३४ ॥

एष स्थाणुमनुः स्यात् । अत्र मन्त्रे ज्योतिःस्थाने शेषषण्मनूद्धारे मन्त्रितमैर्बाणलिङ्गाद्यं 'बाणलिङ्गावृतात्मने' इत्याद्यं तत्तत्पदं सुयोज्यम् । कथं, बाणलिङ्गावृतात्म, तथा शम्भुलिङ्गा, स्वयम्भूलिङ्गा, परलिङ्गा, परात्परलिङ्गा ।

नमोऽस्तु सकलाधारशक्त्याधाराय शम्भवे ।
निराधाराय नित्याय ज्योतिर्लिङ्गावृतात्मने ॥

इति । एतेषां पुष्पाञ्जल्यादौ विनियोगः । शङ्करनारायणे 'जितं ते' इत्येष एवोपचारमन्त्रः ॥ १३५ ॥

दौर्गान् मन्त्रानुद्धरति — अथेति । सलवैः बिन्दुसहितैः सेदवेतजार्णैः 'सेदवेतजा' इत्यक्षरैरुपलक्षिताश्चतुर्थ्यन्ता नमोन्ताश्च दुर्गा आर्या देवी भगवती

---

१. 'मृ' ग. पाठः. २. 'तथा बा' ङ. पाठः.

उपचारमनुः शक्तिः प्रणवद्वयमध्यगा।
तारं नमो भगवति! दुर्गे! दुर्गतितारिणि! ॥ १३७ ॥
माये! महादिमायेऽथ प्रोदीर्य च फणावले।
महिषासुरशब्दान्ते विनाशिनिपदं वदेत् ॥ १३८॥
दुष्टाद् भयंकरीत्युक्त्वा विन्ध्यादिनिलयेपदम्।
जहीति च सुमर्दिन्यप्यथ देवासुरेत्यपि ॥ १३९ ॥
दैत्यपूजित इत्युक्त्वा वरदे नादिरायणि।
दामोदरप्रिये ह्रीं ह्रीं हूं हूं भूतग्रहेति च ॥ १४० ॥
वेतालदुष्टराक्षसपिशाचांस्त्रासयद्वयम्।
बन्धद्वयं मारययुक् तथा भक्तादिवत्सले ॥ १४१ ॥
भक्तप्रिये परबलमथिनीत्यथ शक्तिति।
निकृन्तनीति सौभाग्यप्रदे भूयो जयप्रदे ॥ १४२ ॥

कन्यकापि एताः पञ्च दुर्गाणवः। 'ओं सें दुर्गायै नमः' 'ओं दं आर्यायै नमः' 'ओं वें देव्यै नमः' 'ओं तं भगवत्यै नमः' 'ओं जां कन्यकायै नमः' एता इत्यर्थः ॥ १३६ ॥

तत्र प्रणवद्वयमध्यगा शक्तिः भुवनेश्वरी 'ओं ह्रीं ओं' इत्युपचारमनुः स्यात्। विद्यामन्त्रमुद्धरति — तारमिति। तारम् 'ओं', 'नमो भगवति! दुर्गे! दुर्गतितारिणि! माये!' इति प्रोदीर्य, अथ महा इत्यादिमाये 'महामाये' इति, 'फणावले' इति च प्रोदीर्य, 'महिषासुर' इति शब्दान्ते 'विनाशिनी'ति पदं वदेत्। दुष्टात् दुष्टशब्दाद् भयंकरीति 'दुष्टभयंकरी'त्युक्त्वा, विन्ध्यादिनिलये 'विन्ध्यनिलये' इति पदं, 'जही'ति पदं, 'सुमर्दिनी'त्यपि पदम्, अथ देवासुरेति दैत्यपूजित इति 'देवासुरदैत्यपूजित' इत्युक्त्वेत्यर्थः, वरदे ना इत्यादि रायणि 'वरदे नारायणी'त्यर्थः। 'दामोदरप्रिये ह्रीं ह्रीं हूं हूं भूतग्रहे' इति च वर्णानुक्त्वा, 'वेतालदुष्टराक्षसपिशाचान्' इत्युक्त्वा, त्रासयद्वयं 'त्रासयत्रासये'ति, बन्धद्वयं 'बन्धबन्धे'ति, मारययुक् 'मारयमारये'ति, तथाच भक्तादिवत्सले 'भक्तवत्सल' इत्यर्थः, 'भक्तप्रिये परबलमथिनी'त्युक्त्वा, अथ शक्तिति निकृन्तनीति

---

१. 'रि' क. ग. पाठः. २. 'रि' ख. ग. घ. च. पाठः. ३. 'ये माये इ' ब. ङ. च. पाठः.

वित्तप्रदे यशोवत्यायुष्यप्रद इति क्रमात् ।
कीर्त्तिप्रदे श्रीप्रदे सर्वप्रदे शान्त्यपि प्रदे ॥ १४३ ॥
महाभूते महाबलेऽथाम्बरं बिन्दुना सह ।
आद्येन च द्वितीयेन तृतीयेन स्वरेण च ॥ १४४ ॥
चतुर्थेन च संयुक्तं शक्तिबीजं त्रिधोद्धरेत् ।
महामायेति नत्यन्तं विद्यामन्त्र उदाहृतः ॥ १४५ ॥
ओङ्काराद्यं दुर्गारूपिणि च कुमार्युपेतरूपिणि च ।
आर्यावर्तिनि मायारूपिण्यपि चोत्सवादिवासिनि च ॥
अथ यागभक्तकारिणि सर्वादिकमन्त्रपूर्वकव्यापिनि च ।
सर्वादिकर्मफलदायिनि सर्वादिक्रियादिवर्तिनिपदं च॥१४७॥
सर्वादिदोषमर्दिन्यथ सर्ववरादिदायिनीति वदेच्च ।
भगवति ततः प्रसादं पुनरापादयतु चेति यागमनुः स्यात् ॥

'शत्रुनिकृन्तनी'त्यर्थः, 'सौभाग्यप्रदे' इति, 'जयप्रदे' इति, 'वित्तप्रदे' इति, 'यशोवती'ति, 'आयुष्यप्रदे' इति, 'कीर्त्तिप्रदे' इति, 'श्रीप्रदे' इति, 'सर्वप्रदे' इति पदानि क्रमादुक्त्वा, शान्त्यपि प्रदे 'शान्तिप्रदे' इत्यर्थः, 'महाभूते' 'महाबले' इति पदद्वयमुक्त्वा, अथ अम्बरं हकारं प्रत्येकं बिन्दुना आद्येन द्वितीयेन तृतीयेन चतुर्थेन च स्वरेण संयुक्तं 'हं हां हिं हीं' इति चत्वारि बीजान्युक्त्वेत्यर्थः, त्रिधा त्रिकृत्वः शक्तिबीजं 'ह्रीं ह्रीं ह्रीं' इत्युद्धरेत् । 'महामाये' इति पदं नत्यन्तं 'नम' इत्यन्ते युतं विद्यामन्त्र उदाहृतः । अस्य मन्त्रस्य पुष्पावरणादौ विनियोगः ॥ १३७ – १४५ ॥

शान्तिहोमे प्रोक्तं यागमन्त्रमुद्धरति — **ओङ्काराद्यमिति** । ओङ्कारमाद्यं यथा भवति तथा 'दुर्गारूपिणी'ति पदं, कुमार्युपेतरूपिणीति 'कुमारीरूपिणी'त्यर्थः, 'आर्यावर्तिनि' 'मायारूपिणी'ति द्वे पदे, उत्सवादिवासिनीति 'उत्सववासिनी'त्यर्थः, अथ 'यागभक्तकारिणी'ति पदं, सर्वादिकमन्त्रपूर्वव्यापिनीति 'सर्वमन्त्रव्यापिनी'त्यर्थः, सर्वादिकर्मफलदायिनि 'सर्वकर्मफलदायिनी'त्यर्थः, सर्वादिक्रियादिवर्तिनिपदं चेति 'सर्वक्रियावर्तिनी'त्यर्थः, सर्वादिदोषमर्दिनीति 'सर्वदोषमर्दिनी'त्यर्थः, सर्ववरादिदायिनीति 'सर्ववरदायिनी'त्यर्थः, 'भगवती'ति च वदेत् । ततः 'प्रसादमि'ति, पुनः 'आपादयतु' (चिः)चे)ति च वदेदिति यागमनुः स्यात् ॥ १४६ — १४८ ॥

भूतिः श्रीः पिङ्गलो बभ्रुर्भूतिर्विष्णुः सनातनः ।
अग्निमारुतयोर्भूतिर्भूतिः सेन्द्राश्च देवताः ॥ १४९ ॥

प्रणवनतिषण्मुखायेत्यपरो मनुरौपचारिकः स्कन्दे ।
[illegible]ष्यृष्याद्यं मन्त्राणैः सलवकैः षडङ्गविधिः ॥१५०॥
सनत्कुमारस्कन्देन्द्रविशाखाः षष्ठिषण्मुखौ ।
[illegible]ण्मन्त्राः षण्मुखे प्रोक्ताश्चतुर्थ्यन्ता नमोन्विताः ॥ १५१ ॥
स्कन्दो बाणो हेमचूडो भद्रसेनो भवस्तथा ।
भवपुत्रोऽन्नाद्यशीलः कुक्कुटध्वज एव च ॥ १५२ ॥
मयूरवाहनगुहौ कुमारः सनदादिकः ।
महासेनश्च सेनान्यां नामद्वादशकं स्मृतम् ॥ १५३ ॥
आद्यं दीर्घयुगं सबिन्दु सकलाणुर्गृं गुहायेत्यणु-
र्नत्यन्तो महदाह्वयोऽब्धिनवनागैकोनविंशाः स्पृशः ।

पुनः कलशाभिषेके प्रस्तुतं भूतिश्रीमन्त्रं पठति—भूतिः श्रीरिति॥ १४९॥

अथ स्कान्दान् मन्त्रानुद्धरति—प्रणवेति । स्कन्दे प्रणवनतिषण्मुखायेति 'ओं नमः षण्मुखाये'ति अपरः अन्यः (मनुः) मूलमन्त्रः औपचारिकः उपचारसंज्ञश्च । इह ऋष्याद्यं प्राग्वत् पूर्वमन्त्रोक्तवत् । सलवकैः मन्त्राणैः 'नमः षण्मुखाये'ति षड्भिरक्षरैः षडङ्गविधिः स्यात् ॥ १५० ॥

षण्मन्त्रान् कथयति—सनत्कुमारेति । षण्मुखे नमोन्विताः 'नम' इति युक्ताश्चतुर्थ्यन्ताः सनत्कुमाराद्याः षण्मन्त्राः प्रोक्ताः । अत्र चतुर्थीनमोयुक्तत्वं द्वादशनाममन्त्राणामप्युपलक्षणम् ॥ १५१ ॥

द्वादशनामानि कथयति—स्कन्दो बाण इति । 'अन्नाद्यशीलाय नमः', सनदादिकः कुमारः 'सनत्कुमाराय नम' इति । इति नामद्वादशकं नाम्नां द्वादशकं स्मृतम् उक्तमित्यर्थः ॥ १५२, १५३ ॥

सकलमन्त्रादिकमुद्धरति—आद्यमिति । सबिन्दु बिन्दुसहितम् आद्यं दीर्घयुगम् 'आं ईं' इति सकलाणुः । नत्यन्तः 'गृं गुहाये'ति महदाह्वयः अणुः महन्मन्त्रः । अब्धिनवनागैकोनविंशाः अब्धिश्चतुर्थः धकारः नव नवमः ञकारः नागोऽष्टमो जकारः एकोनविंशो धकारः एते स्पृशः स्पर्शाक्षराः

---

१. 'आ', २. 'ञावि', ३. 'ष्टि' ख. पाठः.

साद्यद्रीन्दुकरस्वरा विषयुतो यान्तोऽन्त्यवर्गे तुरी-
यार्णं तत्प्रथमौयुतं सलवषट्कं बीजमन्त्रो गुहे ॥ १५४ ॥

विघ्नविनायकवीराः शूरो वरदश्च हस्तिमुखनामा ।
षण्मन्त्रा गणपे स्युः सम्प्रोक्ता डेनमोन्विताः क्रमशः ॥१५५॥

वज्रदन्तो गजास्यश्च भीमश्च महिषास्यकः ।
विघ्नो विनायको वीरः शूराख्यः सर्पमेखलः ॥ १५६ ॥
शूर्पकर्णो नागदन्ती ततो रुद्रास्यसम्भवः ।
नामानि द्वादशैतानि कीर्तितानि गणेशितुः ॥ १५७ ॥

रेवन्ताय महाशास्त्रे गोप्त्रे च प्रभवे तथा ।
दीप्त्रे प्रशास्त्रे चार्ये स्युः षण्मन्त्रा [3]नमसा युताः ॥१५८॥

गोप्ता च पिङ्गलाक्षश्च वीरसेनश्च [3]शाम्भवः ।
आर्यः शास्ता च गोपालो गुहोऽथ भवपुत्रकः ॥ १५९ ॥
[4]नामानि शान्तभूतेशभूतिदा द्वादशार्यके ।

क्रमेण साद्यद्रीन्दुकरस्वराः अद्रिः सप्तमः ऋकारः पुनरप्यद्रिः ऋकारः इन्दुः अकारः कर आकारः एतैः स्वरैर्युक्ताः विषयुतो यान्तः विषं मकारः यान्तो रेफः, अन्त्यवर्गे यादिवर्गे तुरीयार्णं वकारः तत्प्रथमस्तस्य वर्गस्य प्रथमः यकारः, ओयुतम् ओकारयुतं, सलवषट्कं प्रत्येकं बिन्दुसहितमेतत् षट्कं 'घृं झृं जं धां म्रं व्यों' इति गुहे बीजमन्त्रः ॥ १५४ ॥

वैघ्नान् मन्त्रानाह — विघ्नेति । गणपे डेनमोन्विताः एते विघ्नाद्याः षण्मन्त्राः प्रोक्ताः स्युः ॥ १५५ ॥

द्वादशमन्त्रानाह — वज्रदन्त इति । गणेशितुः एतानि द्वादश नामानि कीर्तितानि उक्तानि ॥ १५६, १५७ ॥

अथ शास्तृमन्त्रानाह — रेवन्तायेति । आर्ये (स!)नमसा युताः 'रेवन्ताय' इत्याद्याः षण्मन्त्राः स्युः ॥ १५८ ॥

द्वादशनामान्याह — गोप्तेति ॥ १५९[1/2] ॥

---

१. 'रेवन्तश्च तथा शास्ता गोप्ता च प्रभुरेव च । दीप्ता चैव प्रशास्ता च षण्मन्त्राः शास्तरीरिताः ॥' ख. पाठः. २. 'नामसंयु' ग. पाठः. ३. 'स' क. पाठः. ४. शास्तुर्द्वादशनामानि शान्तभूतेशभूतिदाः । आ' ख. पाठः.

आर्यः शास्ता गुहासन्नः सेनानीर्भूतवल्लभः ।
रुद्रजो रूपवान् कामी वरदो लोकपूजितः ॥ १६० ॥
नीलाश्वः श्वेतमातङ्गः श्यामी पीतानुलेपनः ।
रुमालाधरः शूरो मायो मातृगणप्रियः ॥ १६१ ॥
कालवासा गणाध्यक्षः खड्गहस्तो धनुर्धरः ।
स जायो जनावेशः साधुः संसाररक्षकः ॥ १६२ ॥
षड्विंशतिरिमे मन्त्रा ङेनमोन्ताश्च तेऽखिलाः ।
'ओं श्रीं ह्रीं क्ष्रीं ह्रूं घ्रं शम्बरकुमाराय पद्मिने स्वाहा ।
बीजमन्त्रः समुद्दिष्टः सम्यक् सप्तदशाक्षरः ॥ १६३ ॥
प्राणापानव्यानोदानसमानाः समीरिता ङेन्ताः ।
वाहान्ताः सकलेषु प्राणाद्यनिलाणवो निवेद्यविधौ ॥१६४॥
टान्तामृतौलवनमस्सहितं परायाः
थाबात्मनार्णमपि टान्ततुरीयमूर्तिम् ।

षड्विंशतिनामान्याह — आर्य इति । इमे षड्विंशतिर्मन्त्राः । ते अखिलाः द्वादशमन्त्राः षड्विंशतिमन्त्राश्च ङेनमोन्ताः स्युः ॥ १६०–१६३ ॥

बीजमन्त्रः सप्तदशाक्षर इति वदन् पूर्वं तमेव लिखति — ओं श्रीमित्यादि । अस्य बीजमन्त्रस्य कौतुकबन्धने विनियोगः ॥

अथ सामान्यमन्त्रानुद्धरति — प्राणेति । सकलेषु निवेद्यविधौ ङेन्ताः चतुर्थ्येकवचनान्ताः स्वाहान्ताश्च प्राणापानव्यानोदानसमानाः 'प्राणाय स्वाहा' इत्याद्याः प्राणाद्यनिलाणवः प्राणाहुतिमन्त्राः समीरिताः ॥ १६४ ॥

निवेद्यार्पणमन्त्रमुद्धरति— टान्तेति । टान्तामृतौलवनमःसहितं टान्तः ठकारः अमृतं वकारः, औकारः स्वयमेव लवो बिन्दुः नम इति एभिर्युक्तं (वौं ? ठौं) नम इति, 'पराय' इति स्वरूपम् । अथ 'अबात्मना इत्यर्णमपि, टान्ततुरीयमूर्तिं टान्तां तृतीयैकवचनान्तां तुरीयमूर्तिं अनिरुद्धादिकां मूर्तिम्

---

१. 'लाः ॥ प्राणा' ङ. पाठः २. 'क्ष्रौं' घ. पाठः ३. 'ह्रूं घ्रं श' ग. पाठः. ४. 'न्त्रं', ५. 'ह्रूं', ६. 'रम्' क. पाठः. ७. 'म्त्रं', ८. 'मि', ९. 'ङे' क. घ. ङ. च. पाठः.

उक्त्वा निवेद्यमिति वक्तु सकल्पयामि-
वर्णं निवेद्यगरसार्पणमन्त्र एषः ॥ १६५ ॥

तत्तद्भूतनिदानबीजहृदयोपेतं परायाक्षरं
चाबाद्यर्णयुतात्मनार्णसहितं टान्तस्वमूर्त्याह्वयम् ।
प्रब्रूयाज्जलपूर्वतत्तदुपहाराख्यां तथा कल्पया-
म्यन्तां चेत्युदिता जलादिरसदत्त्यै पञ्च मन्त्राः परे ॥

गुह्यातिगुह्यगोप्तस्त्वं गृहाणास्मत्कृतं जपम् ।
सिद्धिर्भवतु मे देव ! त्वत्प्रसादाद्धृदि स्थिता[1] ॥ १६७ ॥

प्रीणातु भगवान् विष्णुः कर्मणानेन शाश्वतः ।
आद्योऽर्पणे जपस्याणुः प्रीणात्वाद्यश्च कर्मणः ॥ १६८ ॥

उक्त्वा कल्पयामीति वर्णैः सहितं निवेद्यमिति स्वरूपं वक्तु ब्रवीतु '(वौं ? ठ्वौं) नमः परायाबात्मनानिरुद्धेन निवेद्यं कल्पयामि' इत्यादिः । एषः निवेद्यगरसार्पणमन्त्रः निवेद्यगतस्य रसस्यार्पणे मन्त्रः ॥ १६५ ॥

जलादिरससमर्पणार्थं पञ्च मन्त्रानुद्धरति — **तत्तद्भूतेति** । तत्तद्भूतनिदानबीजहृदयोपेतं तस्य तस्य भूतस्याबादेः निदानमादिकारणं वं इत्यादिकेवलबीजं, हृदयं नम इति, ताभ्यां युक्तं परायेत्यक्षरम्, अबाद्यर्णयुतात्मनार्णसहितम् अप्पृथिव्यादिवर्णैः सहितात्मनाक्षरैः युक्तं, टान्तस्वमूर्त्याह्वयं तृतीयैकवचनान्तस्वस्वमूर्तिनामयुक्तं, जलपूर्वतत्तदुपहाराख्यां जलं गन्धं पुष्पं धूपं दीपम् इति तत्तत्पूजासाधनाभिधां तथा कल्पयामीत्यन्तां च तामाख्यां प्रब्रूयात् । 'वं नमः परायाबात्मनानिरुद्धेन जलं कल्पयामि', 'लं नमः पराय पृथिव्यात्मना नारायणेन गन्धं कल्पयामि', 'हं नमः परायाकाशात्मना वासुदेवेन पुष्पं कल्पयामि', 'यं नमः पराय वाय्वात्मना सङ्कर्षणेन धूपं कल्पयामि', 'रं नमः परायाग्न्यात्मना प्रद्युम्नेन दीपं कल्पयामि' इति विष्णौ । शिवादिषु वामदेवादयो मूर्तिमन्त्राः । एते जलादिरसदत्त्यै जलादीनां रसदानाय परे निवेद्यादन्ये पञ्च मन्त्रा उदिता उक्ताः ॥ १६६ ॥

जपसमर्पणमन्त्रं कर्मसमर्पणमन्त्रं च पठति — **गुह्यातीति** । तयोर्वि-

---

१. 'भक्तिर्भ' ङ. पाठः. २. 'तः' ख. पाठः.

इतः पूर्वं प्राणबुद्धिदेहधर्माधिकारतः ।
जाग्रत्स्वप्नसुषुप्त्यन्तेऽवस्थासु मनसेत्यपि ॥ १६९ ॥
वाचेति कर्मणेत्युक्त्वा हस्ताभ्यामिति कीर्तयेत् ।
पद्भ्यामित्युदरेणेति शिश्नेत्यपि च यत् स्मृतम् ॥ १७० ॥
यदुक्तं यत् कृतमिति तत्सर्वं ब्रह्मवर्णकान् ।
अर्पणं भवतु स्वाहेत्यपि ब्रह्मार्पणे मनुः ॥ १७१ ॥
सर्वाद्यादिषु तत्त्वकेषु निजमूर्त्यन्तेषु गन्धादित-
स्तन्मात्रोल्लसितस्वरूपपदमायान्तं तदन्ते पुनः ।
ङेन्तात्मान्तसमानपूर्वकनिजप्राणान् नमोन्तान् वदे-
देवं संहृतिपञ्चतत्त्वमनवः प्रोक्ता विशेषान्विताः ॥ १७२ ॥

भागमाह — आद्य इति । जपस्यार्पणे आद्यः अणुः, कर्मणः अर्पणे प्रीणात्वाद्यः अणुः स्यात् ॥ ११७,१६८ ॥

ब्रह्मार्पणमन्त्रमुद्धरति — इतः पूर्वमित्यादि । 'इतः पूर्वं प्राणबुद्धिदेहधर्माधिकारतः जाग्रत्स्वप्नसुषुप्ति' इत्यन्ते 'अवस्थासु' 'मनसा' इति 'वाचा' इति 'कर्मणा' इत्युक्त्वा 'हस्ताभ्यां' 'पद्भ्याम्' 'उदरेणे'ति 'शिश्ना' इत्यपि 'यत् स्मृतं' 'यदुक्तं' 'यत् कृतम्' इति 'तत्सर्वं ब्रह्म' इति वर्णकान् 'अर्पणं भवतु स्वाहा' इत्यपि कीर्तयेदिति ब्रह्मार्पणे मनुः स्यात् ॥ १६९–१७१ ॥

निष्कामणविधिमधिकृत्य 'विशेषान्वितैः स्वैर्हुनेच्चेपुतत्त्वैः' इत्युक्तं पञ्चतत्त्वानां विशेषवत्त्वमाह—सर्वाद्यादिष्विति । सर्वाद्यादिषु 'लां नमः पराय सर्वात्मने' इत्यादिविष्ण्वादिषूक्तेषु पञ्चसु तत्त्वेषु निजमूर्त्यन्तेषु नारायणादिस्वस्वमूर्तिशब्दान्तेषु, मूर्तीनां चतुर्थ्येकवचनान्तत्वमपि ग्राह्यं, 'लां नमः पराय सर्वात्मने नारायणाय' इत्याद्यन्तेषु गन्धादितत्तन्मात्रोल्लसितस्वरूपपदं गन्धादिशब्दैः तन्मात्रशब्देन च युक्तं स्वरूप इति पदम् आयान्तं च 'गन्धतन्मात्रस्वरूपाये'त्यादि सिद्धं भवति । पुनस्तदन्ते ङेन्तात्मान्तसमानपूर्वकनिजप्राणान् समानादीन् निजान् निजान् प्राणानात्मान्तान् ङेन्तांश्च 'समानात्मने' इत्यादीनित्यर्थः, तान् नमोन्तांश्च वदेत् । एवं सर्वदेवेषु विशेषान्विताः संहृतिपञ्चतत्त्वमनवः प्रोक्ताः । सूत्रच्छेदे तेषां हुंफडन्तत्वमपि ग्राह्यम् ॥ १७२ ॥

१. 'नुः ॥ अन्योन्य' ख. पाठः. २. 'न्मन्त्रोल्ल' क. पाठः. ३. 'त् रहस्यभूतानां ॥' घ. ङ. च. पाठः.

तारं शक्तिसनादयादिमनुवर्णं कादितत्त्वाक्षरं
नत्यन्तेऽथ शिवाय चेति गिरिशे ब्रह्मादि ङेसंयुतम् ।
ङेन्तोर्व्याद्यधिपत्युपर्यभिवदेद् ध्लामादिराजन्निवृ-
त्त्याद्युद्भिन्नकलात्मनेऽमिति चास्त्रान्तं विशिष्टोद्धृतौ ॥
स्थूलात्मतोन्मेषविधायिका चि-
दावाहनासुन्यसनादि कृत्वा ।
क्रिया स्वनिद्राघटयुक्तितोऽत्र
कार्या कुमार्यार्यकयोः स्मृतं तत् ॥ १७४ ॥

शिवे विशेषेण विशेषपञ्चतत्त्वान्युद्धरति — **तारमिति** । गिरिशे विशिष्टोद्धृतौ विशेषवत्त्वेनोद्धारे तारं, शक्तिसनादयादिमनुवर्णं शक्तिः भुवनेश्वरी सनादं नादसहितं नादः प्रासादः यादिमनुवर्णं यकारादिपञ्चाक्षरस्य प्रतिलोमवर्णेष्वेकैकं, कादितत्त्वाक्षरं कवर्गस्य स्वस्वपञ्चभूतसम्बन्ध्यक्षरम् 'ओं ह्रीं हौं यं कं' इत्यादि पञ्च पञ्च बीजानि सिद्धानि, नत्यन्तेऽथ शिवायेति 'नमः शिवाये'त्यर्थः, ब्रह्मादि ङेसंयुतं चतुर्थ्येकवचनान्तानि 'ब्रह्मणे' इत्याद्यधिदैवतनामानि, ङेन्तोर्व्याद्यधिपत्युपरि चतुर्थ्येकवचनान्तपृथिव्यादि(भिः?) सहिताधिपतिशब्दस्योपरि 'पृथिव्यधिपतये' इत्यादीनामुपरीत्यर्थः ध्लामादिराजन्निवृत्त्याद्युद्भिन्नकलात्मनेहुमिति 'ह्लां' इत्यादिबीजैः सह 'निवृत्त्या'दिभिर्युक्तं 'कलात्मने हुं' इति वर्णान् अस्त्रान्तं फडन्तं यथा भवति तथाभिवदेत् । अत्रापि हुंफडन्तत्वं सूत्रच्छेद एव ग्राह्यम् ॥ १७३ ॥

एवं रहस्यभूतानि विशेषपञ्चतत्त्वान्यभिधाय गुरूपदेशादेवावगम्यमतिगुह्यं जीवावाहनस्वरूपमपि किञ्चिदुन्मीलयति — **स्थूलात्मतेति** । चिदावाहनासुन्यसनादि कृत्वा चिदावाहना जीवावाहना असुन्यसनं प्राणादीनां न्यासः, आदिशब्देन पुर्यष्टकादिकं गृह्यते । एतानि कृत्वैव स्थूलात्मतोन्मेषविधायिका क्रिया कार्येत्यन्वयः । स्थूलात्मताया उन्मेष इति स्थूलावाहनं गृह्यते । तस्य विधायिका क्रिया तत्करणमित्यर्थः । इति स्थूलावाहनायाः पूर्वमेव जीवावाहनस्य काल इति द्योतितं भवति । अत्र जीवावाहने कुमार्यार्यकयोः स्वनिद्राघटयुक्तितः कुमारस्य स्वकौमारकलश[3]योगेन आर्यके स्वनिद्राकलशयोगेन च तद् जीवावाहनं स्मृतम् ॥ १७४ ॥

---

१. 'स्य पञ्चस्वस्वभू' ख. पाठः. २. 'त्का' ग. पाठः. ३. 'स्वस्य' कौ' ख. पाठः.

अस्वायमोदबुद्धहृदब्जयुक् स्वे
निध्याय निर्याप्य निजेडयास्र ।
सुषुम्नयावेश्य दशासुचित्ता-
दीद्धां चितिं हृत्कमले निदध्याद् ॥ १७५ ॥
त्रिरुव्यात्मना व्याप्य सुजप्य पञ्च-
तत्त्वानि हृत्येभिरथाखिलाङ्गे ।
संव्याप्य संसूत्र्य तदासुजात-
न्या सादिना प्राणितमादधीत ॥ १७६ ॥
प्राणं पादतलादि नोवधि ततः पृष्ठेऽन्यथापानकं
व्यानं व्याप्तमुदानमादृगुदरान्नाभेः समानं हृदि ।
वाच्यक्ष्णोर्नासि नागकूर्मकृकलाख्यान् देवदत्तं बहि-
र्व्याप्यान्तश्च धनञ्जयं न्यसतु मन्त्री स्वाङ्गुलीबीजवित् ॥

अस्वायमोदबुद्धहृदब्जयुक् प्राणायामेन विकसितं हृदयकमलयुग्मं स्वस्य देवस्य च येन स आचार्यस्तथोक्तः, स तु स्वे हृदयकमले निध्याय स्वगुरूक्तक्रमेणावलोक्य निजेडया नाड्या निर्याप्य निर्गमय्य अस्य देवस्य सुषुम्नया नाड्यावेश्य प्रवेश्य दशासुचित्तादी(डां?द्धां) दशभिः प्राणैश्चित्तादिभिः मनोबुद्ध्यादिभिर्दीप्तां चितिं चैतन्यमस्य हृत्कमले निदध्यात् स्थापयेत् । एतदावाहनस्य मन्त्रादिकं स्वगुरुमुखादेव ग्राह्यमिति नोक्तम् ॥ १७५ ॥

अथ आवाहनानन्तरं (त्र्यात्मना) प्रणवेन त्रिर्व्याप्य हृदि स्पृशन् पञ्चतत्त्वानि सुजप्याथ एभिरेवाखिलाङ्गे संव्याप्य संसूत्र्य सूत्रस्थाने न्यस्य तदा पुनः असुजातन्यासादिना प्राणन्यासादिना प्राणितं संजातप्राणमादधीत ॥ १७६ ॥

प्राणन्यासमपि किञ्चित् प्रकाशयति — **प्राणमिति** । स्वाङ्गुलीबीजवित् प्राणादीनामङ्गुलीबीजानि च जानन् मन्त्री मन्त्रांश्च जानन् प्राणं पादतलादि पदतलमारभ्य नोवधि नासिकान्तं न्यसतु । ततो नासिकाया आरभ्य पृष्ठे पृष्ठभागे अन्यथा पादतलपर्यन्तमपानकं च, व्यानं देहे व्याप्तम्, उदानमुदरादारभ्य आदृक् नेत्रपर्यन्तं, समानं नाभेरारभ्य हृदि हृत्पर्यन्तं, नागकूर्मकृकलाख्यान् क्रमेण वाच्यास्ये* ॥ १७७ ॥

* अक्ष्णोरित्यार्यशब्याख्यानमादर्शेषु नोपलभ्यते ।

न्यस्येत् पुरोऽव्यक्तपुरोगगन्ध-
मात्रान्तिकांस्त्वष्ट हृदम्बुजस्य ।
दलेष्ववाचीनमुखेषु मध्ये
शक्तिं च पुर्यष्टकसन्निविष्टाम् ॥ १७८ ॥

तन्मध्ये चिद्घनं जीवं मूलमन्त्रात्मकं न्यसेत् ।
तत्त्वान्यपि यथास्थानं मूलवर्णाङ्कान्यपि[1] ॥ १७९ ॥

अन्योन्यसम्पुटदृढा घटिताग्रहस्ता
मुद्राञ्जलिर्मुकुलिताम्बुरुहानुरूपा ।
ब्रह्माञ्जलिर्विधिवदाराचिता स्वमूर्ध्नि
सा वन्दनी स्वहृदि दक्षिणपार्श्वनम्रा ॥ १८० ॥

अव्यक्तपुरोगगन्धमात्रान्तिकाः अव्यक्तं प्रकृतितत्त्वं तदादिगन्धतन्मात्रान्तिकाः प्राणबुद्ध्यहङ्कारतत्त्वानि शब्दादितन्मात्रतत्त्वानि चाष्ट पुरः पुरीः न्यस्येत्, मध्ये कार्णिकायां पुर्यष्टकसन्निविष्टां पुर्यष्टकस्याश्रयभूतां स्वां शक्तिं च । अत्र तुशब्दः पक्षान्तरद्योतकः । तत्पक्षे अव्यक्तपुरोगगन्धमात्रान्तिका इति अव्यक्तं पुरोगतं यस्य बुद्धितत्त्वस्य तत् तथोक्तं, तत्र (सं?)-बुद्ध्यहङ्कारमनःशब्दतन्मात्रादीनि अष्टतत्त्वानि दलेषु, मध्ये शक्त्यात्मकमव्यक्तं च न्यस्येदिति ॥ १७८ ॥

तन्मध्ये शक्तेर्मध्ये चिद्घनं चैतन्यसारं जीवं जीवतत्त्वं मूलमन्त्रात्मकं मूलमन्त्ररूपदेवस्वरूपं च न्यसेत् । पुनस्तत्त्वान्यपि यथास्थानं न्यसेत् । पुनर्मूलवर्णाङ्कान्यपि न्यसेत् ॥ १७९ ॥

रहस्यभूतानां मन्त्राणामुद्धारानन्तरं तथाविधानां मुद्राणां लक्षणमाह — अन्योन्येति । अन्योन्यसंपुटदृढा परस्पराभिमुख्येन दृढबद्धा, घटिताग्रहस्ता संस्पृष्टहस्ताग्रा, मुकुलिताम्बुरुहानुरूपा मुकुलितपद्मसमाना या सा अञ्जलिर्नाम मुद्रा । स्वमूर्ध्नि विधिवत् पद्मासनस्थेन साधकेनाराचिता सैव ब्रह्माञ्जलिर्नाम मुद्रा । स्वहृदि दक्षिणपार्श्वनम्रा दक्षिणपार्श्वे नम्रा सैव वन्दनी नाम मुद्रा ॥ १८० ॥

---

१ 'मा' घ. पाठः. २ 'मन्त्राङ्ग' क. पाठः.

या वाममुष्टयुच्छ्रितपूर्वशाखाग्रहान्यमुष्टिर्लसितप्रधाना ।
सा तूर्ध्वमुद्रा शिवलिङ्गमुद्रोद्गताग्रजा दक्षिणहस्तमुष्टिः ॥

आकुञ्चिताग्राङ्गुलि हस्तयुग्ममायोज्य तर्जायुगलं प्रकल्प्य ।
स्वमध्यमापृष्ठगमग्रजाभ्यामन्तर्लिखेत् स्यादिति योनिमुद्रा॥

मध्यानामान्तराङ्गुष्ठो निर्गतो मध्यमानता ।
दक्षिणस्य तु मुष्टौ स्यान्मुद्रा वैनायकी त्वियम् ॥ १८३॥

अनामिकामध्यमिकान्तरालप्रसारिताङ्गुष्ठविशिष्टमुष्टिः ।
मुद्रा हृदि स्यात् प्रथमाग्रलग्नतर्जाग्रमुष्टिः शिरसि प्रदिष्टा ॥

वाममुष्टयुच्छ्रितपूर्वशाखाग्रहा वामकरं मुष्टीकृत्य तस्य करस्य पूर्वशाखामङ्गुष्ठशाखां गृह्णती अन्यमुष्टिर्दक्षिणमुष्टिः लसितप्रधाना उच्छ्रिता ङ्गुष्ठा यो सा तूर्ध्वमुद्रा ऊर्ध्वाख्या मुद्रा स्यात्। उद्गताग्रजा ऊर्ध्वगताग्रया ज्येष्ठया युक्ता दक्षिणहस्तमुष्टिः शिवलिङ्गमुद्रा स्यात् ॥ १८१ ॥

योनिमुद्रामाह — **आकुञ्चितेति** । आकुञ्चिताग्राङ्गुलि ईषत्कुञ्चिताङ्गुल्यग्रं हस्तयुग्ममायोज्य परस्परं योजयित्वा तर्जायुगलं तर्जनीद्वयं स्वमध्यमापृष्ठगं स्वस्वमध्यमायाः पृष्ठगतं प्रकल्प्य अर्थात् मध्यमाद्वयमृजूकृत्य **अग्रजाभ्याम्** अङ्गुष्ठाभ्याम् अन्तर्लिखेदिति योनिमुद्रा स्यात् ॥ १८२ ॥

गणपतेर्मुद्रामाह — **मध्येति** । मध्यानामान्तरा मध्यमानामिकयोरन्तरा मध्ये अङ्गुष्ठो निर्गतो दक्षिणस्य तु मुष्टौ भवेत् । तत्र मध्यमानता च भवेत् । इयं वैनायकी मुद्रा स्यात् ॥ १८३ ॥

अङ्गमुद्राः क्रमेणाह — **अनामिकेति** । अनामिकामध्यमिकान्तरालप्रसारिताङ्गुष्ठाविशिष्टमुष्टिः अनामिकामध्यमयोरन्तराले प्रसारितेनाङ्गुष्ठेन विशिष्टा मुष्टिः हृदि हृदयमुद्रा स्यात् । प्रथमाग्रलग्नतर्जाग्रमुष्टिः अङ्गुष्ठाग्रे लग्नं तर्जाग्रं यस्या मुष्टेः सा शिरसि मुद्रा प्रदिष्टा स्यात् ॥ १८४ ॥

१. 'ग्रा' इति मूलकोशपाठः.

उत्थापिताङ्गुष्ठविशिष्टमुष्टि-
मुद्रा शिखायां कवचेऽग्रदोर्भ्याम् ।
गूढाग्रिमाभ्यामभिवेष्टय गात्रं
समाहरेत् तर्जनिके स्तनान्ते ॥ १८५ ॥

नाराचमुष्टी परिवर्त्य तिर्यगायम्य मुञ्चेदियमस्त्रमुद्रा ।
भ्रूमध्यबद्धव्यवलम्बमानज्येष्ठाग्रमुष्टिः खलु नेत्रमुद्रा ॥

प्रदेशिनीमध्यमिकाग्रकाभ्यां
सानामिकाभ्यामपि वाभिमर्शः ।
स्यान्नेत्रमुद्रेति षडङ्गके तु
स्वस्वास्पदस्पर्शनमात्रमूर्ध्वम् ॥ १८७ ॥

हस्तौ परावृत्य कनिष्ठिकाद्वयं
तर्जाद्वयं च प्रकलय्य गारुडीम् ।

उत्थापिताङ्गुष्ठविशिष्टमुष्टिः ऊर्ध्वीकृतेनाङ्गुष्ठेन विशिष्टा मुष्टिः शिखायां स्यात् । गूढाग्रिमाभ्याम् अन्तर्गताङ्गुष्ठाभ्याम् अग्रदोर्भ्यां कराग्राभ्यां गात्रं शरीरमभिवेष्ट्य स्तना(न्तरेऽन्ते) स्तनमध्ये तर्जनिके तर्जनीद्वयं समाहरेत् योजयेत् । इयं कवचे भवेत् ॥ १८५ ॥

नाराचमुष्टी शरग्रहेणमुष्टिद्वयं परिवर्त्य बहिर्मुखं कृत्वा तिर्यगायम्य तिर्यक् प्रसार्य मुञ्चेत् । इयमस्त्रमुद्रा स्यात् । भ्रूमध्यबद्धव्यवलम्बमानज्येष्ठाग्रमुष्टिः भ्रूमध्ये बद्धा अधोमुखज्येष्ठाग्रयुक्ता मुष्टिः खलु आगमप्रसिद्धा नेत्रमुद्रा ॥ १८६ ॥

तत्र पक्षान्तरमाह — प्रदेशिनीति । प्रदेशिनीमध्यमिकाग्रकाभ्यां नेत्रद्वैयं चेत्, नेत्रत्रयं चेत् सानामिकाभ्याम् अनामिकासहिताभ्यां वा अभिमर्शः स्पर्शो नेत्रमुद्रा स्यात् । इति षडङ्गके मुद्राः स्युः । ऊर्ध्वं त्वष्टाङ्गादिषु स्वस्वास्पदस्पर्शनमात्रं स्वस्वस्थानस्पर्शनमात्रमेव ॥ १८७ ॥

गरुडमुद्रामाह—हस्ताविति । हस्तौ परावृत्य विमुखौ कृत्वा कनिष्ठिकाद्वयं तर्जाद्वयं चान्योन्यं प्रकलय्य बद्ध्वा अवलम्बिताग्रजाम् अधोमुखी-

---

१. 'सानिता' ख. पाठः. २. 'ह्मु' घ. च. पाठः. ३. 'गतेन् ज्ये' ग. ङ. पाठः. ४. 'द्वन्द्वं चेन्नेत्रद्वयं चेत् सा', ५. 'ङ्गकादि' ख. पाठः.

बध्नातु मुद्रामवलम्बिताग्रजां
चलत्तदन्याङ्गुलिकल्पसपत्रिकाम् ॥ १८८ ॥
अन्योन्यमाबध्य कनिष्ठिकाद्वयं
ज्येष्ठाद्वयं चाप्यथ शोषिताङ्गुलीः ।
अधोमुखीकृत्य निकुञ्चिताग्रकाः[1]
परिभ्रमय्य प्रकरोतु गालिनीम् ॥ १८९ ॥
कनिष्ठिकानामिकयोः करद्वये
प्रदेशिनीमध्यमयोर्युगं मिथः ।
व्यत्यस्तबद्धाग्रमधोमुखीकृतं
प्रकल्प्य मुद्रां प्रकरोतु सौरभीम् ॥ १९० ॥
उत्तानिताञ्जल्युदरद्वयनामिका-
मूलोल्लिखत्स्वप्रथमाभिवाहनी[2] ।
अवाङ्मुखी स्थापनिका नताञ्जलिः[3]
श्लिष्टोत्थिताङ्गुष्टयुगा स्थिराकृतिः ॥ १९१ ॥

कृताङ्गुष्टद्वयां चलत्तदन्याङ्गुलिकल्पसपत्रिकां चलद्व्यामितराङ्गुलिद्वयाभ्यां कल्पाभ्यां पक्षाभ्यां युक्तां च गारुडीं मुद्रां बध्नातु ॥ १८८ ॥

गालिनीमुद्रामाह — **अन्योन्य**मिति । करद्वयं परावृत्य कनिष्ठिकाद्वयं ज्येष्ठाद्वयं चान्योन्यमाबध्य अथ शोषिताङ्गुलीः इतराङ्गुलीः निकुञ्चिता(ग्राः?-ग्रका) वक्रीकृताग्राः अधोमुखीकृत्य परिभ्रमय्य गालिनीं मुद्रां प्रकरोतु ॥ १८९ ॥

सुरभिमुद्रामाह — **कनिष्ठिके**ति । करद्वये कनिष्ठिकानामिकयोः प्रदेशिनीमध्यमयोश्च युगं युग्मं मिथः अन्योन्यं व्यत्यस्तबद्धाग्रं व्यत्यासेन बद्धाग्रमधोमुखीकृतं प्रकल्प्य सौरभीं धेनुमुद्रां प्रकरोतु ॥ १९० ॥

आवाहन्यादिमुद्राः कथयति — **उत्तानिते**ति । उत्तानिताञ्जल्युदरद्व्यनामिकामूलोल्लिखत्स्वप्रथमा उत्तानिताया अञ्जल्या अन्तर्भागे द्वयोरनामिकयोर्मूले उल्लिखद्भ्यां स्वस्वाङ्गुष्टाभ्यां युक्ताभिवाहनी मुद्रा स्यात् । अवाङ्मुखी अधोमुखी श्लिष्टोत्थिताङ्गुष्टयुगा परस्परं श्लिष्टाभ्यामुत्थिताभ्याम् अङ्गुष्ठाभ्यां युक्ता स्थिराकृतिः निश्चलाकारा नताञ्जलिः नमिताञ्जलिः स्थापनिका मुद्रा स्यात् ॥

---

१. 'ग्रि' ख. पाठः. २. 'हि', ३. 'ङ्गु' इति मूलकोशपाठः. ४. 'ल' ख. ग. ङ. पाठः. ५. 'ल' ङ. च. पाठः.

सा सन्निधापन्युदिता नताङ्गुली[1]
श्लिष्टोभयाङ्गुष्ठपरिभ्रमोज्ज्वला ।
अवाङ्मुखाङ्गुष्ठनताङ्गुलीगणा
मुष्टिद्वयी स्यादिह सन्निरोधनी ॥ १९२ ॥
यावाहनी सार्पितपुष्पमूर्ध्वतो
ह्यवाङ्मुखीव्यापितयावकुण्ठनी ।
संयोजिता मूर्धनि धेनुमुद्रिका
सुधामुनीकृत्यभिधा समीरिता ॥ १९३ ॥
उत्तानमुष्टी त्वनुमोदनक्रमात्
प्रसारिते तिर्यगथ प्रसादनी ।
सप्तेति मुद्रा अभिवाहनादिषु
क्रमेण कार्याः कथिताः समासतः ॥ १९४ ॥
व्यत्यस्य तूपाद्ययुगं करोतु वा
निरुध्य संस्थापनमातनोतु वा ।

नताङ्गुलीश्लिष्टोभयाङ्गुष्ठपरिभ्रमोज्ज्वला नतास्वङ्गुलीषु श्लिष्टाभ्यामुभयाङ्गुष्ठाभ्यां युक्तेन परिभ्रमणेनोज्ज्वला या सा सन्निधापन्युदिता । इह अवाङ्मुखाङ्गुष्ठनताङ्गुलीगणा अधोमुखयोरङ्गुष्ठयोः नतेनाङ्गुलीसमूहेन युक्ता मुष्टिद्वयी सन्निरोधनी मुद्रा स्यात् ॥ १९२ ॥

या आवाहनी मुद्रा सैव अर्पितपुष्पं देवमूर्ध्न्यर्पितेन पुष्पेण युक्तं यथा भवति तथा ऊर्ध्वतः शिरस अरभ्य अवाङ्मुखीव्यापितया स्थिता हि अवकुण्ठनी मुद्रा स्यात् । मूर्धनि संयोजिता धेनुमुद्रिका अमृतीकृत्यभिधा मुद्रा समीरित ॥ १९३ ॥

उत्तानमुष्टी उत्तानिते मुष्टी तु अनुमोदनक्रमात् प्रीणनरीत्या तिर्यक्प्रसारिते भवतः । इयं प्रसादनी मुद्रा । इति समासतः कथिताः सप्त मुद्राः अभिवाहनादिषु क्रमेण कार्याः ॥ १९४ ॥

उपाद्ययुगं द्वितीयां तृतीयां च व्यत्यस्य विनिमय्य करोतु वा । निरुध्य निरोधनीं दर्शयित्वा संस्थापनमातनोतु संस्थापनीं दर्शयेद् वा । केचन

१. 'लि', २. 'न्तर्गताङ्गुष्ठ' ख. पाठः. ३. 'लि' ख. ङ. च. पाठः.

मुक्तामृतीकृत्यवकुण्ठनाह्वयाः
पञ्चैव मुद्राः समुशन्ति केचन ॥ १९५ ॥

कृत्वाग्रहस्तौ मणिबन्धसक्तशाखौ मिथःश्लिष्टतलद्वयौ च ।
परिभ्रमय्य प्रकरोतु चक्रमुद्रां परीताङ्गुलिदर्शितारम् ॥
प्रसारिताङ्गुष्ठकतर्जनीकशिष्टात्तमुष्टयुज्ज्वलदक्षदोष्णा ।
निगीर्णवामप्रथमा तु शङ्खमुद्रान्यशाखामुकुलीकृताग्रा ॥
स्याद् वाममुष्टिकबलीकृतदक्षिणाङ्गु-
ष्ठाग्रावसक्तपरिशेषितदक्षशाखा ।
तत्तर्जनीसमसमुच्छ्रितवामबाहु-
ज्येष्ठाग्रका निगदितेत्यपि शङ्खमुद्रा ॥ १९८ ॥

मुक्तामृतीकृत्यवकुण्ठनाह्वयाः अमृतीकृतिमवकुण्ठनीं च त्यक्त्वा पञ्चैव मुद्राः समुशन्ति ॥ १९५ ॥

आयुधमुद्राः कथयति — कृत्वेति । अग्रहस्तौ मणिबन्धसक्तशाखौ मणिबन्धस्थानयोः सक्ताभिः शाखाभिरुपलक्षितौ मिथःश्लिष्टतलद्वयौ अन्योन्यं श्लिष्टेन तलद्वयेन युक्तौ च कृत्वा परिभ्रमय्य परिभ्रमणं कारयित्वा परीताङ्गुलि-दर्शितारां परिवर्तिताभिरङ्गुलीभिः दर्शितैररैर्युक्तां चक्रमुद्रां प्रकरोतु ॥ १९६ ॥

प्रसारिताङ्गुष्ठकतर्जनीकशिष्टात्तमुष्टयुज्ज्वलदक्षदोष्णा प्रसारिताभ्यां दीर्घीकृताभ्याम् अङ्गुष्ठतर्जनीभ्यामवशिष्टाभिः अङ्गुलीभिः कृतया मुष्ट्या उज्ज्वलेन दक्षिणकरेण निगीर्णवामप्रथमा कबलीकृतेन वामाङ्गुष्ठेन युक्ता अन्य-शाखामुकुलीकृताग्रा वामहस्तस्यान्याभिः शाखाभिः मुकुलीकृतेनाग्रभागेन युक्ता शङ्खमुद्रा स्यात् ॥ १९७ ॥

शङ्खमुद्रायाः पक्षान्तरं दर्शयति — स्यादिति । वाममुष्टिकबलीकृत-दक्षिणाङ्गुष्ठाग्रावसक्तपरिशेषितदक्षशाखा वाममुष्टा कबलीकृतस्य दक्षिणाङ्गुष्ठ-स्याग्रे[3] अवसक्ताः प्रसक्ताः परिशेषिताः दक्षिणस्य शाखाः यस्याः सा तथोक्ता, तत्तर्जनीसमसमुच्छ्रितवामबाहुज्येष्ठाग्रका दक्षिणतर्जन्या समं समुच्छ्रितं वामकराङ्गुष्ठाग्रं यस्याः सापि तथोक्ता । इत्यपि शङ्खमुद्रा गुरुभिर्निगदिता स्यात् ॥ १९८ ॥

---

१ 'श्लि' ङ. ख. पाठः. २. 'भवतु वेत्यथ श' ख. पाठः. ३. 'ग्रे प्र' ख. ङ. च. पाठः.

साधोग्रकाङ्गुष्ठकसम्मुखीनश्लिष्यद्विमुष्टिप्रसृतानताग्र- ।
तन्मध्यमायुग्मकमाकलय्य प्रदर्शयेदत्र गदाख्यमुद्राम् ॥
मणिबन्धविषक्तपाणियुग्मप्रसृताष्टाङ्गुलिकल्पिताष्टपत्रा ।
प्रथमायुगक्लृप्तकर्णिकाढ्या परिदृश्या पयसीरुहात्म-द्रा ॥

तिर्यङ् निकुञ्च्य प्रहिताब्धिशाखा
परश्वधस्योन्नमितप्रधाना ।
प्रसारिताङ्गुष्ठशिरःस्थमध्या-
नामाग्रका स्याद्धरिणस्य मुद्रा ॥ २०१ ॥

बहिर्मुखोत्तम्भितपाणिशाखा मनाक्प्रकम्पाभयरूपमुद्रा ।
उत्तानपाणिप्रसृताग्रशाखा निम्नोदरा स्याद् वरदानमुद्रा ॥

गदामुद्रामाह — **साधोग्रके**ति । साधोग्रकाङ्गुष्ठकसंमुखीनाश्लिष्याद्वि-मुष्टिप्रसृतानताग्रम् अधोग्राभ्यामङ्गुष्ठाभ्यां सहितायाः सम्मुखीनायाः श्लिष्यन्त्याश्च द्विमुष्टेः प्रसृतमानताग्रं च तन्मध्यमायुग्मकं तस्य मुष्टिद्वयस्य मध्यमायुगलम् आकलय्य बद्ध्वा अत्र एतन्मुद्राबन्धनकाले गदाख्यमुद्रां प्रदर्शयेत् ॥ १९९ ॥

पद्ममुद्रामाह — **मणिबन्धे**ति । मणिबन्धविषक्तपाणियुग्मप्रसृताष्टाङ्गुलिकल्पिताष्टपत्रा मणिबन्धे विशेषेण सक्तात् पाणियुग्मात् प्रसृताभिरष्टभिरङ्गुलिभिः कल्पितैरष्टभिः पत्रैः उपेता, प्रथमायुगक्लृप्तकर्णिकाढ्या अङ्गुष्ठयुग्मेन क्लृप्तया कर्णिकया च युक्ता पयसीरुहात्ममुद्रा[1] पद्ममुद्रा परिदृश्या स्यात् ॥ २०० ॥

परशुमुद्रामाह — **तिर्यगि**ति । निकुञ्च्यं वक्रीकृत्य तिर्यक् प्रहिताब्धिशाखा तिर्यगग्रच्छन्तीभिः अङ्गुष्ठवर्जिताभिश्चतसृभिरङ्गुलीभिरुपेता, उन्नमितप्रधाना ऊर्ध्वीकृताङ्गुष्ठा च परश्वधस्य मुद्रा स्यात् । मृगमुद्रामाह —**प्रसारिते**ति । प्रसारिताङ्गुष्ठाशिरःस्थमध्यानामाग्रका प्रसारितस्याङ्गुष्ठस्य शिरःस्थं शिरसि स्थितं मध्यानामिकयोरग्रं यस्याः सा हरिणस्य मृगस्य मुद्रा स्यात् ॥ २०१ ॥

अभयमुद्रामाह — **बहिरि**ति । बहिर्मुखोत्तम्भितपाणिशाखा बहिर्मुखाभिः उत्तम्भिताभिरूर्ध्वगताभिः पाणिशाखाभिर्युता, मनाक्प्रकम्पा ईषत्कम्पयुक्ता चाभयरूपमुद्रा अभयमुद्रा स्यात् । वरदमुद्रामाह—**उत्ताने**ति । उत्ता-

---

१ 'योजये' क. घ. पाठः. २. 'निकुञ्च्य तिर्यक्प्र' इति मूलकोशपाठः. ३. 'द्रा परि' ख. पाठः. ४. 'दयमु' ङ. पाठः.

शूलस्य संस्तम्भितमध्यमा मनाक्-
प्रभुग्नतर्जोपकनिष्ठिका सती ।
मुद्रा कपालस्य कपालसङ्ग्रहा-
भिनीतिरुत्तानितपाणिना कृता ॥ २०३ ॥

मुष्टी निजे चापपृषत्कमुद्रिके
कृत्वा करौ द्वौ मुकुलीकृताग्रकौ ।
निबध्य गाढं मणिबन्धयोर्द्विधा
भ्रमेण कार्ये पविशक्तिमुद्रिके ॥ २०४ ॥

कनिष्ठिकाद्याः क्रमशः प्रधानया
चतस्र एनां निजतर्जया स्पृशन् ।
प्राणादिमुद्राः क्रमशः प्रदर्शयेत्
स्याद् ग्रासमुद्रा स्फुरदुत्पलाकृतिः ॥ २०५ ॥

क्रमात् कनिष्ठोपकनिष्ठिके स्पृशन्
प्रदेशिनीमध्यमिके च मुख्यया ।

नेति । उत्तानपाणिप्रसृताग्रशाखा ऊर्ध्वमुखपाणौ प्रसृतैः शाखाग्रैर्युता, निम्नोदरा निम्नान्तर्भागयुता वरदानमुद्रा स्यात् ॥ २०२ ॥

शूलमुद्रामाह — **शूलस्ये**ति । संस्तम्भितमध्यमा ऋज्वीकृतमध्यमा, मनाक्प्रभुग्नतर्जोपकनिष्ठिका ईषद्वक्रीकृतयोः तर्जन्यनामिकयोर्युक्ता सती शूलस्य मुद्रा स्यात् । कपालमुद्रामाह —मुद्रेति । उत्तानितपाणिना कृता कपालसंग्रहाभिनीतिः कपालग्रहणाय कृतोऽभिनयः कपालस्य मुद्रा स्यात् ॥ २०३ ॥

निजे मुष्टी धनुर्मुष्टिः शरमुष्टिश्च चापपृषत्कमुद्रिके धनुर्मुद्रा शरमुद्रा स्याताम् । मुकुलीकृताग्रकौ द्वौ करौ कृत्वा गाढं मणिबन्धयोर्निबध्य द्विधा भ्रमेण पविशक्तिमुद्रिके वज्रमुद्रा शक्तिमुद्रा च कार्ये ॥ २०४ ॥

प्राणादिमुद्राः कथयति — **कनिष्ठिकाद्या** इति । कनिष्ठिकाद्याश्चतस्रोऽङ्गुलीः क्रमशः प्रधानया, एनां प्रधानां निजतर्जया च स्पृशन् क्रमशः प्राणादिमुद्राः प्रदर्शयेत् । स्फुरदुत्पलाकृतिः विकसदुत्पलाकारा ग्रासमुद्रा स्यात् ॥ २०५ ॥

मुख्यया ज्येष्ठया क्रमात् कनिष्ठोपकनिष्ठिके, प्रदेशिनीमध्यमिके च,

अनामिकामध्यमिके च तर्जनी-
युते च ते ताश्च करोतु वाखिलाः ॥ २०६ ॥
अनामिकामग्रजया कनीयसी-
मपि स्पृशन्नग्रभवां स्वतर्जया ।
प्रधानया तर्जनिकादिकं त्रयं
करोतु तोयाद्युपहारमुद्रिकाः ॥ २०७ ॥
अनामिकामूललसत्प्रधानां निवेद्यमुद्रां प्रतनोतु दोर्भ्याम् ।
हृद्बद्धमुष्टिर्बलिमुद्रिकायस्थास्नुप्रधानोपकनिष्ठिका स्यात् ॥
भूषायुधान्तेऽञ्जलिवन्दनीभ्या-
मूर्ध्वा हरौ शूलिनि लिङ्गसंज्ञा ।
योन्याह्वया सुम्भजिति द्विपास्ये
वैघ्न्यञ्जलिर्वा कथितैषु मुद्रा ॥ २०९ ॥

अनामिकामध्यमिके च, तर्जनीयुते ते च तर्जनीमध्यमानामिकाश्च, ताः यतस्तोऽङ्गुलीश्च स्पृशन् ताः अखिलाः प्राणादिमुद्राः करोतु वा ॥ २०६ ॥

षडुपहारमुद्राः कथयति — **अग्रजया** अनामिकां कनीयसीमपि, स्वतर्जया अग्रभवां, पुनः प्रधानया तर्जनिकादिकं त्रयं तर्जनीमध्यमानामिकाः स्पृशन् क्रमात् तोयाद्युपहारमुद्रिकाः जलगन्धपुष्पधूपदीपनिवेद्यमुद्राः करोतु ॥ २०७ ॥

निवेद्यकालस्थां निवेद्यमुद्रामाह — **अनामिके**ति । दोर्भ्याम् अनामिकामूललसत्प्रधानाम् अनामिकयोर्मूले शोभमानां प्रधानां निवेद्यमुद्रां प्रतनोतु । बलिमुद्रामाह — हृद्बद्धेति । अग्रस्थास्नुप्रधानोपकनिष्ठिका मुष्टेरग्रभागस्थाभ्यां प्रधानोपकनिष्ठिकाभ्यां युक्ता हृद्बद्धमुष्टिः हृदये बद्धा दक्षिणमुष्टिः बलिमुद्रिका स्यात् ॥ २०८ ॥

अञ्जल्यादिप्रधानमुद्राणां दर्शनकालमाह — **भूषायुधान्त** इति । भूषायुधान्ते भूषणायुधन्यासानामन्ते अञ्जलिवन्दनीभ्यां सह हरौ ऊर्ध्वा मुद्रा स्यात् । शूलिनि लिङ्गसंज्ञा, सुम्भजिति योन्याह्वया, द्विपास्ये वैघ्नी, एषु सर्वेष्वप्यञ्जलिर्वा मुद्रा स्यात ॥ २०९ ॥

रात्वावाहनतः परं समधुपर्कादावृतिस्फूर्तित-
आचामावधिकं पुरः स्नपनतोऽन्ते वस्त्रभूषाविधेः।
प्राङ् नैवेद्यविधेः परं त्रयमिदं गण्डूषतोऽर्घ्यं प्रसा-
दान्ते प्राक् च विसर्जनात् प्रतिसपर्यं वारि चाद्यन्तयोः॥
स्नानानि पञ्चामृतपञ्चगव्य-
मृत्क्काथकोष्णोदकगन्धवार्भिः।
तार्थाद्भिरष्टौ कलशाम्बुभिश्च
कुर्वीत सावान्तरशुद्धतोयैः॥ २११॥
गुरुभ्यइदमेवमादिपदपूर्वकेणाणुना
करोतु कुसुमाञ्जलिं गुरुपितृस्वमात्रात्मनः।
सहोदरकुटुम्बिनीतनयवंश्यसाध्यांस्तथा
महीतलसमाश्रितांस्त्रिभुवनाश्रितांश्चोद्दिशन्॥ २१२॥

अर्घ्यादिक्लृप्त्या वा पाद्यादिक्लृप्त्या वोपहारदानस्य कालनियममाह — रात्विति। आवाहनतः परम् आवाह्य सकलीकरणान्ते आचामावधिकम् अर्घ्यपाद्याचमनीयक्रमेण वा पाद्यार्घ्याचमनीयक्रमेण वा इदं त्रयं रातु ददातु। समधुपर्कात मधुपर्कद्रव्ययुक्तादुपहारदानात् परम्, आवृतिस्फूर्तितः आवरणस्फुरणात् परं, स्नपनतः स्नपनकर्मणः पुरः पूर्वं, वस्त्रभूषाविधेः वस्त्रविधेर्भूषणविधेरन्ते, नैवेद्यविधेः प्राक्, गण्डूषतः परं च इदं त्रयं रातु। प्रसादान्ते प्रसन्नपूजानन्तरं विसर्जनात् उद्वासनात् प्राक् चार्घ्यं रातु। प्रतिसपर्यम् उपहारसमर्पणे[1] आद्यन्तयोः वारि जलं च रातु॥ २१०॥

स्नानक्लृप्तिमाह — स्नानानीति। पञ्चामृतपञ्चगव्यमृत्क्काथकोष्णोदकगन्धवार्भिः तीर्थाद्भिः कलशाम्बुभिश्च पञ्चामृतादिकलशजलान्तैः अष्टौ स्नानानि सावान्तरशुद्धतोयैः मध्ये मध्ये शुद्धजलसहितैः कुर्वीत॥ २११॥

प्रसन्नपूजाकाले साध्यपुष्पाञ्जलिक्रममाह — गुरुभ्य इति। गुरुभ्य इदमेवमादिपदपूर्वकेणाणुना 'गुरुभ्य इदं ओं नमो नारायणाय' इत्यादिना मन्त्रेण कुसुमाञ्जलिं पूर्णपुष्पाञ्जलिं त्रिशस्त्रिशः करोतु। गुरुपितृस्वमात्रात्मनः उद्दिशन् गुर्वादीनां तत्फलप्राप्तिं स्मरन् 'गुरुभ्य इदं' 'पितृभ्य इदं' 'मातृभ्य इदम्' 'अस्मभ्यमिदं', सहोदरकुटुम्बिनीतनयवंश्यसाध्यान् 'भ्रातृभ्य इदं,

१. 'णाद्य' ख. ङ. च. पाठः.

आवाह्याग्रगते स्वमूलमनुबिम्बात् कर्मबिम्बे निजै-
रभ्यर्च्यावरणैर्युतं विधिवदत्रोद्वासयेच्चान्ततः।
एवं स्याद् बहुबेरनित्यवरिवस्यावाहनोद्वासना-
हीनोऽर्चाविधिरेकबेरविषये न्यूनावृतिश्च क्वचित् ॥

भक्त्यैतद्विधिनाजितं यजतु चाक्षीणश्रियै मुक्तये
तत्तन्त्रप्रवरासयेह जगदीशं कृत्स्नविच्चर्चया।
शर्वं सद्वितयश्रियं गजमुखं वातश्च भूयस्तरा-
राध्यां सुम्भरिपुं तथार्यशरजं येन क्रियार्थोत्तरा ॥२१४॥

पत्नीभ्य इदं' 'पुत्रेभ्य इदम्' 'अस्मद्वंशभूतेभ्य इदं' 'साध्येभ्य इदं', महीतलसमाश्रितान् 'पृथिवीवासिभ्य इदं', त्रिभुवनाश्रितांश्च 'त्रिभुवनवासिभ्य इदम् ओं नमो नारायणाय' इत्यादिमन्त्रैरित्यर्थः ॥ २१२ ॥

बहुबेर एकबेरे च पूजाक्लृप्तिमाह — आवाह्येति । बहुबेरविषये अर्चितपीठे कल्पितमूर्तावग्रगते कर्मबिम्बे स्वमूलमनुबिम्बात् यथोक्तप्रकारेणावाह्य निजैरावरणैर्युतं विधिवदभ्यर्च्यान्ततोऽत्र मूलबिम्ब उद्वासयेत् । एवं बहुबेरनित्यवरिवस्या बहुबेरविषये नित्यपूजा स्यात् । एकबेरविषये अर्चाविधिः पूजाविधिः आवाहनोद्वासनाहीनः स्यात् । क्वचित्पक्षे न्यूनावृतिश्च आवरणैर्विनैव स्यात् ॥ २१३ ॥

अभिहितमेतत्तन्त्रसमुच्चयमुपसंहरति —भक्त्येति । इह पूजायोग्ये काले पूजायोग्ये बिम्बादिविषये च कृत्स्नवित् तन्त्रागमानां कात्स्न्र्येन तात्पर्यज्ञः पूजकः एतद्विधिना अत्रोक्तविधानेन तत्तन्त्रप्रवरासया तस्य तस्य देवस्य तन्त्रागमेभ्यो गृहीतया चर्चया पूजया जगदीशम् अजितं विष्णुं वा, शर्वं शिवं वा, सद्वितयश्रियं वैष्णव्या शैव्या च श्रिया सहितं शिवनारायणं वा, गजमुखं गणपतिं वा, अतोऽन्यां भूयस्तराराध्यां पुनः पुनरा॒राधनार्हां सुम्भरिपुं दुर्गां वा, तथा आर्यशरजं तद्वदेव शास्तारं वा स्कन्दं वा, भक्त्या सह यजतु । भक्तिरेव पूजायां प्रधानं साधनम् । तदुक्तमुपहारप्रकाशिकायां —

---

१. 'श्रि' ख. पाठः. २. 'ध्यं' ख. ग. पाठः. ३ · 'रा ॥ इति विधिमधिगम्य क्षेत्रसंस्कारपूर्वं परमपि सुविशुद्धं हृद्यमापाद्य तत्स्थम् । परमपुरुषमेकं श्रद्धयाराधयाद् यः स हि पुरुषधुरीणः स्यात् समग्रोन्मिषच्छ्रीः ॥' क. ख. पाठः. ४· 'र्घां' ङ. पाठः.

कल्यब्देष्वातियत्नं नन्दनयनेष्वम्भोधिसङ्ख्येषु यः
सम्भूतो भृगुवीतहव्यमुनियुङ्मूले सवेदोन्वये ।

"स्नेहविश्वाससम्मानभक्तिज्ञानजलादिना"

इति । भगवद्गीतायां च —

"पत्रं पुष्पं फलं तोयं यो मे भक्त्या प्रयच्छति ।
तदहं भक्त्युपहृतमश्नामि प्रयतात्मनः ॥"

इति । किमर्थमिज्यत इत्यत्राह — अक्षीणश्रियै इति । प्रभूताय ऐहिकफलाय, मुक्तये मोक्षाय च । येन विधिना क्रिया पूजा अर्थोत्तरा सफला भवति । तेन विधिनेति पूर्वत्र संबन्धः । अयं श्लोको ग्रन्थकृता चक्ररूपतया लेखनीयत्वेन विवक्षितः । तत्र समे स्थले वृत्तं विलिख्य तदन्तरेकैकाक्षरलेखनप्रदेशमात्रं व्यतीत्यापि वृत्तं विलिख्य, तत्र वृत्तद्वयवति स्थले समान्तरालानि त्रीणि पुटानि द्विद्विसूत्रास्फालनाद् बाह्यवृत्तादारभ्य तदन्तानि अन्योन्यं मध्यतः संसक्तानि कृत्वाक्षराणि लिखेत् । तत्र दण्डाकारेषु पुटत्रयेषु प्रादक्षिण्यक्रमेण श्लोकस्य पादत्रयंमूलत आरभ्याग्रपर्यन्तं लेखने तत्र दशममक्षरं जकारः पुटत्रयेऽपि समानं मध्ये यथा भवति तथा 'भक्त्यैतदि'त्यारभ्य एकोनविंशत्यक्षरान् त्रीन् पादान् विलिख्य चतुर्थं पादं 'राध्यां सुम्भरिपुमि'त्यादिकं तृतीयपदान्त्यगतमेवाक्षरं पुनरप्यारभ्य षट्सु पुटान्तरालेषु द्विद्व्यक्षराणि च विलिख्य वाचयेत् । तत्र पुटान्तरालस्थैः द्वादशभिरक्षरैः पुटस्थैः षड्भिरक्षरैः सहाष्टादशाक्षरावसानेऽन्त्यगतं 'रा' इत्यक्षरमपि वाचयित्वा पादं पूरयेत् । तत्र पुटषट्केऽपि तृतीयतृतीयाक्षरवाचने 'तन्त्रसमुच्चय' इति ग्रन्थस्य नामोक्तं भवति । षष्ठषष्ठाक्षरवाचने 'नारायणकृत' इति ग्रन्थकर्तुः स्वस्य नामाप्युक्तं भवतीति ॥ २१४ ॥

ग्रन्थकृत् स्वस्य लोकप्रसिद्ध्यर्थं गृहगोत्रनामान्यपि अस्मिन् ग्रन्थे निबध्नाति — कल्यब्देष्विति । नन्दा नव, नयने द्वे, इषवः पञ्च, अम्भोधयश्चत्वारः[1] । एकस्थानदशस्थानशतस्थानसहस्रस्थानेषु क्रमेण स्थिता नन्दाद्याः संख्या येषु कल्यब्देषु, कल्यब्दाः कलेरब्दाः संवत्सराः तेषु संवत्सरेषु, अतियत्सु अतिक्रम्य गच्छत्सु कालावयवेषु यः पुमान् भृगुवीतहव्यमुनियुङ्मूले

१. 'यं' घ. ङ. च. पाठः. २, ३. 'मि' ख. ङ. च. पाठः. ४. 'रः षड्भिरक्षरैरेक' ख. ग. पाठः.

प्राहुर्यस्य जयन्तमङ्गलपदेद्धं[1] धाम नारायणः
सोऽयं तन्त्रमिदं व्यधाद् बहुविधादुद्धृत्य तन्त्रार्णवात् ॥
सेयं कृतिस्तन्त्ररहस्यदब्धा
रक्ष्या मुहुर्मूर्खमुखप्रपातात् ।
आचार्यवर्यैरियमेव शश्वद्
विश्वेश्वरेज्यास्मदनुष्ठितास्तु[2] ॥ २१६ ॥

भृगुर्वीतहव्य इत्यृषिद्वयमूलभूते सवेदोन्वये सवेदा इति कश्चिदृषिः तस्यान्वये वंशे । भृगोः पुत्रो वीतहव्यः, तस्य पुत्रः सवेदाः, तस्यान्वये इति स्वस्य प्रवरोऽप्युक्तो भवति । तस्मिन् वंशे यः सम्भूतः, यस्य पुनः जयन्तमङ्गलपदेद्धं 'जयन्तमङ्गलम्' इति पदेन प्रकाशितं धाम गृहं भवति, सोऽयं नारायणः 'नारायण' इति लोके प्रसिद्धः इदं तन्त्रं बहुविधात् तन्त्रार्णवात् । तन्त्राणां बाहुल्यात् समुद्रकल्पत्वं द्योत्यते । तस्मादमृतमिवोद्धृत्य तन्त्रसमुच्चयाख्यं ग्रन्थं व्यधात् कृतवानित्यर्थः ॥ २१५ ॥

एतद्ग्रन्थकरणमपि विश्वेश्वरपूजा भवत्विति प्रार्थयन् ग्रन्थं समापयति —**सेयमिति**। सेयं कृतिः ममेयं ग्रन्थकरणक्रिया तन्त्ररहस्यदब्धा तन्त्ररहस्यभूतैरर्थैः परिपूर्णा, अत एवाचार्यवर्यैः मूर्खमुखप्रपातान्मुहुः पुनः पुनरपि रक्ष्या । मूर्खास्तु यत्किञ्चिदेव ज्ञात्वा यत्किञ्चिदेव कुर्वन्ति। तस्मात् परमपुरुषवरिवस्याया हानिर्भवति । अतः सर्वप्रयत्नेन तेभ्यो रक्षणीयेत्यर्थः । (इयमेव) शश्वदनवरतम् अस्मदनुष्ठिता अस्माभिरनुष्ठिता विश्वेश्वरेज्या विश्वेश्वरस्य परमपुरुषस्य पूजास्तु भवतु । 'तं देवं नित्यं समाराध्नुयामि'त्युपक्रमे देवस्य नित्यपूजाप्रार्थनाद्, अन्ते 'विश्वेश्वरपूजास्त्विति उपसंहाराच्च, मध्ये पुनर्देवस्य नित्यपूजाप्रतिबिम्बप्रतिष्ठाकर्माङ्गतया गुरुवरणादिप्रतिष्ठापर्यन्तैः कर्मभिस्तत्साधनप्रकाशनात्, तदन्ते पूजाविधानात्, तच्छेषतया कलशादेः प्रकटनाच्च अस्मिन् ग्रन्थे सर्वोऽप्यर्थो विश्वेश्वरपूजातत्परतयैव प्रतिपादितः । अवसाने विशेषेण ग्रन्थकरणप्रयत्नोऽपि तस्य पूजास्त्वित्याचार्यस्याभिमतमिति जानन्तु विद्वांसः ॥ २१६ ॥

[1] 'दाढ्यं धा', २. 'दुपार्जिता' ख. ग. पाठः,

इति तन्त्रसमुच्चये श्रुतार्चा-
क्रमगुप्त्यै रविजन्मसम्प्रणीते ।
पटलः परिशिष्टकर्मवादी
दशमोऽभूद् द्विपुरस्सरः समाप्तः ॥ २१७ ॥

इति तन्त्रसमुच्चये द्वादशः पटलः ।

पटलमुपसंहरति— इतीति । इति तन्त्रसमुच्चये ग्रन्थे द्विपुरस्सरो द्वीति पदपुरोगतो दशमः द्वादशः पटलः समाप्तोऽभूत् । कथंभूते, श्रुतार्चाक्रमगुप्त्यै श्रुतस्य पूजाक्रमस्य रक्षायै रविजन्मसंप्रणीते रविपुत्रेण नारायणेन कृते । परिशिष्टकर्मवादी सर्वपटलेष्वपि परिशिष्टानां कर्मणां वदनस्वभावः पटलः समाप्त इत्यर्थः ॥ २१७ ॥

यस्य हि तन्त्रसमुच्चयरचनालोके समुत्थिता कीर्त्तिः ।
तत्पुत्रेण कृतेयं शङ्करनाम्ना विमर्शिनी व्याख्या ॥

इति तन्त्रसमुच्चयविमर्शिन्यां
द्वादशः पटलः ।


समाप्तोऽयं ग्रन्थः ।

शुभं भूयात् ।

---

१. 'समस्तागमसारैकनिधौ सुधीमुगाह । पटलः पारशेषकर्मरम्यो द' ख. पाठः.

३१६-पृष्ठे प्रदर्शितस्य चक्रबन्धस्याकारः.



भक्त्यैतद्विधिनाजितं यजतु चाक्षीणश्रियै मुक्तये
तत्तन्त्रप्रवरास्पदेह जगदीशं कृत्स्नविच्चर्चया ।
शर्वं सद्वितयश्रियं गजमुखं वातश्च भूयस्तरा-
राध्यां सुंभरिपुं तथार्यशरजं येन क्रियार्थोत्तरा ॥

READY FOR SALE.

	RS.	AS.	P.
भक्तिमञ्जरी (Stuti) by H. H. Svâti Srî Râma Varma Mahârâjah.	1	0	0
स्यानन्दूरपुरवर्णनप्रबन्धः (Kavya) Syânandûrapuravarnanaprabandha by H. H. Swâti Srî Râma Varma Mahârâja, with the commentary Sundari of Râjarâja Varma Koil Tampurân.	2	0	0

Trivandrum Sanskrit Series.

No. 1—दैवम् (Vyâkarana) by Deva with Purushakâra of Krishnalilâsukamuni.	1	0	0
No. 2—अभिनवकौस्तुभमाला-दक्षिणामूर्तिस्तवौ by Krishnalilâsukamuni.	0	2	0
No. 3—नलाभ्युदयः (Kâvya) by Vâmana Bhatta Bâna (Second Edition).	0	4	0
No. 4—शिवलीलार्णवः (Kâvya) by Nilakantha Dîkshita.	2	0	0
No. 5—व्यक्तिविवेकः (Alankâra) by Mahima Bhatta with commentary.	2	12	0
No. 6—दुर्घटवृत्तिः (Vyâkarana) by Saranadeva.	2	0	0
No. 7—ब्रह्मतत्त्वप्रकाशिका (Vedânta) by Sadâsivendra Sarasvati	2	4	0
No. 8—प्रद्युम्नाभ्युदयम् (Nâtaka) by Ravi Varma Bhûpa.	1	0	0
No. 9—विरूपाक्षपञ्चाशिका (Vedânta) by Virûpâkshanâtha with the commentary of Vidyâchakravartin.	0	8	0
No. 10—मातङ्गलीला (Gajalakshana) by Nilakantha.	0	8	0
No. 11—तपतीसंवरणम् (Nâtaka) by Kulasekhara Varma with the commentary of Sivarâma	2	4	0
No. 12—परमार्थसारम् (Vedânta) by Bhagavad Âdisesha with the commentary of Râghavânanda.	0	8	0
No. 13—सुभद्राधनञ्जयम् (Nâtaka) by Kulasekhara Varma with the commentary of Sivarâma	2	0	0

	RS.	AS.	P.
No. 14—नीतिसारः (Niti) by Kâmandaka, with the commentary of Sankarârya.	3	8	0
No. 15—स्वप्नवासवदत्तम् (Nâtaka) by Bhâsa. (Second Edition).	1	8	0
No. 16—प्रतिज्ञायौगन्धरायणम् (Nâtaka) by Bhâsa.	1	8	0
No. 17—पञ्चरात्रम् Do. Do.	1	0	0
No. 18—नारायणीयम् (Stuti) by Nârâyana Bhatta with the commentary of Desamangala Vârya.	4	0	0
No. 19—मानमेयोदयः (Mimâmsâ) by Nârâyana Bhatta and Nârâyana Pandita.	1	4	0
No. 20—अविमारकम् (Nâtaka) by Bhâsa.	1	8	0
No. 21—बालचरितम् Do. Do.	1	0	0
No. 22—मध्यमव्यायोग-दूतवाक्य-दूतघटोत्कच-कर्णभारोरुभङ्गानि (Nâtaka) by Bhâsa.	1	8	0
No. 23—नानार्थार्णवसंक्षेपः (Kosa) by Kesavaswâmin (Part I. 1st & 2nd Kândas).	1	12	0
No. 24—जानकीपरिणयः (Kâvya) by Chakrakavi.	1	0	0
No. 25—काणादसिद्धान्तचन्द्रिका (Nyâya) by Gangâdharasûri.	0	12	0
No. 26—अभिषेकनाटकम् (Nâtaka) by Bhâsa.	0	12	0
No. 27—कुमारसम्भवः (Kâvya) by Kâlidâsa with the two commentaries, Prakâsikâ of Arunagirinâtha and Vivarana of Nârâyana Pandita (Part I. 1st & 2nd Sargas).	1	12	0
No. 28—वैखानसधर्मप्रश्नः (Dharmasûtra) by Vikhanas.	0	8	0
No. 29—नानार्थार्णवसंक्षेपः (Kosa) by Kesavaswâmin (Part II. 3rd Kânda).	2	4	0
No. 30—वास्तुविद्या (Silpa).	0	12	0
No. 31—नानार्थार्णवसंक्षेपः (Kosa) by Kesavaswâmin (Part III. 4th, 5th & 6th Kândas).	1	0	0

	RS.	AS.	P.
No. 32—कुमारसम्भवः (Kâvya) by Kâlidâsa with the two commentaries, Prakâsikâ of Arunagirinâtha and Vivarana of Nârâyana Pandita (Part II, 3rd, 4th & 5th Sargas)	2	8	0
No. 33—वाः चसंग्रहः (Vyâkarana) with the commentary Dîpaprabhâ of Nârâyana.	0	8	0
No. 34—मणिदर्पणः (शब्दपरिच्छेदः) (Nyâya) by Râjachûdâmanimakhin.	1	4	0
No. 35—मणिसारः (अनुमानखण्डः) (Nyâya) by Gopînâtha.	1	8	0
No. 36—कुमारसम्भवः (Kâvya) by Kâlidâsa with the two commentaries, Prakâsikâ of Arunagirinâtha and Vivarana of Nârâyana Pandita (Part III. 6th, 7th & 8th Sargas).	3	0	0
No. 37—आशौचाष्टकम् (Smriti) by Vararuchi with commentary.	0	4	0
No. 38—नामलिङ्गानुशासनम् (Kosa) by Amarasimha with the commentary Tikâsarvasva of Vandyaghatiya Sarvânanda (Part I. 1st Kânda).	2	0	0
No. 39—चारुदत्तम् (Nâtaka) by Bhâsa.	0	12	0
No. 40—अलङ्कारसूत्रम् (Alankâra) by Râjânaka Srî Ruyyaka with the Alankârasarvaswa of Sri Mankhuka and its commentary by Samudrabandha.	2	8	0
No. 41—अध्यात्मपटलम् (Kalpa) by Âpastamba with Vivarana of Srî Sankara Bhagavat Pâda.	0	4	0
No. 42—प्रतिमानाटकम् (Nâtaka) by Bhâsa.	1	8	0
No. 43—नामलिङ्गानुशासनम् (Kosa) by Amarasimha with the two commentaries, Amarakosodghâtana of Kshîraswamin and Tikâsarvaswa of Vandyaghatiya Sarvânanda (Part II. 2nd Kânda 1—6 Vargas).	2	8	0

	RS.	AS.	P.
No. 44—तन्त्रशुद्धम् (Tantra) by Bhattâraka Sri Vedottama.	0	4	0
No. 45—प्रपञ्चहृदयम् (Prapanchahridaya).	1	0	0
No. 46—परिभाषावृत्तिः (Vyâkarana) by Nilakantha Dîkshita.	0	8	0
No. 47—सिद्धान्तसिद्धाञ्जनम् (Vedânta) by Sri Krishnânanda Sarasvati. (Part I.)	1	12	0
No. 48— Do. Do. (Part II.)	2	0	0
No. 49—गोलदीपिका (Jyotisha) by Parameswara.	0	4	0
No. 50—रसार्णवसुधाकरः (Alankâra) by Singa Bhûpâla.	3	0	0
No. 51—नामलिङ्गानुशासनम् (Kosa) by Amarasimha with the two commentaries, Amarakosodghâtana of Kshiraswâmin and Tikâsarvaswa of Vandyaghatiya Sarvânanda (Part III. 2nd Kânda 7 10 Vargas)	2	0	0
No. 52—नामलिङ्गानुशासनम् (Kosa) by Amarasimha with the commentary Tikâsarvaswa of Vandyaghatiya Sarvânanda (Part IV. 3rd Kânda)	1	8	0
No. 53—शाब्दनिर्णयः (Vedânta) by Prakâsâtmayatindra	0	12	0
No. 54—स्फोटसिद्धिन्यायविचारः (Vyâkarana)	0	4	0
No. 55—मत्तविलासप्रहसनम् (Nâtaka) by Sri Mahendravikramavarman.	0	8	0
No. 56—मनुष्यालयचन्द्रिका (Silpa).	0	8	0
No. 57—रघुवीरचरितम् (Kâvya).	1	4	0
No. 58—सिद्धान्तसिद्धाञ्जनम् (Vedânta) by Sri Krishnânanda Saraswatî (Part III.)	2	0	0
No. 59—नागानन्दम् (Nâtaka) by Srîharshadeva with the commentary Nâgânandavimarsinî of Sivarâma.	3	4	0
No. 60—लघुस्तुतिः (Stuti) by Sri Laghubhattâraka with the commentary of Sri Râghavânanda	0	8	0

	Rs.	As.	P.
No. 61—सिद्धान्तसिद्धाञ्जनम् (Vedanta) by Srî Krishnânanda Sarasvati (Part IV.)	1	8	0
No. 62—सर्वमतसंग्रहः (Sarvamatasangraha)	0	8	0
No. 63—किरातार्जुनीयम् (Kâvya) by Bharavi with the commentary Sabdârthadipika of Chitrabhanu (1, 2 and 3 Sargas).	2	8	0
No. 64—मेघसन्देशः (Kâvya) by Kâlidasa with the commentary Pradîpa of Dakshinâvartanatha.	1	0	0
No. 65—मयमतम् (Silpa) by Mayamuni.	3	8	0
No. 66— महार्थमञ्जरी (Darsana) with the commentary Parimala of Maheswarânanda.	2	8	0
No. 67—तन्त्रसमुच्चयः (Tantra) by Nârâyana with the commentary Vimarsini of Sankara. (Part I. 1–6 Patalas)	3	4	0
No. 68—तत्त्वप्रकाशः (Agama) by Srî Bhojadeva with the Commentary Tâtparyadîpikâ of Srî Kumara.	2	0	0
No. 69—ईशानशिवगुरुदेवपद्धतिः (Tantra) by Isânasivagurudevapaddhati (Part I. Sâmanyapâda).	1	8	0
No. 70—आर्यमञ्जुश्रीमूलकल्पः (Part I).	2	8	0
No. 71— तन्त्रसमुच्चयः (Tantra) by Narayana with the commentary Vimarsini of Sankara (Part II. 6—12 Patalas)	3	8	0

Apply to:—


The Agent for the sale of

Government Sanskrit Publications,

Trivandrum.

DATE OF ISSUE

This book must be returned within 3, 7, 14 days of its issue. A fine of ONE ANNA per day will be charged if the book is overdue.



Class No 5294.5 Book No. N62TT
Vol. 2

Author: NARAIN

Title TANTRASAMUCHYA

Acc. No. 16530